BHAVABHUTI'S

UTTARA-CHARITAM

BY

SARADARANJAN RAY, M. A.

Vidyavinode, Siddhanta-Vachaspati,

Late Principal, Vidyasagar College.

Rs. 12·50

BHAVABHUTI'S

UTTARACHARITAM

WITH

Sanskrit Commentary, English Translation,

Critical and Explanatory Notes

AND

Introduction

BY

SARADARANJAN RAY, M. A.

Vidyavinode, Siddhanta-Vachaspati

Late Principal, Vidyasagar College.

Seventh Edition.

Revised and enlarged

BY

Kumudranjan Ray M. A. PH. D, Bhishagacharyya.

Author of Meghadutam, Kirat, Manu, Gita, Siddhanta Kaumudi, Sahitya darpona, Nirukta, Mahabhashya, Upanishads etc.

Opinions

Professor A. Berriedale Keith, Edinburgh University, Says :—

"...I have looked through your book in order to see whether there are any suggestion which I could usefully make it to secure greater adaptation to its purpose. It seems, however, that the mode in which the work is performed is well adapted for its purpose, and I note with satisfaction the effort to render the text into effective English. The explanation seems well adapted to secure comprehension of the text, and certain new renderings deserve serious consideration."

Prof. E. J. Rapson, Cambridge University, says :—

"...I have read with great pleasure and interest. The commentary and notes are admirably clear,"

Preface

In this volume the text is based mainly upon the late Pandit Vidyasagara's edition, though occasionally I have adopted readings from (i) Vidyasagara's extracts from his four manuscripts and (ii) the Bombay edition of Viraraghava.

While preparing the translation, I have derived much help from the late Principal Tawney's precious little book. I am sorry Dr. Belvalkar's translation came in too late to be of much use in the earlier Acts, but it has saved me much trouble from the middle of Act V to the end.

The commentary is my own. In its preparation I have often made occasion to consult Viraraghava, Vidyasagara, Goswami &c. I have, however, often ventured to differ from my predecessors This has happened so often, that for sheer economy of space to keep down the price of the book, I do not say so (except in a few places) when I have a new explanation to offer. But I am sure the intelligent reader will be able to detect the omission at a glance.

For convenience of reference, the text has been divided into paragraphs. Where a paragraph ends in the middle of a speech the initials of the speaker are given both at the end of the para and at the beginning of the next para.

My thanksare due to Pandit Kalikrishna Bhatta˙charyya Pandit Sudhakara, Senior Professor of Sanskrit, Vidyasagar College, for correction of proof-sheets , and to Professor Amulyacharan Vidyabhushana, Senior Professor of Pali, Vidyasagar College, for hunting up certain references for me.

I shall be much obliged if my readers will kindly draw my attention to errors and imperfections with a view to correction in the next edition.

CALCUTTA,
September, 1924.

SARADARANJAN RAY

Seventh revised and enlarged Edition on 1966—K. Ray.

Dedicated

To the ever-green memory of the late lamented **Sir Ashutosh Mukhopadhyaya**, The hero of a hundred deeds with whom have departed the glory of Bengal and the pride of the Bengalis

INTRODUCTION

[*N B.*—In the Summer of 1923, I read at the University Institute an essay in Bengali on the "Fame of Bhavabhuti". The late lamented Sir Asutosh Mukhopadhayaya felt interested to such an extent that he wanted to forward, for an expression of opinion, a copy of the essay to Dr Winternitz who was then at Bolepur and he asked me to translate it into English. The translation was begun but at its very commencement I was laid up for nearly two months with a severe attack of Pleurisy. The malady left me prostrate. As soon as I recovered a little, I got Influenza and was down with it for nearly a month.

For these reasons I could not resume the work of translation during the life-time of my honoured friend. Lately on taking up the work again I found reasons for extensive additions and alterations. I have now, however, the melancholy satisfactian of having finished the task, set on me by the illustrious dead. The translation now appears as *Introduction* to this volume.]

1. The Uttaracharita.

One of the most popular of Sanskrit dramatists is Bhavabhuti. He is better known as the author of the Uttaracharita.

The Uttaracharita is usually considered by competent critics to be one of the best written of Sanskrit dramas. It is in seven Acts and is based on the later history of Rama, commencing with his coronation after return from Lanka.

(i) The first Act tells us that soon after the coronation, people commence talking recklessly of Sita with reference to her stay in the house of Ravana. The news reaches Rama's ears and the king banishes his queen.

(ii) The second Act opens with incidents that happen after a lapse of twelve years.

Rama commences the Asvamedha sacrifice. While preparations are going on for the sacrifice he is obliged to go out personally in quest of a certain Sudra ascetic practising penance in the forest of Dandaka. At the sight of the place old associations wake up and thoroughly overwhelm the king.

This Act and the Acts that follow, describe events that take place within a day or two of one another

(iii) In the third Act we learn that Sita is still alive though practically dead to the world. Delivered of twins (named Kusa and Lava) on the day of her banishment she has been staying in the nether regions these twelve years, with Prithvi and Ganga. The boys were made over to Valmiki by Ganga herself for their training and education.

Ganga knew that on his way back after meeting the Sudra ascetic Rama would have to pass over the Panchavati the sight of which was bound to recall extremely

painful memories. To relieve the shock she came over with Sita to meet Godavari. From there she sent Sita to gather flowers—a mere pretext—from the Panchavati, making her invisible to mortals

As expected Rama entors the Panchavati, meets Sita there feels her presence, but being unable so see her takes all this as a delusion and with a heavy heart hastens towards his capital to get ready for the Asvamedha.

(iv) Here commences the fourth Act. The sacrificial horse wanders into Valmiki's hermitage and is seized by Lava.

(v) In the fifth Act, Chandraketu Lakshman's son, the guardian of the horse meets Lava and forthwith the boys are attracted towards each other and become friends. Lava however, makes certain remarks regarding Rama and a regular fight follows.

(vi) The sixth Act introduces Rama again who notices the battle from the Puspaka, his aerial car, while proceeding towards his capital comes down and prohibits the fight. Lava is then introduced to Rama by Chandraketu Next Kusa arrives and is introduced by Lava Hovering between hope and despair, Rama notices the startling resemblance of the features of the boys with his own and those of Sita.

(vii) Forthwith, in the seventh Act, Valmiki comes to the rescue of the bewildered monarch. The sage invites the whole creation to witness the staging, by celestial nymphs under the guidance of the sage Bharata, of a certain drama written by himself on the later history

of Rama. Lakshman prepares a theatre and seats the audience. Rama himself is present at the performance.

The performance discloses that Sita was delivered of twins on the very day of her exile and is still alive in Patala under the care of Prithvi and Bhagirathi. Her boys are with the sage Valmiki. All see that they are no other than Kusa and Lava.

The nymphs now retire, the acting ceases, and Valmiki appears personally. He arranges for a declaration of Sita's innocence and at his command Sita herself emerges out of the waters of the Ganga, led by Prithvi and Ganga. Arundhati now delivers a well-merited snub to the people of Ayodhya and the villages and asks Rama to take back his spouse The whole creation joins in the request, the people stand abashed and re-union follows.

II. The Author's name

In the prelude to the Uttaracharita the author introduces himself as "श्रीकण्ठपदलाञ्छन...भवभूतिर्नाम" । Hence भवभूति was the name of the poet and he earned the title श्रीकण्ठ—one having the goddess of learning in his throat—possibly by his erudition.

So far as is at present known, Bhavabuti was not a prolific writer. Two other books besides the Uttaracharita are ascribed to him, the Viracharita, a drama on the earlier history of Rama ending with his return from Lanka, and the Malati-Madhava, a romance.

In all these the personal matter in the prelude the three things are in common, viz. (1) the author is Bhava-

bhuti who earned the title Srikantha, (2) the author comes of a Brahmana family of Padmapura in Vidarbha, and (3) the dramas were all first staged on the occasion of the festival of the Kalapriyanatha.

Thus there can be no doubt that these three dramas were written by the same author.

The Viracharita further adds that the poet's father was Nilakantha and grand-father Bhattagopala.

Blinded perhaps by the gloom of Nilakantha's "Kantha" some are misled into the belief that the poet's name was Srikantha and Bhavabhuti was a mere title, failing to see that Bhattagopala and his son Nilakantha have no "kantha" in common in their names. Chapter and verse are cited by the supporters of this theory, thus—The poet while eulogising Gauri sang 'गिरिजायाः कुचौ वन्दे भवभूतिसिताननौ' also "साम्बा पुनातु भवभूतिपवित्रमूर्त्तिः"। This pleased Lord Bhava (शिव) to such an extent that he forthwith bestowed on the poet the title भवभूति। [N. B.—The supporters of this theory perhaps found confirmation in Mallinatha's commentary on Meghaduta 14, where he says that Nichula was the name of the poet for having used the word in one of his verses. So also the tradition is that Magha is called घण्टामाघ for having used the word घण्टा in canto IV. of Sisupalavadha. So also Bharavi is sometimes called छत्रभारवि। It is also said by Ghanashyama in his commentary on Dasakumar that its author is named Dandin for having used दण्ड in his opening verse and so on.]

Against this may be noted that in old writing the poet is always referred to as भवभूति *not* as श्रीकण्ठ। Thus in the 10th century, राजशेखर wrote in his बालचरित—

"बभूव वल्मीकभवः पुरा कविस्ततः प्रपेदे भवि भर्तृमेण्ठताम् ।
स्थितः पुनर्यो भवभूतिरेखया स वर्त्तते सम्प्रति राजशेखरः ॥"

Next came कल्हन in the 12th century with the verse—

"कविर्वाक्पतिराजश्रीभवभूत्यादिसेवितः ।
जितो ययौ यशोवर्मा तद्गुणस्तुतिवन्दिताम् ॥"

(Rajatarangini, IV, 144)

In the 14th century Govardhanacharyya in his आर्य्यासप्तशती wrote —

"भवभूतेः सम्बन्धाद् भूधरभूरेव भारती भाति ।
एतत्कृतकारुण्ये किमन्यथा रोदिति ग्रावा ॥"

But it is quite unnecessary to hunt up these and simllar references, "श्रीकण्ठपदलाञ्छन.. भवभूतिर्नाम" is decisive and seems to have no room for discussion,

The Malati-Madhava, as if to make assurance doubly sure, reads भवभूतिनामा for भवभूतिर्नाम । There is a deal of difference between भवभूतिनामा and भवभूतिर्नाम । The former is a compound of भवभूति and नामन् where नामन् means *name* and nothing else. The compound means "one whose *name* is Bhavabhuti." भवभूतिर्नाम is not a compound. भवभूतिः and नाम are separate words joined together by सन्धि । नाम is an अव्यय indicating प्रकाश publicity, celibrity, &c. Hence भवभूतिर्नाम literally means "kuown as Bhavabbuti". This however, is a very very common way of stating the *name* of a thing. Thus "हिमालयो नाम नगाधिराजः" "कालिन्दीतटवटः श्यामी नाम," "गिरिः प्रस्रवणो नामः" "चित्रकुञ्जवान् नाम दनुकवन्धाधिष्ठिती दण्डकारण्यभूभागः," "श्रमणानाम सिद्धशबरी," &c.

III. His Home.

The prelude to the **वीरचरित** supposes **पद्मपुर** in the **दक्षिणापथ** to be the poet's home (**अस्ति दक्षिणापथे पद्मपुरं नाम नगरम्। तत्र** &c.) It is usual to render **दक्षिणापथ** as "the way to the South." This seems to require correction. The **महाभारत** in the **वनपर्व** says—

> "एते गच्छन्ति बहवः पन्थानो दक्षिणापथम्।
> अवन्तिमृक्षवन्तञ्च समतिक्रम्य पर्वतम्॥
> एष पन्था विदर्भाणामसौ गच्छति कोशलान्।
> अतः परञ्च देशोऽयं दक्षिणे दक्षिणापथ ॥"

"Here are several roads leading to **दक्षिणापथ।** They cross the hill **ऋक्षवत्** and go beyond **अवन्ति।** This road goes to **विदर्भ**, this lead to **कोशल।** To the south beyond this place the land is known as "**दक्षिणापथ**"। We shall not perhaps be much in the wrong if we say that **दक्षिणापथ** is the modern Deccan. *Deccan* is evidently a corruption of **दक्षिण।** "The town of **पद्मपुर** in the Deccan" is vague, The **मालतीमाधव** with more definiteness reads **दक्षिणापथे विदर्भेषु** etc The quotation from the **महाभारत** above place **विदर्भ** in the Deccan. **विदर्भ** is the modern Berar. We have it then that Bhavabhuti was born at Padmapura in the Berar. Padmapura has not yet been identified.

IV. His Age.

Though born in the Berar, Bhavabhuti passed his best days at **कान्यकुब्ज** as one of the court-poets of king Yasovarman. The verse quoted above from the Rajatarangini may

be freely rendered thus—"Yasovarman was a poet himself and commanded the services (सेवित) of a host of poets—Vakpatiraja, Bhavabhuti and others. When defeated by Lalitaditya, he made good use of his poesy by singing in praise of the victor." From this and a few other minor considerations Bhavabhuti issupposed to have lived towards the latter part of the 7th century A.D.

IV. His creed.

The Viracharita begins with a salutation to the absolute (ब्रह्मन्) ।

"अथ स्वस्थाय देवाय नित्याय हतपाप्मने
त्यक्तक्रमविभागाय चैतन्यज्योतिषे नमः ॥

This is colourless as regards the poet's creed. Every Hindu is a believer in the Vedas , hence salutation to the सच्चिदानन्दस्वरूपं ब्रह्म is natural with him. This ब्रह्मन् is altogether unconditioned, and, as such, cannot be the subject-matter of the devotee's meditation. The mind hankers after something conditioned, a personal god. Hence believers in ब्रह्मन् are also seen to be शैव, वैष्णव etc in their creed. शिव, विष्णु etc. are the objects of their daily worshinp—they are भक्तs of शिव, विष्णु etc. which are to them but manifestations of ब्रह्मन् himself. What was Bhavabhuti—a शैव, or a वैष्णव, or what ?

The उत्तरचरित furnishes no clue , it opens with a salutation to the old masters—

इदं गुरुभ्यः पूर्वेभ्यो नमोवाकं प्रशास्महे ।
विन्देम देवतां वाचममृतामात्मनः कलाम् ॥

In the मालतीमाधव the poet makes salutations to शिव and

गणेश ; The case of **गणेश** may be left out of consideration, he is invoked by everybody to guard against hindrance in undertakings. Was then the poet a **शैव** ?

There are considerations which cannot be ignored in giving an answer to this question. The prelude to the Viracharita has the following—

"प्राचेतसो मुनिवृषा प्रथमः कवीनां यत् पावनं रघुपतेः प्रणिनाय वृत्तम् ।
भक्तस्य तत्र समरंसत मेऽपि वाचस्तत् सुप्रसन्नमनसः कृतिनो भजन्ताम् ॥"

The first classical poet was Valmiki He has recorded the holy life of Rama. I am a **भक्त** of Rama My speech also has revelled in recording that life. May the learned accept my record. In this, **भक्त** is a devotee, a worshipper ; not a mere admirer.

To Bhavabhuti, Rama was the Primeval Soul himself. Thus in the Viracharita he makes **वशिष्ठ** speak of Rama as—

रामायाः स क्षेत्रं गुणमणिगणानामपि खनि
प्रपन्नानां मूर्त्तः सुकृतपरिपाको जनिमताम् ।
कृपारामो रामो वहिरिह दृशोपास्यत इति
प्रमोदाद्ध तस्याप्युपरि परिवर्त्तामह इह ॥"

"In Rama resides forbearence and all virtues. To those that resort to him Rama is prior-birth-merit seen embodied in this life. Rama has to be seen within by meditation but he reveals in showing favour and is hence being seen without. From the consequent joy we are transported even above him "

Still more explicit is what in the **वीरचरित** comes from the presiding deity of Kuvera's Alaka , thus—

"इदं हि तत्त्वं परमार्थभाजामयं हि साक्षात् पुरुषः पुराणः ।
त्रिधा विभक्ता प्रकृतिः किलैषा श्रातुं भुवि खेन सतोऽवतीर्णा ॥"

"This is the treasure of those that have acquired the Supreme Treasure. This is the Primevial Soul Himself. This is the First Cause (divided subsequently into Brahman, Vishnu and Maheswar) which has come down on earth for the salvation of the good, with a sight of its real self."

These and similar sentiments are those of genuine worship and are not compatible with mere admiration. Hence as he himself declares, Bhavabhuti was a भक्त of राम।

The question as likely to arise that if Bhavabhuti was a worshipper of Rama, why does he salute Siva in the Malati-Madhava ?

The answer is simple. The worshipper of विष्णु worship him either in the form of राम or as कृष्ण। These two classes of Vaishnava are always at variance with each other. But Siva's position is unique ! nobody quarrels with Siva. In public bathing *ghats* when a bather shouts जय सीताराम, he is immediately challenged by dozens of voices with thecounter shouts जय राधाश्याम, and *vice versa* while जय गौरीशङ्कर is at once taken up with alacrity by almost every one present. There is therefore no inconsistency in a worshipper of Rama saluting शिव। Or—it may be that as a dramatist Bhavabhuti saluted नटराज शिव the ideal lover at the beginning of his drama, for he was to depict in नाटक the ardent love of Malati and Madhava , cp- 'आरोग्यं भास्करादिच्छेत् धनमिच्छेद् हुताशनात् " &c,—As health is asked of Sun-god, wealth of Fire-god, so love is asked of Siva. Thus this is no inconsistency with a रामभक्त।

———

VI. His Works

As stated before, Bhavabhuti wrote three books so far as is known at present, and they are all dramas. Two of these the Viracharita and the Uttaracharita, are based upon the Ramayana of Valmiki.

With reference to the genesis of these two books the poet himself explains, in the verse 'प्राचेतसो मुनिवृषा प्रथमः कवीनाम्" &c, quoted before, that being a भक्त of राम, he found it necessary to re-write the History of Rama, with certain alterations. The last line of the verse is 'तत् सुप्रसन्नमनस· कृतिनोभजन्ताम्। There तत् refers to the poet's own record. This record is in the form of दृश्यकाव्य, so the correct word with respect to it is in पश्यन्तु—let them *witness*. This the poet avoids and prefers भजन्ताम्—let them *accept*. This is suspicious. It seems to suggest that his record apparently differ in place from that of Valmiki, and he exhorts the audience to accept his version of the story. Let us see what these differences if any, are and what they have got to do with Bhavabhuti's भक्ति in राम।

(1) As a भक्त of राम the poet shocked at the mean device adopted to slay the monkey chief वाली। It casts a slur on his favourite deity which, as a भक्त, he is bound, thinks, to try to wipe out. His version is that वाली was killed in fair fight wherein he himself was the aggressor.

(2) The poet cannot bear the idea that Sita was banished without consultation with Vasishtha and the elders. His divinity is incapable of taking such a hasty step. No, it was that राम deliberately omitted to consult them, but at the time, they were away from Aydhoya and could not be consulted.

(3) Bhavabhuti's heart weeps to see Sita go down to Patala leaving his Deity, his heart's idol, disconsolate. The very idea is repulsive to a भक्त। He thinks that the Ramayana must be a comedy ; it must not be a tragedy. Accordingly he works towards that end.

(4) Incidentally he deems it necessary to absolve Kekayi of all responsibility in the matter of Rama's exile.

The Viracharita deals with रामवनवास and वालिवध and the Uttaracharita takes up सीताविवासन and पातालप्रवेश।

The third line of the verse quoted before is "भक्तस्य तत्र समरसत मेऽपि वाचः'। The past tense in समरंसत has to be noted. It implies that poet's speech (वाचः) is no longer engaged in *recording* the story of राम ; the story is already *recorded* This seems to suggest that, at the time the Viracharita was being staged, the Uttaracharita too was completed though the staging of it took place later on. Thus it appears that the verse "प्राचेतसो मुनिवृषा प्रथमः कवीनाम्" &c, warrants us to say that the poet's three dramas were staged in the order—Viracharita, Uttaracharita, Malati-Madhava.

Sanskritists unanimously suppose that the Viracharita was staged first. But as regards the other two Dr. Sir Ramkrishna Gopale Bhandarkar in his preface to the Malati-Madhava says—' Malati-Madhava must have been his second work, and the Uttara Ramacharita the last. In the benedictory stanza at the end of this, the play is represented as the production of his mature intellect" Here in the foot-note is quoted the line "शब्दब्रह्मविदः कवेः परिणतप्रज्ञस्य वाणीमिमाम्" from the last verse in the Uttaracharita to justify the assertion "the production of his

mature intellect" by "परिणतप्रज्ञस्य वाणीमिमाम्" । Later writers, including Prof. Lanman and Dr. Belvalkar, all follow Dr Bhandarkar.

Here the reasoning is, beacause the poet was of *mature* intellect when he wrote the Uttaracharita, therefore the Uttaracharita was the *last* work. It will perhaps strike many that when the intellect has matured it is just the time to *commence* writing not to *stop* writing. There seems to be no bar to the supposition that after his intellect has matured, the poet first wrote the Viracharita then the Uttaracharita and last the Malati-Madhava. Maturity of intellect does not necessarily imply old age and decrepitude that compel one to stop all work वृद्धत्व is of two kinds—ज्ञानवृद्धत्व (maturity in knowledge of intellect or genius) and वयोवृद्धत्व (maturity in age). Either is possible without the other , "वृद्धत्वं जरसा विना" is a current saying bequeathed unto us by Kalidasa.

Moreover, before building upon the epithet परिणतप्रज्ञस्य it is necessary to see if परिणतप्रज्ञस्य is by common consent the reading here and if so whether we all agree that it refers to भवभूति and to no one else. Regarding that first point it may be noted that वीरराघव reads परिणतां प्राज्ञस्य for परिणतप्रज्ञस्य । This throws doubt on the authenticity of the reading. The reading itself being thus open to question it is not safe to base an inference upon it.

But for argument's sake, let us accept the reading परिणतप्रज्ञस्य । Well, to whom does the epithet refer ? Not to भवभूति । Let me explain. Here there is another epithet शब्दब्रह्मविदः to qualify the poet. The poet, whoever he was was both परिणतप्रज्ञ (of mature intellect) and शब्दब्रह्मविद् (enlight

tened in Brahman in the shape of speech. But भवभूति was not शब्दब्रह्मविद्, he himself says he was not. In the opening verse of the उत्तरचरित he prays that he *might become* enlightened in Brahman in the shape of speech—'विन्देम देवतां वाचममृतामात्मन. कलाम्'' । Hence, neither शब्दब्रह्मविद् nor परिणतप्रज्ञस्य in the line "शब्दब्रह्मविदः कवेः परिणतप्रज्ञस्य वाणीमिमाम्'' can refer to भवभूति ।

This reference is to वाल्मिकी । The Second half of the stanza as given by विद्यासागर is—

"वाल्मीके. परिभावयन्त्वभिनयैर्विन्यस्तरूपां बुधाः
शब्दब्रह्मविदः कवेः परिणतप्रज्ञस्य वाणीमिमाम् ।'

In this the only possible construction is शब्दब्रह्मविद: परिणतप्रज्ञस्य कवेः वाल्मीकेः &c &c.

It is but fair to note that in the above some read तामेताम् for वाल्मीके । This reading also occurs in one of Vidyasagar's manuscripts. Sir Bhandarkar and others were probably misled by this reading.

A little reflection will show that तामेताम् cannot be the correct reading here. With तामेताम् the complete verse reads—

"पाप्मभ्यश्च पुणातु वर्द्धयतु च श्रेयांसि सेयं कथा
मङ्गल्या च मनोहरा च जगतो मातेव गङ्गेव च ।
तामेतां परिभावयन्त्वभिनयैर्विन्यस्तरूपां बुधाः
शब्दब्रह्मविद् कवेः परिणतप्रज्ञस्य वाणीमिमाम् ॥

The construction is—"सा इयं कथा । ताम् एताम् इमां वाणीं परिभावयन्तु'' । There are two separate sentences here. In

the first sentence सा refers to something well-known (प्रसिद्धार्थ) and absent (परोक्ष) । The word कवेः secures the presence (सन्निधि) of the absent thing before the vision of our mind. If so, the परोक्षता is gone, and the प्रसिद्धि too being already indicated, the ताम् in the second sentence serves no purpose , hence it is objectionable.

Besides, as the second sentence is an अन्वादेश (subsequent assertion), एताम् there should be एनाम् । Moreover the simultaneous presence of ताम, एताम् , इमाम, in similar senses, is extremely awkward and makes the sense obscure.

On the other hand with the reading वाल्मीके: we have to construe—"... सा इयंकथा । इमां वाल्मीकेः वाणीं परिभावयन्तु" which leaves no doubt as to the sense intended. The absence of अन्वादेश in इमाम is only a question of grammar and is not perhaps altogether indefensible as I have tried to show elsewhere (see Act VII)

In these circumstances there is every likelihood that वाल्मीके. is the correct reading here and Sir Bhandarkara's conclusions do not follow. If then my interpretation of the verse "प्राचेतसोमुनिवृषा प्रथम: कवीनाम्" &c. be correct it is safe to say that Malati-Madhava, not Uttarcharita, is the last work of the poet.

But one of our poets says "व्याख्या बुद्धिवलापेक्षा" (a keen wit can mould the interpretation in any way it likes). Same clever critic might perhaps interpret my 'verse quite

differently and thus vitiate my conclusion. Let us therefore see if independent evidence is available.

I. In the **मालतीमाधव** the style is purer, and more attractive than what we find in the **उत्तरचरित।** Now, the plot of a story depends largely upon inspiration, A happy idea may flash and illustrate the mind at any age, It cannot therefore be said that, of the two stories by the same author, attractive is the product of a more advanced age. But the style improves with age undoubtedly Hence the style of **मालतीमाधव** is the proof that it came after the **उत्तरचरित।**

II. In the prelude to the Uttarcharita the Sutradhara, after stating the day's business '**एषोऽस्मि कार्य्यवशादायोध्यकस्तदानींन्तनश्च संवृत्तः**'—Owing to the requirements of my duties I have now become a citizen of Ayodhya of Rama's time."

Next follows—"(**समन्तादवलोक्य**) '**भो भोः** &c."—(*looking round*) Ho ! Ho ! &c" Now, who looks round here ? Not the Sutradhara, but the citizen whom now the Sutradhara represent. This is defective The prelude should have ended with **संवृत्तः।** The stage direction should have been something like this—(**परिक्रम्य निष्क्रान्तः**) । **इति प्रस्तावना ॥ ततः प्रविशति कश्चिदायोध्यकः (समन्तादवलोक्य)— भो भोः** &c.

Referring to the prelude to the Malati·Madhava we find—"**सूत्रधारः——बाढम् । एषोऽस्मि कामन्दकी संवृत्तः । नटः— अहमप्यवलोकिता । (इति परिक्रम्य निष्क्रान्तौ) । प्रस्तावना ॥ ततः परिवृत्य रक्तपट्टिकनेपथ्ये कामन्दक्यवलोकिते प्रविशतः**" &c.—*Sutra*—All right-

Here I have become Kamandaki. *Actor*—I too have become Avalokita. (Exeunt after going ronnd the stage). *Then enter Kamandaki and Avalokita dressed in scarlet.*"

This is in perfect order. In other words the defect noticed in the Uttarcharita is corrected in the Malati-Modhava. This implies that Malati-Madhava comes later than the Uttarcharita. Had the Uttarcharita been the later work the defect avoided in the previous work would not have occured there at all

III. Sanskrit poets often have in the prelude a kind word or two for the audience. In the Viracharita, Bhavabhuti's first work, we read—

"वश्यवाचः कवे काव्यं सा च रामाश्रया कथा।
लब्धश्च वाक्यनिष्यन्दनिष्पेषनिकषो जनः॥"

—'The poet is the master of speech, the theme is the supremely interesting story of Rama, and the audience is one of connoisseurs of the merits of a composition." Here the poet, a candidate for fame, is conscious of his own merit, is conscious of the merits of his work and has full confidence in the judgment of the audience. His expectations are therefore high.

In the Uttarcharita there is no mention of the audience, instead we have the cynical remark—"यथा स्त्रीणां तथा वाचां साधुत्वे दुर्जनो जनः—'people are wicked while judging of women and speech."

The language is that of disappointment. The hopes with which the Viracharita was then launched have not been realised The poet is therefore now indifferent towards his audience.

The prelude to the Malati-Madhava is in a different vein. There the poet is furious and lets the audience have the full measure of his venom of abuse. Says he—

ये नाम केचदिह नः प्रथयन्त्यवज्ञां जानन्ति ते किमपि तान् प्रति नैष यत्नः ।
उत्पत्स्यतेऽस्ति मम कोऽपि समानधर्मा कालो ह्ययं निरवधिर्विपुला च पृथ्वी ।'

"There are certain vile (नाम कुत्सायां क्रोधे च) no-bodies (केचित) here who delight in airing their contempt of me, What do they know ? I do not write for them. People there will be in time when people will sing in my praise" To emphasise the wide difference in birth and training between himself and his critics be belauds his own family, thus—

"ते श्रोत्रियास्तत्वविनिश्चयाय भूरि श्रुतं शाश्वतमाद्रियन्ते ।
इष्टाय पूर्त्ताय च कर्मणेऽर्थान् दारानपत्याय ततोऽर्थमायु " ।

Now, mark the the attitude of the poet towards the audience in the dramas. It is respectful in the Viracharita indifferent in the Uttarcharita, abusive in the Malati-Madhava. In what order did these changes in the attitude appear ? That is our problem for solution.

Well, an author is always expected to be respectful towards his audience Hence it is natural to suppose that the Viracharita was the poet's first work.

Assuming that the Viracharita was a failure and remembering that that the poet had a high opinion of himself and his work, we expect indifference towards the audience in the next work. This means that the Uttarcharita was the poet's second attempt.

If the Uttarcharita too was unfavourably received then no wonder that the sensitive poet lost all patience and became abusive in this next venture. So Malati-Madhava naturally follows the Uttarcharita.

Another theory would perhaps occur to some, viz the Malati-Madhava was the poet's second work, it was a success and softened down his tone of abuse into one of indifference in the Uttarcharita. This does not seem to commend itself.

First, why should we suppose that the poet was *abnormally* sensitive like the writer of the "English poets and Scotch Reviewers' and that the very first breath of criticism drove him mad ?

Second, if then he was really so impatient of criticism, then the poet's abuse was more likely to elicit from the audience counter-abuse than praise for the Malati-Madhava.

Third, if indeed the audience praised the Malati-Madhava, then, with his naturally sensitiveness—sensitiveness which is touched equally by praise and abuse the poet would be eager to make amends for his abuse and would come out with not indifference or cynicism, but a brimful of enthusiastic appreciation in the Uttarcharita.

It seems we have now enough materials before us to say with some amount of certainty that the sequence of the dramas is —Viracharita, Uttarcharita, Malati-Madhava.

These dramas as we learn from the Preludes were all staged at the festival of Kalapriyanatha. (कालप्रियनाथस्य यात्रायाम्), it is usual to take Kalapriyanatha as identical with the Mahakala at Ujjayini. We are inclined to differ.

Mahakala is a well-know name. Why should the poet alter it—persistently alter it into the unheard—of Kalapriyanatha? Besides, as shown above, Bhavabhuti was the court-poet of Yasovarman at Kanauj. Why then should he go to Ujjyaini to have his dramas staged there? That would be an affront to his patron Yasovarman which that king would never forgive. The supposition seems absurd. It is more natural to take Kalpapriyanatha as some deity enshrined somewhere in Yasovarman's territory.

The word Kalpapriyanatha means—"The guardian deity of Kalpapriya." Again Kalpapriya would be a happy name for a newly rounded city It means "The favourite of Time (Kala)" i. e. "Imperishable", for it is "time" that destroys cities. It struck me a few days ago that the modern city of Calpi night be the Kalpapriya of Bhavabhuti; on referring to Dr. Belvalkar's Translation I find that in this I had been anticipated by Mr. Lele of Bombay. Dr Belvalkar rejects Mr. Lele's suggestion on the ground that it is based on mere surface resemblance between the names Kalpi and Kalpapriya. I have not seen Mr. Lele's book and do not know if he cites reasons; but it seems

what has been said above enables one to say that the dramas were certainly not first staged at Ujjayini, and Kalpapriyanatha is not the Mahakala of that city. Whether the resemblance between Kalpapriya and Kalpi lies on the surface only or goes any deeper cannot be decided until fresh materials are available.

VI. His Fame.

As appears from the Preludes to his work, Bhavabhuti's career as a dramatist was one of disappointment. He received no public favour during his life time. But after his death came a time when people felt attracted towards his dramas. Gradually there arose a decent body of admirers. That was the time when the line "**कवयः कालिदासाद्या भवभूतिर्महाकविः**"—Kalidasa &c. were poets but Bhavabhuti was the prince of poets" used to be quoted and answered by the opposite party, with the cry "**तरवः पारिजाताद्याः स्नुहिवृक्षो महातरुः**"—'The Parijata, &c. are trees but the Cactus is the prince of trees"

At the present time Bhavabhuti enjoys a world wide fame, Prof, Wilson says—'......brilliant thoughts occur—the justice and beauty of which are not surpassed in any literature." Pandit Vidyasagar remarks—"Noble and lofty sentiments abound in his work in a measure not to be usually seen in those of other poets." Sir Bhandarkar has "He shows a just appreciation of the awful beauty and grandeur of Nature, enthroned in the solitudes of dense forests, cataracts and lofty mountains. He has an

equally strong perception of stern grandeur in human character, and is very successful in bringing out deep pathos and tenderness. He is skilful in detecting beauty even in ordinary things or actions and in distingushing the nicer shades of feeling, He is a master of style and his cleverness in adapting his words to the sentiment is unsurpassed."

All this is very high praise and renders prophetic the poet's words "उत्पतस्यतेऽस्ति मम कोऽपि समानधर्मा'। These appreciations reach us with reasons aasigned for them ; whereas we do not know what made his books unpopular during the poet's life-time. We propose to make an attempt to know. We shall try to see if there is anything, even in the poet's best work, with which the critic is likely to be dissatisfied.

The Uttaracharita is by common consent supposed to be the masterpiece of Bhavabhuti. There is the current saying "उत्तरे रामचरिते भवभूतिर्विशिष्यते"—Bhavabhuti excels himself is the later history of Rama. Are here any defect any serious defect, in this drama ? Let us search for the reply,

At the very outset it appears that the language is heavy, often it is unmusical , in places it is repulsive. It jars and grates to such an extent that Govardhanacharyya in the verse from the Arya Saptasati quoted before compares Bhavabhuti's composition to a rocky soil. In a jesting mood he remarks—

भवभूतेः सम्बन्धात् भूधरभूरेव भारती-भाति ।
एतत्कृतकारुण्ये किमन्यथा रोदिति ग्रावा ॥"

—'Coming in contact with Bhavabuti goddes Speech has turned into a rocky soil. Hence it is that when Bhavabhuti's speech weeps the poet says that the rock itself. weeps"!

We are aware that sometimes this verse is interpreted as a high tribute to the pathos of Bhavabhuti's writing The text of the verse does not seem to justify this interpretation. Besides, the context shows that Govardhana here is not all anxious to make any profound remark , he merely wants to say something smart Thus in the very next verse he says of Bana—

"जाता शिखण्डिनी प्राक् यथा शिखण्डी तथावगच्छामि ।
प्रागल्भ्यमधिकमाप्तुं वाणी वाणो वभूवेति ॥'—

Bana is Vani herself with the female suffix ङीप् dropped to acquire greater boldness of speech (for the sake of the joke he choses to forget that Bana begins with B and Vani with V, so that the mere absence of ङीप् does not change the one into the other*). Change of sex is not unknown in history, for did not sex-transmution convert शिखण्डिनी to शिखण्डी in the good old days ?

It is impossible to take this, and along with this the previous verse also, as spoken of in earnest. Govardhana does not like Bhavabhuti's style and cuts a joke.

But unttractiveness of style is a minor offence in a dramatist Like every story teller, he has other more important ends to meet, the foremost of which is to make the incident appear natural and consistent with one another, In other words the dramatist has first of all to secure a perfect technique If the technique is defective

* Some lexicographer do indeed read बाण and बाणी with both ब and व !

all interest in the story is gone, lofty ideals and masterly delineations of character fail to make a permanent impression.

Bhavabhuti's technique in the Uttaracharita leaves much to be desired. I shall cite a few instances, only a few out of a lot

(i) In the Prelude the Sutradhars says.

"एषोऽहं कार्य्यवशादायोध्याकस्तदानीन्तनश्च संवृत्तः। (समन्तादवलोक्य) भो भो किमिति विश्रान्तचारणानि चत्व रस्थानानि ?"

This has already been cited as a defect because the acting begins with the entry of the citizen of Ayodhya. The Prelude therefore should have ended immediately before and the Sutadhara should have left the stage. The Dasarupaka says—**"प्रस्तावनान्ते निर्गच्छेत् ततो वस्तु प्रपञ्चयेत्"**—"The Sutradhara must leave the stage after the Prelude and *thereafter* the staging should commence" Strictly speaking this only offended against the rules of dramaturgy and is not an instance of defective technique. But all the same no orthodox critic would tolerate it.

(ii) After the above follows—'**(प्रविश्य) नटः– भाव प्रेषिता हि, इत स्वगृहान् महाराजेन लङ्कासमरसुहृदः** &c." "(*Entering*) Nata—Honoured Sir, the allies in the war at Lanka have been sent away to their homes by the Maharaja &c." This too is defective, no Nata can come in after the Prelude has ended.

Again this Nata address the Sutradhara as Bhava and the Sutradhara returns the compliment with Marisha. But Bhava, Marisha &c., are terms allowed in the Prelude only. Thus here the poet offers us the choice between Scylla and charybdis If the Prelude has ended, Sutradhara, Nata, Bhava Marisha &c., are out of place.

if the Prelude continues then "किमिति विश्रान्तचारणानि-चत्वरस्थानानि, 'वैदेशिकोऽस्मी पृच्छामि" &c , are inconsistent.

The dilemma certainly cannot escape the vigilance of the critic,

(iii) In answer to the Sutradhara's query किमिति विश्रान्त-चारणानि &c."—Why are the yards idle &c." the Nata says "प्रेषिता हि इतः &c."—the guests have left &c" He also adds—

"वशिष्ठाधिष्ठता देव्यो गता राघवमातरः ।
अरुन्धतीं पुरस्कृत्य यज्ञे जामातुराश्रमम् ॥"

Vasishtha has gone to Rishyasringa's place taking the queen-mothers with him." This is irrelevant. We can understand music in honour of guests, but Vasishtha and the queen-mothers can have nothing to do with it. Their presence or absence cannot start or stop music.

The poet wants to keep them away at the moment of Sita's exile as explained before and informs the audience accordingly, forgetting, however, that the information is irrelevant at this stage. The technique is faulty here,

(iv) Next we are told that Vasishtha &c , have reached Rishyasringa's place and sent word through Ashtavakra to explain why Ram and Sita were not invited. Ashtavakra says "वत्से, कठोरगर्भेति नानीतासि । वत्सोऽपि रामभद्रस्त्वद्विनो-दनार्थमेव स्थापितः"—Child, your term is full, so you heve not been brought over , Rama too has been left there to entertain you".

The fullness of Sita's term requires explanation, The queen-mother left in the morning. Ashtavakra reached Ayodhya that very day at about noon. Sita was exiled soon after noon and in the afternoon was delivered of twins.

If delivery is to take place in the afternoon the elders will guess it froom looks &e. in the morning. Sita was the darling of ths elders, was given up for lost and was recovered unexpectedly after a lapse of 13 years. That was her first conception. In the circunstances the elders cannot think of leaving her on the day of delivery even for a few hours, whereas this absence was to be for 12 years. Any Hindu motheir-in-law would unhesitatingly decide to stay on till delivery and then go. This is another defect in the technique.

(v) Further, Ashtavakra reports that the queen-mothers &c, have asked Rama to satisfy without delay any *dohada* (pureperal longing) Sita might have It is queer to thing of *Bhadhumata's dohada* after the expiry of the whole term on the day of delivery. The request was unnatural at this stage.

(vi) Rama's reply to the above is—"क्रियते यद्येषा कथयति"—"It will be done if she discloses it", Rama doubts if she would tell him at all, such was her bashfulness. But Sita falsifies his doubts by immediately declaring her wish and even uses the word *dohada* itself without a blush.

The *dohada* was—to ream in the forests once again and to bathe in the Bhagirathi, and this on the day of delivery. Rama does something stranger still. He orders Lakshmana to take her over to Valmiki's hermitage, forgetting that her term being full it was not deemed advisable to take her to Rishyasringa's place Sita now asks Rama to accompany her, Rama reports that it was cruel of her to think that a request for it was necessary. Yet when getting on into the car she finds Lakshmana alone there, she does not even ask where Rama was and why he did not come.

All this is extermely unnatural The unnaturalness arises from assuming that Sita's term was full. It is worth while to see if this is at all a possble assumption.

In the Viracharita we find that after having killed Ravana Rama starts that very day for Ayodhya which he reaches in the evening. Coronation follows the next day. Festivities continue for a little over two weeks. Ashtavakra comes on the day the festivities cease Including that day we see that since her deliverance Sita has been living with her husband for about a fortnight. Yet the poet says Sita's term was full when Ashtavakra came! This is a glaring incongruity which no critic can tolerate.

Bhavabhuti has left us no materials to judge if Sita had conceived before her abduction by Ravana, which supposition alone can remove the incongruity here. The Ramayana of Valmiki does not allow the supposition as will be obvious on reference to the Sundarkanda.

(vii) A very curious feature of Ashtavakar's visit is that the message sent through him did not occur to the elders at the time they left Ayodhya. Forgetfulness is pardonable in the queen-mothers, but why should Vasistha forget ? He too has sent through Ashtavakra this very urgent and important piece of advice to Rama—

"जामातृयज्ञेन वयं निरुद्धास्त्वं बाल एवासि नवञ्च राज्यम ।
युक्तः प्रजानामनुरञ्जने स्यास्तस्माद् यशो परमं धनं वः ॥"

"I am detained here for 12 years. You are a more boy and only recently crowned. So try to please your subjects by all means. This will make you popular and popularity is what your ancestors have all prized". The nervousness of Vasistha about Rama's abilities as displayed in this

verse makes it imperative for him to add here—"In matters of moment do nothing without consulting me." But this he omits.

On the other hand, Vasishtha had no reason to think so lightly of Rama. He knew who Rama was as is obvious from the verse "क्षमायाः स क्षेत्रं गुणमणिगणानामपि खनिः" &c. quoted before. Hence the advice sounds inconsistent in his mouth

This much is enough to show the nature of the techni que of the Uttaracharita. I will however, before leaving this subject add two more instances.

(viii) In Act II we learn that the elders have been dismissed by Rishyasringa, but Arundhati has declined to go back to Ayodhya which is now bereft of her beloved Sita.

The queen mothers approve. Vasistha advises them to go and live in Valmiki's hermitage. Why ? Vasishtha had a hermitage of his own. There they could all go and thus avoid going back to Ayodhya Of course Vasishtha knew what was going to happen at Valmiki's hermitage as described in Act VII and was perhaps actuated by that knowledge to make the suggestion. But the suggestion should have come with all the appearance of naturalness in it, and this it fails to do

(ix) In Act VII, on hearing a hubbub, Valmiki explains —उत्खातलवणो मधुरेश्वरः प्राप्तः—"Satrughna is returning from Madhura after having killed Lavana." The expedition against Lavana had started 12 years before as we knew from Act I. We have then to suppose that a regular War has been in progress against Lavana these 12 years, the Rakshasa defying Rama's forces all the while ; in that case

the Asvamedha becomes an impossiblity because the conqueror of the whole world alone has the right to it.

As I have already said these are only illustrative of the defects of technique and do not make an exhaustive list. Modern critics have however learnt to shut their eyes to defects of technique. We do not know how they learnt it, but the art is there and in a highly improved form, for, not only do they now wink at defects but actually see beauty in them. Thus Dr Belvalkar and Prof. Lanman speak of the "almost perfect development in form and technique" of the Uttaracharita and of "the advance which Bkavabhuti had made in his technique" in the first act of "the Uttaracharita."

Here let me not be misunderstood. My object in noticing these defects, as stated at the outset is only to see if ths poet's detractors—those who came out purposely to condemn—got any real hold against him, and thus to explain why the poet was unpopular during his life-time. In time, the play of passions and prejudices ceased and admirers arose. If I am asked to speak to on the grounds for admiration, I think little would remain unsaid if I said "The man who can read through the Uttaracharita without being moved to tears more than once स योगी ह्यथवा पशुः— is either a sage or a brute."

VIII. The Sources of the Uttaracharita

The general outlines of the story of the Uttaracharita are obviously derived from the Ramayana of the Valmiki- For the details Bhavabhuti is largely indebted to Kalidasa and to a certain extent to Bhasa also. The Alekhyadarsana of Act I is only an amplification of Kalidasa's—

' तयोर्यथाप्रार्थितमिन्द्रियार्थानासेदुषः सद्मसु चित्रवत्सु ।
प्राप्तानि दुःखान्यपि दण्डकेषु सञ्चिन्त्यमानानि सुखान्यभूवन् ॥"

—"They are now enjoying life. On the walls of the mansions are painted scenes of their sojourn in the Dandaka. Many of these recall painful memories; but now, while contemplating on them in the picture, they give more pleasure than pain."

Both Sita and Sakuntala are abandoned *when with child.*- At the time of abandonment Kalidasa's Rama laments—

"राजर्षिवंशस्य रविप्रसूतेरुपस्थितः पश्यत कीदृशोऽयम् ।
मत्तः सदाचारशुचेः कलङ्कः पयोदवातादिव दर्पणस्य ॥"

—"This illustrious race is soiled through contact with me." Bhavabhuti's Rama thinks exactly along similar lines—

"यत् सावित्रैर्दीपितं भूमिपालैर्लोकश्रेष्ठैः साधु शुद्धं चरित्रम् ।
मत्सम्बन्धात् कश्मला किं वदन्ती स्याच्चेदस्मिन् हन्त धिङ्मामधन्यम् ।"

—"My ancestors have rendered the race pure, my luckless self has soiled it."

Both the queens, Sita and Sakuntala, depart *leaving* no *trace behind* and their husbands meet their sons *unexpectedly after the lapse of years in a hermitage.* Both the poets dwell on the resemblance of the *features of the boys* to those of their sires and on the *thrill of joy* caused to their sires *from the touch* of the boys. Thus "अस्य बालकस्य रूपसंवादिनी ते आकृतिः", in Sakuntala, VII, and—"अये न केवलमस्मत् संवादिन्याकृतिः" in the Uttaracharita. VI, also—

"अनेन कस्यापि कुलाङ्कुरेण स्पृष्टस्य गात्रेषु सुखं ममैवम् ।
कां निर्वृतिं चेतसि तस्य कुर्याद् यस्यायमङ्गात् कृतिनः प्ररूढः ॥"

in Sakuntala, VII; and—

"अङ्गादङ्गात स्रुत इव निजः स्नेहजो देहसारः
प्रादुर्भूय स्थित इव बहिश्चेतनाधातुरेव ।
सान्द्रानन्दक्षुभितहृदयप्रस्रवेणेव सृष्टो
गात्रं श्लेषे यदमृतरसस्रोतसा सिञ्चतीव ॥"

in the Uttaracharita silghtly disguised by Bhavabhuti's fondness for the prolix.

Both the pairs pine away after separation and suffer in their persons. When husband and wife accidentally meet for the first time after the separation, Kalidasa's Sakuntala exclaims—"न खलु आर्य्यपुत्र इव" and Bhavabhuti's Sita remarks—"हा कथं प्रभातचन्द्रमण्डलापाण्डुराकृतिः etc.

As for the queens. Dushyanta remarks of Sakuntala....

"वसने परिधूसरे वसाना नियमक्षाममुखी धृतैकवेणिः ।
अतिनिष्करुणस्य शुद्धशीला मम दीर्घं विरहव्रतं बिभर्ति ॥"

and Tamaasa says almost the same thing of Sita In the Uttaracharita—

"परिपाण्डु दुर्व्बलकपोलसुन्दरं दधती विलोलकबरीकमाननम् ।
करुणस्य मूर्तिरिव वा शरीरिणी विरहव्यथेव वनमेति जानकी ॥"

Both the kings are re-united with with their queens *in a hermitage* in presence of a sage of exceptional spiritual eminence.

In act V. of Bhasa's Svapnavasavadatta, king Udayana (whose beloved queen Vasavadatta was supposed to have perished in a fire though she was really alive unknown to all in the world except Yaugandharayana) sees Vasavadatta in a dream and commences thinkiug in sleep. By chance, Vasavadatta herself arrives there. speaks to the sleeping king and touches his hand, The touch rouses the king and Vasavadatta hastily withdraws. Thisseems

to be the germ out of which Bhavabhuti unfolds his Act III of the Uttaracharita.

The talk Udayana has with Vidushaka on awaking strongly reminds one of Rama's talk with Vasanti in the Uttaracharita Act III. Thus Bhasa writer—"*King*—I have good news for you. Vasavadatta is alive, *Vid*—Alas, Vasavadatta ! Where is Vasavadatta ? She is long dead. *King*—No friend, no, I was half awake, "she aroused me and left. Rumanvat has deceived me saying she was dead." Bhavabhuti has—*Rama*—Friend Vasanti, you are lucky. *Vas*—*How* so, sire ? *Rama*—Sita has come back to me. *Vas*—Well, Sire. where is she ? *Rama*—Why she is standing before you."

———

IX. Bhavbhutl, The Man.

We often judge a man by his writings, by the trend of his thoughts. This is not safe and often likely to mislead, we shall however apply the test to the case of Bhavabhuti to see what results it yields. In the Uttaracharita the verses—

'इयं गेहे लक्ष्मीरियममृतवर्त्तिर्नयनयो-
रसावस्याः स्पर्शो वपुषि बहलश्चन्दनरसः ।
अयं कण्ठे बाहुः शिशिरमसृणो मौक्तिकसरः
किमस्या न प्रेयो यदि परमसह्यस्तु विरहः ॥

and "अद्वैतं सुखदुःखयोरनुगुणं सर्वास्ववस्थासु यद्
विश्रामो हृदयस्य यत्र जरसा यस्मिन्नहार्य्यो रसः ।
कालेनावरणात्ययात् परिणते यत् स्नेहसारे स्थितं
भद्रं" मे सुमानुषस्य कथमप्येकं हि तत् प्राप्यते ।

paint perfect pictures of conjugal love.

The verse "अङ्गादङ्गात् सृत इव निजः स्नेहजो देहसारः" &c. quoted before is again a happy delineation of parental affection. Very likely then Bhavabhuti was a loving husband and an affectionate father.

In his description of nature it is the somber and the terrible that usually attract him where others see aesthetic beauty alone. In keeping with this, in the region of mind also, Nature in agony, not in ecstasy, he likes to depict. He prefers the shades keeping away from the sun-shine. The inference ought to be that the poet was a pessimist of a morose temperament. This is supported by the absence of the jester in his drama.

From the absence of the jester some argue that the poet had no sense of humour. In the Uttaracharita only once he cracks a joke. That is when Lakshman points out the pictures of the wives of the four brothers skipping over that of his own wife, Sita laughingly asks—"वत्से, इयमपि अपरा का" —Dear child, who is this other girl ?"

I think this is a bit unfair to the poet. Sense of humour cannot be absent where there is the sense of the ludicrous : and the latter the poet did possess undoutedly. Thus, in the Malati-Madhava, the poet, describing Siva's delirious dance (ताण्डव), says—

"सानन्दं नन्दिहस्ताहतमुरजरवाहूतकौमारबर्हि-
त्रासान्नासाग्ररन्ध्रं, विशति फणिपतौ भोगसङ्कोचभाजि।
गण्डोड्डीनालिमालामुखरितककुभस्ताण्डवे शूलपाणे-
र्वैनायक्यश्चिरं वो वदनविधुतय. पान्तु चीत्कारवत्यः ॥"

—"Nandi is playing the tabor. The notes he is eliciting resemble the rumble of a water-laden cloud. This

attracts Karitikeya's peacock at whose sight the frightened serpentking on the head of the Lord beats a hasty retreat, and for shelter closes its hood and runs up to one of the nostrils of Ganesa ! Poor Ganesa is shrieking and sneezing and giving violent jerks to his head to shake off the intruder who had stuck fast in the hole. May these jerks of Ganesa be to your salvation for ever.

It seems to me that the absence of the jester only shows that the poet was always serious in his undertakings and eschewed frivolities.

X. The characters in the Play

Of the several characters in the play, Rama and Sita stand prominent. The others 'i. e,' Lakshman, Janaka. Chandraketu, Lava, Kusa Valmiki, Kausalya. Arundhati, Ganga, Prithvi etc. are of minor inportance. So we shall here note a few prominent traits in Rama's and Sita's characters.

[*N. B.*—As this edition had to be published in a very short time owing to the great demand of the book, so we have dealt with a few salient points only of the important characters here and hastily or broadly passed over others.]

Rama : Bhavabhuti paints Rama as an ideal householder—both physically and morally. As regards his strength etc. Sambhuka. extols him as the destroyer of terrible demons. As a strong warrior he goes himself forward to save the elephant reared by Sita. Even his majestic appearance commands respect. Thus Kusa says ' आह्ल-

नीयपुण्यदर्शनः स महात्मा ' । Rama was ब्रह्मकोशस्य गोप्ता । And his aim was to protect the world, more so the sudjects on moral principles (cp. ''इदं विश्वं पाल्यं विधिवदभियुक्तेन मनसा'' &c.) In fact duty was the greatest aim of Rama. He followed duty for duty's sake. As a prince of the solar race प्रजारञ्जन was his highest duty (युक्तः प्रजानामनुरञ्जने स्यात्तस्माद्यशोयत् परमं धनं व'), for this duty he even abandoned Sita and bore everything manfully (स्नेहं दयाञ्च सौख्यञ्च यदि वा जानकीमपि । आराधनाय लोकानां मुञ्चतो नास्ति मे व्यथा ।।''). Thus his aim was the greatest good of the greatest number. He could not brook vice in his kingdom. Thus he saves the dead Brahmana boy by killing Sambuka, the Sudra ascetic, In fact he duly behaves to all aud knew the power of religion (लौकिकानां हि साधूनामर्थं वागनुवर्त्तते । ऋषीणां पुनराद्यानां वाचमर्थोऽनुधावति ।।), In public capacitics he brilliantly discharged duties to the entire satisfaction of all. Great as a moral ruler, he was also great as a loving husband. He abandoned Sita, but all the while brooded over her affeetion. Sita's thought ruled supreme in his mind. Throughout his life he evinced his unbounded, and pure affection for his wife and ever tried to minister to her happiness. His heart-rending cries and frantic utterings in Act III specially on account of separation from his wife (Sita) disclose the depth of his love. Sita's touch to him is मुग्ध (मनोहर) and it made him मुहेन्द्रियगण too (मुह+क्त=मुग्ध pleasant, and मूढ़ ignorant or dazed etc. see p 345). But in this respect his sentimentalism carries him away and brings him down to the level of ordinary lovers. He had great regard for Sita's merits and chastity (इयं गेहे लक्ष्मी' &c). As a father also he is very affectionate Thus though Lava molested his soldiers still he is filially disposed towards him, Rama is soft to his relations. Indeed his filial affection inclined him to Lava and Kusa though the relation was not known. Rama's fondness for Chandraketu should not also pass unnoticed.

Though Rama is the foremost hero of his age, he was devoid of all pride. Thus while seeing the pictures he avoids self-praise (लक्ष्मणः—पश्य अयमसौ आर्य्येण—इत्यद्धो के । रामः—वत्से, बहुतरं द्रष्टव्यमस्ति &c.). Rama was also an ardent admirer of the sublime aspects of nature. See Rama's description of Panchavati in Act II.

Thus though young in age Rama was mature in his judgements and never swerved from the path of duty,

Sita—As Rama was a perfect type of manhood, so Bhavabhuti depicts Sita as an ideal woman. Here we see her as a wife. Her character as mother or daughter is not so painted as to deserve serious consideration. She did all for Rama's good and she followed him in joy and in sorrow like a shadow , though banished still she thought of Rama alone. Thus she was really a पतिव्रता । Even in her banishment, she curses her luck and not Rama , thus though wronged she uttered not a single reproach against her husband. Such an ideal picture of self-abnegation and undeviating submission to the will of the husband is rare indeed. Even though विमानिता she addresses आर्य्यपुत्र to Rama. She restores back Rama to consciousness by the words—"जं होदु तं होदु ।

There is more meaning here than what meets the ear. In fact the Third Act gives us a clear picture of Sita's deep love and great concern for her husband. After the birth of Lava and Kusa, her consideration of husband was greater than that of sons. Of a spotless character she feels for others grief. As a being of purity she sanctifies all by her chaste character (उत्पत्तिपरिपूतया· किमन्यैः पावनान्तरः" । "हा चरित्रदेवते" । 'अर्पितेयं तवाभ्यासे सीता पुण्यव्रतावधू ! '). We conclude by saying that her love for husband was amply rewarded when Rama was about to perform अश्वमेध by a

हिरण्मयी सीताप्रतिकृति । Thus Arundhati addresses Rama (as he was taking back sita) "जगत्पते रामचन्द्र !

नियोजय यथाधर्म्मं प्रियां त्वं धर्म्मचारिणीम् ।
हिरण्मय्याः प्रतिकृतेः पुण्यप्रतिकृतिमध्वरे ॥"

In fact, Sita is ever a sobre devoted wife ; only once she cuts joke with Lakshmana (e. g. "इयमपि अपराका") ।

Laksnmana is depicted as an unselfish brother following Rama obediently. The impression he makes here is that he feels pride in obeying his brother and tries to glorify his brother for his manly heroic deeds. *Chandraketu* is Lakshmana's worthy son and a befitting fighter of the solar race. He is so frank that he even does not hesitate to be a friend of his adversary as well.

Lava and *Kusa* are worthy sons of a worthy Kshattriya father and act as true disciples of a great sage like Valmiki and stick to the duties cf a Kshattriya. Thus they caught hold of the sacrifical horse. They are reverent to the aged as well.

Janaka is painted as a great learned restrained saint overcome with grief fo his daughter's misfortune.

Kausalya as a noble queen of Dasaratha is all tenderness. Though her son Rama was dearest to her, still she did not like his company for he cruelly renounced Sita. This shows her just reasoning power as shining above affection. At first sight of Lava, she alone saw his similarity with Rama , so keen is her observatian even during mqurning.

Arundhati, Ganga. Prithvi are God-like women and play part in bringing solace and re-union of Sita and Rama.

Valmiki is all kindness (cp. मा निषाद etc. Act II) and acts here like Providence—and manages everything to unite Rama and Sita, for he did not like that a chaste lady like Sita should undergo all these miseries.

XI, A bird's eye glance on Bhavabhuti and Kalidasa

(With reference to Uttaracharita and Sakuntala).

Both these books depict true love. But Sita is a higher and purer lady than Sakuntala. In one the love was post-natal and in the other it is ante-natal, herein lies the defeciency in Sakuntala's character. Her love was without Kanva's permission, and further love in her was आश्रमव्यापारविरोधी, under the circumstances she had to suffer much by way of atonement. So we say Sita's character is much higher than Sakuntala's. Sita indeed is the true type of lady as conceived by our ancient sages But both were tender, attached to husbands and behaved as सती though forsaken by their masters and both were lovers of animals and hermitage sites. But Kalidasa depictsfine aspects and beauties of nature, whereas Bhavabhuti depicts nature's sublime and grand aspects only (cp कार्य्या सैकतलीमहंसमिथुना' —in Sak, and see end of Act II Uttar, also "दधति कुहरभाजामत्र भल्लूकयूनाम्—Uttar). In fact, Kalidasa paints fine things whereas भवभूति serious things. भवभूति is also more sentimental than Kalidasa—he weeps and makes others also weep (cp. "अपि ग्रावा रोदत्यपि दलति वज्रस्यहृदयम्) । Kalidasa however paints sentiments in such a way that his readers sympathise with him ("कथं नु पीड्यन्ते गृहिणो दुःखैनवैः"—Sak. IV). Kalidasa's beauty lay in this that he made the Art he painted a concealed one, whereas Bhavabbuti makes it open (cp "अद्वं तं सुखदुःखयोरनुगुणं सर्वास्ववस्थासु यत्" —Uttar. and "न मिश्रयति वाचो यद्यपि"—&c. Sak.). Like Kalidasa too Bhavabhuti was in sympathy (or—felt) with what he described, but in descriptions, he dabbled in excess, for to him excess was the

vivifying principle of all Art. In fact Kalidasa's verses glided on with restraint, but Bhavabhuti's without restraint. But in रसात्मता, धर्मात्मता and ऐकबोध. Bhavabhvti was Kalidasa's disciple indeed. Thus sentiment prevails in both these above plays (रसात्मता), and in each we find one is to repent for his actions—Rama and Dushyanta repented for removing their wives—this is धर्मात्मता) . and both the poets become one with the thing described—ऐक्य । Bhavabhuti's characters and descriptions are over-sentimental, whereas Kalidasa's characters behave in a befitting manner. Thus Rama weeps and repents more than Dushyanta. Lastly Kalidass is modest though confident, whereas Bhavabhuti is proud of his confidence—of "यंब्रह्माणमियं देवीवाक् वश्येवानु वर्त्तते" etc. Macdonall says "While other Indian poets dwell on the delicate and mild beauties of nature, Bhavabhuti loves to depict her grand sublime aspects, doubtless owing to the influence on his mind of the southern mountains, of his native land. He is moreover. skilfull not only in drawing characters inspired by tender and noble sentiment, but in giving effective expression in depth and force of impression." See also 'sources of Uttar"—above. for comparison of Sita and Sakuntala.

टीकाकृतोमङ्गलाचरणम्

वाणीं शिवञ्च जनकञ्च गुरुं च नत्वा
पूर्वोक्तिमर्म च मया वहुधा विभाव्य ।
व्याख्या व्यधायि सरला भवभूतिवाके
बालप्रवोधजननी मितभाषिणीयम् ॥ १ ॥
दुर्भेद्‌वन्धविषमा पुनरत्र वाणी
को नाम तामुत करोतु सुखप्रवेशाम् ।
मोघं श्रम मतिमतामपि पश्यतो मे
दुश्चेष्टितं जड़धियो विवुधाः क्षमध्वम् ॥२॥
साधु विधातुमशक्यं यदि कृत्यं यतते जनस्तथापि ।
श्रममिह तेन सुदुर्गं सारदारञ्जनो वितनोति ॥३॥

महाकविश्रीभवभूतिप्रणीतम्

उत्तरचरितम् ।

प्रथमोऽङ्कः ।

(*i*) इदं गुरुभ्यः पूर्वेभ्यो नमोवाकं प्रशास्महे ।
विन्देम देवतां वाचममृतामात्मनः कलाम् ॥१॥

With the utterance of *Namas* unto old masters, we pray that we might attain Speech Divine, the immutable light of *Brahman* Or—Here, we utter the word *Namas* unto the old masters that we might...*Brahman.* (1)

मितभाषिणी । अन्वयः—पूर्वेभ्यो गुरुभ्यो नमोवाकम् ‘ आत्मनः अमृतां कलां देवतां वाचं विन्देम ’ इदं प्रशास्महे । यद्वा—इदं पूर्वेभ्यो गुरुभ्यो नमोवाकं प्रशास्महे । आत्मनः अमृतां कलां देवतां वाचं विन्देम । व्याख्या —‘पूर्वेभ्यः’ प्राचीनेभ्यः ‘गुरुभ्यः’ रामायणादिप्रबन्धमुखेन उपदेष्टृभ्यः वाल्मीकिभासकालिदासादिभ्यः ‘नमः’ नमःशब्दस्य ‘वाकः’ उच्चारणं यस्मिन् कर्म्मणि अस्ति तत् यथा तथा (मत्वर्थीयः अच् । न हि बहुव्रीहिः षष्ठ्या वैयधिकरण्यस्य तत्र अनाकरत्वात्)—‘आत्मनः’ ब्रह्मणः ‘अमृताम्’ अनपायिनीं ‘कलां’ षोडशभागात्मिकां ‘देवतां देवस्वरूपां ‘वाचं’ वाणीं शब्दब्रह्मणः “सूक्ष्मा ”—संज्ञितां तुरीयां भिदाम् (उक्तञ्च—“वैखरी शब्दनिष्पत्तिर्मध्यमा श्रुतिगोचरा । द्योतितार्था च पश्यन्ती सूक्ष्मा वागनपायिनी ॥” इति) ‘विन्देम’ लभेमहि इदम्’—एतत् ‘प्रशास्महे आशास्महे । इति कवेरात्माकाङ्क्षानिवेदनम् (“अस्मदो द्वयोश्च” इति बहुवचनम्) । एष गुरुभ्यः प्रणामः तत्प्रसादात् शब्दब्रह्मणः सूक्ष्मा कला मे स्फुरतु ततो जीवन्मुक्तो विषयेषु स्वतन्त्रः स्याम् इति फलितम् (तदुक्तम्—“तस्यां विज्ञातमात्रायामधिकारो निवर्त्तते । पुरुषे षोडशकले तामाहुरमृतां कलाम् ।” इति) । पक्षे व्याख्यानम् —‘इदम्’ एतत् ‘पूर्वेभ्यो गुरुभ्यो नमः’ एव ‘वाकः’ शब्दः (कर्म्मणि घञ्) तं ‘प्रशास्महे’ उच्चारयामहे । एषोऽहं गुरुम् नौमि इत्यर्थः । किमर्थं प्रणाम इत्याह—‘आत्मनः अमृतां कलां देवतां वाचंविन्देम’ इत्यादि प्राग्वत् । उभयत्र—अमृतकलाविज्ञानफलं सर्वविषयेषु विमुखतां कामये । तच्च विज्ञानम् ऋतेगुरुप्रसादात् न सम्भवति । ततः प्रथमं गुरूनेव नौमि इति तात्पर्य्यम् । कविवचनमिदं नटमुखेन ।

Notes :—1. उत्तरचरितम्—चरितम् is रामस्य चरितम् the deeds of Rama. उत्तरं चरितम् the *latter* deeds of Rama. कर्मधा—। उत्तरचरितम् अधिकृत्य कृतं नाटकम् इति उत्तरचरितम् + अण् = उत्तरचरितम् the अण् disappearing by the Varttika "लुबाख्यायिकाभ्यो बहुलम्" Or, by transference of epithets (उपचार) the latter deeds of Rama are taken to mean the *book* on the latter deeds of Rama. Or again चरित is चरितवर्णन by लक्षणा। उत्तरं चरितमस्मिन् उत्तरचरितम् बहु—। Here *latter* means those happening after Rama's return from Lanka. The *prior* deeds are described by the poet in another Work named वीरचरितम् or महावीरचरितम्। The name of the drama is sometimes given as उत्तररामचरितम। But as the other drama is *never* spoken of वीररामचरितम् we prefer here the simple उत्तरचरितम् to उत्तररामचरितम्॥ उत्तरचरितम् is also रूढ़ on this work as पङ्कज is रूढ़ on lotus. In Sanskrit brevity is always laudable too, oragain उत्तर is best. In Ramayana राम is said as best person on Earth, our poet too speaks of Rama as लोकोत्तर in Act II. sl 7. Thus उत्तर means लोकोत्तर पुरुष। उत्तरस्य चरितम् अस्मिन् व्यधिवह, as in Bhashya under धातुलोपे। अङ्क Act. The अङ्क continues until *all* the actors leave the stage "अन्तनिष्क्रान्तनिखिलपात्रोऽङ्कः परिकीर्त्तितः" ॥ 3 इदम्—In the alternative Tika this refers to the *act* of salutation, the वाक्यार्थ of गुरुभ्यः प्रसारमहे। Hence *neuter* as in 'किमिदं द्युतिमा नमीयां न बिभ्रति यथा पुरा"—Kumara. Also इदमशरणैरद्याप्येवं प्रसीदत दृश्यते"—Act. III sl 32. 4. गुरुभ्यः—चतुर्थी सम्प्रदाने by the rule 'कर्म्मणा यमभिप्रैतिस सम्प्रदानम्"। नमस् is the कर्म in the 1st व्याख्या and it is intended for गुरु। In the second, the कर्म is नमोवाक which again is meant for गुरु। The चतुर्थी has nothing to do with the नमस् शब्द here, because we still get चतुर्थी if नमस् is replaced by some other word. Thus गुरुभ्यः नमः वक्ति, गुरुभ्य· अभिवादनं वक्ति, वन्दनं वक्ति, &c. It is the क्रिया that

regulates the विभक्ति here 5. नमोवाकम्—वचनम् इतिवच + घञ् भावे वाकः। नमः इत्यस्य वाकः, ६ तत्—। नमोवाकः अस्ति अस्मिन् इति नमोवाक + अच मत्वर्थ = नमोवाकम् containing theutterance नमस्, सत् तथा तथा। Qual. प्रशास्महे। This suits the lst व्याख्या। For the 2nd, उच्यते इति वच + घञ् कर्म्मणि = वाकः word. नमः इति वाकः नमोवाकः the word नमस्, कर्म्मधा—। तम्। कर्म्म of प्रशास्महे। See next note. In the lst व्याख्या the मत्वर्थीय अच् is a necessity, because usually व्यधिकरण वहु viz नमः इत्यस्य वाकः अस्मिन् goes against Panini and should be avoided if possible "समानाधिकरणानां वहुब्रीहिर्वक्तव्यः व्यधिकरणानां मा भूत '—*Bhasya*. 6 प्रशास्महे —शास् is परस्मैपदी। The गणसूत्र "आङःशासु इच्छायाम्" gives आत्मनेपद to आ + शास only *not* to प्र + शास also. प्रशास्महे should be प्रशास्मः। But there are some who do not consider "अङःशासु—" to be always binding. This will justify प्रशास्महे। Madhava attributes this view to आत्रेय। Thus "प्रायेणायमाङ् पूर्व इति नमोवाकं प्रशास्महे' इति भवभूतिप्रयोगोपपत्तिरित्यात्रेयः '—*Dhatu-Vritti*. Thisimplies that शास् to mean इच्छा is usually (प्रायेण) preceded by आङ् (sometimes by other prefixes also) and then it has the आत्मनेपद। Nagesa takes theप्रायिकता in a wider sense He believes that not onlymay the उपसर्गchange but the meaning also. Hence he says प्रशास्महे means कुर्म्महे। Thus—"नमोवाकमिति वचेर्घञि वाकः। नम इति वचनमित्यर्थः, नमस्कारमिति यावत्। प्रशास्महे कुर्म्महे इत्यर्थः। धातूनामनेकार्थत्वात्" -*Subdendusekhara*. Viraraghava says "—' प्रशासनन्तु निर्देशः" ॥ 7. विन्देम—विद् here is लाभार्थक, तुदादि, उभयपदी)। "सत्तायां विद्यते ज्ञाने वेत्ति विन्ते विचारणे। विन्दते-विन्दती लाभे श्यन् लुक श्नम् शेष्विदं क्रमात।' शकि लिङ्। The सूक्ष्मा कला is gained byकर्म्मयोग and ज्ञानयोग (See note 10). 8. देवतांवाचम्—देव एव इतिदेव + तल् स्वार्थे देवता। देव is masculine and देवता is feminine because sometimes स्वार्थिक affixes do give different gender and number to the resultant word. क्वचित् स्वार्थिका प्रकृतितो लिङ्गवचना-

न्यतिवर्त्तन्ते। देवता वाक here is a particular कला of ब्रह्मन् or आत्मन्। It is वाक् or शब्द in its subtlest form (सूक्ष्मा वाक्) and is different from what is popularly called वाग्देवी (See under यं ब्रह्माणम् etc.—below). अमृताम्—मृतं मरणम् अपायः। अविद्यमानं मृतंयस्याः, बहु— । ताम् । The सूक्ष्मा कला is supposed to be immutable (अमृता i.e. अविकारा)। cp.—"सूक्ष्मावागनपायिनी"। 10. आत्मनः कलाम्—कला is the 16th part. This कला is supposed to reside at मूलाधार। "सा हि सर्वस्यप्राणापानान्तरालवर्त्तिनी विगतप्रादुर्भावतिरोभावा सम्यकप्रयोजनपरिशीलनात्मना कर्मयोगेन, मननादिना ज्ञानयोगेन च, सम्यगधिगम्यते"—*Ratneswar*.

II. *Remark*—(a) Some, from old rhetorical treatises suggest this reading here of the 2nd line of the verse "वन्दामहे च तां वाचममृतामात्मनः कलाम्"। But prefer our reading, it is more explicit. (b) For 'अमृता कला' also compare—स्थानेषु विवृते वायौ कृतवर्ण परिग्रहा। वैखरी वाक प्रयोक्तॄणां प्राणवृत्तिनिबन्धिनी॥ केवलं बुद्ध्युपादानक्रमरूपानुपातिनीप्राणवृत्तिमतिक्रम्य मध्यमा वाक प्रवर्त्तते॥ अविभागा तु पश्यन्ती सर्वतः संहृतक्रमा। स्वरूपज्योतिरेवान्तः सैषा वागनपायिनी। सैषा संकीर्य्यमानापि नित्यमागन्तुकैर्मलैः। अन्त्याकलेव मोक्षस्य नात्यन्तमभिभूयते। तस्यां दृष्टस्वरूपायामधिकारो निवर्त्तते पुरुषे षोड़षशकले तामाहु अमृतां कलाम्॥

(*ii*) (नान्द्यन्ते) सूत्रधारः—अलमतिविस्तरेण। अद्य खलु भगवतः कालप्रियनाथस्य यात्रायाम् आर्य्यमिश्रान् विज्ञापयामि। एवमत्रभवन्तो विदाङ्कुर्वन्तु—अस्ति तत्रभवान् काश्यपः श्रीकण्ठपदलाञ्छनः पदवाक्यप्रमाणतत्त्वज्ञो भवभूतिर्नाम जातुकर्णीपुत्रः (सु—)

(*After the Nandi*) Manager—Away with much prolixity, I address the honourable gentlemen to-day at the festival of the mighty Kalariyanatha. Let these respectable people know it thus—There is an illustrious descendant of Kasyapa, marked with the epithet Srikantha versed in the essence of the regulations on words and sentences (Grammar), born of the mother of the jatukarnya *Gotra*, Bhavabhuti by name. (Man.)—

मित—। नान्द्याः' पूर्वरङ्गाख्याया मङ्गलक्रियायाः अन्ते अवसाने सूत्रं कथासूत्रं धारयतीति सूत्रधारः' नटानां नेता स्थापकनामा नटः कथयति। अलमिति। किं कथयति इत्याह— अतिविस्तरेण' बाहुल्येन 'अलम्' संक्षेपतः कर्त्तव्यं निवेदयामि। 'अद्य खलु भगवत कालप्रियनाथस्य, अत्रैव स्थापितस्य शिवलिङ्गविशेषस्य 'यात्रायाम्' उत्सवे समवेतान् 'आर्य्यमिश्रान् पूज्यान् महानुभावान् 'विज्ञापयामि' बोधयामि। अत्रभवन्तः पूज्या इमे एव' विदाङ्कुर्वन्तु इत्थं जानन्तु। बेद्यमाह—'तत्रभवान् काश्यपः' काश्यपसगोत्रः पूज्यः श्रीकण्ठः' इति 'पदं' लाञ्छनं चिह्नं यस्य तादृशः श्रीकण्ठोपाधिक इत्यर्थ पदानां' सुप्तिङन्तानां वाक्यानां' सम्भूयार्थाभिधायिनां पदकदम्बानाञ्च यानि 'प्रमाणानि' अनुशासनानि तेषां 'तत्त्वज्ञः' मर्म्मवित् 'भवभूतिः इति प्रसिद्धः 'जातुकर्ण्याः' जातुकर्ण्यगोत्रोद्भवायाः कस्याश्चित् ब्राह्मण्याः पुत्रः अस्ति'।

Notes—I. नाद्यन्ते—नन्दनं नन्दः rejoicing, भावे घञ्। नन्दे नन्दात्, नन्देन वा क्रियते पठ्यते वा इति नन्द+अण् शैषिकः स्त्रियां नान्दी। It is often only a benedictory verse. "देवद्विजनृपादीनामाशीर्वादपरायणा। नन्दति देवता यस्मात्तस्मान्नान्दी प्रकीर्त्तिता॥" Here by नान्दी the poet refers to *all* those observances which precede the acting. The benedictory verse is only one of them. Collectively these are known as पूर्वरङ्ग। "यन्नाट्यवस्तुनः पूर्वरङ्गविघ्नोपशान्तये। कुशीलवाः प्रकुर्वन्ति पूर्वरङ्गः स उच्यते॥ प्रत्याहारादिकान्यङ्गान्यस्य भूयांसि यद्यपि। तथाप्यवश्यं कर्त्तव्या नान्दी विघ्नोपशान्तये॥" The drift is—The ceremonies are numerous. But the benedictory verse (नान्दी) is indispensable though the rest may be omitted. The verse 'इदं गुरुभ्यः—" does not satisfy the definiton of a नान्दी as given above. It merely expresses the wish of the poet himself and is not the नान्दी। We have to suppose that the ceremonies have been observed and the नान्दी verse, whatever it was, was recited *outside* the stage. But the ways of Bhavabhuti are sometimes so unorthodox that it is quite possible that this very verse was 'meant to pass as नान्दी।

The procedure then would be that the सूत्रधार should enter the stage, recite the verse "इदं गुरुभ्य.— 'and thereafter commence the प्रस्तावना। 2. सूत्रधारः—सूत्र+धृ+णिच् स्वार्थे+अण् कर्त्तरि। 'पूर्वरङ्गं विधायादौ सूत्रधारे विनिर्गते। प्रविश्य तद्वदपरः काव्यमासूत्रयेन्नट॥" Hence the पूर्वरङ्गः is performed *outside*. the सूत्रधार enters *thereafter* (नान्द्यन्ते)। 3. विस्तरेण—वि+स्तृ+अप् भावे = विस्तरः With घञ् weget विस्तारः। Both refer to *expanse*. But the first to that of words only Thus वाक्यस्य विस्तरः but पटस्य विस्तारः। The rule is "प्रथने वावशब्दे"। 4 आर्य्यमिश्रान् —मिश्र is प्रशंसावचन। "मतल्लिकोद्दमिश्राः स्युः प्रकाण्डस्थलभित्तयः' इति गण-व्याख्याने। प्रशस्ता आर्य्या आर्य्यमिश्रा, the परनिपात of मिश्र being due to the rule 'प्रशंसावचनैश्च"। अत्रभवन्त —एतद्+जस (१मा)+त्रल स्वार्थे=अत्र, meaning एते। अत्र भवन्तः (कर्म्मधा etc) and need not necessarily be a compound. अत्रभवत्, तत्रभवत् &c. imply पूजा। 6 विदांकुर्वन्तु—विद्+लोट अन्तु निपातनात्। Optionally विदन्तु by the rule विदाङ्कुर्वन्त्वित्यन्यतरस्याम्'। 7 श्रीकण्ठ &c.—श्रीः सरस्वती कण्ठे अस्य श्रीकण्ठः a learned degree implying vast erudition. 3. भवभूतिः—this is the name of the poet. Viraraghava, however suggests that श्रीकण्ठः is the proper name given him by father. भवभूति is the name under which he is known to the world. He states the origin of the name thus—' एतत्कृत—साम्बा पुनातु भवभूतिपवित्रमूर्तिः—इति श्लोकश्रवणसन्तुष्टो राजा भवभूतिरित्येनं ख्यापयामास किञ्चासमै कवये ईश्वर एव भिक्षुरूपेण आगत्य भूति दत्तवान। एवञ्च भवात् भगवतो भूतिर्यस्य इति भवभूतिरित्यन्वथ इत्याहुः।" We suppose भवभूति was the name and श्रीकण्ठ the title. 9 जातूकर्णी &c—जतूकर्णस्य ऋषेर्गोत्रापत्यं स्त्रीइति जतूकर्ण+यञ्+ङीप्= जातुकर्ण्य+ङीप्=जातुकर्णी the य disappearing by the rule "हलस्तद्धितस्य"। पिता काश्यपः माता जातूकर्णी इति उभयोः कुलयोर्महात्म्यं कविरिति फलितम्।

(*iii*) (सू—) यं ब्रह्माणमियं देवी वाग् वश्येवानुवर्त्तते।
उत्तरं रामचरितं तत्प्रणीतं प्रयुज्यते ॥२॥ (सू—)

(Ma.—) Which Brahman this goddess Speech obeys like

one enslaved. The later deeds of Rama recorded by him (in the form of a drama) are being staged, 2. (Ma—).

मित—। 1. अन्वयः—यं ब्रह्माणम् इयं देवी वाक् वश्या इव अनुवर्त्तते। तत्प्रणीतम् उत्तरम् रामचरितं प्रयुज्यते। व्याख्या—'यं ब्रह्माण' विरिञ्चिमिव द्वितीयं यं भवभूतिम् 'इयं देवी वाक्' सरस्वती 'वश्या इव' अनुरक्ता इव रमणी 'अनुवर्त्तते' सेवते इति पूर्वेण सम्बन्धः (यच्छब्दस्य उत्तरवाक्यगतत्वेन अन्वयात् न तच्छब्दव्यपेक्षा)। भूपृष्ठे ब्रह्मा एवायं भवभूतिः। नाकपृष्ठस्य ब्रह्मण इव अस्यापि भार्य्या सरस्वती। परन्तु एषः भेद—नाकस्थं ब्रह्माणमिय पातिव्रत्यानुरोधात् सेवते, इमं पुनर्भूतलगतं ब्रह्माणं प्रेमविह्वला सती इत्याशय.। इयञ्च रूढ़ाहङ्कारकत्थना। श्लोकार्द्धमिदं पूर्वेण अन्वितम्—भवभूतिरस्ति यं ब्रह्माणम् इत्याद्यन्वयः। उत्तरार्द्धं तु—तेन भवभूतिना प्रणीतं नाटकाकारेण निवद्धम् 'उत्तरम्' अर्वाचीनम् अयोध्याप्रत्यावर्त्तनात् परं भूतं 'रामचरितं' रामचरितकथा 'प्रजुज्यते' अभिनीयते। इति विज्ञापयामि भवन्तोऽपि जानन्तु इति पूर्वेण सम्बन्धः।

Notes —1. ब्रह्माणम्—ब्रह्मन् means both प्रजापति and विप्र। 'ब्रह्मा विप्रः प्रजापतिः', इत्यमरः। विप्र is not intended here for, then the poet would have written the more familiar word ब्राह्मण। 'यंब्राह्मणमियं देवो' suits the metre well. Besides, after what has gone before any one can infer that भवभूति was a विप्र without being explicitly told of it. In tact ब्रह्माणम् is deliberately used here to mean प्रजापति। The poet brags that he too is ब्रह्मा having सरस्वती for his wife! 2. देवी वाक्—This is सरस्वती the wife of प्रजापति। देवतां वाचम् of Sl. 1 is different, because सरस्वती (देवी वाक्) the poet already commands (वश्येवानुवर्त्तते), while he is only *hoping* to acquire देवतां वाचम् (विन्देम प्रज्ञामहे)। It is not any one and every one that can entertain such hope. Even Valmiki was inspired in अमृता कला after years of toil. The inspiration came to him quite unawares when he saw a fowler shoot down a heron. He did not know that he was inspired and had actually to be told of it by Brahman

himself. Comp. "पद्मयोनिरवोचत् ऋषे प्रबुद्धोऽसि वागात्मनि ब्रह्मणि" (Act II. para vii). 3. यं ब्रह्माणम् &c.—This half has to go with the prose preceding , for otherwise, the meaning becomes that the drama is the work of प्रजापति himself. At any rate the author is not identified. The work is of some ब्रह्मन् whom देवी वाक् अनुवर्तते, nothing showing that *that* ब्रह्मन् is भवभूति। On other grounds too it is necessary that यम् &c. be predicated of भवभूति। For, then the audience at once feels interested in the poet. Of such powers is the poet His drama is indeed worth staging on an occasion like this in preference to dramas by older poets. Also यमित्यादिकस्य विधेयत्वेन उपस्थापनात् सामाजिकानामुन् सुखीकरणम्। 4 तत्प्रणीतम्—As explained above the तद् here cannot go with the यम् preceding. यम् going with the prose preceding, the second half of the verse must be taken as an independent sentence. तद् in the second half will not require the correlative यद् because it then becomes प्रक्रान्तार्थ (contextual)—भवभूतिरस्ति तत्प्रणीतम् प्रयुज्यते is the context. 5 *Remark*—The audacious brag of the poet embodied in this verse taken along with the fact that the poet does not flatter the audience with any such compliment like "अभिरूपभूयिष्ठा परिषत्" "परिषदप्येषा गुणग्राहिणी" or his own "लब्धश्च वाक्यनिस्यन्दनिष्पेषनिकषो जनः" (in the Viracharita) is significant. The poet has lost respect for the audience. See *Remark* under para xi.

(*iv*) (सू—) एषोऽस्मि कार्यवशादायोध्यकस्तदानीन्तनश्च संवृत्तः। (समन्तादवलोक्य) भो भोः! यदा तावत् तत्रभवतः पौलस्त्यकुलधूमकेतोर्महाराजरामस्य अयमभिषेकसमयः रात्रिन्दिवमसंहृतानन्दनान्दीकः, तत् किमिति विश्रान्तचारणानि चत्वरस्थानानि ?

(Ma.—) Here, for the sake of my work I have become one of Ayodhya and of that time, (*Looking all round*) Ho ! Ho ! As this is the occasion for the coronation of the illustrious and mighty king Rama, a veritable Dhumaketu to the race of Paulastva, is indeed to have uninterrupted music of joy day and night, why then are the sites of court-yards deserted by bards ?

मित— । 'एषः' अहं कार्य्यवशात् प्रयोगानुरोधात् अभिनयहेतोः इत्यर्थः 'आयोध्यकः' अयोध्यायां दृष्ठः कश्चित् पुरुषः ("धन्वयोपधात्—" इति वुञ्) 'तदानीन्तनश्च' रामसमकालोऽपि 'संवृत्तः' जातः । इतः प्रभृति मां सूत्रधारं मा मन्यध्वं किन्तु कश्चिदायोध्यकम् तदनीन्तनञ्च रामाभिषेक-समये कश्चिदयोध्यां प्रविश्य वक्ष्यमाणं ब्रवीति इति जानीत इति भावः । तदेवाह—"भो भीः" पुरुषाः 'यदा तावत्' यतश्च पोलस्त्यकुलस्य' रावण-वंशस्य 'धूमकेतोः' उत्पातग्रहरूपस्य 'तत्रभवत' मान्यस्य 'महाराजस्य' राजचक्रवर्त्तिनी रामस्य अयम् अभिषेकसमयः रात्रिन्दिवम्' अहर्निशम् 'असंहता' अविच्छिन्ना 'आनन्दनान्दी' उत्सवतूर्य्यघोषः यस्मिन् तथाविधो वर्त्तते 'तत्' तस्मात् 'किमिति' कथं 'चत्वरस्थानानि' अङ्गनभूमयः विश्रान्तचारणानि' नटविरहितानि लक्ष्यते ? उत्सवस्य अविच्छेदो युक्तः, तथापि अङ्गनेषुनटा न दृश्यन्ते, कथमेतत् इति प्रश्नः ।

Notes.—1. एषोऽस्मि &c.—Henceforth सूत्रधार behaves as a man at Ayodhya. This is irregular. The सूत्रधार should have left the stage after Sl. 2, and entered again dressed as a man at Ayodhya. The stage direction should have been something like this—(निष्क्रान्तः । ततः प्रविशति कश्चिदायो-ध्यकः) । आयोध्यकः (समन्तादवलोक्य)—भो भोः &c. Instead, the man stays on and, dressed still as सूत्रधार, declares that he is no longer the सूत्रधार but a man of Ayodhya ! A most primitive method of stage management undoubtedly. Practically पात्रप्रवेश has taken place here and the प्रस्तावना has ended. आयोध्यकः—अयोध्यायां जातः इष्टो वा इति अयोध्या+वुञ्

शैषिकः। This is Viraraghava's reading. Others have आयोध्यिक, with ठञ् of the अध्यात्मादि class. The sense is तत्र भवः ('lives there' *not* 'born there') on which the Vrittikara remarks—'सत्ता भवत्यर्थो गृह्यते न जन्म, तत्र जात इति गतार्थत्वात्'। Hence आयोध्यिक means 'lives in Ayodhya' But later (Para vii) सूत्रधार says he is a वैदेशिक—resident of a foreign country—which contradicts आयोध्यिक here We therefore prefer आयोध्यक। 3. तदानीन्तनः—तस्मिन् काले इति तद्+ङि (ङमी)+दानीम् स्वार्थे=तदानीम्। तदानीं भव इति तदानीं+टुल। The तद् here refers to राम in रामचरितम् of Sl. 2. The maxim "सर्वनाम्नानुसन्धिवृत्तच्छन्नस्य" allows such reference even though the word referred to is compounded Comp 'पटोलपत्रं पित्तघ्नं मूलं तस्य कफापहम्' where तस्य refers to पटोल not पटोलपत्र। 4 यदा—अव्यय indicating हेतु। Comp. "यदा बुधैः सर्वगतस्त्वमुच्यसे न वेत्सि भावस्थमिमं कथं जनम—*Kumara*. With the reading यदि, translate—If, as you say, the time is &c. This expresses some doubt as to the character of the time, which is not desirable. 5. पौलस्त्य &d.—पुलस्ति or पुलस्त्य is one of the *Saptarshis* a son of Brahman. तस्य गोत्रापत्यंपुमान् इति पुलस्ति+यञ (or पुलस्त्य+अण्) पौलस्त्यः। धूमकेतु is a comet. Comets are supposed to augur misery to the world. By transference of epithets धूमकेतु means *like* धूमकेतु, i.e. पीडाकर। Some take धूमकेतु as अग्नि। "अग्न्युत्पाती धूमकेतु" इत्यमरः। 6. रात्रिन्दिवम्—दिवा is in अव्यय meaning दिवसे। रात्रौ च दिवा च इति रात्रिन्दिवा+अच् समासान्त रात्रिन्दिवम्। The द्वन्द्व, the समासान्त and the मकारान्तता of रात्रि are by निपातन in the rule "अचतुरविचतुर—(p 5. 4. 77). 7. असंहत etc — नान्दी here is तौर्यत्रिक music or दुन्दुभि drum. Comp. 'नान्दीनादप्रभृति हि कृतं मङ्गलं तैस्तदानीम्', "दिष्ट्या देवदुन्दुभिध्वनिः" &c.—*Viracharita*, आनन्द festive rite, आनन्दस्य नान्दी music accompanying a festive rite. असंहता आनन्दनान्दी यस्मिन्। बहु—। "नद्यृतश्च" इति कप् समासान्तः। This is predicated of

अभिषेकसमयः । The construction is either यदा · अभिषेकसमयः असंहतानन्दनान्दीकः or यदा असंहतानन्दनान्दीकः अभिषेकसमयः अयम् । The actor does not mean by समय the exact moment of coronation, but the whole period from a little before to a little after that moment. This is obvious from इयती दिवसान् उत्सव आसीत् (parav.). 8. विश्रान्त &c.—विश्रान्त absent. Comp. "विश्रान्तविग्रहकथो रतिमान् जनानाम्", "विरोधो विश्रान्तः प्रसरति रसो निर्वृतिघनः" (Act VI. Sl 11) चारण bard. विश्रान्ताः चारणाः येषु, बहु— । As अभिषेकसमयः is to be असंहतानन्दनान्दीकः why are चत्वरस्थानानि विश्रान्तचारणानि ? Evidently this cannot be a part of the prelude (प्रस्तावना) ।

(v) (प्रविश्य) नटः—भाव, प्रेषिता हि स्वगृहान् महाराजेन लङ्कासमरसुहृदो महात्मानः प्लवङ्गराक्षसाः, सभाजनोपस्थायिनश्च नानादिगन्तपावना ब्रह्मर्षयो राजर्षयश्च यदाराधनाय इयतो दिवसान् उत्सवश्चासीत् । (न—)

(*Entering*) Actor—Sir by the great king have been sent back to their homes the high-souled Monkeys and Rakshasas who were allies in the war in Lanka, the Brahmarshis and Rajarshis too—sanctifiers of the various quarters—that came for congratulation, and in whose honour festivities lasted all these days. (Ac—).

मित—। 'प्रविश्य' नेपथ्यात् रङ्गमाख्य नटः' आह—हे भाव' विद्वन् सूत्रधार ("भावो विद्वान्" इत्यमरः) 'लङ्कायां' वृत्तोयः 'समर ' रणः तत्र ये 'सुहृदः' मित्राणि उपकारिण इत्यर्थः ते 'महात्मानः' उदाराशया भूरिविक्रमाश्च 'प्लवङ्गराक्षसाः' सुग्रीवविभीषणादयः सहैव रामेण ये लङ्कायां समागताः तथा सभाजनाय' अभिषेककर्मणि अभिनन्दनाय 'उपस्थायिनः' समागताः नानादिगन्तपावनाः' परिपूतदशदिशः ब्रह्मर्षयो राजर्षयश्च महाराजेन' रामेण सम्राजा 'स्वगृहान् हि, निजभवनान्येव 'प्रेषिताः' प्रेरिताः (यत्नात् प्रजोज्ये कर्मणि क्तः), 'यदाराधनाय' येषां ब्रह्मर्षिराजर्षिप्लवङ्गराक्षसानाम् 'आराधनाय' सत्कृतये 'इयतो दिवसान्' व्याप्य 'उत्सव आसीत्' । गतेषु तेषु उत्सवो विरतः विश्रान्तचारणानि च चत्वरस्थानानि इति भावः ।

Notes.—1. नटः—This is irregular, No नट should enter the stage after one of the *Dramatis Personae* has made his appearnce. Here an आयोध्यक has already entered in the person of the सूत्रधार, and the नट is now entering to represent a second. These two are वैतालिक (bards) by profession as is obvious from "राजद्वारमेव स्वजातिसमयेन उपतिष्ठावः" below (para ix). 2. भाव—This is how a सूत्रधार has to be addressed by his companions. सूत्रधारं वदेद्भाव इतिवै पारिपार्श्विकः। Hence the नट takes the first comer as सूत्रधार and not as an आयोध्यक। By implication he himself too enters not as an आयोध्यक but as a नट of the stage set up at the यात्रा of कालप्रियनाथ। This is a glaring contradiction of "एषोऽस्मि कार्य्यवशात्—" above Besides as a नट of the local stage, he is utterly incompetent to explain the absence of चारण in the quadrangles at the time of Rama's coronation "प्रेषिता हि"—&c are therefore misplaced in his mouth. He can of course alter them if he enters as—acts the part of—another आयोध्यक। 3. प्रेषिताः—प्र+इष गतौ+णिच्=क्त कर्मणि। "गतिबुद्धि—" इत्यादिना द्विकमकत्वम्। 4 स्वगृहान्—"गृहं गृहाः पुंभूम्नि:" इतिवद्वत्वं पुंसि! The sense is—If taken in the masculine गृह *must* be in the plural. But if the plural is used it is not *necessarily* in the masculine, Comp. 'नीवारमुष्टिपचना गृहिणो गृहाणि"—Act I. sl. 25. 5. सङ्का &c—घोभनं हृदयमस्य gives सहृदय also सहृद्। The latter is by निपातन in the rule "सहृद्दुहृदौ मित्रामित्रयोः" which restricts सहृद् to मित्र and दुर्हृद् to an अमित्र (enemy) सहृदय means 'one with a good heart' whoever he may be—friend or foe . प्लवङ्ग &c —प्लु leap. प्लवेन गच्छन्ति इति प्लव+गम+खच् कर्तरि=प्लवङ्गाः or प्लवङ्गमाः। The खच् optionally elides the अम of गम by the Varttika 'खच डिद्वा वक्तव्यः'। रक्षांसि एव राक्षसाः। अण् स्वार्थे (see देवताम् sl. 1.) प्लवङ्गाश्च राक्षसाश्च। उक्त अणिकर्त्तकर्म of the क्रिया in प्रेषिताः। 7. सभाजन &c.—सभाज (to greet चुरादि) + णिच स्वार्थे+ल्युट् भावे=सभाजनम greeting. सभाजनाय

उपतिष्ठन्ते इति समाजन+उप+स्था+णिनि साधुकारिणि कर्त्तरि। Qual. both ब्रह्मर्षयः and राजर्षयः। 8. नाना &c.—नाना is an अव्यय meaning विभिन्न। दिशाम् अन्ताः। नाना दिगन्ताः। तान् पावयन्ति इति नानादिगन्त+पू+णिच्+लुयट् कर्त्तरि बाहुलकात्। Or, पाव्यन्ते एभिरिति ल्युट् करणे or ल्यु कर्त्तरि। This too refers to both ब्रह्मर्षयः and राजर्षयः। 9. ब्रह्मर्षयः—ब्रह्मकल्पा ऋषयः शाकपार्थिवादि। 10. राजर्षयः—राजान इमे ऋषय इव, उपमित-कर्मधा—। 11. च—This *twice* occurs here. The first (सभाज-नोपस्थायिनश्च) implies समुच्चय of ब्रह्मर्षि and राजर्षि with प्लवङ्ग and राक्षस in प्रेषणक्रिया। The second indicates समुच्चय of राजर्षि with ब्रह्मर्षि in पावनक्रिया। 12. यदारा &c.—आ+राध+णिच्+ल्युट् भावे=आराधनम्। येषां आराधनम्। तस्मै। तादर्थ्ये चतुर्थी। 13. इयतः इदं परिमाणमेषाम् एति इदम्+वतुप्=ई+वतुप्=ई+घतु=इयत् (प्रादिपदिक) which in the second case plural becomes इयतः। Qual दिवसान्। 14. दिवसान्—अत्यन्तसंयोगे २या। These long continued festivities were a necessity as much in celebration of the unique coronation as in honour of the renowned guests सूत्रधार recognises only the importance of the coronation itself (पौलस्त्यकुलधूमकेतोः अभिषेकसमयः) the नट draws attention to the high character of the guests—one set were the mighty allies of war and the other the sanctifiers of the whole universe. These are gone and the coronation has long been over hence the festivities cease.

(*iv*) (नट—) सम्प्रति हि—

वशिष्ठाधिष्ठिता देव्यो गता राघवमातरः।

अरुन्धतीं पुरस्कृत्य यज्ञे जामातुराश्रमम् ॥३॥

(Ac,—) Now again,—

The dowager queens the mothers of the Raghavas, led by Vasishtha, have gone to the house of their son-in-law at a sacrifice, with Arundhati at their head. (3)

मित—। एकं निमित्तमुक्तमुत्सवस्य अपरमपि शृणु वशिष्ठेति। अन्वयः—देव्यो राघवमातरः वशिष्ठाधिष्ठिताः (सत्यः) अरुन्धतीं पुरस्कृत्य

यज्ञे जामातुराश्रमं गताः ॥ व्याख्याः—देव्यः दशरथमहिष्यः राघवाणां रामादीनां 'मातरः' कौशल्याकैकयीछमित्राः 'वशिष्ठेन' कुलगुरुणा अधिष्ठिताः' गोपिता नीयमाना वा सत्यः 'अरुन्धतीं पुरस्कृत्य गुरुपत्नीत्वेन तामेव अग्रतो निधाय 'यज्ञे जामातुः' ऋष्यशृङ्गस्य आश्रमं गताः। यज्ञेऽपि जामातुरेव इत्यर्थादायाति । निमन्त्रितैर्वियुक्ता देवीभिश्च विरहिता राजधानी, तत् कथमुत्सव इति भावः।

Notes—वशिष्ठ &c—अतिशयेन वशी इति वशिन्+इष्ठम् वशिष्ठः। अतिशयेन वश्मान् gives वशिष्ठ with a dental. अधि+स्था+क्त कर्मणि अधिष्ठिताः ruled over Vasishtha was the guide of the royal house in *all* matters Comp "हा कष्टम्! अरुन्धतीवशिष्ठाधिष्ठितेषु रघुकदम्बकेषु .. कथमिदं जातम्"—Act II. para xiii. 2. राघव &c.—रामस्य मातरः is also seen. But it looks disrespectful for an ordinary bard (चारण) to refer to the king by name without some such qualifying epithet as देवस्य, महाराजस्य etc. Hence too we avoid the exposition राघवस्य मातरः, because राघवस्य in the singular refers specifically to राम। 3. पुरस्कृत्य—पुरस् is an अव्यय meaning अग्रे। पुरस्+कृ=ल्यप्, गतित्वत्—। The स of पुरस becomes विसर्ग and is then restored (to स) by the rule "नमस्पुरसोर्गत्योः"। 4 यज्ञे—यज्ञ here by लक्षणा is यज्ञकाल। तस्मिन्। अधि ष्मी। 5. *Remark*—This verse gives an additional reason why festivities have ceased—why विश्रान्तचारणानि चत्वरस्थानानि। But it may well be asked if the festivities had anything to do with the dowager queens or with वशिष्ठ and अरुन्धती either. On the other hand, if we suppose that the verse has no reference to festivities a reason has to be found why the नट unasked, speaks of the absence of the queen etc here. The fact is, as explained in the Introduction, Bhavabhuti anxious to remove the queen-mothers, Vasihtha and Arundhati from the capital and seizes the earliest opportunity to inform the audience of their absence without caring much to see if the information suits the occasion. [*N.B.*—The reading "सम्प्रति हि" is better here than अन्यच्च। See P. 65 notes also].

(*vii*) सूत्र—वैदेशिकोऽस्मीति पृच्छामि कः पुनर्जामाता ?
नटः—कन्यां दशरथो राजा शान्तां नाम व्यजीजनत् ।
अपत्यकृतिकां राज्ञे लोमपादाय यां ददौ ॥४॥ (न—)

Ma.—Who again is the son-in-law ? I ask because I live in a foreign land.

Ac —King Dasaratha begot a daughter, Santa by name whom he gave unto king Lomapada as an adoptive child (4)

मित— । कन्यामिति । राजा दशरथः शान्तां नाम कन्यां व्यजीजनत् जनयामास 'यां' शान्तां 'लोमपादाय राज्ञे' अपत्यकृतिकां' कृत्रिमां कन्यां 'ददौ' । अनपत्येन राज्ञा लोमपादेन याचितः स दशरथः स्वतनयां शान्तामस्मै कृत्रिमकन्यारूपेण ददौ इत्यर्थः । [Some here unnecessirely read "अस्त्येतन्निमित्तम्"]

Notes.—1. वैदेशिकः—विदेशे भव इति विदेश+ठञ्, अध्यात्मादि । भवः means वर्त्तमानः । "सत्ता भवत्यर्थी गृह्यते न जन्म" (See under आयोध्यकः, para 4) I am a man of Ayodhya , but as I live in a foreign land I am ignorant of the events of my own country and do not know who the son-in-law is.
2. व्यजीजनत्—वि+जन+णिच्+चङ्+लुङ तिप् । 3 अपत्य &c. —कृता एव इति कृत+कन् स्वार्थे=टाप् स्त्रियाम्=कृतिका artificial, adopted. अपत्यञ्चतत् कृतिका च अपत्यकृतिका, कर्मधा—, ताम् । कृतक कृतिका &c may appear either as विशेष्य or विशेषण in a कर्मधा— । The पूर्वनिपात is then unrestricted. Comp. "यस्यं नः पुत्रकृतकः पदवीं मृगस्ते"—*Sakuntala*, Act IV also , "कृतककलहं कृत्वा"—*Mundrarakshasa* , 'यस्योपान्ते कृतकतनयः कान्तया वर्द्धितो मे' *Meghaduta*. Or अपत्यं कृतिका, सुपसुपा । Or again अपत्यं कृतकम् अपत्यकृतकम् सुपसुपा । स्त्रियाम् अपत्यकृतक+टाप् ।

(*vii*) (न—) । विभाण्डकसुतस्तामृष्यशृङ्ग उपयेमे । तेन च साम्प्रतं द्वादशवार्षिकं सत्रमारब्धम् । तदनुरोधात् कठोरगर्भामपि वधूं जानकीं विमुच्य गुरुजनस्तत्र गतः ।

(Ac.—) Bibhandaka's son Rishyasringa, married her. And by him is now begun a sacrifice that will last for

twelve years. For its sake, the mother-in-law have gone leaving behind the daughter-in-law Janaki though her period of gestation is full (Or —though with a fully developed foetus).

मित — । 'तां' शान्तां मुनेः विभाण्डकस्य सुतः ऋष्यशृङ्गः उपयेमे' ("उपाद्यमः स्वकरणे" इत्यात्मनेपदम्)। 'तेन च' ऋष्यशृङ्गेन 'साम्प्रतम्' अधुना 'द्वादशवार्षिकं' द्वादशवर्षाणि भावि 'सत्रमारब्ध' यागः प्रकान्तः। 'तस्य' यज्ञस्य जामातुर्वा 'अनुरोधात्' गौरवाद्धेतोः कठोरगर्भामपि पूर्णगर्भामपि 'वधूं' जानकीं विमुच्य एकाकिनीं परित्यज्य 'गुरुजनः' श्वश्रूवर्गः 'तत्र गतः।

Notes—1. द्वादश &c.—द्वौ च दश च द्वादश द्वन्द्वः। Now द्वादशन् and वर्ष cannot be compounded into द्वादशवर्ष by "दिक्संख्ये संज्ञायाम्" because द्वादशवर्ष is not a संज्ञा। We compound by "तद्धितार्थोत्तरपदसमाहारे च"। Thus द्वादशवर्षाणि भविष्यति इति द्वादशवर्ष+टञ् (तद्धितार्थे द्विगु)=द्वादशवार्षिकम्। उभयपदवृद्धि by "अनुशतिकादीनाञ्च"। The prohibition "वर्षस्याभविष्यति" does not apply, because that is for those cases only in which उत्तरपदवृद्धि *alone* is enunciated. 2. तदनु &c. —अनुरोध is प्रतिबन्ध restraint. तस्य अनुरोधः the restraint put by it तस्मात्। The sense is—The sacrifice put a check to their free movements and forced them to be in attendance. The तद् here is better taken as referring to सत्र than to ऋष्यशृङ्ग। वशिष्ठ says 'जामातृयज्ञेन वयं निरुद्धाः' (sl. 11). So the निरोध (अनुरोध), restraint comes from जामातृ यज्ञ *not* from जामातृ। 8. कठोर &c.—कठोर fully developed. advanced. Comp. "कठोरताराधिपलाञ्छनच्छवि" "कठोरीभूतस्तु दिवसः" "परिणतकठोरपुष्कर" "कठोरपारावतकण्ठः" &c. गर्भ foetus, or by लक्षणा, the whole period of gestation. कठोरः गर्भः अस्याः बहु—। ताम्। This is absurd (See Intro—). 4. जानकीं विमुच्य। The words are ominous. A Fore-cast of जानकीविमोचन ? 5. गुरुजनः &c —This refers to Sita's mothers-in-law. This is not possible. No Indian mother-in-law would think of it (See Intro—).

(*ix*) सूत्र— । तत् किमनेन । एहि राजद्वारमेव स्वजातिसमयेन उपतिष्ठावः ।

नट—तेन हि निरूपयतु राज्ञः सुपरिशुद्धामुपस्थानस्तोत्रपद्धतिं भावः ।

Ma.—So away with this. Come let us attend at the royal gate as is the practice with our own caste.

Ac.—Then let your honour think out some absolutely faultless lines of panegyrics of attendance.

मित— । सूत्रेति । अनेन उत्सवविरामहेतुचिन्तनेन किम् किमपि न साध्यते । 'स्वा जाति' चारणजातिः तस्याः समयः' आचारः तेन हेतुना 'राजद्वारमेव उपतिष्ठावः उपसृत्य तिष्ठावः । वैतालिका वयम् राजद्वारे स्थित्वा राज्ञः स्तुतिपाठनमस्माकमाचरः, तत् एहि आचार पालयाम', अलमुत्सवालोचनरूपया अनधिकारचर्चया ॥ नटेति । 'तेन हि निमित्तेन स्तुतिः पठनीया इति हेतोः—'भाव' मान्यो भवान् 'राज्ञः सुपरिशुद्धाम् उपस्थानस्य सेवाया या 'स्तोत्रपद्धतिः स्तुतिपदावलिः तां 'निरूपयतु' चिन्तयतु । -

Notes.—1. सूत्रधारः—This is irregular. He is no longer सूत्रधार now. Say आयोध्यकः । 2. स्वजाति &c.—Here सूत्रधार describes himself and the नट as two bards (वैतालिक) of अयोध्या । This is all right. 3. उपस्थान etc.—उपस्थान attendance. पादाभ्यां हन्यते इति पाद्+हन्+क्तिन् कर्मणि=पद्धति track hence line string of panegyrics for attendance. पाद become पत् by 'हिमकाषिहतिषु च' । सुपरिशुद्धाम् is important as giving occasion for सूत्रधार's remark and the नट's hint at the slander of the queen. 4. *Remark*—We expect the bards to recite some verses but they do not do it. (See sl. 7)

(*x*) सूत्रधारः—मारिष,

सर्वथा व्यवहर्त्तव्यं कुतो ह्यवचनीयता ।

यथा स्त्रीणां तथा वाचां साधुत्वे दुर्जनो जनः ॥५॥

Ma.—Good man, we have to work, by all means. Whence, pray is there escape from criticism ? People are wicked in the matter of the purity of speeches as of women.

मित—। मारिष आर्य्य 'सर्वथा' सर्वप्रकारेण येन केनापि प्रकारेण इत्यर्थः "व्यवहर्त्तव्यं" व्यवहारः कर्त्तव्यः आचारो रक्षितव्यः। यथाशक्ति कर्त्तव्योऽनुष्ठेयः। 'कुतो हि' कुत एव 'अवचनीयता' निन्दाभावो भवेत् 'न कुतोऽपि इत्यर्थः। निन्दा स्यादेव, अतः सुपरिशुद्धया वा अपरिशुद्धया यया कयापि पद्धत्या स्तोतव्यम्। 'स्तुतिः कृता इतेत्याह्म्, शुद्धा वा अशुद्धा वा पदावलिरित्यकिञ्चित्करमिति भावः। कारणमाह,—'जनः यथा स्त्रीणां साधुत्वे दुर्जनः' खलः। अतः सुपरिशुद्धामपि वाचम् अशुद्धा इति जनो वर्णयेत्।

Notes.—1 **मारिष**—The **सूत्रधार** has to address his attendants as **मार्ष** or **मारिष**। Here the **सूत्रधार** himself forgets that he is an **आयोध्यक**। 2. **सर्वथा**—By all means, after all. any how etc. Comp. "**सर्वथा पीतं दुःशासनस्य रक्तम**"। 3. **व्यवहर्त्तव्यम्**—वि+अव+हृ+तव्य भावे। **व्यवहार** routine, conduct etc. **व्यवहर्त्तव्यम्** the routine has to be followed. **सर्वथा व्यवहर्त्तव्यम्**। The routine has after all (by all means etc.) to be followed. We must any how do our work. Duty must not be omitted , Whether done properly or improperly is immaterial 3. **अवचनीयता—वच+अनीयर कर्मणि= वचनीयम्** that which is to be condemned **न वचनीयम्** not to be condemned, irreproachable. **तस्य भावः**। The sense is—Any way you cannot escape criticism , why then this solicitude for a **सुपरिशुद्धा स्तोत्रपद्धतिः** ? 4. *Remark*—Here "**वाचां साधुत्वे दुर्जनो जनः**" seems to be a fling at the audience. The audience is fault-finding ; my previous **वीरचरित** work has been unjustly criticised See *Remark* under Para 'vi'. This has an important bearing on the sequence of Bhavabhutis dramas (See *Intro*).

(*xi*) नटः—प्रतिदुर्जन इति वक्तव्यम्—

देव्यामपि हि वैदेह्यां सापवादो यतो जनः ।
रक्षोगृहस्थितिर्मूलमग्निशुद्धौ त्वनिश्चयः ॥६॥

Ac.—You should say "extremely wicked."

For, people have evil words even in the matter of Queen Vaidehi. The stay in the house of the Rakshasa is the root of it Incredulity indeed prevails in the declaration of even purity by Fire 6

मित—। अतिदुर्जनत्वे हेतुमाह—'यतः' यस्मात् 'जनः देव्यां वैदेह्यामपि' या 'हि स्वयं देहवतीव साधुता तस्यामपि 'सापवादो हि' असाधुतासमारोपपर एव। किं तादृशस्य समारोपस्य बीजम् इत्याह—'रक्षसः' रावणस्य गृहे या स्थितिः' निवासः सा एव 'मूलं' वचनीयबीजम्। ननु अग्नौ शुद्धा सा, तत् कुतो वचनीयता इत्याह—'अग्नौ' या 'शुद्धिः' तत्र 'तु अनिश्चयः' अप्रत्यय' एव। इति शङ्कास्थानस्य सूचना।

(*xii*) सूत्रधारः—यदि पुनरियं किंवदन्ती महाराजं स्पृशेत् ततः कष्टं स्यात्।

नटः—सर्वथा ऋषयो देवताश्च श्रेयो विधास्यन्ति।

(परिक्रम्य) भो भोः क्वेदानीं महाराज? (आकर्ण्य) एवं जनाः कथयन्ति—

स्नेहात् सभाजयितुमेत्य दिनान्यमूनि
नीत्वोत्सवेन जनकोऽद्य गतो विदेहान्।
देव्यास्ततो विमनसः परिसान्त्वनाय।
धर्मासनाद्विशति वासगृहं नरेन्द्रः ॥७॥

(इति निष्क्रान्तौ)। प्रस्तावना।

Ma.—It would be painful if this gossip reach the Maharaja.

Ac.—The saints and the gods will, by all means promote welfare. (*Going round the stage*) Ho! Ho! Where is the Maharaja now? (*Listening*) Thus do people say,—

Through affection having come to greet and having passed these days in festivities, Janaka has gone back today to Videha; and to console the queen, who is sad the-

reat, the lord of mean enters the bed-room from the seat of justice (*Exeunt*).

End of Prelude.

मित—! सूत्रेति। नाहं जनानां सापवादतां गणयामि। पुनः पक्षान्तरे 'यदि इयं किंवदन्ती 'महाराजं स्पृशेत्' तस्यकर्णगोचरा भवेत् 'ततः कष्टं स्यात् विपद्भवेत्। इति भाविन्या विपत्तेः सूचना॥ नटेति—सत्यं कष्टं स्यात् परम् 'ऋषयः' वाल्मीकिप्रभृतयः 'देवताश्च' पृथ्वी-भागीरथ्यादयः 'सर्वथा सर्वप्रयत्नेन श्रेयो विधास्यति' कष्टमपनुद्य मङ्गलं करिष्यति। इति सप्तमाङ्कप्रतिबिम्बनम्। तत उपस्थानस्तोत्रपाठार्थं परिक्रम्य' रङ्गमञ्च परितो गत्वा अलक्षिहिते राजनि वृथा स्तव इति तत्रत्यान् पृच्छति 'भोः भोः' इत्यादि। आकाशभाषितमेतत्' उत्तरं श्रुत्वा आह—'जनाः' इत्यादि। स्नेहादिति—अन्वयः। स्नेहात् सभाजयितुम् एत्य अमूनि दिनानि उत्सवेन नीत्वा अद्य जनकः विदेहान् गतः। नरेन्द्रः ततः विमनसो देव्याः परिसान्त्वनाय धर्मासनात् वासगृहं विशति। व्याख्या—स्नेहात् प्रीत्या 'सभाजयितुम्' परमकठोरसत्यपालनत्रैलोक्य-कण्टकोद्धारप्रभृतिषु कर्मसु अभिनन्दितुम् 'एत्य' अयोध्यां प्राप्य 'अमूनि दिनानि उत्सवेन प्रमोदेन 'नीत्वा अद्य जनकः' विदेहाधिपतिः देव्याः पिता इति शेषः 'विदेहान्' निजजनपदं प्रति गतः'। 'नरेन्द्रः' रामः 'ततः तस्मात् जनकगमनात् हेतोः 'विमनसः क्षुब्धायाः 'देव्याः' महिष्याः सीतायाः 'परिसान्त्वनाय' विनोदनाय 'धर्मासनात् सभामण्डपस्थितात् राजपीठात् धर्मासनं परित्यज्य इत्यर्थः (ल्यप्लोपे पञ्चमी) वासगृहं' शयनमन्दिरं 'विशति'। एवं जनाः कथयन्ति' इति पूर्वेण सम्बन्धः। नास्त्यत्र महाराजः तदलं स्तोत्रपाठेन एहि यामः इति 'निष्कान्तौ' नटसूत्रधारौ।

Notes.—1. किंवदन्ती—किं वदति इति किम्+वद् झच् कर्त्तरि स्त्रियाम्=किंवदन्त+ङीष् गौरादि। Rumour. वर्द्धमान seems to suggest—वद्+शतृ स्त्रियां=वदन्ती that which says, i. e. a rumour. कुत्सिता वदन्ती or किञ्चित् वदन्ती। 2. कष्टं स्यात्—This hints at the impending separation of the royal pair as related towards the end of the first Act. 3. सर्वथा—by every means. See ante. ऋषयः देवताश्च—The reference to sage Valmiki ऋषिः and the geddesses Earth and Ganga (देवता)

as we find in the Seventh Act. 4. श्रेयः—अतिशयेनप्रशस्य+इति प्रशस्य+ईयसुन्। कष्टं स्यात् is assumed, but it will end happily through the intervention of Valmiki, Earth and Ganga. 5. परिक्रम्य—This is to go to the gate of the audience—chamber (राजद्वार para ix) 6. भो भोः &c.—The नट undertakes to gather all the information, because he is the man on the spot while other is a foreigner (वैदेशिक, para vii) This is addressed to people outside the stage. 7. आकर्ण्य—आ सम्यक कर्णेन गृहीत्वा इति आ+कर्ण+णिच् ल्यप। The reply is not heard by the audience. The enquirer feign that he has heard the reply and translates it to the audience. This is just the characteristic of an आकाशभाषित। "किं ब्रवीष्येव-मित्यादि विना पात्रं ब्रवीति यत्। श्रुत्वेवानुक्तमप्येकस्तत् स्यादाकाशभाषितम्।" The stage direction should have been—(परिक्रम्य—आकाशे)। Comp. our Sakuntala Act III, विष्कम्भक। As a rule there is no आकाशभाषित before actual staging has commenced. 8 उत्सवेन—करणे ३या। The उत्सव was in honour of अभिषेक and also in honour of जनक and also in honour of the august vistiors (para v) 9. विदेहान्—निमि the old ancestor of जनक, the founder of his race, lost his body through a curse and was thence forward known as विदेह। By transference of epithets विदेहस्य अनुचरा विदेहाः। Next विदेहानां निवासो जनपदः becomes विदेह+अण् विदेहाः the अण् disappearing by the rule "जनपदे लुप्"। Lastly the resultant word is masculine plural by the rule "लुयुक्तवद्व्यक्तिवचने"। 10. विमनसः—विक्षुब्धं मनो यस्याः स विमनाः बहु—। तस्याः। She was sorry for the parting with her father whom she had met after such a long and eventful interval. 11. परिसान्त्वनाय—देवीं परिसान्त्वयितुम् gives देव्याः परिसान्त्वनाय with ल्युट्। The चतुर्थी being by "तुमर्थाच्चभाववचनात्"। 12. धर्मासनात्—धर्म justice धर्मस्य आसनम् the seat of justice—Judgement-seat. 13. प्रस्तावना—प्र+स्तु+णिच्+युच् भावे स्त्रियाम्। That which introduces Prelude आमुख।

"नटो विदूषको वापि पारिपार्श्विक एव वा। सूत्रधारेण सहिताः संलापं यत्र कुर्वते॥ चित्रैर्वाक्यैः स्वकार्य्योत्थैः प्रस्तुताक्षेपिभिर्मिथः आमुखं तत्तु विज्ञेयं नाम्ना प्रस्तावनापि सा॥"—*Sahitya-Darpana*·The word प्रस्तुताक्षेपिभिः has tobe noted carefully. What is the प्रस्तुत—matter in hand—here ? It is the acting of the उत्तरचरित (para iii). That acting—the प्रस्तुत—has not become आक्षिप्त *here* in Sl. 7. It became आक्षिप्त with the words एषोऽहम् &c. In para iv The प्रस्तावना should have ended there There can be little or no doubt that the poet had really intended to close his प्रस्तावना there , and all that follows was meant by him to be a विष्कम्भक conducted by two men of Ayodhya Subsequently purists perhaps thought it unorthodox for the सूत्रधार *alone* to introduce the acting—सूत्रधारेण सहिताः supposes the presence of others along with the सूत्रधार। Accordingly with more zeal than thought they, it seems, altered the whole of the text from (समन्ताद् वलोक्य) भो भोः &c , down to इति निष्क्रान्तौ here. The result has been a mass of inconsistencies as noted during our progress above Unorthodoxy surely is not desirable , but it is no doubt a much lesser evil than inconsistency.

Again, in the matter of the introduction of the acting by सूत्रधार *alone*, भवभूति can be supported by the case of भास as precedent. Bhasa's drama's are all introduced by सूत्रधार *alone*. The canons of dramaturgy were formulated, not perhaps even excluding the नाट्यशास्त्र of Bharata, long after भास। But even after these cannons had taken entire possession of the Indian stages, भास, was not despised for his unrothodxy. Thus Bana says—"सूत्रधारकृतारम्भैर्नाटकैर्बहुभूमिकैः। सपताकैर्यशो लेभे भासो देवकुलैरिव॥" Here "सूत्रधारकृतारम्भैः" in not intended to imply a blemish Before Bana, Kalidasa had said "प्रथितयशसां भाससौमिल्लककविपुत्रादीनां स्थितेष्वपि प्रबन्धेषु" &c. It is thus difficult to see what moved the purists to alter Bhavabhuti's text and incorporate his विष्कम्भक into the प्रस्तावना। It has made the प्रस्तावना by no means short one as is expected.

from his भक्तमतिविस्तरेण in para *xi*. If on the other hand it be contended that all this work is the poet's own and purists had nothing to do with it, then we must say that Bhavabhuti was a poet who cared little for his reputation. [N.B.—The reading "सम्प्रतिहि" is more emphatic and poetic than "अन्यच्च" in Para VI. p. 55 making the cause वाङ्मय, so we reject 'अस्त्येतन्निमित्तम्" in the beginning of the para. 7]

(*XIII*) (ततः प्रविशत्युपविष्टो रामः सीता च)

रामः—देवि वैदेहि, समाश्वसिहि। ते हि गुरवो न शक्नुवन्ति विमोक्तुमस्मान्।

किन्त्वनुष्ठाननित्यत्वं स्वातन्त्र्यमपकर्षति।
सङ्कटा ह्याहिताग्नीनां प्रत्यवायैर्गृहस्थता॥ ८॥

(*Then enter Rama and Sita, seated.*)

RAMA—Queen Vaidehi, cheer up Such elders cannot indeed leave us.

But obligatory observance (*lit.* obligatoriness of observances) curtail freedom The position of a householder who cherishes fire is risky on account of sin (through lapses) 8.

मित। 'ते' तथाविधाः स्नेहमयाः 'गुरवः' पित्रादयः 'अस्मान् विमोक्तुं न हि शक्नुवन्ति'॥ कथं तर्हि विमुक्ता एव वयमित्यत्राह—किन्त्विति। अन्वयः—किन्तु अनुष्ठाननित्यत्वं स्वातन्त्र्यम् अपकर्षति। आहिताग्नीनां गृहस्थता प्रत्यवायैः सङ्कटा हि। व्याख्या—'किन्तु' पक्षान्तरे 'अनुष्ठानानां कर्त्तव्यविधीनां 'नित्यत्वम्' अनुल्लङ्घनीयता 'स्वातन्त्र्यं' यथेच्छप्रवृत्तिम् अपकर्षति नियमयति सङ्कोचयति। स्नेहात् इहैवावस्थाने जनकस्य प्रवृत्तिरस्ति किन्तु नित्यानुष्ठेयानां विधीनामनुरोधात् सः अस्मान् परित्यज्य गत.। परतन्त्रेण सता तेनाय परित्यागः अत्र तत्र, स्नेहाभावं मा शङ्किष्टाः। धीरा भव, पुनरेष्यति तत्रभवान् पिता ते। इत्यचिरभाविनि रामकर्त्तृक-सीतापरित्यागे राममुखेनैव दैवप्रेरिता काप्यपूर्वा समाश्वासनवाणी वैदेह्याः। कुतः पुनर्जनकस्य अनुष्ठाननित्यता—इत्यत्राह 'आहिताग्नीनां' साग्निकानां

'गृहस्थता' गार्हस्थ्यं 'प्रत्यवायैः' पापै 'नित्यानुष्ठानविधानजनितैः' 'सङ्कटा हि' आपत्करी एव। तस्य हि राजर्षेवैवाहिकोऽग्निराहित आस्ते तत्र नित्यहोमस्तेन अनुष्ठेय, अननुष्ठाने तु प्रत्यवाय इति भावः।

Notes.—1, ते गुरवः—This refers either to Janaka alone or to all elders of his type. If to Janaka alone, say गौरवे बहुवचनम्। 2. स्वातन्त्र्यम्—स्वमात्मा तन्त्रं यस्य स—स्वतन्त्रः one to whom his self is the final authority, i. e., independent, बहु —। तस्य भाव इति स्वतन्त्र+ष्यञ्। Independence. 3. आहिताग्नीनाम्—आ+धा क्त कर्मणि आहितः set up आहितः अग्नि अनेन आहिताग्निः or अग्न्याहितः। The पूर्वनिपात of आहित is optional by the rule "वाहिताग्न्यादिषु"। 4 प्रत्यवायैः—प्रत्यवायते निम्नं प्रति गच्छति एभिः इति प्रति+अव अय घञ् करणे प्रत्यवायाः those that cause one's downfall, i. e. sin. करणे ऐया।

(*XIV*) सीता—जाणामि अज्जउत्त। किन्दु सन्दावआरिणो बन्धुअणविप्पओआ होन्ति [जानामि आर्यपुत्र, किन्तु सन्तापकारिणो बन्धुजनविप्रयोगा भवन्ति]।

रामः—एवमेतत। एते हि हृदयमर्मभिदः संसारभावाः येभ्यो बीभत्समानाः सन्त्यज्य सर्वान् कामान् अरण्ये विश्राम्यन्ति मनीषिणः।

(प्रविश्य) कञ्चुकी—रामभद्र—(इत्यर्धोक्ते साशङ्कम्) महाराज—

रामः—(सस्मितम्)—आर्य, ननु रामभद्र इत्येव मां प्रति उपचारः शोभते तातपरिजनस्य। तत् यथाभ्यस्तमभिधीयताम्।

कञ्चुकी—ऋष्यशृङ्गाश्रमादष्टावक्रः सम्प्राप्तः।

सीता—अज्ज तदो किं विलम्बीअदि [आर्य, ततः किं विलम्ब्यते] ?

रामः—त्वरितं प्रवेशय । (कञ्चुकी निष्क्रान्तः) ।

SITA—I know it my husband but separation from kinsmen causes grief.

RAMA—So it does These are just those heart rending traits of the world revolting from which the wise rest in the woods having renounced all cravings

(*Entering*)—Chamberlain—Rambhadra—(*At this part utterance—With timidity*) O Great king—

Rama (*With smile*)—But Noble Sir, this Ramabhadra is indeed the form of address towards me that behoves the attendants of my father O speak as is your wont

Chamberlain—Ashtavakra has come from the hermitage of Rishyasringa

SITA—Noble Sir, why then delay ?

RAMA—Usher him in quick (*Exit Kanchuki*)

मित । जानामीति । कर्त्तव्यानुरोधात् स्निग्धजनपरित्यागी न हि स्नेहस्तज्यते गुरुभिरिति 'जानामि किन्तु सत्यपि ज्ञाने वन्धजनैः' पित्रादिभिः ये विप्रयोगाः' विरहाः ते सन्तापकारिणो भवन्ति । परित्यक्ता वदेही गुरुदु खा अपि स्नेहीऽपि भवता त्यक्त इति नैव मन्यते इति रामं प्रति तस्यैव दैवस्य जानकोमुखेन आश्वासवचनम् ॥ एवमिति एतत्' वन्धुजनविप्रयोगरूपं वस्तु एवम् ईदृश सन्तापकारि इति भावः । एते हि' इमे एव ते 'हृदयस्य मर्म भिन्दन्ति ये तादृशाः ससारस्य' जीवलोकस्य भावाः धर्मा येभ्यो वीभत्समान , जुगुप्समानाः यद्वा येभ्यः यैः हेतुभिः वीभत्समानाः वरूप्य' भजमाना मनीषिणः सर्वान् कामान् सन्त्यज्य अरण्ये निवसन्ति' ॥ कञ्चुकीति—कञ्चकः परिच्छद अस्यास्ति भमा इति कञ्चुकी अन्त पुरचरो वृद्धो ब्राह्मणः । अर्द्धम् उक्त्म, तस्मिन् ॥ आर्य्येति ननु इत्याक्षेपे । उपचार·'·आमन्त्रणपदम् । तातस्य दशरथस्य परिजन रामस्य पैतृको भृत्य इत्यर्थः, तस्य ॥

Notes—1 हृदय—&c—हृदयस्य. मर्म हृदयमर्म । तत् भिन्दन्ति इति हृदयमर्म+भिद् क्विप् कर्त्तरि । 2. येभ्यः वीभत्समानाः—वैरूप्यं भजमाना इति वध (भ्वादि-वैरूप्ये)+सन्+लटः स्थाने शानच कर्त्तरि=

बीभत्समानाः lit undergoing a change of attitude. Hence remotely जुगुप्सा is implied. Thus येभ्यः has अपादाने पञ्चमी by the Varttika "जुगुप्साविरामप्रमादार्थानामुपसंख्यानम्." I Or हेतौ ५मी। 3. उपचारः—उपचर्यतेऽनेन इति उप+चर घञ् करणे उपचारः mode of address. 4. तातपरिजनस्य—शेषे षष्ठी। तातपरिजनस्य सम्बन्धे शोभते। The chamberlain has to be an old Brahmana He is employed in the harem and is the senior officer there. "अन्तःपुरचरो विप्रो वृद्धो गुणगणान्वितः। सर्वकार्येषु कुशलः कञ्चुकीत्यभिधीयते' ॥ 5. यथाभ्यस्तम्—अभ्यस्तम् practised तत् अनतिक्रम्य यथाभ्यस्तम् अव्ययी। 6 किं विलम्ब्यते—Here in her eagerness Sita commits a breach of etiquette. "Why delay" is an order to lead him in *at once*—a peremptory order involving censure for the delay already made. But the king alone, as he is personally present there, is competent to pass, such an order. 7. त्वरितम् &c—Sita's—words have created an awkward situation for the chamberlain. Should he wait to hear Rama or should he forthwith go back as is desired by Sita ? Rama relieves the situation by formally ordering him to do what Sita wants. अष्टावक्रः इति संज्ञायां अष्टनशब्दस्य दीर्घः।

(*XV*) (प्रविश्य) अष्टावक्रः—स्वस्ति वाम्।

रामः—भगवन्नभिवादये, इत आस्यताम्।

सीता—भअवं णमो दे। अवि कुसलं मे सअलगुरुअणस्स अज्जाए अ सन्ताए [भगवन्नमस्ते। अपि कुशलं मे सकलगुरुजनस्य आर्यायाश्च शान्तायाः] ?

रामः—निर्विघ्नः सोमपीती आवुत्तो मे भगवान् ऋष्यशृङ्गः आर्या च शान्ता ?

सीता—अम्हे वा सुमरदि [अस्मान् वा स्मरति] ?

(*Entering*) Astavakra—Blessing unto you both-

Rama—I bow unto you, Worshipful Sir , be seated here.

Sita—Salutation to thee. Mighty Sir, Is it all well with my elders and with noble Santa ?

Ram—Is my brother-in-law, Worshipful Rishyasringa as well as noble Sânta, drinking Soma, without let or hindrance ?

Sita—I wonder if she remembers me.

मित—। 'सकलगुरुजनस्य' निखिलश्वश्रूजनस्य। "आवुत्तो मे" भगिनीपतिर्मम 'सोमपीतो' सम्प्रति सोमरसपाननिरत ऋष्यश्टङ्गः निर्विघ्नः' कुशली किम् इति प्रश्नकाकुः। आर्य्या च शान्ता' सोमपीतिनी निर्विघ्ना किम् ॥' सस्त्रीको धर्ममाचरेत् इति शान्तायाः सोमपाने योगः ॥ अस्मान् इति—'वा इति वितर्के। आर्य्या शान्ता 'अस्मान् मां स्मरति वा"। चिरादर्शनात् स्मरणं प्रति वितर्कः ॥

Notes —1. वाम —'नमःस्वस्ति—" इति स्वस्तिशब्दयोगे चतुर्थी। 2. सकल &c —गुरुश्चासौ जनश्च गुरुजनः। सकलो गुरुजनः। तस्य। This includes शान्ता। शान्ता however is specially mentioned to show Sita's regards for her. 3. सोमपीती—पीतं पानम्। भावे क्तः। सोमस्य पीतं सोमपीतम् the drinking of the soma juice. तत अस्ति अस्य इति सोमपीत+इनि मत्वर्थे। He has to drink the juice on account of the याग। सोमपोती निर्विघ्नः implies सोमपानकर्म निर्विघ्नम्, hence यागो निर्विघ्नः। In other words, Rama wants to know if the sacrifice is proceeding smoothly without let or hindrance from Rakshasas or other molesters, As king it is his duty to make such enquiry. 4, अस्मान् etc —The question is natural after a separation of 14 years

(*XVI*) अष्टावक्रः (उपविश्य)—अथ किम्। देवि, भगवान वशिष्ठस्त्वामाह—

विश्वम्भरा भगवती भवतीमसूत
· राजा प्रजापतिसमो जनकः पिता ते।

तेषां वधूस्त्वमसि नन्दिनि पार्थिवानां
येषां गृहेषु सविता च गुरुर्वयञ्च ॥ ९ ॥

तत् किमन्यदाशास्महे—केवलं वीरप्रसवा भूयाः ।

ASHTA—(*Having sat down*)—O yes (lit.—what else) Queen, Mighty Vasishtha says this unto you—

The mighty sustainer of all (Earth) gave birth to you . King Janaka, a peer of Brahman, is your father. My child you have become a daaghter-in-law to those kings in whose house Savita is the Guru as well as myself. (9)

So what else shall I wish of you ? Only be you the mother of heroes.

मित—। विश्वेति। अन्वयः—नन्दिनि, भगवती विश्वम्भरा भवतीमसूत। प्रजापतिसमो राजा जनकस्ते पिता। येषां पार्थिवानां गृहेषुसविता च गुरुः वयञ्च तेषां त्वं वधूः असि। व्याख्या—हे 'नन्दिनि' आनन्ददायिनि वतसे सीते 'भगवती विश्वम्भरा' देवी धरित्री 'भवतीम् असूत' त्वां सुपुत्रे। अपूर्वं महच्च तेमातृकुलम्। प्रजापतिना ब्रह्मणा 'समः' तुल्यः भुवि ब्रह्मवादप्रवर्त्तकत्वात् ब्रह्मकल्पः राजा जनकः ते पिता'। यथा माता तथा पिता च श्लाघ्य। एव विधायाः सम्बन्धे अनुरूपं श्वशुर—कुलं भवतु इत्येव प्राथ्यंते। तदपि ते सिद्धं यतः 'येषां' पार्थिवानां गृहेषु सविता च गुरुः' वंशप्रवर्त्तकः 'वयञ्च' गुरवः अहमपि नेता 'तेषां त्वं' वधः' स्नुषा 'असि। एवं पितृकुलेन मातृकुलेन श्वशुरकुलेन च महीयस्या ते सन्ततिसौभाग्यमेव आशास्यं शिष्यते। 'तत् केवलं वीरप्रसवा भूयाः' प्रवीरं जनय इत्येव 'आशास्महे' प्रार्थयामहे। किम् आशास्यमन्यत्, नास्त्येव ते। श्लोके वसन्ततिलकं वृत्तम्।

Notes—1. विश्व विभर्तीति—विश्व+भृ खच् कर्त्तरि संज्ञायां स्त्रियाम् (मुम् च) विश्वम्भरा the earth. Here विश्व means सर्व and is a सर्वनाम ! Refers to the earth For force see—मित—। 2. प्रजापतिसमः=प्रजापतिना समः। For force see मित। 3 नन्दिनि—नन्दयति इति नन्द+ णिच णिनि कर्त्तरि स्त्रियाम् नन्दिनी the delighter. 4 .पार्थिवानाम्—पृथिव्या ईश्वराः इति पृथिवी+ अञ् पार्थिवाः lords of the earth तेषाम्। 5. सविता च etc.—Supply गुरव. thus—सविता च गुरः वयञ्च गुरवः। The first गुरु here means 'progenitor'.

The solar race of kings started with **मनु** who was a son of **सविता।** The second **गुरु** means 'spiritual guide' or 'adviser". Plural because of **वयम्** which is used for the singular **अहम्** by the rule **"अस्मदो द्वयोश्च"। गुरुवः** is a **विधेय** and not an ordinary **विशेषण**, hence the prohibition **"सविशेषणानां प्रतिषेधः"** does not apply. 6. **वीरप्रसवा—प्रसूयते इति प्र+सू अप् कर्म्मणि प्रसवः** offspring. **वीरः प्रसवो यस्याः।** This is important, see sl. 10. **भूयाः—भू+ आशिषि लिङ्।**

(*XVII*) **रामः—अनुगृहीताः स्मः।**

लौकिकानां हि साधूनामर्थं वागनुवर्त्तते।
ऋषीणां पुनराद्यानां वाचमर्थोऽनुधावति॥ १०

Rama—We are favoured

Of those that are deemed wise in the world, the speech follows facts, but of the primal seers, facts hasten after the speech (10)

मित। अनेन आशीर्बचनेन वयम् अहम् च जानकी च 'अनुगृहीताः'। महान् हि एषोऽस्माकं प्रसादः। एतदेव स्फुटीकरोति लौकिकेति—'लौकिकानां' लोके विदितानां साधूनां सतां प्राकृतानां मुनीनामित्यर्थः 'वाक्यं हि' वाणी तु 'अर्थं' वस्तु यत् वृत्तं यद्वा वर्त्तिष्यमाणं तदित्यर्थः 'अनुवर्त्तते' वृत्तवर्त्तिष्यमानानुयायी तेषां वाक्प्रयोगः। 'पुनः' पक्षान्तरे, आद्यानाम् ऋषीणां' वशिष्ठप्रमुखानां पुराणानां महामुनीनां 'वाचं' वाणीम् 'अर्थः' वस्तु 'अनुधावति अनुसरति वागनुरूपं परिणमति। एकत्र अर्थ-सापेक्षा वाक्, अन्यत्र वाच्सापेक्षः अर्थः इति भेदः। तस्य नंमहामुनेः प्रसादात् गर्भस्थमिदमपत्यं मे पुत्र एव न कन्या, पुत्रोऽपि पुनः प्रवीरः न हि कश्चित् क्षत्रियः, इति महान् अनुग्रहो मम च सीतायाश्च। अस्मादेव विनिश्चयात् अनुपदमुच्यमानं जृम्भकास्त्रप्रदानं सङ्गच्छते। कन्यापक्षे प्राकृतपक्षे च स्पष्टैवासङ्गतिः।

Notes.—1. **लौकिकानाम्—लोके विदिता इति लोक+ठञ लौकिकाः। तेषाम्।** 2. **अर्थम्—अर्थं** is **वस्तु** fact. 3. **आद्यानाम्—आदौ भवा इति आदि+यत् आद्याः** primeval. **वशिष्ठः**, a son of Brahman himself, was indeed an **आद्य ऋषिः।** cp **"नहि ईश्वरवचनं अयथार्थं पुष्णाति।"**

(*XVII*) **इदं भगवत्या अरुन्धत्या देवीभिः शान्तया च भूयोभूयः सन्दिष्टम्—यः कश्चिद्गर्भदोहदः अस्याः स अचिरात् सम्पादयितव्यः ।**

रामः—क्रियते यदेषा कथयति ।

अष्टावक्रः—ननान्दुः पत्या च देव्याः सन्दिष्टमृष्यशृङ्गेण—वत्से कठोरगर्भेति नानीतासि, वत्सोऽपि रामभद्रस्त्वद्विनोदार्थमेव स्थापितः । तत् पुत्रपूर्णोत्सङ्गामायुष्मतीं द्रक्ष्यामि ।

Ashta—It has been repeatedly enjoined by Illustrious Arundhati, the queen-mothers and Santa, that whatever puerperal longings this one may have, has to be forthwith provided.

Rama—It will be done forthwith if she speaks out

Ashta—And unto the queen has been said by Rishvasringa, her sister-in-law's husband—My child, you have not yet been brought here because your term is full and darling Rama too has been left there solely for your entertainment. So I shall see your long-lived self wish your lap occupied by your boy.

मित—। यः कश्चिदिति । यदा 'यः कश्चित्' य एव 'गर्भहेतुकः' दोहदः' इच्छा 'अस्याः' सञ्जायते 'सः अचिरात्' तत्क्षणं 'सम्पादयितव्यः' । ननान्दुरिति—'ननान्दुः भर्त्तृभगिन्या 'शान्ताया 'पत्या ऋष्यशृङ्गेन देव्याः सम्बन्ध आदिष्टम् इत्यर्थः । स्थापितः अयोध्यायामिति शेषः ।

Notes.—1. **गर्भदोहदः—दोहम् आकर्ष ददाति इति दोहदः** that which creates a hankering—**इच्छा** desire **गर्भस्य दोहदः** *i. e.* **गर्भजनितो दोहदः गर्भदोहदः** puerperal longing. **दोहद** is **इच्छामात्र** । Thus "**अथ दोहदम् । इच्छाकाङ्क्षा स्पृहेहा तृट्**, &c.,'—*Amara*, Bhanuji remarks '**अयमिच्छामात्रवाची अपि विशेषेण गर्भिणीच्छायां प्रयुज्यते**" । Bhavabhuti here differs. Again Amara makes the word neuter. Bhanuji quotes **हेमचन्द्र** for the masculine—

"दोहदो गर्भलक्षणे । अभिलाषे तथा गर्भे" । Unfortunately the word is not one of the अर्धर्चादि class taking both the genders, and as Amara is a much higher authority than हैम we have to take this masculine use of Bhavabhuti as a licence. For the neuter compare—"सनूपुरवेण स्त्रीचरणेनाभिताडनम् । दोहदं यदशोकस्य ततः पुष्पोद्गमो भवेत् ॥ 2 यद्येवा—The 'if' (यदि) implies that Sita will not speak out. Some read यद् यदेषा । That implies—Every now and then I am supplying what she demands. It is preposterous to suppose that अरुन्धती &c. remained ignorant of this fact so long. Their request thus becomes superfluous. I therefore prefer यद्येषा which Implying doubt on Rama's part about her disclosing the desire to him is quite in keeping with Sita's bashfulness. 2. कठोर &c —See para *ix* 3 त्वद्विनोदार्थम्—तव विनोदः त्वद्विनोदः । तस्मै इदम् , or स अर्थः प्रयोजनं यस्मिन् कर्म्मणि तत् यथा तथा । If Rama too had gone, Sita would have felt very lonely. For objections See *Intro*

(*XIV*) रामः (सहर्षस्मितम्)—तथास्तु । भगवता वशिष्ठेन न किञ्चिदादिष्टोऽस्मि ?

जामातृयज्ञेन वयं निरुद्धा-
स्त्वं बाल एवासि नवञ्च राज्यम् ।
युक्तः प्रजानामनुरञ्जने स्या-
स्तस्माद् यशो यत् परमं धनं वः ॥ ११ ॥

Rama—(*With a smile of joy*)—So may it be! Haven't I been commissioned in any way by Illustrious Vasishtha ?

Ashta—Listen—

I am detained by the sacrifice of the son-in-law! you are but a boy and your sovereignty is of recent date. Be intent upon pleasing your people. Thence comes fame which is the highest treasure of your race. 11.

मित—। राम इति। 'हर्षस्य' यत् 'स्मितं' तेन 'सह'। वशिष्ठेन सीतायै प्रदत्तात् आशीर्वादात् पुत्रोत्पत्तिं प्रति यो रामस्य निश्चयो जातः तस्येदमृष्यशृङ्गवचनं समर्थनम् इति 'हर्षः'। 'तथा' यथा भगवता ऋष्यशृङ्गेण अभिहितं पुत्रपूर्णोत्सङ्गत्वं सीताया इति यावत् "अस्तु" भूयात्। आशिषि लोट्॥ जामात्रिति। वयं जामातृयज्ञेन निरुद्धाः। त्वं बालः एवासि राज्यञ्च नवम्। प्रजानामनुरञ्जने युक्तः स्याः, तस्मात् यश, यत् वः परमं धनम्। व्याख्या—'वयम्' अहं ते उपदेष्टा 'जामातुः' ऋष्यशृङ्गस्य 'यज्ञेन निरुद्धाः' नियन्त्रिताः। परिहीणोऽसि मदीयैरुपदेशैः कर्त्तव्योपदेष्टा च भवतो नास्ति कश्चिदपर इति मे शङ्कास्थानमिति भावः। स्वयमेवाहं समर्थ इति मा मंस्थाः—त्वं बाल एवासि कुतो भवतः सामर्थ्यम्। भवतु कर्त्तव्यञ्च गुरुतरं किमपि नास्ति तत् का शङ्का इत्याह—'राज्यञ्च' ते 'नवम्' अचिरप्राप्तम् तत् प्रशमनानि बहूनि कार्य्याणि सन्ति, बालस्त्वं कथं तानि कुर्य्याः इति युक्ता शङ्का। तर्हि किमत्र कार्य्यम् इत्याह—प्रजानामनुरञ्जने प्रीणने 'युक्तः स्याः' निरतो भवः 'तस्मात्' प्रजारञ्जनात् 'यशः' कीर्त्तिर्भवति। 'यत्' यशः 'वः' इक्ष्वाकूनां 'परमं' धनम्। प्रीता प्रजास्त्वां स्तोष्यन्ति शङ्का च मे अपयास्यति कुलप्राप्ता कीर्त्तिश्च ते न ह्रास्यति इत्यर्थः।

Notes—1. जामातृ &c—त्वं बालः &c नवञ्च &c—For force see—मित। 2 युक्तः—युज समाधौ दिवादि क्त कर्त्तरि। Or यजिर् योगे रुधादि क्त कर्म्मणि। In the latter case the nominative is कर्त्तव्यबुद्धि—thus कर्त्तव्यबुद्धिस्त्वां प्रजारञ्जने युनक्ति=कर्त्तव्यबुद्ध्या त्वं प्रजारञ्जने युक्त। 3 तस्मात् यश &c—We may also construe तस्मात् यत् यशः (तत्) वः परम धनम्। In the construction adopted यत्, being in a subsequent clause (उत्तरवाक्यगत), does not require the direct mention of तद्। 4. *Remark.*—Here the first half of the verse states Vasishtha's apprehension of mismanagement in his absence. Naturally we expect the second half to suggest some way to avoid mismanagement. Instead, the second half exhorts the king to seek popularity. This seems incongruous. A

defence may be given assuming that a popular king may safely bungle state-affairs Again, while speaking thus, Vasishtha himself discards consistency (See *Intro*). The fact is, for the development of his plot, the poet needs this exhortation to gain popular favour. (see *Intro*).

(*XX*) रामः—यथाह भगवान् मैत्रावरुणिः ।

स्नेहं दयाञ्च सौख्यञ्च यदि वा जानकीमपि ।
आराधनाय लोकानां मुञ्चतो नास्ति मे व्यथा ॥ १२ ॥

Rama—As the Illustrious Maitravaruni says.

There is no pain unto me sacrificing love, pity and bliss nay, even Janaki, for the service to the people. 12.

मिभ –। मित्रः सूर्य्यश्च वरुणश्च मित्रावरुणौ। तयोरपत्यं मैत्रावरुणिः वशिष्ठः ('देवताद्वन्द्वे च इत्यानङ्। "अत इञः" इति इञ्)। 'यथामैत्रावरुणिः आह तथैव करिष्यामि प्रजानामनुरञ्जने युक्तः स्यामित्यर्थः। स्नेहमिति - लोकानाम् आराधनाय प्रजानामनुरञ्जनाय' (तुमर्थे ४र्थी) स्नेहं दयाञ्च सुखादि च, किं बहुना, यदि वा जानकीमपि' सर्वस्वभूतं मम 'मुञ्चतो मे व्यथा नास्ति'। इति सीताविवासनच्छाया।

Notes —1. मैत्रावरुणिः—मित्र in the masculine means the sun, वरुण is the water god मित्रश्च वरुणश्च मित्रावरुणौ। मित्र becomes मित्रा by the rule 'देवताद्वन्द्वे च'। तयोरपत्यं पुमान् इति मित्रावरुण – इञ्। But is not वशिष्ठ the son of ब्रह्मन्? He is; the tradition however is that वशिष्ठ lost his body through a curse His spirit entered the Sun and Varuna, through whom he was re-endowed with a body, got a re-birth 2. स्नेहं दयाम्—स्नेह implies *Pleasure*, the pleasure one feels at the sight of the beloved, दया involves *pain*, the pain caused by another's distress. 3. सौख्यम्-सुखमेव इति सुख ष्यञ स्वार्थे। 4. जानकीम्—In renouncing जानकी, Rama did indeed renounce स्नेह दया and सौख्य।

(*XXII*) सीता—अदो एव्वो राहवधुरन्धरो अज्जउत्तो
[अतएव राघवधुरन्धर आर्य्यपुत्रः]।

रामः—कः कोऽत्र भोः ? विश्राम्यतां भगवानष्टावक्रः।

अष्टावक्रः—(उत्थाय परिक्रम्य च) अये कुमारलक्ष्मणः प्राप्तः (इति निष्क्रान्तः)।

(प्रविश्य) लक्ष्मणः—जयति जयत्यार्यः। आर्य तेन चित्रकरेण अस्मदुपदिष्टमस्यां वीथिकायामार्यस्य चरितमभिलिखितम्। तत् पश्यत्वार्यः।

Sita—Hence it is that my hasband leads among the Raghavas.

Rama—Who is here, Ho ! Well ? Let Illustrious-Ashtavakta be rested.

Ashta=(*Rising and going round the stage*)—Ha ! Prince Lakshmana has come (*Exit*).

(*Entering*) LAKSHMANA—prosper, let noble brother prosper. Noble brother, the experiences of your noble self, as instructed by me, have been painted along this walk by that painter. Let your noble self have a look at it.

मित—। अत इति—धरं यानमुखं धारयतीति व्युत्पत्त्या धुरन्धरः यानाग्रयायी वाहः, लक्षणया इह अग्रेसरः। राघवाणां धुरन्धरः रघुश्रेष्ठः। अविचारयतेव परार्थे य आत्मत्याग स्तेन श्रेष्ठता। जयतीति—वीथिः पन्थाः इह तु प्रकोष्ठवत आवृतः पन्थाः। सा एव वीथिका। तस्याम वीथिकायां भित्तौ इत्यर्थः। चरितं चित्रितम, अपि च प्रासङ्गिकं यद्यत् वृत्तं तत् सर्वम् अभिलिखितं चित्रितम्। तत् चित्रम् आर्य्यः पश्यतु॥

Notes—1. राघव &c.—धुरं धारयति इति धुर् धृणिच् खच् संज्ञायाम कर्त्तरि=धुरन्धरः a संज्ञा of beasts of burden, By transference of epithets this is here used to mean the *foremost*. राघवाणां धूरन्धरः। 2. कः &c—It is curious that no one responds to Rama's shout. 2. विश्राम्यताम्—वि+श्रम णिच् लोट् ताम् कर्म्मणि। विश्रम्यताम् is expected because श्रम is मित्; thus with णिच्

even the rule "मितां ह्रस्वः" gives श्रमि not श्रामि। Hence while commenting on "धर्य्यान् विश्रामयेति सः" in Raghu I, Malli, takes up the Vrittikara's hint "केचिदत्र वाङ्त्यनुवर्त्तयन्ति। सा च व्यवस्थितविभाषा" i. e वा follows from the previous rule "वा चित्तविरागे" attaching optionality to "मितां ह्रस्वः" but the option has to be व्यवस्थित—restricted. In other words we have to consider that some roots allow ह्रस्व। Thus श्रम is one of these roots that do not allow ह्रस्व। Thus विश्राम्यताम् not विश्रम्यताम्। But the केचित् of the Vritti, shows that the Vrittikara does not like this defence. So too Madhava. They would have विश्रम्यताम् only. We may say श्रम एव श्रामः with the तद्धित affix अण् (प्रज्ञादि)। विगतः श्रामः अस्य विश्राम refreshed. विश्रामः क्रियताम् इति विश्राम णिच् (नाम धातु) लोट् ताम कर्मणि। 4 निष्क्रान्त.—Here again no one leads अष्टावक्र out 6. चित्रकरेण—चित्र panting. चित्रं करोति इति चित्र कृ+ठ ताच्छील्ये चित्रकर. a painter. अस्मदुपदिष्टम् अस्माभिः, i. e. मया उपदिष्टम्। Lakshmana as eyeswitness gave him the details. 7. तत्—This refers not to चरितम् but to अभिलेखनम्।

(XX) रामः—जानासि वत्स दुर्मनायमानां देवीं विनोदयितुम्। तत् कियन्तमवधिं यावत् ?

लक्ष्मणः—यावदार्यया हुताशने विशुद्धिः।

रामः—शान्तम्।

उत्पत्तिपरिपूतायाः किमस्याः पावनान्तरैः।
तीर्थोदकञ्च वह्निश्च नान्यतः शुद्धिमर्हतः॥ १२॥
देवि देवयजनसम्भवे, प्रसीद एष ते जीवितावधिः प्रवादः।
(वा—)

Ram—Darling, you know how to divert the sorrowing queen. To what extent is that ?

Lakshmaṇ—Up to the noble sister's purification in fire

Ram—Peace !

Of this one sanctified by birth what can be done by other sanctifiers ? Holy water and fire do not require purification from other sources 13

Queen spare me sprung as thou art from the ground for offering oblations to the gods this is a life long slur on thee

मित—। जानामीति—दु खित मनो यस्या सा दुर्मना । दुर्मना इव आचरति इति दुर्मानायमाना पितृविरहात् विमर्षा । ताम् । तत चित्र कियन्तम् अवधि पर्य्यन्त यावत् ? केन वृत्तान्तेन परिसमाप्त तत् ? अवधिरिह अन्तवचन । कियदिति परिमाणवचनम् तत्त अवधौ न सङ्गच्छते । कमवधि यावत् इति युक्तम् । यावदित्यधिकार वचनमव्ययम् । कमवधिमधिकृत्य इत्यथे अवधि यावदिति सकर्मिकाया अधिकरणक्रियाया अन्तर्भावात् अवधिम् इति कर्मणि द्वितीया ॥ यावदिति—अत्र तु सीमावचनो यावच्छब्द । आर्य्याया हुताशने विशुद्धिश्चित्रस्य सीमा इत्यर्थो गम्यते । अधिकरणक्रियाया अभावात् भवति इत्यूह्याया क्रियाया कर्त्तरि विशुद्धिरिति प्रथमा ॥ शान्तमिति—अव्ययमेत॰मकारान्त निषेधे वर्त्तते । हुताशने विशुद्धि मा ब्रूहि हुताशन विशुद्धिप्रकटनम् इति न युक्तम् ॥ निषेधे कारणमाह उत्पत्तिरिति अन्वय । उत्पत्तिपरिपूताया अस्या पावनान्तरै किम् ? तीर्थोदकञ्च वह्निश्च अन्यत शुद्धि न अर्हत । व्याख्या—उत्पत्या जन्मना या परिपूता सम्यक विशुद्धा तथा॰विधाया अस्या सीताया पावनान्तरै अन्यै शोधनै हुताशनादिभि कि क्रियते न किमपि । तत् शान्तम् हुताशने विशुद्धिरिति । पश्य तीर्थोदकञ्च गङ्गादीनां पुण्यसलिलञ्च वह्निश्च हुताशन 'अन्यत अन्यस्मात् पावनान्तरात् शुद्धि शोधन न अर्हत न क्षमते । एव सीता अपि अग्निशुद्धि न अर्हतीत्यवेहि उत्पत्तिपरिपूतत्व हेतुमुपस्थापयति देवीति—इज्यते अस्मिन् इति यजनम् यज्ञभूमि । ल्युट अधिकरणे । देवानां यजनम् । तत्सम्भव उत्पत्तिस्थान यस्या तत्सवुद्धौ देवयजनसम्भवे । योनिजाया अयोनिजा शुद्धतरा । अयोनिजासु पुनर्दे वयजनसम्भवा शुद्धतमा अतएव उत्पत्तिपरिपूता सीता सार्थकश्च "परिपूता इत्यत्र परिशब्दप्रयोगः॥

जीवितम् अवधिं सोमा अस्य जीवितावधिः जीवनान्त इत्यर्थः। प्रहीनो वादः प्रवादो निन्दा। इयमसौ यस्या हुताशने विशुद्धिरासीत् इति यावज्जीवं ते निन्दा स्थास्यति इत्ययः। तत्र मद्वचनमेव हेतुः इति तदर्थः मह्यं मा कुप्य प्रसीद।

Notes —1 दुर्मनायमाना – दुर्मनस् क्यङ् लटः शानच, कर्त्तरि। The स disappears by the rule कर्त्तुः क्यङ् सलोपश्च। जानासि &c.—This is a compliment to लक्ष्मण। Sita was feeling disconsolate when लक्ष्मण introduced this deversion, hence the compliment 2 तत्—Refers to अभिलेखनम्, *i e* चित्रम्। तत् कियन्तम् &c.—seems to be rather un-called for. This is introduced to give Rama an opportunity to explain his attitude towards Sita after her release. He was apparently—inexplicably rude, but the reason is जनः कुलधनैरनुरञ्जनीय"। If Sita bears this in mind it will also explain to be the impending renunciation 3 "पावनान्तरैः—अन्यानि, पावनानि पावनान्तराणि। मयरव्यंसकादि तत्। तैः। But अन्य (other) is a relative term "Other" than what? Other than सीता herself. But सीता is not described as पावन, she is called here as-पूत only which is quite different. 4. प्रसीद—Be pacified *i. e.* excuse. The reason for the importunities, is that Rama had offered the occasion for this slur

(*XXIII*) (रा—) कष्टं जनः कुलधनैरनुरञ्जनीय-
स्तन्नो दुरुक्तमशिवं न हि तत् क्षमं ते।
नैसर्गिकी सुरभिणः कुसुमस्य सिद्धा
मूर्ध्नि स्थितिर्न चरणैरवताडितानि॥ १४॥

सीता—होदु अज्जउत्त होदु। एहि पेक्खम्ह दाव दे चरिदं [भवतु आर्यपुत्र भवतु। ऐहि प्रेक्षामहे तावत् ते चरितम्]।
(उत्थाय परिक्रामतः)।

(R.)—It is a pity people have to be humoured by those who value the fame of their family. Hence the evil and ungracious speech of mine. Surely that was not fit for you. What is naturally accorded to the fragrant flower is a seat on the head, not tramplings under feet (*Or*—The seat on head accorded to the fragrant flower—and not tramplings under feet—is what becomes natural to it) 14.

Sita—Let that go, my husband, let that go Come let us see (the painting of) your experiences. (*They get up and go round the stages*).

मित — । कष्टमिति । अन्वयः—कष्टम । कुलधनैः जनः अनुरञ्जनीयः । तत् मे अशिव दुरुक्तम् । तत् ते क्षमं न हि । सुरभिणः कुसुमस्य नैसर्गिकी सिद्धा मूर्द्धि स्थितिः (यद्वा – सुरभिणः कुसुमस्य सिद्धा मूर्द्धि स्थितिः नैसर्गिकी न चरणैरवताडितानि । व्याख्या – 'कष्टम्' अहो दुःखम् 'कुलधन' येषां तादृशैः पुरुषैः प्रजारञ्जनलब्धयाः कुलकीर्त्तेः रक्षणपरैः राघवैः जनः अनुरञ्जनीयः' प्रीणयितव्यः । शोच्यमेतत् व्रतं तेषाम् । 'तत्' तस्मात् एतद्व्रतानुरोधात् 'मे अशिवम्' अभव्यदुरुक्त दुर्वचनम् आत्मानं वचनीयात् मोचय इति तत् लङ्कायामुक्तम् । व्रतेनैतेन परतन्त्रोऽहमेवमवोचं न हि स्वेच्छया, तत् देवि प्रसीद' इति पूर्वेण सम्बन्धः । 'तत् दुरुक्तं' 'ते क्षमं न हि' नैव योग्यम् । अयोग्यत्वे दृष्टान्तमाह –सुरभिणः कुसुमस्य नैसर्गिकी' स्वाभाविकी 'सिद्धा' निसर्गजातात् सौरभादेव लोके लब्धा 'मूर्द्धि स्थितिः शिरसि स्थानम् । सैव तस्य क्षमा । न नतु 'चरणैः अवताडितानि' आघाताः तस्य कुसुमस्य क्षमाणि । एवं नैसर्गिकेण पातिव्रत्यसौरभेण' समन्वितायास्तवापि अभिनन्दनमेव तदानीं क्षममासीत् न दुरुक्तमशिवम् । तत् देवि प्रसीद । पक्षे 'सुरभिणः कुसुमस्य सिद्धा' लोके प्रसिद्धा मूर्द्धि स्थितिः सम्बन्धे नैसर्गिकी' स्वाभाविकी' इत्यादि प्राग्वत् ।। भवत्विति – 'भवतु' यातु तत् अलं तच्चिन्तया नाहं करोमि तत्, हृदयं जानामि त्वमपि मम । तत् 'एहि तावत् प्रेक्षामहे ते चरितं चरिताश्रय-मालेख्यम । परिक्रामतः वीथिकागमनमभिनयतः । (वसन्ततिलकं वृत्तम् । दृष्ठान्तालङ्कारश्च) ।

Notes.—1. कष्टम्—कष+क्त भावे कष्टम् क्लेशः। This is an exclamation here. 2. कुलधनैः—कुल here is by transference of epithets कुलकीर्त्ति। Also without such transference we have in a different sense "इक्ष्वाकूणां कुलधनमिदं' यत् समाराधनीयः —Act VII, Sl. 6. 3. तन्मे—तत् is an अव्यय implying हेतु। 4. दुरुक्तम्—वच+क्त कर्म्मणि or भावे=उक्तम् speech (कर्मणि), act of saying (भावे)। दुष्टमुक्तम्, प्रादितत्। 5. तत् क्षमम्—तत् refers to दुरुक्तम्। 6. नैसर्गिकी—नितरां सृज्यते इति नि+सृज+घञ् कर्मणि निसर्गः nature, निसर्गात् आगता इति निसर्ग+ठक् ङीप् स्त्रियाम्। This is better taken here as a विधेय। If taken as an ordinary attributive (नैसर्गिकी सिद्धा) tautology seems unavoidable, because what is नैसर्गिकी is of course सिद्धा also.

(*xxvi*) लक्ष्मणः—इदं तदालेख्यम्।

सीता (निर्वर्ण्य)—कं एदे उवरि णिरन्दरठिदा उवत्थुवन्दि विअ अज्जउत्तं [के एते उपरि निरन्तरस्थिताउपस्तुवन्ति इव आर्य्यपुत्रम्] ?

लक्ष्मणः—एतानि तानि सरहस्यजृम्भकास्त्राणि यानि भगवतः कृशाश्वात् कौशिकमृषिं विश्वस्य मित्रं विश्वामित्रमुपसंक्रान्तानि तेन च ताड़कावधे प्रसादीकृतान्यार्य्यस्य।

Lak,—This is the painting.

Sita (*Observing*)—Who are these, crowded together in the air bleauding as it were my husband ?

Lak.—These are the famous Jrimbhaka weapons, having secret spells, which from the mighty Krisasva devolved upon sage Visvamitra, the benefactor of the world, the son of Kusika, and by him were made into a gift of pleasure to my noble brother at the slaying of Tadaka.

मित—। इदमिति—आलेख्यं चित्रम्॥ निर्वर्ण्येति—निर्वर्णनं सूक्ष्मवीक्षणम्। निर्वर्ण्य निरीक्ष्य। उपरि आकाशे। अन्तरम् अवकाशः।

निर्गतमन्तरं यस्मिन् कर्मणि तत् यथा तथा स्थिताः निरन्तरस्थिताः परस्परसंघर्षेण वर्त्तमाना ॥ एतानीति—रहसि भवं रहस्यं गुह्यं मन्त्र इत्यर्थः। स च मन्त्री द्वेधा, प्रयोगमन्त्र संहारमन्त्रश्च। जृम्भन्ते प्रयोक्तुरिच्छया इति जृम्भकाणि तथाविधानि अस्त्राणि जृम्भकास्त्राणि। रहस्येनसह वर्त्तमानानि सरहस्यानि। सरहस्यानि जृम्भकास्त्राणि, उपसंक्रान्तानि गतानि। प्रसादीकृतानि प्रीतिदत्तानि, हतायां ताड़कायां प्रसङ्गेन मुनिना दत्तानि॥ तथा च रामायणम् "जृम्भकं प्रतीच्छेमम् पात्रभूतोसि राघव"।

Notes.—1. उपस्तुवन्ति—The weapons appeared in person and looked like ordinary human beings engaged in singing the praise of Rama. 2. विश्वस्य मित्रम्—Benefactor of the whole world. Weapons to such a person had no use except to further the welfare of the world. Hence they were made over to Rama as the fittest person for this sort of work. **विश्वामित्र** is the **संज्ञा** of the sage. In it **विश्व** becomes **विश्वा** by the rule—**मित्रे चर्षौ**।

(*xvx*) रामः—वन्दस्व देवि दिव्यास्त्राणि।
ब्रह्मादयो ब्रह्महिताय तप्त्वा परःसहस्राःशरदस्तपांसि।
एतान्यपश्यन् गुरवः पुराणाः स्वान्येव तेजांसि तपोमयानि॥१५॥

Rama—Queen, bow unto these divine weapons.

The old masters, headed by Brahman, having practised penance for over a thousand years, for the good of the Vedas, saw these the very fire of their austerities. 15.

मित— । वन्दस्वेति—दिवि भवानि दिव्यानि, दिव्यरूपतां दर्शयति ब्रह्मेति। अन्वय—ब्रह्मादयः पुराणा गुरवः ब्रह्महिताय परःसहस्राः शरदः तपांसि तप्त्वा तपोमयानि स्वानि तेजांसि एव एतानि अपश्यन्। व्याख्या --ब्रह्मादयः' विरिञ्चिप्रभृतयः 'पुराणा गुरवः आद्या आचार्याः ब्रह्मणो' वेदस्य तथा 'देवस्य हिताय' मङ्गलाय बेदद्रोहिणां राक्षसादीनां प्रशमाय 'परःसहस्राः' सहस्रात् पराः अधिकाः शरदः' संवत्सरान् व्याप्य 'तपांसि तप्त्वा स्वानि तेजांसि एव' तपस्तेजांसि एव जाज्वल्यमानानि अस्त्ररूपेण च परिणतानि 'एतानि अपश्यन्' ऐक्षन्त। एवं दिव्यानि एतानि वन्दस्व॥

Notes.—अस्महिताय—तादर्थ्ये चतुर्थी। 2. परःसहस्राः—पर is अधिक। सहस्रात् पराः is to be compounded by योगविभाग of पञ्चमी in the rule "पञ्चमी भयेन"। We then expect सहस्रपराः। But Vardhamana places it under the राजदन्तादि list, so परा leads. The form then should have been परासहस्राः। Next by the dictum "सर्वनाम्नो वृत्तिमात्रे पुंवद्भाव." we get परसहस्राः। Lastly assuming that the word is of the पारस्करादि class, as is done by भानुजि, we have परस् सहस्राः which yields परःसहस्राः। Vardhamana however makes it of the पृषोदरादि class and introduces सकारागम at the last stage. 3. शरदः—व्यस्तार्थ्ये रया। 4. पुराणाः=पुरा भवा इति पुरा+ट्यु ल पुरातनाः; or by निपातन in the rule "पूर्वकालैकसर्वजरत् पुराण"=पुराणाः। The metre is उपजाति।

(*xxvi*) सीता—णमो एदेहिं [नम एतेभ्यः]।

रामः—सर्वथेदानीं त्वत्प्रसूतिमुपस्थास्यन्ति।

सीता—अणुगहीदम्हि [अनुगृहीतास्मि]

लक्ष्मणः—एष मिथिलावृत्तान्तः।

सीता—अम्महे दलन्तणवणीलुप्पलसामलसिणिद्धमसिणसोह-माणमंसलेण देहसोहग्गेण विम्हअत्थिमिदताददीसमाणसोम्म-सुन्दरसिरी अनादरक्खडिदसङ्करसरासणो सिहण्डअमुद्धमुहमण्डलो अज्जउत्तो आलिहिदो [अम्महे! दलन्नवनीलोत्पलश्यामलस्निग्ध-मसृणशोभमानमांसलेन देहसौभाग्येन विस्मयस्तिमिततातदृश्य-मानसौम्यसुन्दरश्रीः अनादरखण्डितशङ्करशरासनः शिखण्डकमुग्ध-मुखमण्डलः आर्यपुत्र आलिखितः]।

Sita—Salutation to these.

Rama—They will certainly serve your child now.

Sita—I am favoured.

Lak—This is the scene at Mithila.

Sita—Ha! Here is my husband painted in his charming frame—muscular, appearing mildly glossy, blue as a fresh blue-lotus blooming—with the orb of his face lovely through the youthful locks, with the bow of Sankara snapped without effort and with his graceful and attractive beauty being scanned by father motionless in wonder.

मित —। सर्वथेति—'सर्वथा' सर्वप्रकारेण, अव्यभिचारेण इत्यर्थः। 'इदानीम्' अधुना, प्रसूतायां त्वयि इत्यर्थः। प्रसूयते इति प्रसूतिः अपत्यम्। कर्मणि क्तिन्॥ उपस्थास्यन्ति उप समीपे स्थित्वा तथा निर्देशं सेविष्यन्ते। 'एतानि' इति कर्त्तृपदमूह्यम्॥ अस्महे इति—'अस्महे' इत्यव्ययम् आश्चर्ये। स्त्रीषु नियतमेतत्। केषाञ्चिन्मते प्राकृते एव अस्य प्रयोगः। तेषां तु 'अहो' इति संस्कृते अनुवादः॥ दलत्' प्रस्फुटत् यत् 'नवनीलोत्पलं' नीलपद्मकोरकम् तदिव 'श्यामलं' किञ्च 'स्निग्धमसृणं' कोमलोज्ज्वलं यथा तथा 'शोभमानम्' अपि तु 'मांसलं' परिपुष्टं प्रचुरमित्यर्थः यत् देहसौभाग्यं' वपुःप्रकर्षः तेन सह तद्विशिष्ट इत्यर्थः तथा 'शिखण्डकैः बालोचितैः काकपक्षकैः 'मुग्धं' मनोहरं मुखमण्डलं' आननविम्वं यस्य तथाविधः बाल एव इत्यर्थः। तथापि 'अनादरेण' अवलीलया 'खण्डितं' भग्नं 'शङ्करशरासनं' हरधनुः येन तथाविधं अतएव 'विस्मयेन स्तिमितः' निश्चलो यः 'तातः' पिता जनकः तेन दृश्यमामा 'सौम्या' सुभगा 'सुन्दरी' च 'श्रीः' कान्तिर्यस्य तथाविधः 'आर्य्यपुत्रः आलिखित'। अत्र इदं द्रष्टव्यम्—श्यामलतादयो देहधर्म्माः, सौभाग्यस्य पुनः कीदृशः श्यामलतादयः? उच्यते—भावानयने द्रव्यानयनम्" इति भाष्यवचनात् "देहसौभाग्यम्" इत्यतो 'सुभगदेहः" इत्यस्य वोधः। तेन—"मांसलेन देहसौभाग्येन" इति न काचिदयुक्तता।

Notes.—1. **सर्वथा** &c —Here the weapons are given away. This will play an important part in the recognition of Sita's children hereafter. But there is an incongruity here. The **वीरचरित** makes the weapons a gift to *both* **राम** and **लक्ष्मण**। Thus **राम** says to **विश्वामित्र** "**दिव्यास्त्रसंप्रदायोऽयं लक्ष्मणेन सहास्तु मे**" and **विश्वामित्र** agrees. In that case **राम** *alone* has no right to make the gift now. This goes against

the development of the plot. 2. अममहे—Some think that this word is not at all used in Sanskrit. In that case translate it by अहो। 3. दलत् &c.—This is a compound of the three words दलन्नवनीलोत्पलश्यामलम्, स्निग्धमसृणशोभमानम् मांसलम् all qualifying देहसौभाग्यम्। But the compounding has to be done in *two* stages. Thus, get a कर्मधा—of the last two and then add the 3rd for another कर्मधा—, or first compound the 2nd and 3rd and then add the 1st. This is because a कर्मधा—has to be of two words only, never more than two. The three constituents have to be treated thus नीलोत्पलम्, कर्मधा—। नवनीलोत्पलम कर्मधा—। दलन्नवनीलोत्पलम्, कर्मधा—। दलन्नवनीलोत्पलश्यामलम्, उपमानसमास॥ स्निग्धमसृणम्, कर्मधा—। Next सुप्सुपा॥ मांसलाति इतिमांस+ला क कर्त्तरि or—मांसम् अस्त्यस्मिन् इतिमांस+लच् मत्वर्थे मांसलम् muscular. By transference of epithets this means here 'plentiful' प्रचुर। Also see मित॥ 4 देह &c—सुभगस्य भावः इति सुभग+ष्यञ्, सौभाग्यम् good luck. We have वृद्धि in both components by the rule "हृद्भगसिन्ध्वन्ते पूर्वपदस्य च"। देहस्यसौभाग्यम्, तेन। सहार्थे तृतीया। Also see मित॥ 5. विस्मय &c—विस्मयेन स्तिमितः सुप्सुपा। ताहशस्तातः कर्मधा। तेन दृश्यमाना, तेत। ताहशी सौम्या सुन्दरी श्रीर्यस्य, a बहु of four constituents. Note that श्रयति पुरुषम् इति श्रि+क्विप कर्त्तरि श्रीः by the Varttika "क्विप् वचिप्रच्छि—"। Thus the ई not being ङीप् the rule "नद्यृतश्च" does not apply and we do not get here श्रीकः in the बहु। Also see under—वदुपरिषदं पुण्यश्रीकः श्रीयेव सभाजयन्—Act IV, St. 19. 6. अनादर &c—This taken with शिखण्डक etc., causes wonder in Janaka. So young yet so powerful!

(*xxvii*) लक्ष्मणः—आर्य्य पश्य पश्य—

सम्बन्धिनो वशिष्ठादीनेष तातस्तवार्चति।
गौतमश्च शतानन्दो जनकानां पुरोहितः॥१७॥

Lak—Look, Noble lady, look—

Here is thy father honouring his bridal connections and Gautama's son Satananda, the priest of the house of Janaka, honouring Vasishtha and others 16

मित—। सम्बन्धिन इति। अन्वयः—एष तव तातः सम्बन्धिनः जनकानां पुरोहितः गौतमः शतानन्दश्च वशिष्ठादीन् अर्चति। व्याख्या—'एष तव तातः पिता जनकः 'सम्बन्धिनः वैवाहिकान्, दशरथादीन्, तथा जनकानां' जनककुलजनां 'पुरोहितः' गौतमः गोतमपुत्रः 'शतानन्दश्च वशिष्ठादीन् अर्चति पूजयति। अत्र "तातः शतानन्दश्च वशिष्ठादीन् सम्बन्धिनः अर्चति" इति बहूनां व्याख्यानम् ॥

Notes—1. सम्बन्धिनः—सम्बन्धः विवाहसम्बन्धः अस्ति एषाम् इति सम्बन्ध+इनि मत्वर्थे सम्बन्धिनः those that are connected by the marriagetie. 2 जनकानाम्—जनक here, by transference of epithets, stands for all members of the family of Janaka. 3. *Remark*—The usual construction (See *Mita*—) makes वशिष्ठ etc., also सम्बधी of जनक which is not desirable. Beside the 'अर्चनक्रिया is done simultaneously by both जनक and शतानन्द to the same person. *viz*, the सम्बन्धिन्s. This should give the dual अर्चतः not the singular. In the construction adopted by us जनक honours दशरथ etc. and शतानन्द separately does the same to वशिष्ठ etc. Hence the singular अर्चति is correct. Also it is meet that the पुरोहित should honour the पुरोहित। In the Sakuntala when Kanva's disciple arrives the king deputes his पुरोहित to honour them.

(*xvii*) रामः—द्रष्टव्यमेतत्।

जनकानां रघूणाञ्च सम्बन्धः कस्य नः प्रियः।
यत्र दाता ग्रहीता च स्वयं कुशिकनन्दनः ॥१७॥

Rama—This is worth seeing.

To whom is not gratifying the union of Janakas and the Raghus wherein the son of Kusika is himself the offerer and the acceptor as well ? 17.

मित—'द्रष्टव्यं' दर्शनीयं दर्शनात् प्रीतिरित्यर्थः ॥ जनकानामिति। आगमम्।

Notes —1 जनकानाम etc —Here also we have transferrence of epithets as in Sl. 16. 2. कुशिकनन्दनः—This is विश्वामित्र।

(*xxix*) सीता—एदे क्खु तक्कालकिदगोदाणमङ्गला चत्तारो भादरो विवाहदिक्खिदा तुम्हे। अम्मो जाणामि तस्सिं एव्व पदेसे तस्सिं एव्व काले वत्तामि [एते खलु तत्कालकृतगोदानमङ्गलाः चत्वारो भ्रातरो विवाहदीक्षिता यूयम्। अहो जानामि तस्मिन्नेव प्रदेशे तस्मिन्नेव काले वर्त्ते]।

रामः—एवम्!

समयः स वर्त्तत इवैष यत्र मां
समनन्दयत् सुमुखि गौतमार्पितः।
अयमुद्ग्रहीतकमनीयकङ्कण-
स्तव मूर्त्तिमानिव महोत्सवः करः ॥१८॥

Sita—Here are you four brothers under the vow of marriage with the auspicious ceremony of tonsure performed just before. Ah! Methinks I am at the very same place now and at the very hour.

Raman—Yes,

Here O fine-faced girl, that time has it seems returned, the time when your hand, carrying the attractive nuptial thread, on being placed on mine by Gautama, delighted me like supreme bliss embodied 18.

मित—। एते। गावः केशाः स्वनामख्याताः पशवो वा। गवां दानं छेदनं वितरणं वा गोदानम्। तदेव मङ्गलं शुभकर्म गोदानमङ्गलम्। स कालः तत्—कालः। तस्मिन् कृतं तत्कालकृतम्। तत्कालकृतं गोदानमङ्गलं यः ते ॥ दीक्ष नियमग्रहणे भ्वादिषु आत्मनेपदी। कर्त्तरि क्तः दीक्षिताः। 'विवाहे दीक्षिताः' ॥ समय इति। अन्वयः—हेसुमुखि, एष स समयः

वर्त्तते इव यत्र अयं तव करः उद्गृहीतकमनीयकङ्कणः (सन्) गौतमार्पितः (भूत्वा) मूर्त्तिमान् महोत्सव इव मां समनन्दयत्। व्याख्या—हे सुमुखि सुवदने सीते इष्टं उक्तं त्वया तस्मिन्नेव काले वर्त्ते इति। ममापि 'एष स समयः वर्त्तते इव यत्र' यस्मिन् समये 'अयं तव करः दक्षिणो हस्तः 'उद्गृहीतं धृतं 'कमनीयं कङ्कणं' वैवाहिकं करसूत्रं येन तादृशः सन् 'गौतमेन' गौतमपुत्रेण जनकपुरोहितेन 'अर्पितः' मम करे निवेशितो भूत्वा 'मूर्त्तिमान्' धृतदेहः 'महोत्सव इव परमानन्दसन्दोह इव 'मां समनन्दयत' सम्यक् प्रीणयामास। तत अहमपि "जानामि तस्मिन्नेव देशे काले वर्त्ते" इति॥ एतेन चित्रनैपथ्यमपि गम्यते।

Notes—1. तत्काल etc —गोदान is differently explained as "Shaving" and "Gift of cows". केशान्त is a synonym of गोदान। Hence some offer the derivation गावः केशाः दीयन्ते छिद्यन्ते अस्मिन् इति अधिकरणे ल्युट। This seems a bit far-fetched. We notice that the ceremony of केशान्त has the peculiarity that its दक्षिणा is a pair of cow "गोमिथुनं दक्षिणा. —*Asvalayana* quoted by वाचस्पति। It is quite possible that owing to this distinctive character, केशान्त itself has come to be known as गोदान। Hence it seems better not to strain गोदान as above but take it in its plain sense "Gift of cows" as the gift accompanies tonsure, let गोदान secondarily refer to केशान्त tonsure. 2 समयः &c—Hence Rama echoes Sita's sentiment "जानामि etc".

(*xxx*) लक्ष्मणः—इयमार्य्या इयमप्यार्य्या माण्डवी इयमपि वधूः श्रुतकीर्त्तिः।

सीता—वत्स इयं व अवरा का [वत्स, इयमपि अपरा का]?

लक्ष्मणः (सलज्जस्मितमपवार्य्य)—अयि ऊर्मिलां पृच्छत्यार्य्या। भवतु, अन्यतः सञ्चारयामि। [प्रकाशम्] आर्ये! दृश्यतां द्रष्टव्यमेतत्, अयञ्च भगवान् भार्गवः।

सीता—(ससम्भ्रमम्)—कम्पिदम्हि [कम्पितास्मि ।]

रामः—ऋषे नमस्ते ।

Lak—This is my noble sister-in-law, this again is noble Mandavi and this is daughter in-law Srutakirti.

Sita—Child, who is this other one again ?

Lak—(*Aside with a bashful smile*)—Ho ! Her noble self is asking of Urmila, well, I will direct her elsewhere. (*Aloud*) Noble sister in-law, look here this is worth-seeing. This again is worshipful Bhargava.

Sita (*In alarm*)—I am startled.

Rama—Salutation to thee, O sage.

मित – । इयमिति । 'आर्य्या' इति सीता लक्ष्यते । "माण्डवी इति भरतपत्नी जनकानुजस्य कुशध्वजस्य कन्या । तदनुजा शत्रुघ्नपत्नी श्रुतकीर्त्तिः । "आर्य्या "माण्डवी" इति भरतस्य ज्येष्ठत्वं प्रतीयते । प्राचीनानां तु मतं लक्ष्मणो ज्यायान् इति ॥ वत्सेति । चतसृष्वपि कन्यकासु लिखितासु ऊर्मिला न कथिता इति लक्ष्मणं प्रति सीतायाः परिहासः ॥ सलज्जेति । लज्जया सह सलज्जम् 'सहलज्जमिति'वा । तत् यथा तथा । 'अपवार्य्य' अन्यैरश्रुतं यथा तथा आत्मानं प्रत्युक्त्वा । 'अन्यतः' अन्यस्मिन् विषयान्तरे इत्यर्थः । 'सञ्चारयामि' यत्र वीथिकाया-मन्यत् किञ्चिल्लिखितं तत्र नयामि । विषयान्तरमुपस्थाप्य एनां व्यासक्तां करोमि इत्यर्थः । 'भार्गवः' परशुरामः ॥ ससम्भ्रमेति । सम्भ्रमो भयम् । तेन सह यथा तथा 'कम्पिता' भयेन इति शेषः । अतीतस्मरणात् भयं, ततः कम्पः ॥ ते इति नमस् शब्दयोगे ४र्थी ॥

Notes —1. सलज्ज &c.—स्मित because he has been found out by Sita ; लज्जा because the matter relates to his wife. 2. अपवार्य्य—अप + वृ + णिच + ल्यप literally having screened. Technically it is a stage-direction when an actor turned his back on the other actors and speaks on something which is not intended for them. Thus—"तद्भवेदपवारितम् । रहस्यन्तु यदन्यस्य पराद्वृत्य प्रकाश्यते ॥"

(*xxxi*) लक्ष्मणः—आर्ये पश्य पश्य, अयमसावार्य्येण (इत्यर्द्धोक्ते)—

रामः (साक्षेपम्)—अयि बहुतरं द्रष्टव्यमस्ति, अन्यतो दर्शय ।

सीता (सस्नेहबहुमानं निर्वर्ण्य)—सुट्ठु, सोहसि अज्जउत्त एदिणा विणअमाहप्पेण [सुष्ठु शोभसे आर्य्यपुत्र एतेन विनयमाहात्म्येन] ।

लक्ष्मणः—एते वयमयोध्यां प्राप्ताः ।

रामः (सास्रम्)—स्मरामि हन्त स्मरामि ।

जीवत्सु तातपादेषु नवे दारपरिग्रहे ।

मातृभिश्चिन्त्यमानानां ते हि नो दिवसा गताः ॥१९॥

Lak—Look noble lady look here , by my noble brother, that (*when half uttered*)—

Rama—(*Deprecatingly*)—Well there is a good deal remaining to see, guide us elsewhere.

Sita. (*Eyeing with regard and affection*)—My husband you show well in this immensity of modesty.

Lak—Here are we arrived at Ayodhya.

Rama (*With tears*)—I remember, alas ! I remember Gone are those days of ours when, our revered father living with our acceptance of wives fresh, we were anxiously cared for by our mothers (19 R)

मित—। आर्य्यें इति। अर्द्धः अंशमात्रम्। अर्द्धश्वासौ उक्तश्च 'अर्द्धोक्त'। तस्मिन्। असमाप्ते लक्ष्मणवाक्ये इत्यर्थः। अयमसावार्य्येण जित इति वाक्यसमाप्तिः। अनुच्चारिते एव जितशब्दे॥ साक्षेपेति। आक्षेपो निन्दा। तेन सह 'साक्षेपम्'। समक्षमेव 'भार्गवो जितः" इति

प्रशंसावाक्योच्चारणम् अनुचितम्। अतो निन्दन् रामो ब्रवीति॥ सत्त्वेति। महान् विपुलः आत्मा स्वरूपं यस्य स महात्मा। तस्य भावः 'महात्म्यं' परिपूर्णता। 'विनयस्य महात्म्यं' तेन। प्रकर्षगतेन विनयेन इत्यर्थः। हेतौ तृतीया। "शोभसे" इति बहुमानः "आर्य्यपुत्र" इति 'स्नेहः'। तदाह 'सस्नेहबहुमानम्' इति॥ स्मरामीति। 'हन्त इति विषादे अव्ययम्। जीवत्स्विति। अन्वयः—तातपादेषु जीवत्सु (सत्सु) दारपरिग्रहे नवे (सति) मातृभिः चिन्त्यमानानां नः ते दिवसा गता हि। व्याख्या—तातपादेषु जीवत्सु' पूज्ये ताते जीवति 'दारपरिग्रहे' पाणिपीडन-कर्मणि 'नवे' अचिरसम्पन्ने (सति) 'मातृभिः' चिन्त्यमानानाम्, अनुध्यायमानानां 'नः ते' पूर्वानुभूता आनन्दमयाः 'दिवसा गता हि' गता एव॥

Notes 1. **अयम्** etc —This points at the picture before them. **असौ** refers to **भार्गव**। 2. **अयि**—This here expresses **निन्दा**। Comp. "**अयि कठोरयशःकिल ते प्रियम्**"—Act III. Sl. 27. 3. **अन्यत**—**अन्यस्मिन्** *i e*. elsewhere in the gallery. **अन्य+त्रि** (७मी)+**तसि स्वार्थे**। 4. **सस्नेह** &c—**बहुमननं = बहुमानः** (**घञ्**) regard. This is because of his self-effacement. **स्नेह** because the possessor of this sublime virtue is her own husband. 4. **विनयमाहात्म्येन**—This is equivalent to **महता विनयेन** by '**भावानयने द्रव्यानयनम्**'। 5. **एते**—Again points at the scene in the picture 6. **हन्त**—An **अव्यय** implying **विषाद**। 7. **तातपादेषु**—A **कर्म्मधा** of **तात** and **पाद**। **पाद**, when an **उत्तरपद** in such compunds, indicates **प्रशंसा** (**प्रशंसावचन**)। The **समास** is regulated *by* the rule "**प्रशंसवचनैश्च**" which also directs the **परनिपात** of **पाद**। The plural is due to **गौरव बहुवचनम्**। Note that **पाद** is **प्रशंसावचन** *only* when it is the **उत्तरपद** in these compounds. When the word is uncompounded, it does not imply **प्रशंसा**। Thus **पादा: ताता:** will not mean **तातपादा:**—revered father. Hence **पाद** has to be

avoided in the **वाक्य** of the compound. In other words the compound is of the **नित्यसमास** class with **अस्वपदविग्रह** (See **मित** above). The couplet "**मतल्लिकोद्‌घमिश्रा स्युः प्रकाण्डस्थल-मित्तय । हस्तपाशतटाः पादपालीमचर्चिकादयः ॥**"—Gives the **प्रशंसावचन** words in generel use

(*xxxii*) (रा)—इयमपि तदा जानकी,
प्रतनुविरलैः प्रान्तोन्मीलन्मनोहरकुन्तलै-
र्दशनमुकुलमुग्धालोकं शिशुर्दधती मुखम् ।
ललितललितैर्ज्योत्स्नाप्रायैरकृत्रिमविभ्रमै-
रकृत मधुरैरम्बानां मे कुतूहलमङ्गकैः ॥२०॥

Rama—This Janaki too then-

A child, wearing a face lovely to look at by reason of her bud-like teeth and showing off (by contrast) at the sides with beautiful locks that were fine and not over—dense, afforded joy to my mothers with her small limbs that were delicate and charming with unassumed grace that resembled the moon beam, 20

मित—। इयमिति। परवर्त्तिना पद्येन अन्वितमिदम्। अन्वयः—तदा प्रतनुविरलैः मनोहरकुन्तलैः प्रान्तोन्मीलत्दशनमुकुलैः मुग्धालोकं मुखं दधती शिशुः इयं जानकी अपि ललितललितैः ज्योत्स्नाप्रायैः अकृत्रिमविभ्रमैः मधुरैः अङ्गकैः मे अम्बानां कुतूहलम् अकृत। व्याख्या—'तदा' तस्मिन् काले मातृचिन्तासमकाले इत्यर्थः 'प्रतनुभिः' सूक्ष्मैः 'विरलैः' अनतिनिविडैश्च अतएव 'मनोहरः कुन्तलैः केशैः 'प्रान्तयोः' गण्डयोः 'उन्मीलत्' शोभमानम्, तथा 'दशनमुकुलैः 'मुग्धालोकं' कान्तदर्शनं 'मुखं दधती' धारयन्ती "शिशुः इयं जानकी अपि ललितललितैः' अतिसुकुमारैः ज्योत्स्नाप्रायाः' अन्द्रिकाकल्पा ये 'अकृत्रिमविभ्रमाः' सहज-

विलासाः तैः हेतुभिः 'मधुरैः' रुचिरैः 'अङ्कैः' 'इक्ष्वैरङ्ग': 'मे अम्बानां जननीनां 'कुतूहलम्' आनन्दम् अकृत' अकरोत्। मातृभिश्चिन्त्यमाना वयम्, आनन्दश्चानुभूतस्ताभिः सीतारूपविलोकनात् इति भावः। वीरचरितविरुद्धमेतत्। तत्र तु प्राप्तयौवना सीता परिणीता रामेण।

Notes.—1. इयमपि etc —अपि implies समुच्चय of कुतूहलकरण and चिन्तन, the construction being जानकी अपि अम्बानां कुतूहलम-कृत। मातृभिश्चिन्तनक्रियायाः, जानक्या च कुतूहलकरणक्रियायाः एकस्मिन् काले (तदा) समुच्चयः। 2. प्रतनुविरलैः—Qual. मनोहरकुन्तलैः। 3. प्रान्तोन्मीलत्—प्रान्त is पार्श्व in sides of the face. उद्+मील+शतृ उन्मीलत् lit. opening up, here showing off. शोभमानम् as Vidaysagar has it. Compare 'उन्मीलितं तुलिकयेव चित्रम्'—*Kumara*, Now see *Tika* Qual. छलम्। 4. मनोहर &c.—हेतौ तया। This is the reason why the face was प्रान्तोन्मीलत्। 5 दशनमुकुलैः—दशना मुकुला इव teeth looking like white flower buds, उपमितकर्मधा। तैः। हेतौ रेया। This is the reason why the face was मुग्धालोक। 6. मुग्धालोकम्—मुग्धः मनोहरः आलोको दर्शनं यस्य तत् beautiful to look at, वहु। Qual. छलम्। 7. दधती—No नुम् because the root is अभ्यस्त। 8. ललितललितैः—ललितेभ्यो ललितानि ललितललितानि, सुपसुपा। तैः। Qual. अङ्गकैः। 9. ज्योत्स्नाप्रायैः—प्राय here means 'like' तुल्य। ज्योतिरस्त्यास्याम् इति ज्योतिस्+न मत्वर्थे स्त्रियाम् ज्योत्स्ना moon beam. The इ of ज्योतिस् disappears by निपातन in the rule "ज्योत्स्नातमिस्रा।" ज्योत्स्नया प्रायाणि ज्योत्स्नाप्रायाणि, सुपसुपा। तैः। Qual. अकृत्रिमविभ्रमैः। See next note. 10. अकृत्रिम् &c.—क्रियया निर्वृत्ता इति कृ+क्त्रि—कृत्रिमाः with मप् attached, न कृत्रिमाः अकृत्रिमाः not artificial, "i.e." natural.

विभ्रम् is **शोभा, विलास** &c **अकृत्रिमाः विभ्रमाः** natural grace. **तैः । हेतो ३या ।** This gives the **हेतु** why the limbs (**अङ्गक**) were **मधुर ।** The natural grace of the limbs resembled the natural brilliancy of the moon, *i e*, the **विभ्रम** resembled **ज्योत्स्ना** and rendered the limbs **मधुर ।** 11. *Remark*—The description of **सीता** as a **शिशु** at the time of marriage contradicts the **वीरचरित** where on the day after the marriage **राम** speak thus to **सीता** "**उन्नद्धस्तनकुम्भकुड्मलगुरूच्छ्वासावभुग्नस्य ते मध्यस्य त्रिवलीतरङ्गकजुषो भङ्गः प्रिये मा च भूत ।**" This does not suit a **शिशु । कृ+लुङ् त=अकृत ॥** The meter here is **हरिणी ।**

(*xxxiii*)—लक्ष्मणः—एषा मन्थरा ।

रामः (अनुत्तरमन्यतो गत्वा)—देवि वैदेहि ।

इङ्गुदीपादपः सोऽयं शृङ्गवेरपुरे पुरा ।

निषादपतिना यत्र स्निग्धेनासीत् समागमः ॥११॥

लक्ष्मणः (विहस्य स्वगतम्)—अये मध्यमाम्बावृत्तान्तोऽन्तरित आर्येण ।

Lak—Here is Manthara.

Rama—(*Passing on to another point without comment*) Queen Vaidehi ,—

This is that Ingudi tree in the city of Sringavera where formerly chanced my meeting with my friend the king of the Nishadas. 21.

Lak—(*Laughing and to himself*)—Ha ! The incident of our second mother is screened over by my noble brother.

मित—। अनुत्तरमिति। अविद्यमानम् उत्तरं प्रतिवचनं यस्मिन् गमने तत् तथा। इङ्गुदीति। अन्वयः—सः अयं शृङ्गवेरपुरे इङ्गुदीपादपः यत्र पुरा स्निग्धेन निषादपतिना समागमः आसीत्। व्याख्या—सः' पूर्वानुभूतः अयम्' एष चित्रे दृश्यमानः 'शृङ्गवेरपुरे इङ्गुदीपादपः। 'यत्र' यस्मिन् इङ्गुदीपादपे इङ्गुदीपादपतले। तथा 'यत्र' यस्मिन् शृङ्गवेरपुरे

'पूरा' पूर्वं वनप्रयाणसमये इत्यर्थः 'स्निग्धेन वयस्येन' निषादपतिना निषादराजेन गुहेन 'समागम आसीत्' मेलनमभूत ॥ द्वितीयार्द्धे 'यत्र' इति उत्तरवाक्यगतत्वात् तच्छब्दोपादनं नापेक्षते। तथा अनुभूतार्थत्वात् 'सः' इति यच्छब्दनिरपेक्षम् ॥ विहस्येति। स्वस्मिन् आत्मनि गतं 'स्वगतम्' अन्यैरश्रुतं स्वरसंयोग विनैव भाषितम्। तत् यथा तथा। आह इत्यूह्य-क्रियाविशेषणम्। 'मध्यमा' अम्बा जननी कैकेयी तस्या 'वृत्तान्तः' व्यापारः रामवनवासादिक। 'अन्तरितः' 'गोपितः तत् तथा निन्दिताचरणम् उपस्थापितं मा भूत इति परिहृतः॥ इयमपि वीरचरितविरुद्धम्। तत्रहि मृषा कैकय्या अपवाद, सर्वा एव रामवनवासवृत्तान्तो माया शूर्पणखायाः सैव दशरथमुपसृत्य रामस्य निर्वासनं भरतस्य चाभिषेचनं याचितवती इत्युक्तम् ॥

Notes—1. अन्यतः—To another part of the walk. 2. शृङ्गवेरपुरे—Construe शृङ्गवेरपुरे इङ्गुदीपादपः not शृङ्गवेरपुरे यत्र etc Comp. वर्त्मनि वनस्पतिः Para xxxvi, विन्ध्याटवीमुखे विराधसंरोधः—Para xxxvi, &c. 3 स्निग्धेन—स्निह्यतीति स्निह+क्त कर्त्तरि वर्त्तमाने=स्निग्धः friend "स्निग्धो वयस्यः सवयाः" इत्यमरः। 4. मध्यमा &c.—मध्यमाम्बया: कैकय्याः वृत्तान्तः वार्त्ता रामविवासनादिकं दुष्कर्म। 5. अन्तरितः—अन्तर is अन्तर्द्धि screening, or screen. अन्तरेण गोपितः इति अन्तर+णिच (नामधातु)+क्त कर्मणि।

(*xxxiv*) सीता—अम्हो एसो जडसम्भमणवुत्तन्तो [अहो! एष जटासयमनवृत्तान्तः]।

लक्ष्मणः—

पुत्रसंक्रान्तलक्ष्मीकैर्यद्वृद्धेक्ष्वाकुभिर्धृतम्।
धृतं बाल्ये तदार्येण पुण्यमारण्यकं व्रतम् ॥२२॥

Sita—Ha! Here is the incident of matting the locks.

Lak—The holy vow of the forester which had been observed by the Iksvakus with their sovereignty transferred to their sons when old, was, by noble brother, taken up in his childhood. 22.

मित— । अहो इति । 'जटानां संयमनं बन्धनं तदेव 'वृत्तान्तः' । पुत्रेति । अन्वयः—वृद्धैरिक्ष्वाकुभिः पुत्रसंक्रान्तलक्ष्मीकैः (सद्भिः) यत् धृतं तत् पुण्यमारण्यकं व्रतम् आर्येण बाल्ये धृतम् । व्याख्या—'वृद्धैः इक्ष्वाकुभिः' इक्ष्वाकुकुलजैः नृपैः 'पुत्रे संक्रान्ता 'लक्ष्मीः' राजश्रीः यैः (अन्तर्भाविताण्यर्थः क्रामतिः) । यद्वा 'सक्रान्ता' सङ्गता 'लक्ष्मीः' येषां तादृशैः सद्भिः 'यत्' धृतम्' अवलम्बितं 'तत् पुण्य' पवित्रम् 'आरण्यकं व्रतं' वनवासरूपा तापसवृत्तिः 'आर्येण' पूज्येन' रामेण 'बाल्ये' शैशवे एव 'धृतम्' । अहो त्यागः ।

Notes.—1. पुत्र &c.—लक्षयति पश्यति नीतिविदं पुमांसम् इति लक्ष+णिच्+ई (औणादिक) कर्त्तरि स्त्रियाम्=लक्ष्मीः Fortune, Royalty &c. ; now see मित । त्रिपदबहु । Or पुत्रे सक्रान्ता, सम्पत्ता । तादृशीः लक्ष्मीः येषाम् । कप् is added by the rule "उरःप्रभृतिभ्यः कप्" । "नद्यृतश्च" has no scope because लक्ष्मी is not नदीसंज्ञक । Witness लक्ष्मीः with a विसर्ग which would have disappeared if the word were नदीसंज्ञक । 2. वृद्धैरिक्ष्वाकुभिः —इक्ष्वाकु is an ancestor of the race. By transference of epithets the descendants of इक्ष्वाकु are also called इक्ष्वाकु । वृद्धा इक्ष्वाकवः &c. The word वृद्ध here is significant. They did it when *old* after having fully enjoyed the sweets of power &c. Noble brother did the same when quite young, when enjoyment was just coming within his reach. Hence the magnitude of the sacrifice. 3. *Remark*—It would have been better to leave वृद्ध uncompounded. Compounded, the word loses the prominence which is necessary for the force as explained in note 2.

(*XXXV*) सीता—एसा पसण्णपुण्णसलिला भअवदी भाइरही [एषा प्रसन्नपुण्यसलिला भगवती भागीरथी]।

रामः—देवि रघुकुलदेवते नमस्ते !

तुरगविचयव्यग्रानुर्वीभिदः सगराध्वरे
कपिलमहसामर्षात् प्लुष्टान् पितुः प्रपितामहान्।
अगणिततनूपातं तप्त्वा तपांसि भगीरथो
भगवति तव स्पृष्टानद्भिश्चिरादुददीधरत् ॥२३॥

सा त्वमम्ब स्नुषायामरुन्धतीव सीतायां शिवानुध्यानपरा भव।

Sita—This is mighty Bhagirathi with her clear and holy waters.

Rama—Salutaion to thee, the Illustrious Deity of the race of Raghu.

O mighty one, Bhagiratha, having practised penance, heedless of the loss of body, saved after a long time, with the touch of thy waters the great-grand-fathers of his father who, intent upon the search for the horse at the sacrifice of Sagara, had rent the earth and got consumed by kapila's fire from wrath.

With such traditions, Mother do thou be, like Arundhati, watchful over the welfare of thy daughter-inlaw Sita.

मित— । एषेति। 'प्रसन्नं' विमलं 'पुण्यं' पावनञ्च 'सलिलं' यस्याः॥ देवीति—कुलस्य देवता, विशेषेण पूजिता देवी, कुलदेवता। रघूणां रघुवंशीयानां कुलदेवता रघुकुलदेवता। यद्वा—रघुकुलस्य देवता। कुल-देवतात्वं समर्थयते तुरगेति। अन्वयः—भगवति, भगीरथः अगणिततनूपातं तपांसि तप्त्वा तव अद्भिः स्पृष्टान् सगराध्वरे तुरगविचयव्यग्रान् उर्वीभिदः अमर्षात् कपिलमहसा प्लुष्टान् पितुः प्रपितामहान् चिरात् उददीधरत्। व्याख्या—हे 'भगवति, महिमवती गङ्गे' पूर्वपुरुषोऽस्माकं दिलीपतनयो 'भगीरथः अगणितः' उपेक्षितः 'तनूपातः' देहनाशो यस्मिन् कर्मणि तत् यथा

तथा 'तपांसि तप्त्वा' तपश्चरित्वा तेनैव तपोबलेन त्वां प्रसाद्य स्वर्गात् भूतलमानीय 'तव अद्भिः सलिलैः, 'स्पृष्टान्' संसृष्टान् 'सगरस्य' तेषामेव पितुः 'अध्वरे' यागे अश्वमेधे 'तुरगस्य यज्ञियाश्वस्य इन्द्रेण चोरितस्य रसातलञ्च कपिलसमीपे नीतस्य 'विचये' अन्वेषणे 'व्यग्रान्' व्यापृतान् भुवि अश्वमनासाद्य पाताले विचयार्थम् 'उर्वीभिदः'—मही विदार्य कपिलसमीपं गतान् कपिलश्च अश्वचौर इति धर्षणपरान् अमर्षात्' रोषाच्च ज्वलितं यत् 'कपिलस्य महः' तेजः तेन 'प्लुष्टान्' भस्मीभूतान् 'पितुः' दिलीपस्य 'प्रपितामहान्' पितामहान् ("पितुश्च पितामहान्" इति कर्त्तव्ये "पितुः प्रपितामहान्" इति लिपिकरप्रमाद इव प्रतिभाति) 'चिरात्' बहोः कालात् परम् 'उददीधरत्' उद्धारयामास ॥ 'सा' तपसा कुलदेवतारूपेण अर्जिता कुलमङ्गलकारिणी च त्वम् अरुन्धतीव तदाख्यकुलगुरुपत्नी इव स्नुषायां वध्वां सीतायां शिवानुध्यानपरा मङ्गलचिन्तननिरता 'भव'। विपत् सूच्यते। अस्य वचनस्य उपयोगं सप्तमाङ्के स्फुटीभविष्यति ॥

Notes—*1*. तुरग &c.—तुरेण वेगेन गच्छतीति तुर + गम + ड कर्त्तरि तुरगः horse, विशिष्टम् अग्रमेषाम् इति व्यग्राः keen , तुरगस्य विचयः। तस्मिन् व्यग्राः, समुत्सुकाः। 2. उर्वी &c.—उर्वी is मही earth. तां भिन्दन्ति इति उर्वी + भिद् + क्विप् = उर्वीभिदः—तान्। They dug up the earth at the command of their father—"यावत्तुरगसन्दर्शनं तावत् खनत मेदिनीम्"। 3. सगर &c.—सगर was an old ancestor of the Raghu, अध्वर=याग (अध्वानं स्वर्गमार्गं राति ददाति इति क प्रत्ययः)। This was an अश्वमेध। The sacrificial horse was stolen by Indra and left tied near the sage kapila who was practising penance in Patala. 60000 of Sagara's sons went out in search of the horse. They dug up the earth, saw the horse near Kapila whom they insulted and were all consumed in the fire of kapila's wrath. The hole dug by Sagar's sons is the सागर, sea (सगरस्य अयम् इति अण्)। 4.

अमर्षात्—मृष+घञ्‌ भावे मर्षः क्षमा। न मर्षः अमर्षः। तस्मात्। हेतौ ५मी। हेतु of कपिलमहः। Kapila's fire was due to the intolerance (अमर्ष) caused by the arro-gance of the princes 5. प्रपितामहान्—This should be पितामहान् as is seen from the रामायण quoted by विद्यासागर—'सगरस्यासमञ्जस्तु असमञ्जादथांशुमान्। दिलीपोऽंशुमतः पुत्रो दिलीपस्य भगीरथः ॥' The princes were प्रपितामह of भगीरथ not of his father. Hence विद्यासागर suggests the reading पुरा प्रपितामहान्। This attaches oversight to the poet himself because it is difficult to believe that the scribes misread पितुः for पुरा। I am inclined to think that the poet had written पितुश्च पितामहान् which agrees with the रामायण। The scribes, however misread श्च and wrote प्र, a very likely error ; with च, construe उर्वीमिद्धः दग्धांश्च—rent the earth and got burnt up. 6. चिरात्—An अव्यय meaning चिरेण कालेन। अपवर्गे तृतीया which has disappeared. They lay long undelivered. Their great grandson भगीरथ brought down गङ्गा from heaven and procured their deliverance. The goddess गङ्गा was thenceforth called भागीरथी (भगीरथस्य इयं तेन आनीता इति वा, or तस्य कुलदेवता इति)। उद्+द+णिच्+लुङ् (चङ्)=उददीधरत्।

(*xxxvi*) लक्ष्मणः—अयमसौ अग्रजावेदितश्चित्रकूटयायिनि वर्त्मनि वनस्पतिः कालिन्दीतटवटः श्यामो नाम।

सीता—सुमरेदि एदं पदेसं अज्जउत्तो [स्मरति एतं प्रदेशमार्यपुत्रः] ?

रामः—अयि कथं विस्मर्यते ?

अलसलुलितमुग्धान्यध्वसंजातखेदा-
दशिथिलपरिरम्भैर्दत्तसंवाहनानि।

परिमृदितमृणालीदुर्वलान्यङ्गकानि
त्वमुरसि मम कृत्वा यत्र निद्रामवाप्ता ॥२४॥

Lak.—This is the fig tree, Syama by name, on the bank of the Kalindi, on the road leading to the Chitrakuta, mentioned by Bharadvaja.

Sita.—Does my husband remember this spot ?

Rama.—How could it be forgotten, dear ?

(This is) where you fell asleep laying on my bosom your slim limbs powerless like crushed stalks of lotus, languid, bruised and thus charming (Or—and palsied) through the fatigue causel by the journey—limbs to which shampooings were done by close embraces . 24.

मित —अयमिति। मुनिना 'भरद्वाजेन आवेदितः' चित्रकूटं याति इति 'चित्रकूटयायि' तस्मिन् 'वर्त्मनि' स्थितः 'अयमसौ वनस्पतिः' वृक्षः। वृक्षस्य विस्तरमाह—'वर्त्मनः कस्मिन् प्रदेशे इत्याह—'कालिन्द्याः यमुनायाः तटे जातः। किं जातीयो वनस्पतिरित्याह — वटः' वटजातीयोवनस्पतिः'। किमाख्य इत्याह—श्यामो नाम श्याम इति प्रसिद्धः॥ अयीति। प्रदेशः कर्म। कथं विस्मर्य्यते एष प्रदेशः। स्मरणे कारणमाह—अलसेति। अन्वयः—यत्र त्वम् अध्वसञ्जातखेदात् अलसलुलितमुग्धानि परिमृदित-मृणालीदुर्वलानि (ततश्च) अशिथिलपरिरम्भैः दत्तसंवाहनानि अङ्गकानि मम उरसि कृत्वा निद्रामवाप। व्याख्या—कथं विस्मर्य्यते एष प्रदेशः 'यत्र' यस्मिन् प्रदेशे त्वम् अध्वनः अध्वविक्रमणात् 'सञ्जातो' यः 'खेदः' क्लान्तिः तेन 'अलसानि' स्तिमितानि 'लुलितानि' मृदितानि 'मुग्धानि' मनोहराणि तेन च 'परिमृदिता' निष्पिष्टा या 'मृणाली' विसकिसलयं सा इव दुर्वलानि ततश्च श्रममपनुद्य वलमाधातुं मया 'अशिथिलैः गाढैः 'परिरम्भैः आलिङ्गनैः' दत्तं संवाहनम्' अङ्गचर्य्या मर्दनरूपा येषु तथाविधानि अङ्गकानि 'मम उरसि वक्षसि 'कृत्वा' निधाय निद्राम् 'अवाप्ता' निद्रितः। भरद्वाजाश्रमात् चित्रकूट' प्रति चलिता पथि परिश्रान्ता अस्यैव वटस्य तले मम वक्षसि त्वं प्रसुप्ता. सुखातिशयश्च तेन मयानुभूतः, तत् कथं विस्मर्य्यते एष प्रदेशः ? मालिनीवृत्तम्।

Notes,—1. वनस्पतिः—वनस्य पतिः वनस्पतिः । The word is of the पारस्करादि class and takes सुट् changing पति into स्पति। This means here a tree in general. वनस्पतिर्वृक्षमात्रे'' । 2. कालिन्दी etc.—कालिन्द्यास्तटम् । तस्मिन् वटः सुप सुपा । 3. अलस etc.—अलसानि च लुलितानि अलसलुलितानि, कर्मधा— । तानि च मुग्धानि च, कर्मधा— । See next 4. अध्व etc—अध्वन. or अध्वनि सञ्जातः अध्वसञ्जातः सुप् सुपा । तादृशः खेदः कर्मधा— ! तस्मात् । हेतौ ५ मी । हेतु of अलस etc. सञ्जात seems superfluous, अध्वखेदात् is enough. 5. अशिथिल etc — परि+रभ+घञ् भावे = परिरम्भ embrace. करणे ३या । 6. दत्त etc.—सम्+वह+णिच्+ल्युट करणे = संवाहन that which is to remove (fatigue)—shampoo. 7. परिमृदित etc.—परिमृदिता मृणाली कर्मधा— । सा इव दुर्बलानि, उपमान कर्मधा—Evidently Sita's limbs were not naturally so powerless. They were then rendered powerless because they had become अलसलुलितमुग्धानि through अध्वसञ्जातखेद । But मुग्धानि (charming) has nothing to do with दुर्बलानि । Hence explain मोहमुपगतानि इति मुह+क्त कर्तरि = मुग्धानि palsied. Or if we agree to put up with a little दूरान्वय we may construe— यत्र त्वम् अध्वसञ्जातखेदात् परिमृदितमृणालीदुर्बलानि अलसमुग्धानि अशिथिलपरिरम्भैः दत्तसंवाहनानि अङ्गकानि etc. which again is not altogether free from objection. अङ्गकानि—ह्रस्वानि अङ्गानि इति अङ्ग+कन् ह्रस्वे = अङ्गकानि । We suppose the ह्रस्वता here to be opposed to stoutness, *i. e.*, it is slimness.

(*xxxvii*) लक्ष्मणः—एष विन्ध्याटवीमुखे विराधसंरोधः ।

सीता—अलं दाव एदिणा । ऐक्खामि दाव अज्जउत्तहत्थधरिततालवेण्टादपत्तं अत्तणो दक्खिणारण्णपवेसारम्भं [अलं

मावदिनेन। प्रेक्षे तावत् आर्यपुत्रहस्तधृततालवृन्तातपत्रम् आत्मनो दक्षिणारण्यप्रवेशारम्भम्]।

रामः—एतानि तानि गिरिनिर्झरिणीतटेषु
वैखानसाश्रिततरूणि तपोवनानि।
येष्वातिथ्यपरमाः शमिनो भजन्ते
नीवारमुष्टिपचना गृहिणो गृहाणि ॥२५॥

Lak—Here is our capture by Viradha at the entrance to the Vindhya forest.

Sita—Away with this I am looking at (the scene of) my attempt to enter the southern forest with a palm leafumbrella held (over me) in the hands of my husband.

Rama.—These are those penance groves on the banks of mountain-streams with trees resorted to by hermits where house-holders retired from the world (Or—self-restrained) occupy huts, cooking handfuls of wild rice and consider hospitality the highest duty. 25.

मित—। एष इति। 'विन्ध्यस्य' तदाख्यस्यगिरेः या 'अटवी' वनं तस्याः 'मुखे' 'प्रवेशमार्गे' 'विराधेन' तदाख्येन रक्षसा आर्यस्य मम च 'संरोधः' निरुध्य ग्रहणम्॥ अलमिति। 'आर्य्यपुत्रस्य हस्तेन धृतं यत् 'तालवृन्तं' तदेव 'आतपत्रं' यस्मिन् तत्। विन्ध्यारण्यादारभ्य 'दक्षिणस्यां दिशि प्रसृतं यत् अरण्यं तस्या वा तत्र 'प्रवेशस्य आरम्भम्' उद्योगम्। प्रेक्षे एतामीति। अन्वयः—गिरिनिर्झरिणीतटेषुवैखानसाश्रिततरूणि एतानि तानि तपोवनानि येषु नोवारमुष्टिपचनाः आतिथेयपरमा शमिनो गृहिणः गृहाणि भजन्ते। व्याख्या—निर्झरा विद्यन्ते आसां निर्झरिण्यः नद्यः। गिरिनिर्झरिणीनां गिरिनदीनां 'तटेषु 'वैखानसैः वानप्रस्थैः यतिभिः 'आश्रिताः' अधिकृता 'तरवो' वृक्षाः वृक्षमूलानि इत्यर्थः येषु तानि 'एतानि' चित्रितानि' 'तानि तपोवनानि येषु नीवारमुष्टेः' नियताहारत्वात् मुष्टिमात्रस्य नीवारसंग्रहस्य 'पचनं' पाकी येषां तथाविधा एव

स्वल्पमप्योदने आतिथेयम्' अतिथिसत्कारः 'परम्' प्रधानं कर्म येषां तादृशाः 'शमिनः' शमप्रधानाः 'गृहिणः' गृहस्था मुनयः 'गृहाणि' अत्रत्ये कुटीः समाश्रयन्ते कृतकुटीरा निवसन्ति ॥ वसन्ततिलकं वृत्तम् ।

Notes. 1.—विराध &c.—विराध is the कर्त्ता of संरोध ; the कर्म्म is easily guessed, viz, राम and लक्ष्मण ; Also the घञ् in संरोध (सम्+रुध+घञ्) is भावे। Hence there is उभयप्राप्ति here and विराध takes अनुक्ते कर्त्तरि ३या । Thus आवयोः विराधेन संरोधः। Compounding आवयो विराधसंरोधः इति— । Or avoid the rule 'उभयप्राप्तौ कर्म्मणि and apply the Vartika "शेषे विभाषा" । This gives आवयोः विराधेन विराधस्य वा संरोधः yieiding as before विराधसंरोधः as a ३तत्—or ६तत् । 2. अल तावत् &c —She wants to avoid the painful sight. आर्य्यपुत्र &c—See मित। Qual दक्षिणारण्य &c. 4. दक्षिणारण्ये &c.—See मित । आरम्भ is here आरम्भाश्रयं चित्रम् by transference of epithets. 5. वैखानस &c—वैखानस is वानप्रस्थ an anchorite. The derivation is uncertain, The Bhagavata in the रासपञ्चाध्याय uses विखनस् cr विखनस as a name of ब्रह्मन् । If this is accepted, we may say विखनसः विखनसस्यः वा those who have renounced the world for ब्रह्मन् । They get seated at the foot of trees and practise penance in this penance groves (तपोवनानि) । 6. आतिथेय &c —अतिथिषु साधु इति अतिथि+ढञ् (एय) आतिथेयम् hospitality. Now see मित । Also see next two. 7. शमिनः— शम+घञ भावे 'शमः restraint. सः अस्ति एषाम् इति शम+इनि शमिनः । वा—शम+घिणुन् । Owing to their restraint they could eat very sparingly or renounce a few meals altogether when necessity arose. 8. नीवार etc.—नितरां व्रियन्ते मुनिभिः इति नि+वृ

+घञ् कर्म्मणि नीवाराः wild paddy. नि becomes नी by 'उपसर्गस्य घञि' । मुष्टि shows the scantiness of the supply. Even thus they were आतिथेयपरमाः । How was that possible with such a meagre supply? They themselves were शमिनः so could afford to hand over their all to the guests. 9. गृहाणि —"गृहं गृहाः पुंभूम्नि" does not bar. the plural use in the neuter.

(*xxxviii*) लक्ष्मणः—अयमविरलानोकहनिवहनिरन्तर-स्निग्धनीलपरिसरारण्यपरिणद्धगोदावरीमुखरकन्दरः सन्ततमभि-ष्यन्दमानमेघमेदुरितनीलिमा जनस्थानमध्यगो गिरिः प्रस्रवणो नाम ।

राम—स्मरसि सुतनु तस्मिन् पर्व्वते लक्ष्मणेन
प्रतिविहितमपर्य्याप्तस्थयोस्तान्यहानि ।
स्मरसि सरसतीरां तत्र गोदावरीं वा
स्मरसि च तदुपान्तेष्वावयोर्वर्त्तनानि ॥२६॥ (रा—)

Lak.—Here is the hill Prasrâvana by name extending to the heart of Janasthana whose darkness is deepened by perpetually pouring clouds and whose caves bring with the (flow of the) Godavari which is embraced by the forests at the skirts that are of a uniformly mild blue colour because of dense rows of tree.

Rama—Ho Fair-limbed one, do you remember those days on that mountain where we rested at ease with comforts provided by Lakshamana? Do you also remember the Godavari there with its attractive (i. e. shady and cool) banks? Do you remember our strolls as well in its neighbourhood? 26. (R—)

मित। अथमिति। 'अयं प्रस्रवणो नाम गिरिः'। किम्भूतः प्रस्रवणः ? 'जनस्थानस्य तदाख्यस्य 'मध्यं' मध्यमार्गपर्य्यन्तं 'गच्छति प्रसरति यस्ता-दृशः। पुनः किम्भूतः ? 'सन्ततं सततम् 'अभिष्यन्दमानैः' वर्षद्भिः 'मेघैः मेदुरितः' स्निग्धतामापादितो 'नीलिमा' श्यामता यस्य तथाविधः। पुनः किम्भूतो गिरिः ? गोदावर्य्या' तदाख्यया नद्या हेतुभूतया, तज्जलप्रवाहेण इत्यर्थः मुखराः नदन्तः 'कन्दराः' गुहाः यस्य तथाविधः। किम्भूता गोदावरी ? 'निरन्तराः' अविच्छिन्नाः' 'स्निग्धनीलाः' मसृणश्यामाः परिसराः' पर्यन्त-भागाः येषां तादृशैः अरण्यैः परिणद्धा आलिङ्गिता गोदावरी। तच्च कथम् ? 'अविरलैः निविडैः 'अनोकहनिवहैः' हेतुभिः। गोदावरीसलिलपर्यन्तप्रसृता वृक्षराजिरित्यर्थः॥ स्मरसीति। अन्वयः—हे तनु तस्मिन् पर्वते लक्ष्मणेन प्रतिविहितसपर्य्याखस्थयोः (आवयोः) तानि अहानि स्मरसि ? तत्र सरस-तीरां गोदावरीं वा सरसि? तदुपान्तेषु आवयोर्वर्त्तनानि स्मसि च ? व्याख्या —हे 'सतनु' (See III 15) कान्तवपुः सीते 'तस्मिन् पर्वते' गिरौ प्रस्रवणे 'लक्ष्मणेन प्रतिविहिता' उत्प्रेक्ष्य प्रार्थनां विनैव कृता या 'सपर्य्या' या परि-चर्य्या तया 'सुखस्थयोः' सुखमवस्थितयोः आवयोः तानि अहानि' दिनानि स्मरसि किम् ? 'तत् तस्मिन् गिरौ गिरिप्रान्ते इत्यर्थः 'सरसं तीरं यस्याः तथाविधां 'गोदावरीं वा स्मरसि ? 'तस्याः' गोदावर्य्याः 'उपान्तेषु' पर्य्यन्त-भागेषु 'आवयोः वर्त्तनानि' भ्रमणानि 'स्मरसि च'॥

Notes—1. अविरल &c—Qual गिरिः। 'अनसां' शकटानाम् 'अकः' गतिः अनोकः। तां घ्नन्ति इति अनोक+हन ड कर्तरि=अनोकहाः trees. Long lines of carts are often seen held up by trees blown down by gales and lying across roads. परिसरत्यस्मिन् इति परि+सृ+घ संज्ञायां=परिसरः skirts, *Cf.* "सद्यः पुरीपरिसरेषु शिरीष-मृद्वी" !' परि+नह बन्धने क्त कर्म्मणि=परिणद्ध embraced. In this sense comp. ताम्बुलवल्लीपरिनद्धपुगास्वेलालतालिङ्गितचन्दनासु"-*Raghu.* न विरलाः अविरलाः not sparse, *i, e,* dense. निर्गतम् अन्तरम्

अवकाशशून्याः निरन्तरा continuous. अनोकहानां निवहः अनोकहनिवहः । स्निग्धाश्च नीलाश्च स्निग्धनीलाः कर्मधा— । निरन्तराश्च स्निग्धनीलाश्च निरन्तर-स्निग्धनीलाः कर्मधा— । तादृशाः परिसरा एषां निरन्तरस्निग्धनीलपरिसराणि, बहु— । अविरलाः अनोकहनिवहाः, कर्मधा । अविरलानोकहनिवहैः निरन्तरस्निग्धनीलपरिसराणि सुप् सुपा । तथाविधानि अरण्यानि, कर्मधा । तैः परिणद्धा या गोदावरी , तया मुखराः, सपसुपा— । तथाविधाः कन्दराः यस्य । बहु— । 2. सन्ततम्—सम्+तन+क्त कर्म कर्त्तरि=सन्तत or सतत । The म of सम् disappears optionally by the कारिका "समो वा ततहितयो." । Qual the क्रिया in अभिष्यन्दमान 3, अभिष्यन्दमान &c.—अभि+स्यन्द शानच कर्त्तरि=अभिष्यन्दमान or अभिस्यन्दमान—the ष being optional by 'अनु विपर्य्यभिनिभ्यः स्यन्दतेरप्राणिषु' । मिद (स्नेहने भ्वादि) घुरच् कर्मकर्तरि=मेदुर mild स्निग्ध । मेदुर कृतः इति मेदुर+णिच् (नामधातु) क्त कर्मणि मेदुरित subdued. नीलस्य भाव इति नील+इमनिच्=नीलिमा blueness. अभिष्यन्दमाना मेघाः, कर्मधा— । तै मेदुरितः, इतत— । तादृशो नीलिमा यस्य, बहु—; Qual गिरिः । Mark that मेदुरितनीलिमा गिरिः is the same as स्निग्धनीलो गिरिः । 4. जनस्थान &c—जनस्थान was the old name of the central part of the Deccan, तस्य मध्यम् । तत्र गच्छतीति जनस्थानमध्य+गम+ड कर्त्तरि । 5. प्रतिविहित &c—सपर (अदन्त) is a root of the कण्ड्वादि class meaning "to honour' (पूजायाम्) । सपर+यक स्वार्थे सपर्य्य which also is a root. The यक् is by the rule—कण्ड्वादिभ्यो यक सपर्य्य+अभावे स्त्रियाम्=सपर्य्या पूजा, i, e., all those attentions to minister to their comforts. स्वस्मिन् तिष्ठतः इति स्व+स्था क कर्त्तरि=स्वस्थौ at ease. प्रतिविहिता सपर्य्या, कर्मधा— । तयां स्वस्थौ । तयोः । Qual. आवयोः । 6. तामि—No षष्ठ्यन्त is necessary because the reference is to अनुभूतार्थ । 7. अहानि—No शेषविवक्षा, hence "अधीगर्थ—" does not apply, and we get कर्मणि २या, not षष्ठी ।

सरसं &c.—रस is स्वाद । रसेन सह सरसम् tasteful, i. e., attractive, वल्गु— । सरसं तीरं यस्याः ताम्— । Qual. गोदावरीम् । 9. उपान्तेषु— अन्त is समीप । उपगता अन्तम् उपान्ता: close to the margin. प्रविविक्त— । तेषु । 10, आवयोः—अहम् च, त्वं च, आवाम्, एकशेष by the Varttika "त्यदादीनां मिथः सहोक्तौ यत् परं तच्छिष्यते" i. e, when words of the त्यदादि class are spoken of together (as in a द्वन्द्व) that which is subsequent in the list is retained and the other dropped युष्मद् and अस्मद् are त्यदादि and युष्मद् precedes अस्मद् in the list Hence अस्मद् is the शेष here giving आवाम् । तयोः । शेषे षष्ठी । 11. वर्त्तनानि—वृत + ल्युट भावे । वर्त्तन is usually revolution as in, "मेरोरुपान्तेष्विव वर्त्तमानम्" । Here it means motion in general i. e. walk, stroll, &c.

(*xxvii.*) (रा—) अपि च

किमपि किमपि मन्दं मन्दमासत्तियोगा-
दविरलितकपोलं जल्पतोरक्रमेण ।
अशिथिलपरिरम्भव्यापृतैकैकदोष्णो-
रविदितगतयामा रात्रिरेव व्यरंसीत् ॥ २७ ॥

(R —) And (do you remember) also that—

Night itself passed unto us with its watches unnoticed, an arm of each of us engaged in clasping the other close, we through proximity talking low and aimlessly with our cheeks in contact ?. 27.

मित । अपीति । स्मरसीति योज्यम् । स्मरसि चापि यत् रात्रिरेव व्यरंसीत् इति पूर्ववर्त्तिना श्लोकेन सम्बन्धः ॥ किमपीति । अन्वयः—अशिथिल-परिरम्भव्यापृतैकैकदोष्णोः आसत्तियोगात् अविरलितकपोलं मन्दं मन्दं

किमपि अक्रमेण जल्पतोः (आवयोः) रात्रिरेव अविदितगतयामा (सती) व्यरंसीत् । व्याख्या—'अशिथिलः' गाढः यः 'परिरम्भ' आलिङ्गनं तत्र 'व्यापृतः' नियुक्तः मम 'एकः' तव च 'एकः दोः' बाहुः ययोः तादृशयोः अतएव 'आसत्तेः' परस्परसान्निध्यस्य 'योगात्' सद्भावात् 'अविरलितौ' मिलितौ 'कपोलौ' गण्डौ यस्मिन् कर्म्मणि तत् यथा तथा मन्दं मन्दं साम्निध्यादेव नीचैर्नीचैः 'किमपि किमपि अचिन्तितोपस्थितं वस्तु अचिन्तितत्वादेव 'अक्रमेण' क्रमस्य परिपाट्या अभावेन विश्रृङ्खलं तथा तथा इत्यर्थ 'जल्पतोः' गदतोः आवयोः रात्रिरेव समग्रा एव रात्रिः न तु तस्या एकदेशमात्रम् 'अविदितम्' अज्ञातं यथा तथा 'गताः' याताः यामाः' प्रहराः 'यस्या' तादृशी सती व्यरंसीत् व्यतीता । विनिद्रयोर्जल्पनपरयोरेव अदृणोः प्रभाता रजनी इत्यर्थः । इत्येतत् स्मरसि किम् इति पूर्वेण सम्बन्धः ॥

Notes;—1. किमपि किमपि—One refers to राम the other to सीता। Each was talking at random. 2. मन्दं मन्दम्—मन्द is अनुष्ठ। It is गुणवचन qualifying जल्पनक्रिया। The duplication is by by the rule "प्रकारे गुणवचनस्य" the sense being मन्दप्रकारं जल्पतोः talking *rather* low. The double form has to be treated like a कर्मधा—compound by the rule "कर्मधारयवदुत्तरेषु"। This requires the elision of the विभक्ति with the form मन्दमन्दम। This irregularity is common with poets, Comp. "मन्दं मन्दं नुदति पवनः"—*kalidas* A defence may be attempted —मन्दं जल्पतोः talking low, मन्द being कर्म or क्रियां वि— । मन्दं यथा तथा मन्दं जल्पतो —Softly talking low. i e., talking very low. 3, आसत्ति &c—आ+सद्+क्तिन्भावे=आसत्तिः आसन्नता closeness. तस्य योगः। तस्मात् (हेतौ ५मी—हेतु of अविरलित &c.) 4. अविरलित &c.—विरल sparse here separated. न विरलौ अविरलौ not separated'*i, e.*, in contact, अविरलौ कृतौ इति अविरल+णिच

(नाम धातु) + क्त कर्मणि, अविरलितौ । Next बहु — । 5. अक्रमेण—क्रम order. न क्रमः अक्रमः random, नञ् तत्— । तेन प्रकृत्यादि or सहार्थे रैया। 6. अशिथिल &c —न शिथिलः । तादृशः परिरम्भ., कर्म्मधा । तस्मिन् व्यापृतम् छयपृया। एकम एकम् एकैकम one of each. कर्म्म-व्यतिहारे द्विरुक्ति। The whole is treated as a बहुव्रीहि Compound, hence the first एकम् drops its विभक्ति । एकैकंदोः एकैकदोः कर्म्मधा — । दोस् is both masculine and neuter. अशिथिलपरिरम्भ-व्यापृतम एकैकदोः ययो तथाविधयो । Qual आवयो: of verse 26. This compound explains the reason for "आसत्तियोग। दोस् becemes दोषन् optionally (by the rule "पद्दन्नोमास्—" in *Bibhaktis* beginning with शस्। Hence—"व्यापृतैकैकदोषोः" is also correct. 7. अविदित &c.—अविदिताश्च गताश्च यामाः यस्यां त्रिपदबहु 8 रात्रिरेव—एव implies अवधारण। In other wordsit adds emphasis to रात्रि *i.e*, रात्रिरेव means the whole night. जल्पतोः रात्रिरेव व्यरंसीत् implies bv virtue of the शतृ in जल्पतोः, that day dawned *before* the जल्पन had finished. Compare—वादिनः धेनुरावबृते in "इति वादिनः एवास्या होतुराहुतिसाधनम् । अनिन्द्या नन्दिनी नाम धेनुरावबृते वनात् ॥"

—*Raghu*

(*xl*) लक्ष्मणः—एषा पञ्चवट्यां शूर्पणखा ।

सीता—हा अज्जउत्त, एत्तिअं दे दंसणं (हा आर्य्यपुत्र, एतावत् तेदर्शनम्) ।

रामः—अयि विप्रयोगत्रस्ते, चित्रमेतत् ।

सीता—जहा तहा होदु, दुज्जणो असुहं उपापादेइ [यथा तथा भवतु, दुर्ज्जनः असुखम् (अशुभम्) उत्पादयति] ।

रामः—हन्त वर्त्तमान इव मे जनस्थानवृत्तान्तः प्रतिभाति ।

Lak—Here is Surpanakha in the Panchavati.

Sita—Alas, my husband, this much is my sight of you.

Rama—Ah ! you frightened—by (thoughts of) separation, this is but a picture.

Sita— Be it as it may, the wicked cause evil,

Rama—Ha , The events at Janasthana appear as if present before me.

मित—एषेति। 'पञ्चवट्याम्' आलिखिता इति योज्यम् ॥ हा इति 'एतावत् ते दर्शनम्'' इति भाविन्या विपत्तेश्छाया। 'ते' इति कर्म्मणि षष्ठी ॥ अयीति। 'विप्रयोगो' विरहः। तस्मात् 'त्रस्ता' सीता 'विप्रयोगत्रस्ता'। पूर्वानुभूतो विप्रयोगः शूर्पणखाकृत आसीत् इति भयम्। नह्यत्र तत्त्वतः शूर्पणखायाः आगमः 'चित्रमेतत् तस्याः तत् कुतो भयम् ॥ चित्रगता वा पारमार्थिकी वा 'यथा तथा भवतु' तस्याः प्रसङ्गोऽपि अशुभम् उत्पादयति' परम् अश्रेयसे भवति। मन्ये अमङ्गलं किञ्चित् भविता। ''कथापि खलु पापानामलमश्रेयसे यतः''। हन्तेति। 'हन्त इत्यव्ययंमाह विषादे। विषादकारणमाह—'जनस्थानस्य वृत्तान्त' सीतापहरणरूपः अतीतोऽपि प्रतिकृतोऽपि अद्य 'मे वर्त्तमान इव प्रतिभाति' प्रत्यक्षमिव दृश्यते। अयमपि आसन्नस्य सीताविरहस्य छायापातः ॥

Notes.—1. शूर्पणखा—शूर्पा इव नखा अस्या वह—। ङीष् is prohibited by "नखमुखात् संज्ञायाम्" because this is the संज्ञा of Ravana's sister ! न becomes ण by "पूर्वपदात् संज्ञायामगः" । 3. एतावत् &c.—The mention of शूर्पणखा alarms her. 3. अशुभं—This is usually translated as असुखम्। But अशुभम् seems better, अशुभ is अमङ्गल। This is a forecast of the great अमङ्गल (banishment) which was impending. Again we have already had a warning against दुर्जन in Sl.7. It seems the same word दुर्जन is repeated here to show that the mishap

is going to happen through दुर्जन । 4. वर्त्तमान इव—I too am reminded of those heart-rending incidents at Janasthana and feel as if those sufferings I am again going through now

(xli) लक्ष्मणः—

अथेदं रक्षोभिः कनकहरिणच्छद्मविधिना
तथा वृत्तं पापैर्व्यथयति यथा क्षालितमपि ।
जनस्थाने शून्ये विकलकरणैरार्यचरितै-
रपि ग्रावा रोदित्यपि दलति वज्रस्य हृदयम् ॥२८॥

सीता (सास्रमात्मगतम्)—अइ देव रहुउलानन्द एव्वं मम कारणादो किलिट्टासि [अयि देव रघुकुलानन्द, एवं मम कारणात् क्लिष्ट आसीः] ।

Lak—Now, here is what happened through the vile Rakshasas (Or—what was dealt by the vile Rakshasas with the) adoption of the stratagem of the golden deer in such a manner as to pain even though wiped out Even rocks weep, even the heart of adamant breaks, at my noble brother,s doings with the senses dazed in lonely janasthana

Sita. (*With tears—Within herself*) O king, the joy of Ragu's race, so much were you afflicted for my sake!

मित — । अथेति—अथ पापैः रक्षोभिः कनकहरिणच्छद्मविधिना इदं तथा वृत्तं यथा क्षालितमपि व्यथयति । शून्ये जनस्थाने विकलकरणैः आर्यचरितैः ग्रावा अपि रोदिति वज्रस्य हृदयं दलति । अथशब्दः—'अथ' इति आरम्भे । दारुणतरस्य प्रदर्शनमारभ्यते मया इत्यर्थः । पापैः' दुराचारैः (अर्श आदि अच) 'रक्षोभिः' राक्षसैः कर्तृभिः 'कनकहरिणः' सुवर्णमृग एव 'छद्म' छलं मायामृग इत्यर्थः तस्य 'विधिना' अनुष्ठानेन हेतुना ('उभयप्राप्तौ कर्मणि' इति रक्षोभिरित्यत्र तृतीयैव । एवं 'कर्मणि च'' इति कर्मषष्ठ्याः समासनिषेधात् कनकहरिणच्छद्मविधिना इति विग्रहः

प्रयोगः) 'इदम्' एतत् चित्रे दृश्यमानं 'तथा वृत्तं' तेन प्रकारेण पर्यवसितम् (सीताहरणावसानमित्यभिप्रायः) 'यथा क्षालितमपि' विशोधितमपि प्रतिकृतमपि इत्यर्थः 'व्यथयति' तापयति, तदा इदं वृत्तमिति स्मृतिपथमायतमपि पीडयति इत्यर्थः ("आर्या अपह्रियते" रावणेन" इति रूक्षं परिहृत्य 'तथा वृत्तं' यथा क्षालितमपि व्यथयति' इति मसृणमुक्तम्)। 'शून्ये' मानुषसञ्चारविरहिते 'जनस्थाने विकलानि अवशानि 'करणानि' इन्द्रियाणि येषु तादृशैः 'आर्यस्य चरितैः' अनुष्ठानैः हेतुभिः 'ग्रावा' गिरिः रोदिति' समवेदनो भूत्वा अश्रूणि मुञ्चति, 'वज्रस्य अपि हृदयं दलति विदीर्यते। अयीति—'रघुकुलम् आनन्दयति' यः सः ("कर्मण्यण्")। क्लिष्टः' क्लेशं प्राप्तः ॥

Notes—1. अथ—Implies आरम्भ। A different subject is begun. comp. 'अथैतन्मन्वन्तरपुराण etc "—Para xliv. 2. इदम्—There is a gesture here, the index finger pointing at the scene. 3. रक्षोभिः—तृतीया in the अनुक्तकर्त्ता of विधानक्रिया, thus—इदं रक्षांसि कनकहरिणच्छद्म विदधति इति। इदं रक्षोभिः कणकहरिणच्छद्मनः विधिः इति=इदं रक्षोभिः कणकहरिणच्छद्मविधिः (इति) But the grammar is bad, because the ईतत—in the last stage is prohibited by the rule "कर्म्मणि च"। We therefore propose the following—इदं (अनेन प्रकारेण) रक्षांसि वृत्तवन्त· 'इद रक्षोभिः वृत्तम् (भावे)। How वृत्तम् ? कनकहरिणच्छद्मविधिना (करणे ३या) with अविवक्षा of the कर्त्तृता (?) of the Rakshasa in the विधानक्रिया। The prose may be given thus—अथ इदं कनकहरिणच्छद्मविधिना पापैः रक्षोभिः तथा वृत्तम् etc. *Translate*—Now, here the vile Rakshasas, with the adoption of the stratagem of the golden deer, have so manouvred that it pains even though etc. 4. तथा वृत्तम् etc.—This is an indirect way of saying—"Now here sister- in-law is being carried away by Ravana". The direct statemant is too harsh to be

be repeated just now when feelings are strung tosuch a high pitch. 5. शून्ये—शून्य is 'void'. Here 'destitute of human beings.' Hence none to weep for Rama 6. अपि ग्रावा &c— But Rama received full sympathy from the lower creations —birds, beasts and trees, "नृत्तं मयूराः कुसुमानि वृक्षा दर्भानुपात्तान् विजहुर्हरिण्यः.' says Kalidasa. Elsewhere he has ' उद्गलितदर्भ-कवला मृगाः परित्यक्तनर्त्तना मयूराः। अपसारितपाण्डुपत्रा मुञ्चन्त्यश्रूणि इव लताः॥"—*Sakuntala*, 7. रोदिति, दलति—The वर्त्तमानकाल shows that भवभूति goes a step further and says—Even to-day at narrations of brother's mad doings even (अपि) rocks weep and the adamant bursts, what to say of birds· beasts and tree ? 8 मम कारणात्—मम' मत्सम्बन्धि यत् 'कारण' तस्मात्। शेषे षष्ठी and हेतौ ५मी respectively.

(*xlii*) लक्ष्मणः (रामं निर्वर्ण्य साकूतम्)—आर्य ! किमेतत् ?

अयं ते बाष्पौघस्त्रुटित इव मुक्तामणिसरो
विसर्पन् धाराभिर्लुटति धरणौ जर्जरकणः ।
निरुद्धोऽप्यावेगः स्फुरदधरनासापुटतया
परेषामुन्नेयो भवति च भराध्मातहृदयः ॥२९॥

Lak,—(*Meaningly, after watching Rama*) How is this, noble brother ?

This mass of thy tears flowing in streams, rolls on the ground being divided into drops like a broken string of pearls. The emotion which by its volume has filled your heart, though checked, can be guessed by others also from the quivering lower lip and nostrils. 29.

भित—। राममिति। रामं निर्वर्ण्य सूक्ष्मं वीक्ष्य तस्य आवेगं दृष्ट्वा 'साकूतं' साभिप्रायं यथा तथा आह। अयमावेगकारणं जानन्नपि रामसूक्ष्मात्

तच्छ्रवणमभिप्रायः अतएव साभिप्रायम् ॥ अयमिति । अन्वयः—धाराभिः विसर्पन् अयं ते बाष्पौघः जर्जरकणः (सन्) त्रुटितः मुक्तामणिसर इव धरणीं लुटति । भराध्मातहृदयः आवेगः निरुद्धोऽपि स्फुरदधरनासापुटतया च परेषामुन्नेयो भवति । व्याख्या— धाराभिः प्रवाहैः 'विसर्पन्' प्रसरन् 'अयं ते बाष्पौघः' अश्रुराशिः भुवमागत्य 'जर्जरकणः' सन् विन्दुजालरूपेण परिणमन् इत्यर्थः 'त्रुटितः' छिन्नः 'मुक्तामणिसरः इव गलितमणिः मुक्ताहार इव 'धरणीं लुटति' धरायामावर्त्तते (अकर्मकस्य लुठतेर्देशस्य कर्मसंज्ञा । "देशकालाऽध्वगन्तव्याः कर्म्मसंज्ञा ह्यकर्मणाम्") । एतदेव हृदयावेगोऽत्रय-नाय अलम् परमन्यदप्यस्ति इत्याह—'भरेण' आतिशय्येन 'आध्मातम्' आपूरितं 'हृदयं' येन तादृशः आवेगः' विचलितता 'निरुद्ध' अपि' निय-न्त्रितोऽपि विलापरूपेण अप्रकटितोऽपि इत्यर्थः 'स्फुरन्' कम्पमान 'अधरः नासापुटश्च यस्य तद्भावत्वात् 'च न केवलमश्रुभिः 'परेषाम्' अन्येषां द्रष्टृ-णामित्यर्थः उन्नेयो भवति' 'अनुमेयो भवति' अनुमेयो भवति ॥ शिखरिणी वृत्तम् ।

Notes.—1. मुक्ता—&c.—सर is 'a string'. मुक्ता एव मणयः, कर्मधा— । तेषां सरः । The simile is defective in the usual construction मुक्तामणिसर इव धाराभिः विसर्पन् &c. Hence we have given a different prose order (see above). The tears can be compared to beads of pearls if they stand distinct in the shape of drops. But ओघ (stream प्रवाह), as well as धाराभिः (in streams) goes against it. 2. धाराभिः — प्रकृत्यादि तृतीया । 3. धरणीम्—कर्म of लुटति । लुठ though अकर्मक can have its site (देश) as कर्म by the कारिका "देश-कालाऽध्वगन्तव्याः कर्मसंज्ञा ह्यकर्मणाम्" । 4. जर्जर &c.— जर्जराः पृथक्तया उपलब्धाः कणा यस्य सः बहु— । Before reaching the ground—the whole was one continuous stream and by its transference etc., looked like a string of pearls. Or reaching the ground it broke up into particles and then

looked like a *broken* string of pearls each separate drop of tears now resembling a bead of the broken string. 5. निरुद्ध—Rama was not making loud lamentations, hence his आवेग was indeed निरुद्ध। 6. स्फुरत् &c.—नासायाः पुटं नासापुटम्। अधरश्च नासापुटश्च अधरनासापुटम्। प्राण्यङ्गत्वात् समाहारः तत एकवचनम्। स्फुरत् अधरनासापुटं यस्य ; तस्य भावः। तया। हेतौ तृतीया। च—Construe स्फुरदधरनासापुटतया च, the च implying समुच्चय of वाष्पवर्षण with स्फुरदधरनासापुटता। People can guess the आवेग from स्फुरदधरनासापुटता and *also* (च) from the fact that वाष्पौघो धरणीं लुठति। Usually च is construed as उन्नेयो भवति च with च implying अवधारण—becomes inferrable indeed. This should be avoided, because the tears spoken of in the first half of the verse have already declared the emotion to observers, why then go to the quivering lips &c, in the second half ?

(*xliii*) रामः—वत्स,

तत्कालं प्रियजनविप्रयोगजन्मा
तीव्रोऽपि प्रतिकृतिवाञ्छया विसोढः।
दुःखाग्निर्मनसि पुनर्विपच्यमानो
हृन्मर्मव्रण इव वेदनां करोति ॥३०॥

सीता—हद्धी हद्धी अहं वि अदिभूमिं गदेण रणरणएण अज्जउत्तसुण्णं विअ अत्ताणं पेक्खामि [हा धिक्, हा धिक्, अहमपि अतिभूमिं गतेन रणरणकेन आर्यपुत्रशून्यमिव आत्मानं प्रेक्षे]।

Rama—Darling,

The fire of anguish caused by loss of my beloved and, at the time, endured, though intense, through a desire for retaliation being rekindled in my mind, is causing pain like a wound in the vitals of the heart. 30.

Sita—O fie! O fie! Through distress reaching its climax, I too deem myself as if devoid of my husband.

मित — । तत्कालमिति । प्रियजनविप्रयोगजन्मा तीव्रः अपि प्रतिकृति वाञ्छया तत्कालं विसोढ़ः दुःखाग्निः मनसि विपच्यमानो हृन्मर्मव्रण इव वेदनां करोति । व्याख्या—'प्रियजनेन' प्रेमपात्रेण सीतया इति यावत् यः 'विप्रयोगः' विरहः तस्मात् 'जन्म' यस्य अतएव 'तीव्रः अपि दारुणोऽपि 'प्रतिकृतेः प्रतिकारस्य वैरनिर्य्यातनस्य इति यावत् या वाञ्छा' आकाङ्क्षा तया (हेतौ तया) प्रतिकारचिन्तनपरतया इत्यर्थः तं कालं व्याप्य 'तत्कालं तस्मिन् काले इति यावत् 'विसोढः' कृतविसहनः 'दुःखाग्निः' शोकपावकः 'पुनः' भूयोऽपि अद्य 'मनसि विपच्यमानः' (कर्मकर्त्तरि शानच्) विपाकं गच्छन् हृन्मर्मणि हृदयस्य जीवस्थाने जातो यो 'व्रणः' सद्यःप्राणहरः स्फोटकः स 'इव' वेदनां करोति' पीडयति । अतएव हे वत्स, अश्रुप्रवाहः अधरना- सास्फुरणञ्च ॥ हा इति । 'अतिगता' सर्वोपरि गता 'भूमिः' स्थानम् 'अतिभूतिः' प्रकर्षः । तां 'गतः' प्राप्तः अत्युत्कट इत्यर्थः य 'रणरणकः' उद्वेगः तेन हेतुना 'आर्य्यपुत्रशून्यमिव आत्मानं प्रेक्षे' इति अचिरभाविन्या विपद्रश्छाया ॥ प्रहर्षिणी वृत्तम् ।

Notes.—1. तत्कालम्—सकालः तत्कालः कर्मधा । तम्, व्याप्त्यर्थे २या । 2. प्रिय &c—प्रियः जनः, कर्मधा— । तेन विप्रयोगः, सुप्सुपा । तस्मात् जन्म यस्य स. बहु— । This sort of व्यधिकरण बहु—, though irregular, is unavoidable. "अवश्यो बहुव्रीहि- र्व्यधिकरणो जन्माद्युत्तरपदः"—*Vamana*. 3. विसोढः—वि + सह + क्त कर्मणि । The स does not become ष though the rule "परिनिविभ्यः सेवसित—" directs the change. This is because "सोढः" makes an exception in the case of सह when its स becomes सो । दुःखाग्निः—दुःखम् अग्निरिव उपमितकर्मधा । 4. वि- पच्यमानः—वि + पच + शानच् कर्म कर्त्तरि । Being developed. Formerly it was विप्रयोगजन्मा, now it is विप्रयोगस्मृतिजन्मा । This and प्रियजनविप्रयोगजन्मा go against a रूपककर्मधा—in दुःखाग्नि । 5. हृन्मर्म &c.—हृद् heart. मर्म्मन् vital point, हृदो

मर्म्म। तद्मिन् व्रणः इवदुवा। If like fire, the pain should be greater than that of हृन्मर्म्मव्रण? Not necessarily. The likeness is not in तीव्रता for then we cannot have the compound दुःखाग्नि, the rule "उपमितं व्याघ्रादिभिः सामान्याप्रयोगे" prohibiting it when the common attributive (सामान्य) is directly mentioned. Hence we say दुःख and अग्नि are compared through their दाहकता, they both consume their subject. The तीव्रता in तीव्रोऽपि is *predicated* afterwards. It was not thought of (अविवक्षा) when compounding. 6. अतिभूमिम्—भूमि is तल storey. अत्युन्नताभूमिः इत्यर्थे अतिभूमिः प्रादितत्—(नित्यसमास)। अतिभूमिं गतः then means reached the top floor' *i.e.*, excessive. 7. *Remark*—Both Rama and Sita are here represented as already feeling the pangs of separation. This is not without a purpose. *It prepares them for the coming blow.*

(*xliv*)—लक्ष्मणः (स्वगतम्)—भवतु अन्यतः क्षिपामि। (चित्रं विलोक्य प्रकाशम्) अथै तन्मन्वन्तरपुराणस्य गृध्रराजस्य तत्रभवतस्तातजटायुषः चरितविक्रमोदाहरणम्।

सीता—हा ताद निव्वूढो दे अवच्चसिणेहो [हा तात, निर्व्यूढस्ते अपत्यस्नेहः]।

रामः—हा तात काश्यप शकुन्तराज, क्व पुनस्त्वादृशस्य महतस्तीर्थस्य साधोः सम्भवः?

Lak—(*To himself*)—Well, I will turn them to something else. (*Looking at the painting—Aloud*). Here is the exhibition of the nature and valour of that Manvantara-old vulture prince the revered father Jatayus.

Sita—Alas! Father, your filial love has been fully demonstrated!

Rama—Alas! Father Kasyapa, king of birds, where again will appear such a highly worthy saint as thyself?

मित—भवत्विति। 'अन्यत' अन्यविषये। 'क्षिपामि' नयामि। अन्यदुपस्थापयामि इत्यर्थः॥ 'अन्तरम्' अवकाशः व्याप्तिकालः। मनोः अन्तरं 'मन्वन्तरम्' स्वायम्भुवादीनां चतुर्दशनामेकैकस्य राज्यकालः। 'मन्वन्तरेण' मन्वन्तरमितकालेन य 'पुराणः' प्राचीनः अतिवृद्ध इत्यर्थः। तस्य 'चरितस्य' आचरणस्य सद्वृत्तस्य इत्यर्थः, येन चरितेन प्रेरितः अतिवृद्धोऽपि सीतार्थे दुर्दान्तं रावणमपि रुरोध इति हृदयम्। तथा 'विक्रमस्य शौर्य्यस्य येन शौर्य्येण रावणस्यापि प्राणसंशयो जात इत्याशयः। तयोः 'चरितविक्रमयोः उदाहरणं प्रदर्शनं चित्रे लेखनमिति यावत्॥ सीतेति। 'ते' तव 'अपत्यस्नेहः' सन्ततिवात्सल्यं 'निर्व्यूढः' महता हि वैशिष्ट्येन 'ऊढः' अङ्गीकृतः। प्राणव्ययेनैव त्वया मद्गतस्य आणन्यमङ्गीकृतमिति भावः॥ राम इति। 'काश्यप' कश्यपसगोत्र। देवर्षेरिव कश्यपस्य ते हृदयम् इत्याशयः॥ 'शकुन्तानां' पक्षिणां 'राजा त्वम् (समासान्तः टच्)। राज्ञः इव आश्रितरक्षाविधिस्ते इति भावः। तीर्थस्य पुण्यनिलयस्य इत्यर्थः। 'क सम्भवः न क्वापि। न कोऽप्यन्यः प्राणशङ्कामवमत्य ईदृशे दुष्करे यतेत इत्यर्थः॥

Notes—1. मन्वन्तर &c —The manus are 14 in number each of whom is in the ascendant (राजा) for a certain number of years which is known as a मन्वन्तर। मन्वन्तरेण पुराणः (Deriv. ante) सपुत्रा। Jatiyus had lived a whole मन्वन्तर। Or मन्वन्तरं व्याप्य पुराणः। 2. जटायुषः—जटायुस् was the second son of गरुड। The name is also spelt जटायु ending in उ। 3. निर्व्यूढः—निर्+वि+वह+क्त कर्म्मणि। नि is *intensive*, वि *distinctive*. The love you felt was not like that of ordinary People (वि distinctive) and it was felt in a vast measure (निर् intensive). वह to carry here means

'to feel and show it'. 4. त्वाहृशस्य—त्वमिव दृश्यमानः त्वमिव आत्मानं दर्शयति इति युस्मद्+दृश+कञ् कर्मकर्तरि=त्वादृशः। This is after the भाष्य। Usually the affix is taken as कर्त्तरि—त्वमिवपश्यतीति। The Vritti thus says—'त्यादृशयो हि रूढ़िशब्द-प्रकारा नैवात्रदर्शनक्रिया वर्त्तते"।

(*xlv*) लक्ष्मणः—अयमसौ जनस्थानपश्चिमतः चित्रकुञ्जवान् नाम दनुकबन्धाधिष्ठितो दण्डकारण्यभागः। तदिदमृष्यमूकपर्वते मतङ्गस्याश्रमपदम्। इयञ्च श्रमणा नाम सिद्धशवरी। तदेतत् पम्पाभिधानं सरः।

सीता—एत्थ किल अज्जउत्तेण विसज्जिदामरिसधीरत्तणं पमुक्तकण्ठं रुदिअं आसी [अत्र किल आर्यपुत्रेण विसृष्टामर्षधीरत्वं प्रमुक्तकण्ठं रुदितमासीत्]।

Lak—Here is the tract of the forest Dandaka known as Chitrakunjavat, to the west of Janasthana, haunted by the headless giant Danu, this is the site of the hermitage of Matanga on the hill Rishyamuka, this again is the emancipated Chandala woman named Sramana; this is the celebrated lake called Pampa.

Sita—Here, you say, wrath and fortitude were given up by my husband and lamentation made at the top of his voice.

मित—। अयमिति। 'जनस्थानस्य महावनस्य 'पश्चिमतः' पश्चिमे दिग्विभागे। 'दनुः' नाम यः 'कवन्धः' निष्कन्धरो राक्षसः तेन 'अधिष्ठितः' अध्युषितः। 'दण्डकारण्यस्य भाग.' अंशविशेषः। 'सिद्धा' तपसः पारं गता 'शवरी' चण्डाली॥ अत्रेति। 'किल' इत्यव्ययमिह ऐतिह्ये श्रुतमात्रे विषये। श्रुतं मया यत् इह इत्यादि। 'विसृष्टः' परित्यक्तः 'अमर्षः' मद्‌पहारिणि रिपौ रावणे यः कोपः (येन च मद्वियोगज:

शोको विस्मृतः) 'धीरत्वं धैर्यं च (येन पुनः स्मृतोऽपि शोको नियन्त्रित आसीत) यस्मिन् कर्मणि तत् यथा तथा । करणप्रमोचनक्रियाविशेषणमेतत् । 'प्रमुक्तः' उद्गीरितः 'कबडः' स्वरः यस्मिन् कर्मणि तत् यथा तथा । रोदन-क्रियाविशेषणमेतत् ॥

Notes —1. जनस्थान &c – पश्चिमे इति पश्चिम + ङि (सप्तमी) + तसि स्वार्थे = पश्चिमतः to the west, आग्रादि । 2. चित्रकुञ्जवान् is the proper name of the tract. 3. ऋष्यमूक &c.—ऋष्यमूक is the hill where Rama met सुग्रीव। 4. मतङ्गस्य &c.—The mention of the sage reminds us of his curse on Bali. वाली after killing the monster दुन्दुभि flung away his carcase to a considerable distance causing blood from it to defile the sage Matanga's hermitage and person. Thereupon the sage pronounced instant death on वाली if he came to ऋष्यमूक। Thenceforth वाली always shunned the hill and सुग्रीव who had offended वाली took up his residence there secure from Bali's wrath. 5. तदेतत्—तत् is प्रसिद्धार्थक । Or तत् एतत् यस्य मया बहुशः कथिता ते कथा । See under किल above. अत्र किल—अत्र refers to पम्पा। किल इत्यैतिह्ये—Such is the rumour. She means that she has heard of it since very likely from Lakshmana himself.

(*xlvi*) रामः—देवि, रमणीयमेतत् सरः ।
एतस्मिन् मदकलमल्लिकाक्षपक्ष-
व्याधूतस्फुरदुरुदण्डपुण्डरीकाः ।
वाष्पाम्भःपरिपतनोद्गमान्तराले
सन्दृष्टाः कुवलयिनो भुवो विभागाः ॥३१॥

Rama—Charming is this lake, my Queen.

Here, at intervals between the shedding and the show of tears. I noticed tracts, studded with blue lotuses with longstalked white lotuses becoming manifest when shaken by the wings of the Mallikaksha, cackling sweetly from joy. 31.

मित—। एतस्मिन्निति। अन्वय.—एतस्मिन् मदकलमल्लिकाक्षपक्षव्याधूतस्फुरदुरुदण्डपुण्डरीकाः कुवलयिनो भुवो विभागाः बाष्पाम्भः-परिपतनोद्गमान्तराले सन्दृष्टाः। व्याख्या—'एतस्मिन्' सरसि 'मदेन' हर्षेण प्रियसन्निधानजनितेन आनन्देन 'कलाः' मधुरं स्वन्तः ये 'मल्लिकाक्षाः' धवलदेहाः मलिनचञ्चुचरणा राजहंसाः, तेषां 'पक्षैः व्याधूतानि कम्पितानि अतएव 'स्फुरन्ति' आविर्भवन्ति प्राक् वर्णसाम्यात् मल्लिकाक्षेभ्यः पृथक्तया अगृहीतानि कम्पितेषु च पुण्डरीकरूपेण प्रकटीभवन्ति उरुदण्डानि दीर्घनालानि अतः पुनः उद्ग्रीवराजहंसवत् प्रतीयमानानि पुण्डरीकाणि' श्वेतपद्मानि येषु तादृशाः 'कुवलयिनः' प्रचरनीलोत्पलाः भुवो विभागाः' भूखण्डाः पम्पाजलप्रदेशाः इति यावत् 'बाष्पाम्भसाम्' अश्रुजलानां यत् 'परिपतनं निःशेषेण भूप्राप्तिः भूयश्च यत्तेषाम् 'उद्गमः' नेत्रयोराविर्भावः इत्येतयोः 'अन्तराले' अवकाशे 'सन्दृष्टाः' सम्यगवलोकिताः। इन्दीवरैर्नीलं कत्रचित् क्वचित् पुण्डरीकैः सितमिति वर्णवैचित्र्यात् रमणीयमेतत् सरः। मम तु दुःखायैवाभूत्सा रमणीयता। तत्र विहरतां द्वन्द्वचराणां सानन्दानां मधुरञ्च गायतां 'मल्लिकाक्षाणां दर्शनात् चात्मनो दयितया वियोगः प्रत्यग्र इव प्रतिभातो मे, दुःखेन च प्रसृता नयनयोर्वारिधारा। एवं सावरणे लोचने विलुप्तं 'च' पम्पादर्शनम्। अश्रूणि विमुच्य तु मया भूयोऽपि दृष्टा पम्पा प्रसृता च पुनरेव अश्रुधारा। एवमेव नीतं मया समयमहः इति भावः। उक्तञ्च ग्रन्थान्तरे—"अनुदिनमपूरि पम्पा मदक्षिसम्पातिभिः सलिलैः" इति॥ प्रहर्षिणी वृत्तम्।

Notes—1. मदकल &c.—मदेन कलाः, तृ॰तत्पु। मदकला मल्लिकाक्षाः कर्मधा—। तेषां पक्षः। तेन व्याधूतानि इत्यत्।—उरुः दण्डः

एषाम उल्लदण्डानि, वहु—। मदकलमल्लिकापक्षव्याधूतानि स्फुरन्ति उल्लदण्डानि पुण्डरीकाणि येषु, वहु—। For propriety &c. see Tika. 2. वाष्पाम्भः &c.—वाष्प is the vapour (उष्मा) that is supposed to proceed from the eyes before flow of tears वाष्पाणाम् अम्भः। परिपतनञ्च उद्गमश्च, द्वन्द्वः। तयोः अन्तरालम्। वाष्पाम्भसां परिपतनोद्गमान्तरालम्। तस्मिन्। 3. सन्दृष्टाः—सम implies साकल्य। It seems misplaced here. Under the circumstances Rama could not have a proper view of the lake.

(*xivii*) लक्ष्मण.—अयमार्य्यो हनूमान्।

सीता—एसो सो चिरणिव्विण्णजीअलोअसमुद्धरणगुरुओवआरी महाभाओ मारुदी [एष स चिरनिर्विण्णजीवलोकसमुद्धरणगुरुकोपकारी महाभागो मारुतिः]।

रामः—दिष्ट्या सोऽयं महाबाहुरञ्जनानन्दवर्द्धनः।
यस्य वीर्य्येण कृतिनो वयञ्च भुवनानिच ॥३२॥

Lak—This is noble Hanumat.

Sita—Of the long-suffering world of beings, this is the great benefactor by rescue—the highly talented son of the wind god.

Rama—O joy! This is the mighty-armed contributor to Anjana's joy through whose valour myself and the world gained our ends. 32

मित—। एष इति। 'चिर' यथा तथा 'निर्विण्णः दुःखित' 'चिरनिर्विण्णः' रावणेन दीर्घकालं क्लेशमापादितः। 'गुरु' महत् एव 'गुरुकम्'। 'गुरुकं' यथा तथा 'उपकारी गुरुकोपकारी'। 'समुद्धरणेन' रावणवधं विधाय दुःखमोचनेन 'गुरुकोपकारी समुद्धरणगुरुकोपकारी। चिरनिर्विण्णस्य जीवलोकस्य' त्रिभुवनस्य 'समुद्धरणगुरुकोपकारी। 'महान् भागः' विधिदत्तः सद्गुणराशिर्यस्य सः मारुतस्य' पवनस्य अपत्यं मारुतिः हनूमान्॥ दिष्ट्या

इति ॥ अन्वयः—दिष्ट्या ! अयं सः महाबाहुः अञ्जनानन्दवर्द्धनः यस्य वीर्य्येण वयञ्च भुवनानि च कृतिनः। व्याख्या—दिष्ट्या इत्यव्ययमिह हर्षे। अहो हर्षः 'अयम् एष चित्रे लिखितः 'स महाबाहुः' आजानुलम्बितभुजः शूर इत्यर्थः 'अञ्जनाया' केशरिपत्न्याः 'आनन्दवर्द्धनः' हर्षजननः सुतः हनुमान् 'यस्य वीर्य्येण', सीतासमुद्धरणात् 'वयञ्च', रावणवधात् 'भुवनानि च कृतिनः' कृतकृत्या जाताः ॥

Notes—1. हनूमान्—हनुरस्यास्ति कुत्सित इति हनु+मतुप् निन्दायाम्। It is a संज्ञा of the monkey chief, hence "शरादीनाञ्च' lengthens the उ of हनु। Comp. "शुक्रे हनूमत्-कथितप्रवृत्तिः", 'एष श्रीलहनूमता विरचिते श्रीमन्महानाटके' &c. Sometime हनुमत् with a short उ is also seen Thus "वसन्त-काल हनुमानिवायात" "गाढं वक्षसि ताडिते हनुमता द्रोणाद्रिरत्राहृतः" etc. 2. चिरनिर्विण्ण etc—निर्+विद् क्त कर्त्तरि=निर्विण्णः distressed The ण is by "निर्विण्णस्योपसंख्यानम्"। गुरु एव इति गुरु कन् स्वार्थे=गुरुकम्। गुरुकं यथा तथा उपकारी गुरुकोपकारी, सुपसुपा चिरं निर्विण्णः, इतत्—। तादृशो जीवलोकः, कर्मधा—। तस्य समुद्धरणम्। तेन गुरुकोपकारी, सुपसुपा। 3. मारुति—मारुतस्य अपत्यं पुमान् इति मारुत+इञ्। Refers to हनूमान who was the wind god's son by अञ्जना the wife of the monkey chief केशरी। 4 दिष्ट्या—An अव्यय indicating हर्ष। 5 कृतिनः—कृतमेभिः इति कृत+इनि, or कृ+भावे क्त=कृतम् deed. ततः मत्वर्थीय इनिः=कृतिनः। Also see under "मधुकर त्वं खलु कृती'—Sak Ram did his work (सीतासमुद्धरण) and the world had their work (रावणवध) through the prowess of हनूमान्। For भुवनानि change कृतिनः to कृतीनि।

(*xviii*) सीता—वच्छ, एसो कुसुमिदकदम्बतरुतण्डविद-वरहिणो जिअणामहेओ गिरि जत्थ अणुभावसोहग्गमेत्तपरिसेस-धूसरसिरी मुच्छन्तं मुच्छन्तो तुए पइदिएण अवलम्बिदो तरुअले

अज्जउत्तो आलिहिदो [वत्स एष कुसुमितकदम्बतरुताण्डवित-बर्हिणः किन्नामधेयो गिरिः यत्र अनुभावसौभाग्यमात्रपरिशेष-धूसरश्रीः मुहूर्त्तं मूर्च्छन् त्वया प्ररुदितेन अवलम्बितः तरुतले आर्य्यपुत्रः आलिखितः] ?

Sita—Brother, of what name is this hill where peacocks, are in a giddy dance on Kadamba trees in flower and on which is painted, under a tree, with looks pale, the exuberance of majesty alone remaining, my husband fainting and supported by yourself weeping for the moment ?

मित—। वत्सेति। 'वत्स किन्नामधेयः एष गिरिः' किं नामधेयम् अस्य—'यत्र गिरेः तरुतले आर्य्यपुत्रः आलिखितः ? किम्भूतः आर्य्यपुत्रः ? 'मूर्च्छन् आर्य्यपुत्रः मुहूर्त्तं प्ररुदितेन त्वया अवलम्बितः'। पुनः किम्भूत आर्य्यपुत्रः ?—अनुभावस्य' प्रभावस्य यत् सौभाग्यम्' आतिशय्यं 'तन्मात्र' तदेव 'परिशेषः' अवशिष्ट' यस्या तादृशी 'धूसरा' भूमौ लुण्ठनात् रेणुदिग्धा 'श्रीः' शोभा यस्य तादृशः', अनुभावमात्रं शिष्यते सर्वमन्यद्रामणीयकमपगतं यस्य तादृश आर्य्यपुत्र इत्यर्थः। किम्भूतो गिरिः ?—'कुसुमितः' प्रफुल्लः यः कदम्बतरुः' तत्र ताण्डवितः' कृतोद्धतनृत्तः 'बर्हिणः' कश्चिन्-मयूर यस्मिन् स गिरिः॥

Notes—1. कुसुमित etc — कुसुमानि सञ्जातानि अस्य इति कुसुम+इतच् कुसुमित in flower ताण्डवं प्रकृतः इति ताण्डव+णिच् (नामधातु) क्त कर्त्तरि आदिकर्मणि (वर्त्तमाने) ताण्डवितः dancing. बर्हम् अस्य अस्ति इति बर्ह+इनच बर्हिणः having fine tail, *i.e.*, a peacock. कुसुमितः कदम्बतरुः कर्मधा—। तस्मिन् ताण्डवितः, सुप्सुपा। तादृशो बर्हिणो यस्मिन, बहु। 2. किन्नामधेयः—नाम एव इति नामन् धेय स्वार्थे=नामधेयम name. किं नामधेयं तस्य, बहु—। 3. अनुभाव etc—अनुगतो भाव· अनुभावः, प्रादितत्—। सुभगस्य भावः इति सुभग+ष्यञ सौभाग्यम् ; ffluence. "हृद्भगसिन्ध्वन्ते पूर्व-पदस्य च" इत्युभयपदवृद्धिः। अनुभावस्य सौभाग्यम्। तदेव इति

अनुभावसौभाग्यमात्रम्—नित्यसमास of the मयूरव्यंसकादि class. मात्र implies अवधारण। 'मात्रं कार्त्स्न्येऽवधारणे"। Of the मयूरव्यंसकादि compounds the भाष्य says "समासान्तरं न भवति"। This is interpreted to mean that these compounding may *lead* in a समास but cannot *follow*. Hence compounding again अनुभावमात्र परिशेषे परिशेषो वा यस्याः सा अनुभावमात्रपरिशेषा, बहु। तादृशो धूसरा श्रीः यस्य, त्रिपदबहु। 3. प्ररुदितेन—प्र+रुद्+क्त कर्त्तरि प्ररुदित, weeping aloud. तेन।

(*xlix*) लक्ष्मण:—

सोऽयं शैलः ककुभसुरभिर्माल्यवान् नाम यस्मिन्
नीलः स्निग्धः श्रयति शिखरं नूतनस्तोयवाहः।
आर्य्येणास्मिन्—

रामः—

—विरम विरमातः परं न क्षमोऽस्मि
प्रत्यावृत्तः पुनरिव स मे जानकीविप्रयोगः ॥३३॥

Lak—This is that hill, fragrant with Arjuna flowers, Malyavat by name, where the first cloud (of the season) dark and moist, settles on the top. Here by my noble brother—

Rama—Stop! Stop! I can endure no more. That loss of Janaki seems to have come back to me. 33.

मित—। स इति। अन्वयः—अयं स ककुभसुरभिः माल्यवान्नाम शैलः यस्मिन् नीलः स्निग्धः नूतनस्तोयवाहः' शिखरं श्रयति। अस्मिन् आर्य्येण—। व्याख्या—'अयं' सः ककुभैः अर्जुनपुष्पैः 'सुरभिः माल्यवान्नामा शैलः यस्मिन्' सजलत्वात् 'नीलः स्निग्धः' मेघ्रानम्बुः नूतन. ऋतौ प्रथमोदितः 'तोयवाहः' जलदः शिखरं श्रयति' अध्यास्ते। 'अस्मिन्' गिरौ आर्य्येण'—इत्यन्यत् किञ्चित् प्रक्रान्तमाक्षिप्तं रामेण॥ विरमेति। अन्वयः—विरम विरम्। अतः परं न क्षमोऽस्मि। स जानकीविप्रयोगः

पुनः प्रत्यावृत्त इव मे। व्याख्या– हे लक्ष्मण, 'विरम विरम' निवृत्तो भव, गिरौ माल्यवति किंकि मया कृतं तत्प्रसङ्गेनालम्। अतः' अस्मात् 'परम' 'आर्ये– णास्मिन्' इति कथनात् परं यत् कथनीयं तत् श्रोतुं न क्षमः अस्मि सर्वथा असमर्थोऽहम्। कारणमाह "आर्येणास्मिन्" इत्येतावत्येव प्रोक्तेयत् यत् विरहकातरेण मयाकृतं तस्मिन् तत् सर्वं स्मृतं मया। तेन मन्ये 'सः' पूर्वानुभूतो जानकीविप्रयोगः' सीताविरहः पुनः प्रत्यावृत्त इव मे' मम समागत इव। इति आसन्नस्य सीताविरहस्य छाया॥

Notes.—1. सोऽयम् &c.—This is in reply to Sita's question किन्नामधेयो गिरिः। 2. ककुभसुरभिः—Scents are supposed to be unendurable to the विरहिन्। Comp. "गन्धश्च धाराहतपल्वलानां कादम्बमर्द्धोट् गतकेशरश्च। स्निग्धाश्च केकाः शिखिनां वभूवुर्यस्मिन्नसह्यानि विना त्वया मे॥" *Raghu* 3. नूतनस्तोयवाहः—This is as trying as the गन्ध। Thus "नवं पयो यत्र घनैर्मया च त्वद्विप्रयोगाश्रु समं विसृष्टम्।'— *Raghu.* 4. आर्येणास्मिन्—Some read वत्सेतस्मात् as coming from राम। This is an interruption to लक्ष्मण। But as लक्ष्मण has finished his sentence with नूतनस्तोयवाह. the interruption seems misplaced. आर्येणास्मिन् on the other hand evidently wants to introduce a painful subject and the interruption comes in very well there. Also see next. 5. विरम् विरम—"व्याङ्परिभ्योरमः" इति परस्मैपदम्। सम्भ्रमे द्विरुक्तिः। The repetition shows Rama's impatience. Hence the repetition is expected to be *abrupt.* The endearing epithet वत्स in वत्सेतस्मात् takes from the abruptness and does not seem to suit the repetition विरम विरम्। The interruption beginning with the plain विरम विरम् emphasises the abruptness. We therefore perfer the reading आर्येणास्मिन attributed to लक्ष्मण by वीरराघव।

(*i*) लक्ष्मणः—अतः परम् आर्यस्य तत्रभवतां कपिराक्षसानाञ्च असंख्यातानि उत्तरोत्तराणि कर्माश्चर्याणि। परिश्रान्ता चेयमार्या। तद्विज्ञापयामि विश्राम्यतामिति।

सीता—अज्जउत्त एदिणा चित्तदंसणेण पच्चुप्पण्णदोहदाए अत्थि मे विण्णप्पं [आर्यपुत्र, एतेन चित्रदर्शनेन प्रत्युत्पन्नदोहदाया अस्ति मे विज्ञाप्यम्]।

रामः—नन्वाज्ञापय।

सीता—जाणे पुणो वि पसण्णगम्भीरासु वणराईसु विहरिस्सं पवित्तसोम्मसिसिरावगाहं च भअवदीं भाईरहीं अवगाहिस्सं [जाने पुनरपि प्रसन्नगम्भीरासु वनराजिषु विहरिष्यामि, पवित्रसौम्यशिशिरावगाहाञ्च भगवतीं भागीरथीमवगाहिष्ये]।

Lak—Hereafter (follow) countless wonderful deeds of my noble brother and of the honoured monkeys and Rakshasas one excelling another. But my noble sister here is tired. So I say let us stop here.

Sita—My husband, with a longing arising from this inspection of the picture, I have a prayer, to make.

Rama—Well, command me.

Sita—I hope I shall once again roam in those safe though sombre lines of forests, and shall bathe in the mighty Bhaghirathi—a plunge in which is sanctifying, delightful and cool.

मित—। अत इति। 'संख्यातं संख्या। भावे क्तः। 'असंख्यातानि' असंख्यानि, अथ निःशेषेण द्रष्टुमशक्यानि इत्यर्थः। 'उत्तर' प्रकृष्टम्। 'उत्तरेभ्यः उत्तराणि'। वालिवधः इति प्रकृष्टं कर्म लङ्कादाहस्तु प्रकृष्टतरं, प्रकृष्टतमं पुनः सागरबन्धनम्। एवं परं परं प्रकर्षमापद्यमानानि कर्माणि। 'कर्माणि' च तानि 'आश्चर्याणि'। क्रियाकृतं निसर्गकृतञ्च इति द्विविधमाश्चर्यम्। आद्यमिह कर्माश्चर्यमिति निर्दिष्टम्। एतेन आश्चर्याणि इति

विशेष्यं कर्मेति विशेषणं भवति, 'विशेषणं विशेष्येण बहुलम्' इति च समासः। 'विश्राम्यताम्' अस्माभिरिति कर्त्तृपदमुह्यम्॥ आर्य्यपुत्रेति। 'प्रत्युत्प्रश्नः' सञ्जातः 'दोहदः मनोरथो यस्यास्तस्याः। 'विज्ञाप्यं विज्ञापनीयम् आवेदनीयं त्वयि। कश्चिदभिलाषो मे जातः तं विज्ञापयितुमिच्छामि इत्यर्थः। नन्विति। 'आज्ञापय' आदिश। विज्ञापिते एव अविलम्बितं करिष्यते इति भावः॥ जानेइति। प्रसन्नाः' प्रशान्तश्वापदा अतएव विस्रम्भकर्य्यः तथा 'गम्भीरा' अप्रधृष्या या 'वनराजय.' ताश्च। एतेन तपोवनं, किञ्चिल्लक्षते कथमन्यथा प्रशान्ताः श्वापदाः? 'पवित्र'' पावनः "सोम्यः सुभगः आनन्दन इत्यर्थः 'शिशिरः' शीतलश्च 'अवगाहः' मज्जनं स्नानमित्यर्थः यस्यां ताम। एतेन भगीरथीतीरस्थं तपोवनमायाति। तादृशञ्च तपोवनं वाल्मीकेः। अतएव वाल्मीकितपोवने परित्यागो वैदेह्याः सूच्यते॥

Notes—1. असंख्यातानि—अविद्यमानं संख्यातम् एषाम् बहु। 2. विश्राम्यताम्—See ante, "विश्राम्यतामद्यावक"'। 3 विज्ञाप्यम्—वि+ज्ञा+णिच्+यत् कर्मणि। 4. ननु etc.—ननु implies आक्षेप, disapproval, what do you say in the matter of दोहद is not a विज्ञापना but an आकाङ्क्षा to me. Hence you should have said आज्ञाप्यम् not विज्ञाप्यम्। Now आज्ञापय command me. 5 जाने—ज्ञा लट् ए। Here ज्ञा means to wish. The result of the wish is her own विहार and स्नान। Hence the क्रियाफल goes to the कर्त्ता। The आत्मनेपद seems compulsory by "अनुपसर्गात् ज्ञः" though ज्ञा is परस्मैपदी also. But here विहरिष्यामि and अवगाहिष्ये being in the उत्तमपुरुष directly states that the क्रियाफल attaches to the कर्त्ता of ज्ञानक्रिया। Hence the आत्मनेपद is optional by the rule "विभाषोपपदेन प्रतीयमाने"। Thus also जानामि पुनरपि etc. just like स्वम् अश्वं जानीते, स्वम् अश्वं जानाति &c. *Remark*—On the propriety etc. of the para see aslo *Intro.*

(*li*) रामः—वत्स, लक्ष्मण।

लक्ष्मणः—एषोऽस्मि।

रामः—अचिरं सम्पादनीयोऽस्या दोहद इति सम्प्रत्येव गुरुभिः सन्दिष्टम्। तत् अस्खलितसुखसम्पातं रथमुपस्थापय।

सीता—अज्जउत्त तुम्हेहि वि तहिं गन्तव्वं [आर्यपुत्र, युष्माभिरपि तत्र गन्तव्यम्]।

रामः—अयि कठिनहृदये, एतदपि वक्तव्यमेव ?

सीता—तेण हि पिअं मे [तेन हि प्रियं मे]।

लक्ष्मणः—यथाज्ञापयत्यार्यः। (इति निष्क्रान्तः)।

Rama—Dear Lakshman.
Lak—Here I am.
Rama—Her longings have to be gratified without delay; this has just now been urged by the elders. So bring here a car with an easy uninterrupted roll.
Sita—My husband, you also will have to go there.
Rama—O hard-hearted girl, need this be said really ?
Sita—Then indeed it is joy to me.
Lak—As my noble brother commands (*Exit*),

मित—। अचिरमिति। 'न स्खलितः' व्याहतः अतएव 'सुखः' सुखकरः 'सम्पातः' गमनं यस्य तादृशं गर्भिणीवहनयोग्यमित्यर्थः 'रथम् उपस्थापय' आनय॥ अयीति। 'वक्तव्यमेव' इति अनुक्तमपि सिद्धमेव तत् वृथा उक्तिः। अपरञ्च, आसन्नप्रसवायास्ते सहयायी न वा स्यामिति ते शङ्का जाता तत् नूनं कठिनहृदया' असि॥ तेनेति। 'तेन त्वद्गमनेन। अन्यथा तपोवनगमनं मेऽप्रियं न स्यात्॥

Notes.—1. सम्प्रत्येव—See ante "यः कश्चिद्गर्भदोहदोऽस्याः &c." 2. अस्खलित &c.—स्खल+क्त कर्त्तरि=स्खलितः। न स्खलितः।

This qualifies सम्पातः। स्खलित literally 'slipped ; hence 'changed'. अस्खलित is therefore uninterrupted. सुखयतीति सुख+णिच (नामधातु)+अच् कर्तरि=सुखः pleasant. सम+पत+घञ् भावे=सम्पातः motion, progress, अस्खलितः सुखः सम्पातः अस्य, विपद्वद्व— । Rama does not want a jolting car which is dangerous to a woman whose term is full. 2. उपस्थापय —उप समीपवचने। उप+स्था+णिच्+लोट हि। Bring such a car up to her. 3. *Remark*—After this, transfer "लक्ष्मणः—यथा-ज्ञापयत्यार्यः &c., from below which is cleary misplaced there. 4. आर्यपुत्र &c.—This has introduced an inconsistency (*See Intro*). 5. लक्ष्मणः etc.—We have retained this here because all available texts have it here. There is clearly no need for लक्ष्मण to wait so long after Rama's order—रथमुपस्थापय। As it stands, it is irrelevant and looks like a rude interruption to राम and Sita's talk.

(*lii*) रामः—प्रिये, इतो वातायनोपकण्ठे मुहूर्त्तं संविष्टा भव।

सीता—एव्वं होदु। ओहिरिज्जामि क्खु परिस्समजणिदाए णिद्दाए [एवं भवतु। अपह्रिये खलु परिश्रमजनितयानिद्रया]।

Rama—Darling, you lie down for a while (lit—a moment) here near the window.

Sita—So be it. I am indeed *being drifted* by sleep caused by fatigue.

मित—। प्रिये इति। 'वातायनस्य' गवाक्षस्य 'उपकण्ठे' समीपे। 'संविष्टा' शयाना 'भव'; शयित्वा चित्रदर्शनजनितं श्रमं विनोदय इति शेषः।

श्रान्ता एव सीता आसीत्' तथा च लक्ष्मणेनोक्तं "परिश्रान्ता चेयमार्य्या" इति ॥ एवमिति । 'एवं 'भवतु' तथास्तु, संविष्टा एव भवामि इत्यर्थः । 'अपह्रिये' आकृष्टा भवामि । श्रमात् निद्रा इव मे प्राप्ता ॥

Notes.—वातायन &c.—**अयते अनेन इति अय गतौ + ल्युट् करणे = अयनम्** passage, **वातस्य अयनं वातायनम्** passage for air, *i.e*, window. **उपगतः कण्ठम् उपकण्ठः** that which has come up to the neck.—*i.e*, that which is nearneighbourhood = **समीपस्थः प्रदेशः, प्रादितत्—** । Or **कण्ठस्यसमीपेउपकण्ठम्** or **उपकण्ठे, अव्ययी—**। The **प्रादितत्**—is better because the **अव्ययी**—is unnecessarily cumbrous. For, we want **समीपे,** but for this we deliberately avoid the simple word **समीपे** and complicate matters by adding **कण्ठस्य** at start, dropping **कण्ठस्य** at the last stage ! **वातायनस्य उपकण्ठः वातयनोपकण्ठः तस्मिन्** । Sita was tired and would be refreshed by the breeze near the window. 2. *Remark*—Vidyasagara reads **वातायनावर्त्तके मुहूर्त्तं संविष्टौ भवावः** । We have adopted Viraraghava's which is in part the same as that of Vidyasagara's maunscript No. 2. Our reasons are—(i) Sita was really tired. **लक्ष्मण** has already noticed this, Comp. "**परिश्रान्ता चेयमार्य्या**," para 1. She was sotired that she feltdrowsy. Comp. "**अपह्रिये खलु परिश्रमजनितया निद्रया**" below. Hence it was necessary that she should lie down. No reason has been adduced to suppose that Rama too was fatigued and felt the need for stretching himself. Hence Viraraghava's **संविष्टा भव** seems to be more reasonable than **संविष्टौ भवावः** । See next para ; (ii) **आवर्त्तक** is a cover.

Vidyasagara explains 'यत्र स्थिता नान्यैर्लक्ष्यन्ते तादृशं स्थानम्'। The necessity is pointed out saying "निभृते स्थाने......शयानौ भवावः"। But they were in the inner apartments where outsiders were not usually allowed. Besides, as will appear, while lying with Sita, Rama freely admits his officers of the inner appartments. Hence there is no necessity for seeking निभृतस्थान—a cover We therefore prefer उपकण्ठे to आवर्त्तके। अप+हृ+लट् कर्मणि = अपह्रिये am being drifted.

(*liii*) रामः—तेन हि निरन्तरमवलम्बस्व मामत्र शयनाय।
जीवयन्निव ससाध्वसश्रमस्वेदबिन्दुरधिकण्ठमर्प्यताम्।
बाहुरैन्दवमयूखचुम्बितस्यन्दिचन्द्रमणिहारविभ्रमः ॥३४॥
(तथा कारयन् सानन्दम्) प्रिये किमेतत् ? (रा—)

Rama—Then do hold me close to lie down here
Let your arm, showing drops of perspiratin through shock and fatigue, hence having the beauty of a necklace of moon gems kissed by lunar rays and dripping, be placed on my neck *as* if enlivening me. (34) (doing sojoyfully) darling, what is this ?

मित—। तेनेति। तेन हि, यदि, निद्रा प्राप्ता तदा। "निरन्तरं" गाढ़म् 'अवलम्बस्व' आलिङ्ग। ततः शेष्व तेन सुलभा निद्रा भविष्यति इत्यर्थः॥ जीवयन्निति। अन्वयः—ससाध्वसश्रमस्वेदबिन्दुः (अतएव) ऐन्दवमयूखचुम्बितस्यन्दिचन्द्रमणिहारविभ्रमः बाहुः जीवयन्निव अधिकण्ठम् अर्प्यताम्। व्याख्या—'साध्वसेन' त्रासेन भार्गवघूर्णणखादीनां चित्रदर्शन-जनितेन इति यावत् तथा 'श्रमेण' चित्रात् चित्रान्तरगमनार्थं वीथिकापरि-भ्रमणजनितेन श्रमेण जाता ये 'स्वेदबिन्दवः' घर्मजालकं तैः 'सह' वर्त्तमानः अतएव 'ऐन्दवेन चान्द्रेण 'मयूखेन चुम्बितः स्पृष्टः ततश्च 'स्यन्दी जल-बिन्दुवर्षी यः 'चन्द्रमणीनां' चन्द्रकान्तमणीनां 'हारः' माला तस्य यो

"विभ्रमः" शोभा, स इव शोभा यस्य तादृशो 'बाहुः' तवायं भुजः 'जीवयन्निव' विरहोत्प्रेक्षणात् अवसन्नं मां समाश्वासयन्निव 'अधिकण्ठं' मदीये कण्ठे 'अर्पंतां' न्यस्यताम् । 'प्रत्यावृत्तः पुनरिव स मे जानकीविप्रयोगः" इत्यहं दूये । तत बाहुना माममन्वस्रवस्य तेन समाश्लिमि इति भावः (कण्ठे करार्पणस्यफलं जीवनम्, तेन 'जीवयन्' इति हेतौ शतृ) तथेति । 'तथा तादृशीं सीतां कण्ठार्पितबाहुं 'कारयन्' ॥

Notes.—1. तेन हि &c.—In saying संविष्टा भव, राम meant सीता merely to stretch herself. But she says she would *sleep* Hence (तेन हि) राम has to lie down himself. 2.ससाध्वस &c.—साध्वस fright. साध्वसश्च श्रमश्च साध्वसश्रमौ, द्वन्द्व । The पूर्वनिपात of श्रम was expected, but sometimes the rules of पूर्वनिपात are violated, अनित्यः पूर्वनिपातविधिः । साध्वसश्रमाभ्यां स्वेदबिन्दुः, उपदुपा । तेन सह । वहु । 3 अधिकण्ठम्—कण्ठे इति अधिकण्ठम्, विभक्त्यर्थे अव्ययी— । 4 अर्प्यताम्—ऋ+ णिच् + लोट् ताम कर्मणि । विधौ लोट् । 5 ऐन्दव &c —ऐन्दवमयूखेन चुम्बित , ऐतत्— । तादृशश्चासौ स्यन्दी च, कर्मधा— । तादृशश्चन्द्रमणिहार', कर्मधा— । तस्य विभ्रमः । स इव विभ्रमो यस्य, 'सहम्यपमान—' इति बहुव्रीहिः । 6. किमेतत्—This is a question to सीता । The touch of Sita's arm on his neck had produced indescribable sensation which राम cannot identify as pleasure or pain &c., and he refers to सीता for an answer.

(*liv*) (रा—)

विनिश्चेतुं शक्यो न सुखमिति वा दुःखमिति वा
प्रबोधो निद्रा वा किमु विषविसर्पः किमु मदः ।
तव स्पर्शे स्पर्शे मम हि परिमूढेन्द्रियगणो
विकारश्चैतन्यं भ्रमयति समुन्मीलयति च ॥३५॥

सीता—(विहस्य)—थिरप्पसादा तुम्हे इदो दाणिं किं अवरं [स्थिरप्रसादा यूयम् इत इदानीं किमपरम्] ।

(R—)—I cannot take it as bliss or as woe either, as waking or as sleeping, as coursing of poison or of liquor ; at every touch of thine, an emotion, having benumbed all my senses, stupefies consciousness also revives it. 35.

Sita—(*Laughing*)—You are of unwavering kindness, what else could it be ?

मित — । अन्वयः—(एतत्) सुखमिति वा दुःखमिति वा, प्रबोधो निद्रा वा, किमु विषविसर्पः किमु मदः, विनिश्चेतुं न शक्यः । तव स्पर्शे स्पर्शे हि प्रमूढ़ेन्द्रियगणो विकारः मम चैतन्यं भ्रमयति समुन्मीलयति च । व्याख्या—यदेतदनुभूयते मया तत् सुखमिति वा' सुखरूपेण वा दुःखमिति वा, दुःखरूपेण वा विनिश्चेतुम्' अवधारयितुं' न शक्यः' न क्षमोऽहम्, 'प्रबोधः' जागरणं 'निद्रा वा' सुषुप्तिर्वा विनिश्चेतुं न शक्यः, 'किमु विषविसर्पः' सम्मोहनं विषं मे शरीरे सञ्चरति, 'किमु मदः आनन्दनो मदः सुरा वा, विनिश्चेतुं न शक्यः । कथमेवमेकस्मिन्नपि विरुद्धबोध इत्याह —'तव स्पर्शे स्पर्शे हि' प्रतिस्पर्शमेव, त्वया स्पृष्टमात्रे 'परिमूढः' विह्वलः 'इन्द्रियगणो' यस्मात् तादृशः कश्चित् 'विकारः' चित्तविक्षेपः 'मम चैतन्यं भ्रमयति' चेतनं हरति 'समुन्मीलयति च करोत्यपि । यदैव चेतनस्य मे भवति कश्चिद्दोषः, तदैव लुप्यते चेतना बोध्य च विपर्य्ययो जायते, एवमेकस्मिन्नपि विरुद्ध बोधः । तत् निश्चयाय त्वामेव पृच्छामि "किमेतदिति", चलितचेतनोऽहं स्वयं कथं विनिश्चिनुयाम् ? स्थिरेति । प्रश्नस्य उत्तरमाह— 'स्थिरः' अचलः प्रसादः' अनुग्रहो येषां तादृशा 'यूयं' मयि । 'इतः' अस्मात् "अपरम् अन्यत् 'किम् इदानीं भवेत् । नैतत् सुखं न वा दुःखं न वा प्रबोधो न निद्रा, नापि विषविसर्पो न च मदः किन्तु एतत् खलु प्रसन्नता ते मयि ॥

Notes.—1. शक्यः—शक of the दिवादि class is उभयपदी । Hence शक्यामि, शक्ये । सुखम् &c.—सुख and दुःख are con·

traries. If it is not taken as the one it is almost sure to be taken as the other But no, I cannot call it either. 3. प्रबोधः &c.—Again contraries. If not प्रबोधः it is likely to be taken as निद्रा। But I cannot decide which. 4. विष &c.—विष and मद् also are contraries—one stupefies, the other stimulates Here the wording seems defective. The contraies are विष and मद्। If विसर्प is to be added, it should go with *both* (विषविसर्प and मद्विसर्प) and not with one only. वि+सृप+घञ् भावे=विसर्प not विषप। 'सात्पदाद्योः" इति षत्वनिषेधः। 5. तव स्पर्शे &c.—This explains why he cannot decide. Difficulty in a decision usually arises when the two sides present similar characteristics. But here though the characters are widely different I am unable to decide *because* तव स्पर्शे स्पर्शे &c. (see *Mitabh*—). I have lost control of my senses, how can I decide ? You tell me what it is. This is a compliment to सीता। 6. विहस्य etc.—Sita laughs and pays back the compliment. I know what it is ; *it is simply your unfailing kindness to me and nothing else.* There is nothing in my touch (स्पर्शे स्पर्शे), your enduring love (स्थिरप्रसाद) for me makes you feel and talk thus. इदानीम् is वाक्यालङ्कारे as in "क इदानीम् उष्णोदकेन नवमालिकां सिञ्चति"—*Sakuntala.* The verse and Sita's remark have been differently explained by commentators.

(*lv*) रामः—म्लानस्य जीवकुसुमस्य विकाशनानि
सन्तर्पणानि सकलेन्द्रियमोहनानि ।
एतानि ते सुवचनानि सरोरुहाक्षि
कर्णामृतानि मनसश्च रसायनानि ॥३६॥

सीता—पिअंवद सइस्सं [प्रियंवद शयिष्ये]। (इति शयनाय समन्ततो निरूपयति)।

Rama—O lotus-eyed girl, these sweet words of thine, that are nectar to the ears, are a tonic that gratifies all the senses; (they) impart strength to the mind also and thus cause the blooming of the withered flower of life. (36).

Sita—Sweet-speaker. I will lie down (*looks round of a pillow*).

मित—। म्लानस्येति। अन्वयः—हे सरोरुहाक्षि एतानि ते कर्णामृतानि सुवचनानि सकलेन्द्रियमोहनानि सन्तर्पणानि मनसः रसायनानि च (अतएव) म्लानस्य जीवकुसुमस्य विकाशनानि। व्याख्या—हे 'सरोरुहाक्षि' कमललोचने जानकि 'एतानि' एवंविधानि "स्थिरप्रसादाः" इत्यादि प्रकारकाणि 'ते कर्णामृतानि' श्रोत्रसुखानि 'सुवचनानि' मञ्जु भाषितानि चाटुकाराणामिव न केवलं श्रोत्रसुखानि अपि तु 'सकलेन्द्रियाणां श्रोत्रनेत्रादीनां 'मोहनानि' मधुरतया आत्मविस्मृतिविधायकानि 'सन्तर्पणानि बलवर्द्धकानि औषधानि। सर्व्वेन्द्रियतर्पणात् देहोत्कर्षविधायकाणि ते वचनान्येतानि इति भावः। न हि एतावति पर्य्यवसिता एतेषां गुणाः, परमेतानि 'मनसः रसायनानि च' आप्यायनान्यपि। एवं देहमनसोरुभयोरपरा—प्यायनात् 'म्लानस्य' संसारदुःखतापैर्विशुष्कस्य 'जीवकुसुमस्य' जीवनरूपस्य पुष्पस्य विकाशनानि (सर्वत्र बाहुलकात् कर्त्तरि ल्युट्) ते सुवचनानि। एष नवीभूतोऽहं तवानेन वचसा इति भावः॥ प्रियंवदेति। यथा मद्वचनं प्रति भवान् भणति तथैव मद्विषये भवतो वचनं जीवकुसुम विकाशनं तत् हे 'प्रियंवद मधुरालापिन् निद्रा मां बाधते कालात्ययमकृत्वा एव शयिष्ये। शेते अस्मिन् इति 'शयनम्' उपधानम्। तस्मै निरूपयति नेत्रं पातयति॥ वसन्ततिलकं वृत्तम्।

Notes.—1. *Remark*—Note the allocation of the qualifying epithet. म्लानस्यजीवकुसुमस्य विकाशनानि is the final character given to the सुवचनानि it is the last predicate

(विधेय)। They are such for they are सकलेन्द्रियमोहनानि, सन्तर्पणानि also because they are मनसश्च रसायनानि। कर्णामृतानि is an ordinary विशेषण of सुवचनानि। Commentators see here only a jumble of qualifying epithets thoughtlessly brought together. 2. प्रियंवद—प्रियं वदतीति प्रिय + वद् + खच् कर्त्तरि। Here again we have an exchange of compliments. You prize my words (सुवचनानि), but your words gratify me (प्रियंवद)—they are to me म्लानस्य जीवकुसुमस्य विकाशनानि।

(*lvi*) राम—अयि किमन्वेष्टव्यम ?

आविवाहसमयाद्गृहे वने शैशवे तदनु यौवने पुनः।

स्वापहेतुरनपाश्रितोऽन्यया रामबाहुरुपधानमेष ते ॥३७॥

सीता—(निद्रां नाटयन्ती)—अत्थि एदं अज्जउत्त अत्थि एदं [अस्त्येतत् आर्यपुत्र अस्त्येतत्]। (इति स्वपिति)।

Rama—What have you got to seek darling.

Thy pillow is this arm of Rama, unresorted to by any other woman, the producer of thy sleep since the time of marriage, at home in childhood and thereafter in the woods again in youth. (37)

Sita—(*Acting drowsiness*)—So it is, my husband, so it is (*Falls asleep*).

मित—। अयोति। 'किमन्वेष्टव्यम्'—नास्ति ? ते। यदन्विष्यते तदिहैवास्ति इति भावः॥ आ इति। अन्वयः—आ विवाहसमयात् शैशवे गृहे तदनु पुनर्यौवने वने ते स्वापहेतुः अन्यया अनुपाश्रितः एष रामबाहुः उपधानम्। व्याख्या—'आ विवाहसमयात्' विवहकालात् परं तत्कालावधि इत्यर्थः। 'शैशवे गृहे अयोध्यायां 'तदनु' ततः परं शैशवान्ते 'पुनः यौवने वने' दण्डकादिषु 'ते स्वापहेतुः' निद्राविधायकः 'अन्यया' रमण्या

'अनुपाश्रित:' असेवितः अतो बहुभिः सेवितात्, कृत्रिमादुपधानात् विशिष्टः 'एष रामबाहुः' मदीयो भुजः 'उपधानं' वर्त्तते एव। एवं विशिष्टे स्थिते निकृष्टे कः प्रयत्नः। एहि इहैव उपधेहि इति भावः। निद्रामिति। 'निद्रां नाटयन्ती' नाट्येन निद्रावार्ता दर्शयन्ती। 'एतत्' भवदुक्तम् अस्ति सत्यमेव।

Notes —1. विवाह etc,—'आ' इति कर्मप्रवचनीययोगे पञ्चमी by the rule "पञ्चम्यपाङ्परिभिः"। An अव्ययी—compound is optionally available giving आविवाहसमयम्। 2 तदनु—Not a compound. तत् has २या owing to अनु which is a कर्मप्रवचनीय by the rule "हीने"। The हीनता is respect of time. 3. यौवने —यूनो भाव इतियुवन्+अण् = यौवनम्। तस्मिन्। We take शैशवे यौवने and गृहे वने in order, *i e*, शैशवे गृहे, यौवने वने। This supposes that सीता was married when a child and went to the woods with राम when an adult. Those who are opposed to this viewshould suppose a च understood after वने and construe—आ विवाहसमयात् स्वापहेतुः, गृहे वने च (this specified the *place*). शैशवे तदनु यौवने पुनः (this gives *time*). 4. स्वापहेतुः—हेतु is कर्त्ता। स्वापस्य हेतुः। 5. रामबाहुः—Sita was looking for a pillow. राम offers his arm for one. This is better than an ordinary pillow, because a pillow, if found there must have been used by several other ladies. But this one is अनुपाश्रितोऽन्यया। You are used to it शैशवे तदनु यौवने it is better than any other, hence किमन्वेष्टव्यम्— what are you looking for? 5 अस्त्येतत् etc —Here both lie down and forthwith सीता falls asleep.

(*lvii*) रामः—कथं प्रियवचना वक्षसि प्रसुप्तैव।
(निर्वर्ण्य सस्नेहम्)—

इयं गेहे लक्ष्मीरियममृतवर्त्तिर्नयनयो-
रसावस्याः स्पर्शो वपुषि बहलश्चन्दनरसः ।
अयं कण्ठे बाहुः शिशिरमसृणो मौक्तिकसरः
किमस्या न प्रेयो यदि परमसह्यस्तु विरहः ॥३८॥

Rama—Ha ! This sweet-speaker has really fallen asleep on my bosom. (*Marking—with tenderness*)—

She is grace in my house—She is a brush of ambrosia to my eyes—This touch of hers is a liberal supply of essence of sandal to my body—This arm is a cool smooth string of pearls on my neck What of hers is not sweet, if her absence alone is indeed unendurable ? [Or—if her absence is indeed unendurable, what else of hers is not sweet]. 38.

मित—। अयमिति। अन्वयः—इयं गेहे लक्ष्मीः इयं नयनयोः अमृतवर्त्तिः। अस्या असौ स्पर्शः वपुषि बहलश्चन्दनरसः, अयं बाहुः कण्ठे शिशिरमसृणो मौक्तिकसरः। अस्याः किं न प्रेयः यदि तु परं विरहः असह्यः (यद्वा—यदि तु विरहः असह्यः परमस्याः किं न प्रेयः)। व्याख्या —'इयं जानकी मदीये 'गेहे' 'लक्ष्मीः' कान्त्यधिष्ठात्री देवता, गृहस्य शोभा, मे नयनयोः अमृतवर्त्तिः' सुधामयी शलाका तद्वत् सुखकरी इत्यर्थः। न केवलम् "इयम्" एवं स्वरूपतः सुभगा मे, किन्तु "अस्याः" सम्बन्धि सर्वमेव सुभगम् इत्याह—'अस्या' जानक्याः असौ' बहुशोऽयं स्पर्शः' मे 'वपुषि' देहे 'बहलः' प्रचुरः 'चन्दनरसः' स इव प्रेयान्' अस्याः 'अयं बाहुः' अवलम्बनार्थं न्यस्तो भुजः 'कण्ठे शिशिरमसृणः' शीतलः अपरूपश्च यः 'मौक्तिकसरः' मुक्ताहारः तथाविधः प्रेयान्। स्पर्शबाहुप्रभृतयः कति पुन पृथगुच्यन्ताम् संक्षेपतो ब्रवीमि 'अस्याः किं किमिव वस्तु 'न प्रेयः' न मे प्रीतिपदम्, सर्वमेव प्रेय इत्यर्थः यदि तु पक्षान्तरे नूनं 'पर' केवलं विरहः असह्यः सोढ्ुमशक्यः। (यद्वा—'यदितु विरहः असह्यः' एव 'पर' विरहव्यतिरिक्तम् 'अस्याः किं न प्रेयः)॥

Notes.—1. **कथम्**—An **अव्यय** implying surprise. **राम** did not expect that she then would fall asleep so soon. 2. **गेहे**, **नयनयोः**, **वपुषि**, **कण्ठे**—Thus she was everywhere a source of joy to **राम**। The two were lying together. Hence **राम** was actually feeling here **स्पर्शो वपुषि** and the moment before (see sl. 35) he had placed her arm on his neck (**कण्ठे बाहुः**)। 3. **शिशिर** etc —**शिशिरश्चासौ मसृणश्च**, कर्मधा—। 4. **मौक्तिक** etc —**मुक्ता एवइति मुकता+ठक्** (**विनयादि**)=**मौक्तिकम्**। Neuter by the dictum "**क्वचित् स्वार्थिकाः प्रकृतितो लिङ्गवचनान्यतिवर्त्तन्ते**"; 5. **प्रेय**—**अतिशयेन प्रियम् इति प्रिय+ईयसुन्**। No comparison is implied. 6 **यदि**—**अव्यय** implying **पक्षान्तर**। 7 **परम्**—**अव्यय** meaning **केवल**। Qual **विरहः**। **परं विरहः**—Separation alone. Or **पर**—else **अन्य**। '**पर**' **किम्**—**अन्यत् किम्** (**न प्रेयः**)। 8. **तु**—**अव्यय** implying **अवधारण**, **निश्चय**। Take it along with **असह्यः**। **असह्यस्तु असह्य एव** really unendurable

(*lviii*) (प्रविश्य) पतीहारी—देव उवट्ठिदो [देव उपस्थितः]।

रामः—अयि कः ?

पतीहारी—आसणपरिचारओ दुम्मुहो देवस्स [आसन्नपरिचारको दुर्मुखो देवस्य]।

रामः—(स्वगतम्)—शुद्धान्तचारी दुर्मुखः स मया पौरजानपदान् अपसर्पितुं प्रयुक्तः। (प्रकाशम्) आगच्छतु। (पतीहारी निष्क्रान्ता)।

(*Entering*) Warder—Sire waiting close by,

Rama—Well who ?

Wander—Sire's personal attendant Durmukha.

Rama—(*To himself*)—Durmukha is employed in the harem He was detailed by me to spy out citizens and villagers. (*Aloud*) Let him come in. (*Exit* Warder).

मित—। देव इति। 'उपस्थितः' समीपे वर्त्तमानः॥ अयीति। क उपस्थित इति नोक्तम्। तत आत्मना अनन्तरोक्तं यत् 'असह्यस्तु विरहः' इति तदनुपदमेव प्रतिहार्य्या प्रोक्तम् "उपस्थित" इति एतयोः परस्परान्वये "असह्यस्तु विरहः उपस्थितः" इति त्रासकरोऽर्थः आयाति। तेन सन्त्रस्तो रामः पृच्छति 'अयि कः उपस्थित' इति। इयमपि भाविनया विपत्तेश्छाया॥ आसन्नेति। 'आसन्नः' सदैव समीपे वर्त्तमानः॥ शुद्धेति। 'शुद्धान्ते' अन्तःपुरे 'चरति' व्यवहरति (णिनिः)। 'दुर्मुखः' अन्तःपुरे नियुक्त इत्यर्थः। 'पौरान्' पुरवासिनः पुरुषान् 'जानपदान्' जनपदवासिनश्च, ग्रामनगरवासिनः सर्वान् इत्यर्थः। 'अपसर्पितु" प्रच्छन्नं परीक्षितुम् नियुक्तः॥

Notes—1. **उपस्थितः**—Has come. **प्रतिहारी** does dot say who has come To Rama this sounds ominous, because his last word uttered aloud is **विरहः** (Sl. 38) and the warder's **उपस्थितः** uttered immediately after it presents to his already disturbed mind the context **विरहः उपस्थितः।** He is startled by the coincidence. 2. **अयि** &c.—**अयि** here implies **सम्भ्रम** caused by the coincidence—**विरहः उपस्थितः।** This sort of coincidence is in dramatic parlance known as **पताकास्थानक।** "**यत्रार्थेचिन्तितेऽन्यस्मिन् तल्लिङ्गोऽन्यः प्रयुज्यते। आगन्तुकेन भावेन पताकास्थानकं तु तत्॥**" **पताकास्थानक** is sometimes **मङ्गलार्थ** sometimes **अमङ्गलार्थ।** Here it is **अमङ्गलार्थ**; it bodes evil—the **विरह** that is imminent. 3. **अपसर्पितुम्**—**अप+सृप+तुमुन्।** This is a poetical licence the correct form being **अपसर्प्तुम्** or **अपस्रप्तुम्।** **सृप** occurs in the **अनिट् कारिका**—

"तृपातिदृपाती स्पृशिम्" । अप + स्पृश् means 'to spy' 'अपसर्पश्चरः स्पशः" इत्यमरः । The reading 'पौरजानपदचरितमुपगन्तुम्" seems better here.

(*lix*) (प्रविश्य) दुर्मुखः (स्वगतम्)—हा कथं सीदादेव्वीए इरिसं अचिन्तणिज्जं जनाववादं देवस्स कधइस्सं । अहवा णिओओ क्खु मे ईरिसो मन्दभाअस्स [हा कथं सीतादेव्या ईदृशम् अचिन्तनीयं जनापवादं देवस्य कथयिष्यामि । अथवा नियोगः खलु मे ईदृशो मन्दभागस्य] ।

सीता (उत्स्वप्नायते)—हा अज्जउत्त सोम्म कहिं सि [हा आर्यपुत्र सौम्य कुत्र असि] ।

(*Entering*) Durmukha (*To himself*)—Alas ! How shall I report to Sire this inconceivable slander of Queen Sita by the people ? Or such indeed is the duty of me the ill-starredone.

Sita—(*Talks in her sleep*)—Ah ! My husband, where art thou, O gentle one ?

मित— । हा इति । "अचिन्तनीयं" चिन्तयितुमशक्यम् । 'जनापवादम्' लोकनिन्दाम् । 'नियोगः' अधिकारः, कर्त्तव्यं कर्म्म ॥ सीतेति । स्वप्नः निद्रा । 'उद्‌ गतः स्वप्नात्' उत्स्वप्नः विगतनिद्रो: जतः । 'उत्स्वप्न' इव आचरति 'उत्स्वप्नायते सुप्ता अपि प्रबुद्धा इव आचरति, वाचः प्रयुङ्क्ते इत्यर्थः । 'कुत्र असि' इति स्वप्ने, तया रामविरहो दृष्ट इत्यर्थः । दुर्मुखागमनात् आसन्नं वियोगम् अन्तरात्मा तस्या जानाति इति विपदः सूचना ॥

Notes —1. जनापवादम्—अप + वद् + घञ् भावे अपवादः slander. जनानाम् अपवादः । 2. देवस्य—४र्थी is expected. षष्ठी शेषे । 3. ईदृशः—Of this nature, *i.e.*, to spy and report. 4. उत्स्वप्नायते—उत्स्वप्न is a प्रातिपदिक—(See Tika.) स इव आचरति इति उत्स्वप्न + क्यङ् (नामधातु) + लट् ते by the rule 'कर्त्तुः क्यङ् सलोपश्च ॥

(*lx*) रामः—अये सैवेयं रणरणकदायिनो चित्रदर्शनात् विरहभावना देव्याः स्वप्नोद्वेगं करोति। (सस्नेहं परामृशन्)

अद्वैतं सुखदुःखयोरनुगुणं सर्वास्ववस्थासु यद्-
विश्रामो हृदयस्य यत्र जरसा यस्मिन्न हार्य्यो रसः।
कालेनावरणात्ययात् परिणते यत् स्नेहसारे स्थितं
भद्रं प्रेमसुमानुषस्य कथमप्येकं हि तत् प्राप्यते ॥३९॥

Rama—Ha ! It is that distressing thought of separation suggested by the inspection of painting that is disturbing the queen's sleep. (*Affectionately caressing her*)—

With great difficulty indeed is gained that unique and benificient love of a good creature that is unchanged in weal and woe, obliging under all circumstances, where there is the heart's repose, the ardour of which is not to be mitigated with age which develops into the mature core of affection through the wearing off of the coating (of reserve) by time. (39).

मित—। अये इति 'सैव' पूर्वदर्शिता 'विरहभावना' विप्रयोगशङ्का या शूर्पणखायाः 'चित्रदर्शनात्' जाता, 'रणरणकदायिनी' उद्वेगकारिणी सा 'इयं' देव्याः स्वप्नोद्वेगं करोति। अद्वैतमिति। अन्वयः—यत् सुखदुःखयोः अद्वैतम् (अतएव) सर्वासु अवस्थासु अनुगुणम्, यत्र हृदयस्य विश्रामः, यस्मिन् जरसा रसः न हार्य्यः, यत् कालेन आवरणात्ययात् परिणते स्नेहसारे स्थितम्, तत् एकं सुमानुषस्य भद्रं प्रेम कथमपि हि प्राप्यते। व्याख्या—'यत् सुखदुःखयोः अद्वैतम्' द्विरूपतावर्जितम् यथा सुखे तथा दुःखे यस्य एकरूपता अतएव 'सर्वासु अवस्थासु' सम्पदि च विपदि च 'अनुगुणम्' अनुकोमम्, 'यत्र' यस्मिन् प्रेम्णि हृदयस्य विश्रामः' संसार-

यातनाक्लिष्टस्य मनसः क्लान्तिविगमः, 'यस्मिन्' प्रेम्णि 'जरसा' वार्द्धकेन 'रसः स्वादः न हार्य्यः' अनपनेयः, 'यत्' प्रेम 'कालेन' (अपवर्गे ३या) 'आवरणस्य' सङ्कोचादीनामाच्छादनस्य 'अत्ययात्' विगमात् 'परिणते' परिपाकमुपेयुषि 'स्नेहसारे' स्थिरांशे 'स्थितं' तद्रूपेण वर्त्तमानम् 'तत् एकम्' इतरविलक्षणं 'भद्रं' कल्याणकरं सुमानुषस्य' सज्जनस्य प्रेम कथमपि हि' अतिकृच्छ्रेणैव हि 'प्राप्यते। दुर्लभं खलु तत् जगति मम तु सिद्धम्, अहो मे भाग्यम् इति भावः ॥

Notes.—1. **रणरणकदायिनी—रणरणक=उद्वेग।** No satisfactory derivation is available **तं ददातीति रणरणक+दा+णिनि कर्त्तरि=ताच्छील्ये साधुकारिणि वा स्त्रियाम्।** Qual. **विरहभावना। विरह** etc —**भू+णिच्+युच भावे स्त्रियां भावना** thought. **विरहस्य भावना** apprehension of separation 3. **स्वप्नोद्वेगम्—स्वप्न** sleep. **उद्+विज+घञ् भावे=उद्वेग** disturbance **स्वप्नस्य=उद्वेगः।** 4 **अद्वैतम्—द्वयोर्भाव इति द्वि+तल् द्विता। सा एव इति द्विता—अण् स्वार्थे=द्वैतम्** double character, **प्रज्ञादि,** which is **आकृतिगण।** The derivation from (**द्वि+इत**)+**अण्** as suggested by Mallinatha in Bharavi I is round about and undesirable, a simpler derivation as above being available, **अविद्यमानं द्वैतमस्मिन् अद्वैतम् वहु—।** 5. **अनुगुणम्—गुण** here is **भर्त्तृगुण। अनुगतं गुणम् अनुगुणम्** adapting itself to the husband's state. **प्रादितत्—।** Here is is not the wife's love that is **अनुगुण**, but the wife herself. 6. **विश्रामः**—See *ante* on **विश्राम्यताम् अष्टावक्रः।** 7 **हार्य्य—हृ+ण्यत् कर्मणि** capable of mitigation. 8. **आवरणात्ययात्—आ+वृ+ल्युट् करणे आवरण** veil, cover, **अति+इ अच् भावे अत्यय** removal. **आवरणस्य अत्ययः। तस्मात्। हेतौ ५मी। आवरण** here is **लज्जा** etc., which conceal the **प्रेम** and which wear off in time as familiarity grows. 9. **प्रेम—प्रियस्य भाव इति प्रिय+इमनिच् प्रेमन्** (**प्रातिपदिक**)। **इमनिच्** usually gives a masculine derivative, such as **लघिमा, गरिमा, महिमा** etc.

We thus expect प्रेमा । But poets often make it neutre, as here. Also compare "तथाविधं प्रेम पतिश्च तादृशः" । Bhavabhuti has it in the masculine also, thus "अनिबन्धनं प्रेमाणमामनन्ति" = Act V, para xvii.

(*lxi*) दुर्मुखः (उपसृत्य)—जअदि जअदि देओ [जयति जयति देवः] ।

रामः—ब्रूहि यदुपलब्धम् ।

दुर्मुखः—उवत्थुवन्ति देअं पौरजाणवदा विसुमरिदा अम्हे महाराअदसरहस्स रामभद्देणेति [उपस्तुवन्ति देवं पौरजानपदा विस्मारिता वयं महाराजदशरथस्य रामभद्रेण इति] ।

रामः—अर्थवाद एषः । दोषस्तु कश्चित् कथय येन स प्रतिविधीयते ।

दुर्मुखः—(सास्रम्)—सुणादु देओ [शृणोतु देवः] । (कर्णे—एवम एवम) ।

रामः—अहह तीव्रसंवेगो वाग्वज्रः । (इति मूर्च्छति) ।

दुर्मुखः—आस्ससदु देओ [आश्वसितु देवः] ।

Durmukha.—(*Advancing*)—Prosper, let sire prosper.

Rama.—Tell me what has been gathered.

Dur.—"We have been by Rambhadra made to forget the great king Dasaratha"—thus do citizens and villagers belaud Sire.

Rama.—This is praise. But tell me of any defect that it may be remedied.

Dur.—(*With tears*)—Let Sire listen. (*Whispers into his ears*—Thus and thus).

Rama—Oh ! A thunder-bolt-of-words of intense energy (*Faints away*).

Dur – Let Sire take courage.

मित—उपस्तुवन्तीति। 'उपस्तुवन्ति' 'प्रशंसन्ति'। 'इति' अनेन प्रकारेण 'पौरजानपदाः देवम् उपस्तुवन्ति'॥ 'अर्थवादः प्रशंसा 'प्रतिविधीयते' निराक्रियते॥ 'कर्णे' रामस्य कर्णे कथयति। 'एवम् एवम्' इति गुप्तभाषितस्य उपलक्षणम्। रहस्यं किञ्चित कथयन्ति जनाः इत्यर्थः। तच्च कर्णे कथिते श्रोष्यति देवी यदि बुध्यते इति॥ अहहेति। 'तीव्रः' दुःसह 'संवेगः' प्रपातः अस्य। 'वागेव वज्रः'॥

Notes—1. विस्मारिताः—वि+स्मृ+णिच्+क्त कर्मणि made to forget. स्मृ means to remember But वि being *privative* वि+स्मृ means to forget. In this sense the root is not मित् and we do not get ह्रस्व with णिच्। मित्त्व is compulsory when meaning उत्कण्ठापूर्वकस्मरण। Thus स्मरयति forces to yearn after, but स्मारयति forces to remember. 2. महाराजदशरथस्य – Originally this was कर्म of स्मृ। But the कर्मत्व is here ignored (अविक्षा) and we have शेषे षष्ठी। Now if there is अविक्षा of कर्म the root becomes अकर्मक and by the rule "गतिबुद्धिप्रत्यवसानार्थ—" the अणिकर्त्ता becomes कर्म when णिच् is attached. Thus वयं विस्मृत-वन्तः = रामभद्रः अस्मान् विस्मारितवान् = रामभद्रेण वयं विस्मारिताः। But this is against the commentators of पाणिनि। Theyexclude अविवक्षित कर्म roots from the operation of the rule 'गतिबुद्धि—'। Thus – 'येषां देशकालादिभिन्न' कर्म न सम्भवति ते अव अकर्मकाः न तु अविवक्षित-कर्माणोऽपि तेन मासमासयति देवदत्तम्' इत्यादौ कर्मत्वं भवति 'देवदत्तेन पाचयति' इत्यादौ तु न" – *Bhattoji* Hence we should get – वयं विस्मृतवन्तः = रामभद्रः अस्माभिः विस्मारितवान् = रामभद्रेण अस्माभिः विस्मारितम् (भावे)। 3. अर्थवादः—वदनम् इति वद्+घञ् भावे = वादः। अर्थस्य प्रयोजनस्य वादः a statement made through necessity, *i. e.*, with the object of gaining some end. Hence

it is flattery or **प्रशंसा**। 4. **येन—येन कथनेन**। Unless you say I can not remedy. **प्रतिविधान** is owing to your report, **हेतौ तथा**। 5. **कर्णे** etc. What is said here is suppressed and the suppression is indicated by **एवम्—एवम्**—Thus (say people), thus. This is whispered into Rama's ear because he apprehends that **सीता** might hear him.

(*lxii*) रामः (आश्वस्य)—

हा हा धिक परगृहवासदूषणं यद्
वैदेह्याः प्रशमितमद्भुतैरुपायैः।
एतत् तत् पुनरपि दैवदुर्विपाका-
दालर्कं विषमिव सर्वतः प्रसृतम् ॥ ४० ॥

तत् किमत्र मन्दभाग्यः करोमि। (रा—)

Rama—(*Recovering*)—

Alas! Alas! Cursed be this slander of Vaidehi through residence in another's house which has been suppressed by miraculous means. Through an evil turn of fate same has once again spread all round like the venom of a rabid dog.

[*Or*—Alas! Alas! How accursed! The very same slander of Vaidehi . means, has once again .dog]. (40)

(R—)

Now what can I ill-starred as I am, do in this matter?

मित—। हा हेति। अन्वयः—हाहा धिक्! वैदेह्याः यत् परगृहवासदूषणम् अद्भुतैः उपायैः प्रशमितम् दैवदुर्विपाकात् तत् एतत् पुनरपि आलर्कं विषमिव सर्वत, प्रसृतम्। व्याख्या—'हा हा धिक्' अहो दुर्गतिः। 'वैदेह्याः यत परगृहे' भर्त्तृभिन्नजनमन्दिरे 'वासात् दूषणं' जनैः कलङ्कारोपः अद्भुतैः, उपायैः विचित्रैः साधनैः अग्निशुद्ध्यादिभिः 'प्रशमितम्' अपनीतम्

दैवस्य हतविधेः 'दुर्विपाकात्' 'दुष्परिणामात् 'तत् एतत् पुनरपि आलर्कं' मस्तकुक्कुरसम्बन्धि विषमिव सर्वतः' समन्तात् प्रसृत' सञ्चरितम् ॥

Notes.—1. परगृह etc —दुष+णिच्+ल्युट् करणे दूषणम् cavil. slander परगृहवासात् दूषणम्, दुष्पदा । Here दूषण is not any blemish in वैदेही । She is without blemish—उत्पत्तिपरिपूता । It is the idle and reckless talk of the people Hence the णिच्, otherwise the poet would have said दोषण or दोष । 2 प्रशमितम्—प्र+शम्+णिच्+क्त कर्मणि प्रशान्तम् or प्रशमितम् । 3. दैव etc —दुष्टो विपाकः दुर्विपाकः प्रादितत्—। दैवस्य दुर्विपापाकः । तस्मात् । हेतौ ५मी । 4. आलर्कम्—अलर्क a made dog तस्य इदम् इति अलर्क+अण् । 5 *Remark*—This is an adaptation of Kalidasa's "पौरेषु सोऽहं बहुलीभवन्तमपां तरङ्गेष्विव तैलबिन्दुम् । सोढुं न तत्पूर्वमवर्णमीशे आलानिकं स्थाणुमिव द्विपेन्द्रः ।" Like Kalidasa's, Bhavabhuti s verse implies that something must be done and that immediately.

(*lxiii*) (रा—) (विमृश्य सकरुणम्) अथवा किमन्यत् ?

सतां केनापि कार्येण लोकस्याराधनं व्रतम् ।

यत् पूरितं हि तातेन मां च प्राणांश्च मुञ्चता ॥ ४१ ॥

सम्प्रत्येव भगवता वसिष्ठेन सन्दिष्टम् । (रा—)

(R.—*Reflecting—Piteously*)—Or, what else ?

The service of the people by any means is the vow of all good (kings)—vow which was indeed redeemed (kept) by father by renouncing me and life as well. (41)

Even now this has been urged by Worshipful Vasishtha.

मित—। "विमृश्य" ध्यात्वा । 'अथवा' लोकानां तुष्टिमेव विधास्ये 'अन्यत् किं' करणीयमस्ति ॥ निश्चयेऽस्मिन् हेतुमाह सतामिति । अन्वय—केन अपि कार्येण लोकस्य आराधनं सतां व्रतम्, यत् तातेन मां च प्राणांश्च मुञ्चता पूरितं हि । व्याख्या—'केन अपि' यत्किञ्चित्करेण च 'कार्येण' कर्मणा लोकस्य प्रजानाम् 'आराधनं' अनुरञ्जनं 'सतां व्रतं' साधूनामनुष्ठेयो विधिः"

'यत्' व्रतं 'तातेन' पित्रा दशरथेन 'मास्त्र प्राणाश्च मुञ्चता दुष्करं कुर्वता इति भावः 'पूरितं हि' उद्यापितमेव । तत् मयापि प्रजारञ्जनानुरोधात् दुष्करं सीतापरित्यागमेव कुर्वता तत् व्रतं पूरयिष्यते इति भावः , अत्र सीतापरित्यागसमर्थनाय दशरथचरितस्योपस्थापनं रामायणविरुद्धं वीरचरितविरुद्धञ्च । तत्र कैकयीप्रीतये रामविवासनमुक्तं न प्रजारञ्जनार्थम् ॥ सम्प्रतीति । 'सन्दिष्ट' "युक्तः प्रजानामनुरञ्जने स्याः" इत्यादिष्टम् । तत् सर्वथा अपरिहार्य्यः सीतापरित्यागः ।

Notes.—1. **विमृश्य—वि + मृश** means to reflect. The preceding verse establishes the necessity for instant action. Two courses present themselves—a course of conciliation of the people whith means renunciation of **सीता**, and a course of repression. Rama *reflects* (**विमृश्य**)—weighs the pros and cons of the two and decides on the adoption of the former. The decision breaks his heart and what follows now is said **सकरुणम्**—piteously. 2. **केनापि**—The **अपि** implies indescribability, inconceivability &c. 3. **पूरितम्**—Vidyasasar's reading is **पूजितम्** honoured. But something more difinite than that is required. One may honour (**पूजित**) a custom yet not observe it ; actual observance is necessary. Hence **पूरित** seems better, 4. *Remark*—**सताम्** &c. cites precedent to justify this apparently atrocious decision. Similar sarifices are not rare in our family. Father made such sacrifice, why then should I not be equal to it ? **सम्प्रतेव** &c.—refers to Guru's command which is above all other consideration.

(*lxiv*) (रा—) अपि च—

यत् सावित्रैर्दीपितं भूमिपालै-
र्लोकश्रेष्ठैः साधु शुद्धं चरित्रम् ।
मत्सम्बन्धात् कश्मला किंवदन्ती
स्याच्चेदस्मिन् हन्त धिङ् मामधन्यम् ॥४२॥

(R—) Moreover,

If to this—the pure record, well rendered illustrious by the solar race of kings, the best among men—a foul slander attaches through my connection, then, alas ! woe be to the luckless self of mine (42)

मित—। एवं सीताया परित्यागे गुणमुक्त्वा अपरित्यागे दोषमाह यदिति अन्वयः—लोकश्रेष्ठैः सावित्रैः भूमिपालैः यत् शुद्धं चरितं साधु दीपितम् अस्मिन् मत् सम्बन्धात् कश्मला किंवदन्ती चेत् स्यात् हन्त अधन्यं मां धिक् । व्याख्या—'लोकश्रेष्ठैः' पुरुषसिद्धैः 'सावित्रैः' सूर्यवंशीयैः 'भूमिपालैः' महीपतीभिः यत् शुद्धं चरित्रं विमलं वृत्तं 'साधुदीपितं सम्यगुद्भासितम् (अस्मिन् लिपिकर प्रमादोयऽम् तस्मिन् इति कवेरभिप्रायः स्यात्) मत्सम्बन्धात् मम सम्पर्कात् एतस्मिन् अन्तरे सीतापरित्यागमकुर्वता मया योगात् 'कश्मला' मलिना 'किंवदन्ती' जनवादः चेत् स्यात् यदि प्रसज्येत तदा 'हन्त' अहो दुःखम् 'अधनक्' हतभाग्यं 'मां धिक्' तत् कुलचरितं दीपितमेव तिष्ठतु इति कारणीय एव सीतापरित्यागः इति भावः ॥

Notes.—1. सावित्रैः—सूते इति सू+तृन कर्त्तरि सविता Sun. सवितुरपत्यानि पुमांसः इति सवितृ+अण्=सावित्राः। . भूमिपालैः—भूमिं पालयन्ति इति भूमि+पा+णिच्+अण् कर्त्तरि भूमिपालाः। तैः। 3. लोकश्रेष्ठैः—अतिशयेन प्रशस्या इति प्रशस्य। इष्ठन् श्रेष्ठाः+लोकेषु श्रेष्ठाः। सप्तमी। तैः। 5. साधु—Qual दीपनक्रिया। Comp. 'तत् साधु कृतसन्धानं प्रतिसंहर सायकम्'—*Sakuntala* 6. कश्मला—कश्मल is

पाप। तद् अस्ति अस्मिन् इति कल्मष+अच् मत्वर्थे स्त्रियाम्=कल्मषा sinful, secondarily 'dark' मलिना। किं वदन्ती—किं कुत्सितं वदति इति किम्+वद् शतृ स्त्रियाम्। 7. अस्मिन्—seems to be a copyist's slip for तस्मिन्। 8. *Remark*—This verse gives the evil consequence of the non-observance of the व्रत referred to in sl. 41, If सीता is not abandoned, a slur attaches to the race—the race originated by the resplendent Sun himself—the race of which the deeds are as resplendent as the sun. Hence by the maxim "त्यजेदेकं कुलस्यार्थे" the abandonment of सीता is unavoidable. This is an *a*daptaiion of "राजर्षि वंशस्य रविप्रसूतेरुपस्थितः पश्यत कीदृशोऽयम्। मत्तः सदाचारशुचेः कलङ्कः पयोदवातादिव दर्पणस्य ॥"—*Raghu.*

(*lxv*) (रा—) हा देवि देवयजनसम्भवे, हा स्वजन्मानुग्रहपवित्रितवसुन्धरे, हा निमिजनकवंशनन्दिनि, हा पावकवसिष्ठारुन्धतीप्रशस्तशीलशालिनि, हा राममयजीविते, हा महारण्यवासप्रियसखि, हा प्रियस्तोकवादिनि, कथमेवंविधायास्तव ईदृशः परिणामः।

त्वया जगन्ति पुण्यानि त्वय्यपुण्या जनोक्तयः।
नाथवन्तस्त्वया लोकास्त्वमनाथा विपत्स्यसे ॥ ४३ ॥

दुर्मुख ब्रूहि लक्ष्मणम्—एष ते नूतनो राजा रामः समाज्ञापयति (कर्णे—एवमेवम्)।

(R—) Ah, my queen sprung from the ground for sacrifice to the gods! Ah thou by whom the earth was sanctified through the favour of thy birth. Ah, thou the delighter of the race of Nimi and Janaka! Alas, thou with a character belauded by Fire, Vasishtha and Arundhati! Alas, thou that lived in Rama only! Alas,

my dear companion of my stay in the great forest! Ah, thou of sweet and spare speech; Such as thou art, how is it that such is thy end?

Through thee the worlds are holy, on thee are people's unholy tattle! Through thee the worlds are provided with a guardain, thou art to perish without a guardian! (46).

Durmukha, tell Lakshmana—Here, your new king Rama commands. (*Whispers into his ears*—Thus and thus).

मित—। हा इति। देवनां यजन यागस्थली 'सम्भवः' उत्पत्तिस्थानं यस्य तादृशी सीता जन्मना पूता इत्यर्थः। अतएव 'स्वजन्म' एव यः 'अनुग्रह तेन 'पवित्रिता' विशोधिता 'वसुन्धरा' पृथिवी यया तादृशी सीता। अतएव सा 'निमेः' जनकवंशकर्त्तुः 'जनकस्य, च वंशस्य नन्दिनी' आनन्ददायिनी सीता (मन्ये—'रघु जनक इति कवेः पाठ आसीत् 'निमिजनक' इति लिपिकरप्रमाद. । रघोः जनकस्य च यौ वंशौ' तयोः 'नन्दिनी' इति व्याख्यानम्)। 'पावकेन वशिष्ठेन अरुन्धत्या च 'प्रशस्तं स्तुतं यत् 'शीलं तेन 'शालते शोभते तादृशी सीता। जन्मना शीलेन च अतुला सीता इति भावः तस्यामपि-लोकवाद इति खेदः। 'राममय' रामैकपरं जीवितं जीवनं यस्याः तादृशी'। यस्य जीवने सर्व्वकर्मसु रामभावना तादृशी सीता, तस्यां अपि परपुरुषसंसर्ग-शङ्का इति खेदः। 'महारण्ये' दण्डकासु 'वासे प्रिया सखी' सहचरी तादृश्यामपि सन्देह इति खेद। 'प्रियं स्तोकम् अल्पञ्च 'वदति' या सा, तस्याः ईदृशः' अचिन्त्यः परिणामः' अन्तिमा दशा॥ परिणाममेव दर्शयति त्वयेति। अन्वयः—सुगमः। व्याख्या—सुगमा॥ 'त्वया जगन्ति पुण्यानि' न केवलं त्वं पवित्रितवसुन्धरा किन्तु पवित्रितभुवनत्रयापि। 'अपुण्या जुगुप्सिताः। 'त्वया हेतुभूतया 'लोका' नाथवन्तः पुरा रावणपीडिता असहाया आसन् अधुना रावणविनाशात् ससहायाः। अनाथा 'अशरणा',विपत्स्यसे' मरिष्यसि। उभयतः असामञ्जस्य' प्रदर्श्यते। या पावनी सा अपवित्रीक्रियते या शरण्यं सैव अशरणा इति॥ नूतन इति। नूतनः' इति साभिप्रायम्।

राजा नूतनः कर्मापि तस्य नूतनम्। न हि सूर्य्यवंशीयेन केनापि भूपालेन परित्यक्ता आसन्नप्रसवा धर्म्मपत्नी। तदपि नूतनं नूतनेन राज्ञा क्रियते इत्यभिप्रायः।

Notes —1 स्वजन्म etc—पवित्रा कृता इति पवित्र+णिच् (नामधातु) क्त कर्मणि पवित्रिता। 2 निमिजनक &c—रघुजनक seems to be the correct reading. See Tika. 3. पावक &c—प्र+शंस+क्त कर्मणि प्रशस्तम् belauded, पावक balauded her शौच at the time of the ordeal in Lanka. वशिष्ट and अरुन्धती were constant admirers. 4. राममय etc—रामः प्रचुरः यस्मिन् इति राम+मयट् राममयम्। 5. ईदृशः परिणामः—Here राम anticipates events—what will happen to her if abandoned. 6. नाथवन्तः—नाथ is रक्षक protector guardian &c—7. रामः—mentions himself by name to show that राम alone is capable of such a villainnous deed 8 •*Remark*—For propriety of the various epithets here, see *Mitakh*—above.

(*lxvi*) दुर्मुखः—कहं दाणीं अग्गिपरिसुद्धाए गब्भट्ठिदपवित्तरघुउलसन्दाणाए देईए दुज्जणवअणादो एवंअज्झवसिदं देवेण [कथमिदानीम् अग्निपरिशुद्धाया गर्भस्थितपवित्र—रघुकुलसन्तानाया देव्या दुर्जनवचनादेवमध्यवसितं देवेन ?]

रामः—शान्तम्। कथं दुर्जनाः पौरजानपदाः ?
इक्ष्वाकुवंशोऽभिमतः प्रजानां जातञ्च दैवाद्वचनीयबीजम्।
यच्चाद्भुतं कर्म विशुद्धिकाले प्रत्येतु कस्तद्यदि दूरवृत्तम् ॥४४॥

तद्गच्छ।

दुर्मुखः—हा देई [हा देवि]। (इति निष्क्रान्तः)।

Dur—How is it that through the slander of the wicked thus is now being contemplated by Sire regarding the queen who was cleared by fire (tested in fire ?) and in whose womb rests the hallowed progeny of the race of Raghu ?

Rama.—Peace ! How are the citizens and villagers wicked ?

Ikhshvaku's race is liked by the people, but through fate has occured cause for slander. On the other hand the miraculous deed (development) at the time of vindication happened far off indeed. Who would believe in it ? (44).

Do go, then.

Dur.—Alas, our queen (*Exit*)

स्मित — । कथमिति । 'अग्नौ परिशुद्धा' तस्य 'देव्याः' सम्बन्धे । शेषे षष्ठी । इत्येकम् अनध्यवसायकारणम् । गर्भे स्थितः पवित्रः रघुकुल-सन्तानः यस्याः यद्वा 'पवित्रस्य रघुकुलस्य सन्तानः यस्याः तस्या· देव्याः' इत्यनध्यवसाय कारणं द्वितीयम् । तथापि कथं देवेन अध्यवसितं परिहार्य्ये कर्म्मणि । एवमनेके स्थिते अध्यवसायकारणे मा भूदध्यवसायो देवस्य ॥

इक्ष्वाविति । अन्वयः—इक्ष्वाकुवंशः प्रजानामभिमतः दैवाच्च वचनीयबीजं जातम् । यच्च विशुद्धिकाले अद्भुतं कर्म्म अतिदूरवृत्तं तत् को हि प्रत्येतु ।

व्याख्या—इक्ष्वाकोः वंशः प्रजानाम् 'अभिमतः' तव अनुरक्ताः प्रजाः कथं मयि दुर्जनाः स्युः । नोचेत् दुर्जनाः, कथं जनवादः ? दैवाच्च ममैव हतभाग्यतया 'वचनीयस्य' निन्दायाः बीजं' कारणं जातम्' उपस्थितम । अग्नौ हि तत् दग्धं बीजमिति चेत् 'यच्च यत पुनः विशुद्धिकाले अद्भुतं कर्म्म प्रदीप्त वह्निप्रविष्टापि कुशलिनो देवी अग्निप्रभृतीनाञ्च साक्षात्कारः अभूत 'अतिदूरे लङ्कायां वृत्तं जातं' तत को हि प्रत्येतु न कोऽपि । तत् अस्त्येत्र कारणं जनवादस्य न हि दुर्जनाः प्रजाः ।

Notes.—1. अग्नि&c—परिशुद्धा means परिशुद्धा इति ज्ञाता found out to be pure—*not* cleansed of impurities. No impurity could ever attach to her, she was स्वप्रमित्परिपूता । As such

tLe slander may be ignored. 2. गर्भस्थित &c.—सन्तन्यते सातत्यं गम्यते वंशः अनेन इति सम्+तन वञ् करणे=सन्तानः progeny. The whole is a चतुष्पद बहुव्रीहि (see *Mitabh*—) Or पवित्रं रघुकुलम् कर्मधा—। तस्य सन्तानः। गर्भस्थितः पवित्ररघुकुलसन्तानो यस्याः, त्रिपदबहु—। तस्याः । 3. देव्याः—देव्याः सम्बन्धे । शेषे षष्ठी। 4. अध्यवसितम्—सो is सकर्मक meaning 'to destroy' &c. But अधि+अव+सो is अकर्मक meaning 'to make an effort' to mak up one's mind' &c. and सकर्मक when meaning 'to attempt' &c. Here it is अकर्मक। अधि+अव सो क्त भावे वर्त्तमाने अध्यवसितम्। The reading अनार्य्यमध्यवसितम् is objectionable. अनार्य्य is too strong a word to come to the king from a menial 5. अभिमतः—अभि+मन क्त कर्मणि वर्त्तमाने। Hence प्रजानाम् has अनुक्त कर्त्तरि षष्ठी by "क्तस्य च वर्त्तमाने"। 6. अग्नौ तं कर्म—सीता came out of fire unscathed. All the leading gods appeared in person to testify to the sanctity of सीता। 7. विशुद्धिकाल—Here again विशुद्धि is विशुद्धिप्रख्यापन 8. प्रत्येतु—प्रति+इ लोट् तु। विध्यर्थे लोट। 9 तत्—कर्म of प्रत्येतु। Very often प्रति इ is used as अकर्मक and the object of प्रत्यय is its अधिकरण। Thus "आत्मन्यप्रत्ययं चेतः"—*Sakuntala.* 9 *Remark*—Note that here again we have the word दुर्जन। we have met with it already in "साधुत्वे दुर्जनो जनः", दुर्जनः अशुभमुत् पादयति" etc

(*lvii*) रामः—हा कष्टम्। अतिबीभत्सकर्मा नृशंसोऽस्मि संवृत्तः।

शैशवात् प्रभृति पोषितां प्रियां

सौहृदादपृथगाश्रयामिमाम्।

छद्मना परिददामि मृत्यवे
सौनिको गृहशकुन्तिकामिव ॥४४॥

Rama—O woe ! I have become a murderer of extremely loathsome ways.

This dear one—brought up from childhood—never, through affection, having a different mind—I am consigning to death under a pretext as does the butcher a domestic bird (45) (R -),

मित—। हा इति। 'नृशंसः' घातुकः अस्मि नास्ति सन्देहः, परं तत्रापि 'अतिबीभत्सं' घृणिततमं 'कर्म' यस्य तादृशोऽहम्। कारणमाह शैशवादिति। अन्वयः—शैशवात् प्रभृति पोषितां सौहृदात् अपृथगाशयां प्रियाम् इमां सौनिकः गृहशकुन्तिकाम् इव छद्मना मृतवे परिददामि। व्याख्या—शैशवात् प्रभृति' बाल्यादारभ्य पोषितां' लालिताम् अतः स्नेहपात्रम् सौहृदात्' प्रेमवशात् न तु, भयादिना 'अपृथक' अभिन्नः आशय ' अभिप्रायो यस्याः तादृशीं प्रेम्णा मदनुवर्त्तिनीमित्यर्थः अतश्च वात्सल्यभाजनं 'प्रियां मम प्रीतिकरीम् इत्थ' बहुभिरेव निमित्तै सदा यत्नतः प्रतिपाल्याम् 'सौनिकः' मांसविक्रयी 'गृहशकुन्तिकां' प्रयत्नपोषितां पक्षिणम् 'इव छद्मना' छलेन तपोवनप्रदर्शनरूपेण 'मृतवे' यमाय 'परिददामि' प्रयच्छामि। किमतः परं बीभत्सं स्यात् ॥

Notes—1. अतिबीभत्सम etc—बीभत्सते अनेन इति बध वैरूप्ये भ्वादि सन्+घञ् करणे=बीभत्सम्। बीभत्सम् that which causes disgust, *i*, *e*, revolting, loathsome &c. वैरूप्य is the sense given by the वृत्ति। Bhattoji interprets वैरूप्य as चित्तविकार। Hence बीभत्सते means चित्तविकारं लभते। In this sense सन् after बध is compulsory and स्वार्थे not इच्छार्थे। The rule is "मान्बध-दान्शान्भ्यो दीर्घश्चाभ्यासस्य। दीर्घश्चाभ्यासस्य changes बिभत्स into बीभत्स। 2. नृशंसः—नृन शंसति हन्ति इति नृ+शंस अण कर्त्तरि नृशंसः a murderer. By abandoning सीता in this condition I am certainly going to become a murderer (नृशंस)। The murder

again is being committed in a peculiarly disgusting manner (बीभत्स)। The verse following explains the बीभत्सता। 3. शैशवात् &c.—Hence she ought to be an object of affection and I going to kill her. Is not this loathsome? प्रभृति योगे ङमी। 4. प्रियाम्—She is an object of delight to me yet I am going to kill her. This is revolting. 5. सौहृदात्—सुहृदयस्य भावः इति सुहृदय+अण=सुहृद्+अण् by the rule हृदयस्य हृद् लेखयदण्-लासेषु'=सौहृदम्। The rule "हृद्गसिन्ध्वन्ते पूर्वपदस्य च" does not apply and we do not get सौहार्दम् (See addendum in our edition of Sakuntalam). The rule "सुहृद् दुर्हृदौ मित्रामित्रयो" has no scope because सीता is not being looked upon her as a mere मित्र। 6. अपृथगाशयाम्—The thought is the same as in "अनुगुणं सर्वास्ववस्थासु यत् (sl 40). Such an one is being killed by me! How disgusting!! 7. इमाम्—Here he points at सीता sleeping in confidence on his bosom. Even such a one I am killing. I am really अतिबीभत्सकर्मा। 8. छद्मना—Again I am killing her under a pretext. She is not being plainly told of her fate. She goes out delighted at my kindness to her! O woe! 9. परिददामि—परि implies सर्वतोभाव। There is not the least doubt that she will die. 10. सौनिकः—सूना is वध्यस्थान or मांसविक्रयस्थान meat-stall. By लक्षणा (transference of epithets) it is here विक्रेयं मांसम्। सूना पण्यमस्य इति सूना+ठक्=सौनिकः। The derivation सूनायां नियुक्तः does not suit us, because the butcher is not posted employed (नियुक्त) by any one at his post.

(*lxviii*) (रा—) तत् किम् अस्पर्शनीयः पातकी देवीं दूषयामि । (सीतायाः शिरः स्वैरमुन्नमय्य बाहुमाकर्षन्)—

अपूर्वकर्मचण्डालमयि मुग्धे विमुञ्च माम् ।
श्रितासि चन्दनभ्रान्त्या दुर्विपाकं विषद्रुमम् ॥४६॥

(उत्थाय) हन्त विपर्यस्तः सम्प्रति जीवलोकः, पर्यवसितं जीवितप्रयोजनं रामस्य । शून्यमधुना जीर्णारण्यं जगत् । असारः संसारः । कष्टप्रायं शरीरम् । अशरणोऽस्मि किं करोमि का गतिः । (रा—)

(R)—Why then do I, an untouchable sinner, defile the queen ? (*Withdrawing his arm after having gently lifted Sita's head*)—

Loose hold of me, O simple girl—of me a Chandala by this unheard-of deed. You have taken hold of a poisontree of dire tendencies under the delusion that it is a sandal-tree (49).

(*Getting up*) Alas ; To Rama now is upset the land of the living, the end (aim of the life has vanished ; the earth is now a withered wilderness—a void , the world is bereft of its best, this body is now almost an infliction I am helpless. what shall I do ? What's the recourse ? (R—)

सित—। तदिति । 'तत्' तस्मात् बीभत्सकर्मनृशंसत्वात् 'अस्पर्शनीयः पातकी स्प्रष्टमप्ययोग्यः पापी अहं 'किं' कथंस्वगात्रसंसर्गेण चारित्रपूतां 'देवीं दूषयामि' अस्मा दूरे एव स्थास्यामि ॥ सीतायाः' शिरः स्वैरं जागरणभयात् शनैः शनैः 'उन्नमय्य उत्तोल्य 'बाहुम्' उपधानीकृतं स्वभुजम् 'आकर्षन्' अपनयन् आह ॥ अपूर्वेति । अन्वयः—अयि मुग्धे अपूर्वकर्मचाण्डालं मां विमुञ्च । चन्दनभ्रान्त्या दुर्विपाकं विषद्रुमं श्रितासि । व्याख्या—'अयि मुग्धे' सरले सीते 'अपूर्वम्' अन्येन अकृतम् अतिबीभत्सं 'कर्म' यस्य तथाविध चाण्डालं मां विमुञ्च' मद्गात्रसंस्पर्शं त्यज । कारणमाह—

'चन्दनभ्रान्त्या' छलस्पर्शश्चन्दनोऽयमिति भ्रमेण 'दुर्विपाकम्' असुखप्रवणं 'विषद्रुमं श्रितासि' दुःखमेवास्य स्पर्शः तत् विमुञ्च माम् ॥ अतः परं मन्ये स्खलितो ग्रन्थः। स्वबाहुमाकृष्य 'विमुञ्च माम्'' इत्युक्तम् विमोचनञ्च न भवति यावत् रामस्य कण्ठे प्रदत्तः सीताया बाहुर्नावतार्य्यते। अनुपदमुक्तम् ''उत्थाय'' इति च न सङ्गच्छते। तदित्थं भवतु—सीताया बाहुं स्वकण्ठादवतार्य्य उत्थाय—इति) ॥ हन्तेति। 'हन्त' अहो खेदः 'रामस्य' सम्बन्धे सम्प्रति' अधुना सीतायाः परित्यागात् 'जीवलोकः' प्राणिजगत 'विपर्य्यस्तः' विपर्ययासं जात आकुलः संवृत्तः 'जीवितस्य' प्राणधारणस्य 'प्रयोजनम्' अर्थः फलं 'पर्य्यवसितं विगतम्। सीताविरहितस्य जगदन्यथा जातं मे, तत् मरणमेव श्रेयः इति भावः। 'अधुना' सीताविरहे 'जगत्' इयं धरा मे 'जीर्णारण्यम' उच्छिन्न' काननम् अतएव शून्यं' जीवसम्पर्कविहीनं जातम्, संसारः असारः सारहीनः सद्वस्तुविरहितः प्रतिभाति, शरीरं कष्टप्रायं पीडाविशेषमिव मन्ये। 'अशरणोऽस्मि घरोसयास्य विपत्पातस्य प्रतीकारी मे नास्ति ॥

Notes.—1. अप्स्पर्शनीयः &c—स्पृश्+अनीयर कर्मणि स्पर्शनीयः। न स्पर्शनीयः अस्पर्शनीयः। पातयति इति पत+णिच+ण्वुल कर्त्तरि पातकम् that which causes downfall, sin तदस्य अस्तीति पातक+इनि पातकी sinner, I am an untouchable sinner. I should not defile the queen with my touch. 2. स्वैरम—ईरणम् इति ईर+घञ् भावे ईरः। स्वः ईरः स्वैरः, कर्मधा—। The वृद्धि is due to the Varttika "स्वात् ईरेरिणोः', तत् यथा तथा। Qualifies उपगमनक्रिया। 3. अपूर्व etc—अविद्यमानं पूर्वं पूर्ववर्त्ति यस्य तत् अपूर्वम् unprecedented, बहु—। तादृशं कर्म यस्य। चण्डाल एव इति चण्डाल अण् स्वार्थे चाण्डालः (प्रज्ञादि)। अपूर्वकर्मा चाण्डालः, कर्मधा—। तम्। 4. चन्दनभ्रान्त्या—चन्दनस्य भ्रान्तिः। तया। 5. दुर्विपाकम्—वि+पच घञ् भावे विपाकः development, दुष्टो विपाक; अस्य दुर्विपाकः that which developes in something very undesirable, बहु—। 6. विषद्रुमम्—विषस्य द्रुमः। तम्। 6. विपर्य्यस्तः—वि+परि+अस+क्त कर्मणि। Becomes

topsy turvy. 7. जीवलोकः—जीवानां लोकः। What was one thing in the land of the living has become to me (रामस्य) something different now 8. पर्य्यवसितम्—परि+अव+सो+क्त कर्त्तरि। 9. जीर्णारण्यम्—जीर्णम् अरण्यम्, कर्मधा— । The world is now to me a wilderness in which all vegetation has withered away. 10. असारः—सृ+घञ् कर्त्तरि सार that which lasts, the best. अविद्यमानः सारः अस्मिन्। 11. संसारः—संसरत्यस्मिन् इति सम्+सृ+घञ् अधिकरणे संसारः the world of birth The best in the world was सीता। She is doomed so the world is bereft of its best. 12 कष्टप्रायम्—कष्ट pain, प्राय is बाहुल्य। प्रायेण कष्टं=कष्ट प्रायम् mostly an infliction or a great infliction. सुप्सुपा। The reason why प्राय does not lead in the compound is that when entering a वाक्य the विभक्ति in प्राय always remains तृतीया (एकविभक्ति) while that in कष्ट changes. Thus प्रायेण कष्टं शरीरं मे, प्रायेण कष्टं शरीरं वहामि, प्रायेण कष्टेन शरीरेण किम् &c Hence प्राय does not get पूर्वनिपात् though an उपसर्जन owing to the prohibition—"एकविभक्ति च अपूर्वनिपाते"। Comp पुत्रप्रायाः in "प्रवक्तमसामेवंप्रायाः शुभेषुहि वृत्तयः"-*Sakuntala* Or say प्राय means तुल्य। कष्टेन प्रायं तुल्यम् कष्टप्रायम्, सुप्सुपा। "प्रायो मरणानशने मृतौ बाहुल्यतुल्ययोः" इति मेदिनी। 13. *Remark*—As pointed out in the मितभाषिणी the text here is defective. राम makes up his mind to avoid touch with Sita's body (किमस्पर्शनीयः पातकी &c.). Hence he withdraws his arm (बाहुमाकर्षन्) I But this does not cut off touch because Sita's arm is still on his neck (अयं कण्ठे बाहुः शिशिरमसृणो मौक्तिक सरः—sl 39). This has tobe removed. Sl. 46 is preliminary

to its removal. विमुञ्च माम् &c.—let me go—cannot refer to the withdrawal of Rama's arm, for by withdrawing *his* arm it is *Rama* that lets go Sita. She can be said to have let राम go when her own hold of राम is released. Besides, so long as Sita's arm is on his neck, उत्थाय following becomes incongruous. Hence it seems a part of the text is missing here (see मितभाषिणी) ।

(*lxix*) (रा—) अथवा—

दुःखसंवेदनायैव रामे चैतन्यमाहितम् ।
मर्मोपघातिभिः प्राणैर्वज्रकीलायितं स्थिरैः ॥ ४६ ॥

हा अम्ब अरुन्धति, हा भगवन्तौ वसिष्ठविश्वामित्रौ, हा भगवन् पावक, हा देवि भूतधात्रि, हा तात जनक, हा तात, हा मातरः हा परमोपकारिन् लङ्काधिपते विभीषण, हा प्रियसख सुग्रीव, हा सौम्य हनूमन, हा सखि त्रिजटे, मुषिताः स्थ परिभूताः स्थ रामहतकेन । (रा—)

(R—) Or,

In Rama, for the full perception of pain indeed, was conciousness instilled, and by life—steady life striking at the vitals—has been played the part of a peg of adamant. (47)

Alas, mother Arundhati ! Alas worshipful Vasishtha and Visvamitra ! 'Alas mighty sanctifier (fire) ! Alas, Goddess the sustainer of beings (Earth). Alas father Janaka ! Alas, father : Alas mother ! Alas my great benefactor Vibhishana, the king of Lanka ! Alas, dear friend Sugriva ! Alas, friend Trijata ! You are all robbed and insulted by wretched Rama. (R—).

मित—। दुःखेति। अन्वयः—दुःखसंवेदनाय एव रामे चैतन्यम् आहितं मर्मोपघातिभिः प्राणैः स्थिरैः (सद्भिः) वज्रकीलायितम्। व्याख्या—'दुःखस्य संवेदनाय सम्यक् ज्ञानाय, एव रामे चैतन्यम् आहितम्' अर्पितम्। न हि अचेतनस्य ज्ञानं सम्भवति इति धात्रा प्रथमं रामे चैतन्याधानं कृतम्, प्राणप्रतिष्ठा विहिता। चेतनोऽपि यदि मुहूर्त्तमात्रं जीवति, तस्य ज्ञानं स्याद्वा, परं सम्यक् ज्ञानं न स्यात्। इति धातुरेव इच्छया 'मर्माणि' जीवस्थाने ये उपघ्नन्ति' प्रहरन्ति तादृशैः 'प्राणैः' असुभिः 'स्थिरैः' अचलैः सद्भिः 'वज्रकीलः 'वज्रप्रस्तरनिर्मितः दृढः यः शुङ्कुः तेन इव आचरितम्। चेतनोऽहं' प्राणाश्च मां न मुञ्चति तत् अनन्तं दुःखमनुभवामि। एष एव धातुरभिप्रायः तत् 'किं करोमि का गतिः' ॥ हा इति। 'अरुन्धती' स्नेहवती सीतायाम्। 'वशिष्ठविश्वामित्रौ' गुरू। पावकः' शीलसाक्षी सीतायाः 'भूतधात्री सीताया माता शीलसाक्षिणो च। 'परमोपकारी' सीतासमुद्धरणे सहाय इति। विस्मृतः स उपकारः कृतघ्नेन मया। 'त्रिजटा' स्नेहवती सीतायामशोकवनिकायां। 'मुषिताः' भवतां सीताऽपरलोत्तमनाशनात्। 'परिभूताः' युष्मभ्यम् अनिवेद्य एव सीताविनाशनात्। हतकेन' दुष्कर्म कुर्वता 'रामेण' ॥ (शाकुन्तलोक्त' "मुष्टम्" इति "आदितश्च" इत्यत्र चकारस्य अनुक्तसमुच्चयार्थात् कथञ्चित् समाधेयम्)।

Notes—*1.* दुःख &c.—सम्+विद्+लुट् भावे संवेदनम् full perception. The सम् is intensive. दुःखस्य संवेदनम् तस्मै। तादर्थ्ये ४र्थी। 2. रामे—Goes with both आहितम and वज्रकीलायितम्। 3. आहितम्—आ+धा+क्त कर्मणि। The nom. is धात्रा understood The object was to make me feel the misery, चैतन्यमाहितम्= प्राणाः प्रतिष्ठापिताः। The प्राण प्रतिष्ठा gives sensation; I feel the pain. To complete the feeling the प्राण is rendered enduring. 4. मर्मोप &c.—मर्म्माणि उपघ्नन्ति इति मर्म्मन्+उप+हन +णिनि कर्त्तरि ताच्छील्ये। तः। Hence they bring me pain. 5. वज्र &c.—वज्र adamant, a kind of very hard stone. कील plug. वज्रस्य कीलः। तेन इव आचरितम् इति वज्रकील+क्यङ्+क्त भावे=

वज्रकीलाय (नामधातु)+क्त=वज्रकीलायितम् acted like a plug of adamant. 6. मुषिताः—Sita was dear to all of these. Here loss would be a personal loss to each them. 7. परिभूताः—परि +भू means to insult.' The loss is being caused without reference to them, hence the insult. 8. रामहतकेन—हत इव इति हत+कन् इवार्थे हतकः। रामश्चासौ हतकश्च कर्मधा—। तेन। One whe robs (मुषिताः) and insults (परिभूताः) is indeed a wretch. The समास is by "कुत्सितानि कुत्सनैः" though strictly speaking this rule does not apply. The rule wants that हतकत्व should attach a slur on रामत्व which it does not. [N. B.—The slur may be established with a little twisting. Thus—राम is one who pleases (रमते or रम्यते अनेन) । For sucha one it is a slur to behave like a wretch. But witness विष्णुगुप्तहतक, चाणक्यवटु, &c where it is not easy to detect slur. It seems the rule is rather loosely applied by poets.]

(*lxx*) (रा—) अथवा कस्य तेषामहमिदानीमाह्वाने ?

ते हि मन्ये महात्मानः कृतघ्नेन दुरात्मना ।
मया गृहीतनामानः स्पृश्यन्त इव पाप्मना ॥४८॥

सोऽहम्—

विस्रम्भादुरसि निपत्य लब्धनिद्रा-
मुन्मुच्य प्रियगृहिणीं गृहस्य शोभाम् ।
आतङ्कस्फुरितकठोरगर्भगुर्वीं
क्रव्याद्भ्यो बलिमिव निर्घृणः क्षिपामि ॥४९॥

(R—) Or who indeed am I now in the matter of their invocation ?

Methinks those noble souls are being touched by Sin itself with their names uttered by me—me, ungrateful and vilehearted (48), who heartless, and throws as an offering unto the carnivora his beloved wife, the jewel of his house, that in confidence had gone to sleep by casting herself down on his bosom, wife heavy with the full foetus that is quivering through fright. (49) (R—)

मित—। अथवेति। 'अथवा' पक्षान्तरे। 'इदानीम्' अधुना अतिवीभत्सकर्मा नृशंसः 'अह तेषाम्' अरुन्धतीप्रभृतीनाम 'आह्वाने' 'संवोधनकर्मणि 'कश्च' कः खलु न कोऽपि, अनधिकारी खल्वहं' तेषामाह्वाने॥ कारणमाह ते इति। अन्वय—महात्मानः ते कृतघ्नेन दुरात्मना मया गृहीतनामानः (सन्तः) पाप्मना स्पृश्यन्ते इव (इति) मन्ये। व्याख्या— 'महात्मानः उदाराशयाः 'ते' अरुन्धतीप्रभृतयः 'कृतघ्नेन' उपकारकापकारिणा 'दुरात्मना' नीचाशयेन 'मया' अपूर्वकर्म्मचाण्डालेन रामेण' गृहीतं नाम' येषां तथाविधाः सन्तः पापमना' मूर्त्तिमता पापेन स्पश्यन्त इव 'हि' एतदेव अहं 'मन्ये' मम मतम्। अतस्तेषां नामग्रहणपरिहारो मया कर्त्तव्यः॥ कृतघ्नता दूरात्मता च दर्शिता अपि भूयः प्रदर्श्यते विश्रम्भादिति। अन्वयः— (यः अहम्) गृहस्य शोभां विश्रम्भात् उरसि निपत्य लब्धनिद्रां प्रियगृहिणीम् उन्मुच्य निर्घृणः (सन्) आतङ्कस्फुरितकठोरगर्भगुर्वी (ताम) वलिमिव क्रव्याद्भ्यः क्षिपामि। किम्भूतेन मया गृहीतनामानः ? (यः अहम्) गृहस्य शोभां भूषणस्वरूपां गृहं भूषयित्या हितकारिणीं मे अपि च 'विश्वम्भात्' मयि प्रत्ययात् निःशङ्कम् उरसि निपत्य वक्षसि निर्भरं संविश्य 'लब्धनिद्रां' सुप्तां 'प्रियगृहिणीं' प्रियपत्नीम् 'उन्मुच्य' परित्यक्तुमनाः वक्षसः उत्तोल्य अकृतज्ञतायाः परां काष्ठां प्रदर्श्य इति भावः। अथ पुनः "निर्घृणः" सन् करुणापरिहीणो भूत्वा 'आतङ्केन त्रासेन चित्रदर्शनजनितेन स्फुरितः' कम्पमानः 'कठोरः परिपूर्णो यो 'गर्भः' तेन गुर्वी मन्थरगमनाम् अतएव पलायितुम योग्याम तां 'वलिमिव भक्षणार्थम् आमिषपिण्डमिव 'क्रव्याद्भ्यः' सिंहव्याघ्रादिहिंस्रेभ्यः "क्षिपामि' दूरादेव न्यस्य ददामि। किमतः परं दूरात्मता स्यात्। एवं कृतघ्नेन दुरात्मना च मया गृहीतनामानस्ते स्पृश्यन्त इव पाप्मना॥

Notes—1. मन्ये—This is his candid opinion, not a surmise.? महात्मानः—contrast with दुरात्मना। Such being the contrast, I am an untouchable with regard to them. 3. कृतघ्नेन—कृ+क्त कर्मणि कृतम् the service done उपकारः। कृतम् हन्तीति कृत+हन+टक् कर्तरि कृतघ्नः। This is owing to च in 'अमनुष्यकर्तृके च''। चकारात् कचिन्मनुष्यकर्तृकेऽपि''। In the case of राम however his मनुष्यत्व may be ignored. Or say after माधव (i) the affix टक् is बाहुलकात् in a wider sense than usual ; or (ii) take the word as of the मूलविभुजादि class and attach क। The difference between the two is seen in the feminine कृतघ्नी with टक् and कृतघ्ना with क। 4. मया &c.—My tongue utters their names. This seems to me like sin personified touching their person (and defiling them). 5. विस्रम्भात्—वि+स्रम्भ+घञ् भावे विस्रम्भ, confidence तस्मात्। हेतौ ५मी। Hence my विश्वासघातकता। 6. उन्मुच्य Having lifted up just as a lump of meat is picked up and thrown at lions, tigers, &c. in a Zoo. 7. प्रिय &c.—Comp. पोषितां प्रियाम, sl. 46. 8. गृहस्य शोभाम्—Comp इयं गेहे लक्ष्मीः, sl 39. 9. क्रव्याद्भ्यः—क्रव्य raw meat. क्रव्यम अदन्ति इति क्रव्य+अद् विट् कर्तरि क्रव्याद् (प्रातिपदिक)। तेभ्यः। ४र्थी सम्प्रदाने।

(*lxxi*) (रा—) (सीतायाः पादौ शिरसि कृत्वा) देवि, देवि, अयं पश्चिमस्ते रामस्य शिरसा पादपङ्कजस्पर्शः। (इति रोदिति)।

(नेपथ्ये)—अब्रह्मण्यम् अब्रह्मण्यम्।

रामः—ज्ञायतां भोः किमेतत्।

पुनर्नेपथ्ये—

ऋषीणामुग्रतपसां यमुनातीरवासिनाम् ।
लवणत्रासितः स्तोमः शरण्यं त्वामुपस्थितः ॥५०॥

(R—) (*Placing sita's feet on his head*) Queen, my Queen, this is the last touch of thy lotus-feet with Rama's head (*Weeps*).

(In the Tiring Room)—Murder! Murder!

Rama—Ho! Let it be known what this is—

(Again in The Tiring Room)—

The body of ascetics of grim austerities dwelling on the banks of the Yamuna, terrorised by Lavana, has come to you the protector-(50).

मित—। देवीति। 'पश्चिमः' पश्चाद्भव अन्तिम इत्यर्थः। शिरसा पादपङ्कज स्पर्शः प्रसादनार्थम्। एतत्ते चरमम् प्रसादनम्। दुर्लभमतः परमावयोः परस्पर दर्शनमितिभावः॥ अब्रह्मण्यमिति। ब्रह्मणि वेदे साधु ब्रह्मण्यम। न ब्रह्मण्यम। वेदविरुद्धम् हिंसा इत्यर्थः। आवेगे द्विरुक्तिः। घाती ब्रह्महत्या वा वर्त्तते त्रायतां भोः इत्याशय:॥ ऋषीणामिति। अन्वयः—यमुनातीरवासिनाम् उग्रतपसाम् 'ऋषीणां स्तोमः लवणत्रासितः (सन्) शरण्यं त्वाम् उपस्थितः। व्याख्या—'यमुनातीरवासिनां कालिन्दीतट-सद्मनाम् 'उग्रतपसां' कठोरव्रतानाम् 'ऋषीणां स्तोमः समूहः 'लवणेन' रावण-भगिन्याः कुम्भीनस्याः पुत्रेण 'त्रासितः' सन् 'शरण्यं' रक्षणसमर्थं त्वाम् उपस्थितः त्राणार्थं त्वत्सकाशमागतः॥

Notes—1. पश्चिमः—पश्चात् भव इति पश्चात्+डिमच्। Final. 2. शिरसा &c.—This is to propiatie for the injury done. 3. नेपथ्ये—नेपथ्य is the dressing room of the actors. 4. अब्रह्मण्यम्—ब्रह्मन् वेद। ब्रह्मणि वेदे साधु इति ब्रह्मन्+यत ब्रह्मण्यम् that which is sanctioned by the Vedas. न ब्रह्मण्यम अब्रह्मण्यम that which

is not sanctioned by the Vedas 'i. e.' प्राणिहिंसा। The Vedas teach "मा हिंस्यात् सर्वभूतानि"। सम्भ्रमे द्विरुक्तिः। The exclamation implies that some one is craving protection against हिंसा by some one else. प्राणिहत्या भवति त्रायतां भोः is the sense, 5. शरणागतम्—Hence deserving protection. 6. श्रवण etc— श्रु+णिच्+क्त कर्मणि। 1. शरणाम्—शरणे रक्षणे साधु इति शरण+यत् शरण्यः a good protector. "शरणं गृहरक्षित्रोर्वधरक्षणयोरपि" इति मेदिनी। 8 उपस्थितः—उप+स्था+क्त कर्त्तरि has approached. उप+स्था is सकर्मक when meaning सङ्गतिकरण and is then आत्मनेपदी। Comp अथैनं समुपस्थिता, महामात्यान् उपतिष्ठते" etc.

(*lxxii*) रामः—आः कथम्! अद्यापि राक्षसत्रासः। तद् यावद् अस्य दुरात्मनः कुम्भीनसीपुत्रस्य उन्मूलनाय शत्रुघ्नं प्रेषयामि। (कतिचित् पदानि गत्वा पुनर्निवृत्य) हा देवि, कथमेवङ्गता भविष्यसि। भगवति वसुन्धरे, श्लाघ्यां दुहितरमवेक्षस्व जानकीम्—

जनकानां रघूणाञ्च यत् कृत्स्नं गोत्रमङ्गलम्।
यां देवयजने पुण्ये पुण्यशीलामजीजनः ॥५१॥

(इति निष्क्रान्तः)

Rama—Ha! How so! fear of Rakshasas even now? Well then I will send Satrughna for the uprooting of this vile-hearted son of Kumbhinasi. (*Having gone a few steps and come back*) Alas! my Queen! Thus circumstanced how will you live? O mighty repository of riches (Earth) look after your worthy daughter Janaki—

Who is the sum total of the blessing of the race of Janka and Raghu and whom, of holy habits, you brought forth in the holy sacrifical ground of the gods. (51).

(*Exit*).

मित—। आः इति। 'अद्य अधुना। हते रावणे प्रशमिता राक्षसा इतेश्च' जानामि तत् कथं तेभ्यस्त्रासः। विपन्नानां ब्राह्मणानां परित्राणे यतिष्यमाणः विपदं गतायाः आत्मपत्न्याः स्मरन् करुणाभिभूत आह 'एवम्' ईदृशीमवस्थां 'गता' प्राप्ता आतङ्कस्फुरितकठोरगर्भगुर्वी क्रव्याद्भिः क्षिप्ता अशरणा 'कथं भविष्यसि केनोपायेन आत्मानं रक्षित्वा जीविष्यसि। असमर्थोऽहं भवत्या रक्षणे तत् त्वदर्थं मातरं वसुन्धरामाक्रन्दामि इत्याह भगवतीति। 'अवेक्षस्व' तस्यां शिवानुध्यानपरा भव। सर्वथा प्रयत्नार्हा सा इत्याह जनकानामिति। अन्वय—यत् जनकानां रघूणाञ्च कृतस्नं गोत्रमङ्गलम्। पुण्यशीलां यां पुण्ये देवयजने अजीजनः। व्याख्या—'यत्' सीतारूपं वस्तु 'जनकानां' जनकवंशीयानां 'रघूणाञ्च' रघुवंशीयानामपि 'कृतस्नं' समग्रं 'गोत्रमङ्गलं' कुलकल्याणम् उभयोरपि वंशयोर्यत् कल्याणकरं तत् समुदाय रूपेण या सीता स्थिता अतएव यत्नेन रक्षणीयाऽऽते। कारणान्तरञ्च त्वत्सम्बन्धे प्रकृष्टतरमस्ति इत्याह—'पुण्यशीलां' पूतचरितां 'यां पुण्ये देवयजने' देवानां यज्ञभूमौ 'अजीजनः' जनितवत्यसि। कन्या किल मातुः रक्षणीया एव। सा च कन्या शीलेन श्लाघ्या इत्यात्मनापि रक्षामर्हति ततः "श्लाघ्यां दुहितरमवेक्षस्व जानकीम्" इति भावः।

Notes.—1. कुम्भनसी &c.—कुम्भी a small pitcher कुम्भी इव नासिका अस्या इति कुम्भीनस्+अच्+ङीष=कुम्भीनसी a woman with nose like a small pitcher. नासिका becomes नस् and अच् comes in by 'अच् नासिकाया नसञ्चास्थूलात'। ङीष is optional by "नासि-कोदर—"। Hence कुम्भीनसा is also correct. 2. इतिचित् etc.—The poet removes राम because his emotion at the so-called Sitas departure for तपोवन would betray him. 3. भग वति &c.—This appeal to वसुन्धरा is important as will be seen

in Act. VII. 4. **जनकानां रघूणाम्—जनक** and **रघु** here stand for the *progeny* of **जनक** and **रघू** by transference of epithets. 5. **गोत्र मङ्गलम्**—Whatever is beneficial to the races is embodied in Sita. If she perishes both the races perish with her. Hence for these weighty reasons guard her carefully in my absence 6, **पुण्यशीलाम्**—People's slander makes no impression on his high opinion of her character. She is abandoned solely to please the people as commanded by the **गुरु**। 7. **अजीजनः**—You gave birth to her, she is your own child ; hence, besides the consideration for the two leading races of king, you have a personal interest in her welfare. जन+णिच्+लुङ्+म्।

(*lxxiii*) सीता—हा सोम्म अज्जउत्त कहिंसि [हा सौम्य आर्य्यपुत्र कुत्रासि]। (सहसोत्थाय) हद्धी हद्धी दुस्मिविग्रएण विप्पलद्धा अहं अज्जउत्तं आक्कन्दामि [हा धिक् हा धिक् दुःस्वप्नेन विप्रलब्धाहमार्य्यपुत्रमाक्रन्दामि]। (विलोक्य) हद्धी हद्धी एआइणीं मं पसुत्तं उज्झिअ गदो अज्जउत्तो। किं दाणीं एदं। भोदु से कुविस्सं जइ तं पेक्खन्तो अत्तणो पहविस्सं ! को एत्थ परिअणो [हा धिक, हा धिक एकाकिनीं मां प्रसुप्ताम् उज्झित्वा गत आर्य्यपुत्रः। किमिदानीमेतत्। भवतु तस्मै कोपिष्यामि यदि तं प्रेक्षमाणा आत्मनः प्रभविष्यामि। कोऽत्र परिजनः] ?

Sita—Alas ! Gentle husband whither artthou ? (*Suddenly getting up*) O fie, O fie, deceived by a bad dream I am

shouting for my husband. (*Looking round*) O fie ! O fie ! my husband has left leaving me alone and asleep. what is this ? well, I will be angry with him if seeing him I can control myself ! who attends (Lit. is the waiter) here ?

मित — । 'दुःस्वप्नेन' अप्रियेण आर्य्यपुत्रविरह प्रदर्शयता स्वप्नेन 'विप्रलब्धा' प्रतारिता । 'आक्रन्दामि' आह्वयामि । प्राप्त एव विरहः सप्ने दृष्टः न ह्यय' विप्रलम्भः । 'एकाकिनीम्' उज्झित्वा गतः' इतेएकं कोपकारणम् 'प्रसुप्तामुज्झित्वा गतः' इति द्वितीयम । 'आत्मनः प्रभविष्यामि' यदि आत्मा मे वशः स्यात । प्रणयस्य गाढ़तया असम्भवः कोपः, तत् सत्यपि कोपकारणें, कृते च सङ्कल्पे, 'तं प्रेक्षमाणा' कोपं विस्मरिष्यामि इत्याशयः ॥

Notes.—1. हा धिक् &c.—धिक् implies निन्दा । She censures herself for the mistake. In the sentence following we have again हा धिक् &c. , there she censures राम for nis apparent want of consideration for her. 2. तस्मै—सम्प्रदाने चतुर्थी । सम्प्रदान in connection with कोपिष्यामि by the rule "क्रुधद्रुह—" । But this is against the spirit of the Bhashya. There a distinction is made between क्रोध and कोप । कोप is the first stage ; its *further developement* is क्रोध । "न हि अकुपितः क्रुध्यति"—*Bhashya* That being so कुप् does not make a सम्प्रदान । Hence it is that the rule itself says "यं प्रति कोप," not "यस्मै कोपः" which would have saved a syllable. We therefore propose to read तस्य for तस्मै । The प्राकृत word से may be rendered तस्य also. The षष्ठी would be शेषे—तस्य सम्बन्धे कोपिष्यामि ।

(*lxxiv*) (प्रविश्य) दुर्मुखः—देई कुमारलक्खणो विण्णवेदि सज्जो रहो आरुहदु देइत्ति [देवि, कुमारलक्ष्मणो विज्ञापयति सज्जो रथः आरोहतु देवि इति] ।

सीता—इयं आरुहामि [इयमारोहामि]। (उत्थाय) परिस्फुरइ विअ मे गब्भभरो ता सिढिलं गच्छामु [परिस्फुरतीव गर्भभारः तत् शिथिलं गच्छामः]।

दुर्मुखः—इदो इदो देई (इत इतो देवी)।

सीता नमो तवोधणाणं, नमो रहुउलदेवदाणं, नमो अज्जउत्त चरणकमलाणं, नमो सअलगुरुअणाणं, [नमस्तपोधनेभ्यः, नमो—रघुकुलदेवताभ्यः, नम आर्यपुत्रचरणकमलेभ्यः, नमः सकलगुरुजनेभ्यः]। (इति निष्क्रान्ता)।

इति चित्रदर्शनो नाम प्रथमोऽङ्कः।

(Entering) Durmukha—Queen, Prince Lakshmana begs to say that the car is ready, let Queen get in.

Sita—Here, I am getting in. (*Rising*) The burden of my womb seems to throb, so I will go slowly.

Dur.—This way Queen, this way.

Sita—Salutation to those that are rich in penance, salutation to the deities of the race of Raghu, salutation to the lotusfeet of my husband, salutation to all my seniors (*exit*).

Here ends the First Act named "Inspection of the Painting".

मित—। 'शिथिलं' मन्दं गच्छामः' ॥ तपोवनं गच्छतीति प्रथममेव तपोधनान् प्रणमति। ततः कुलदेवताः प्रणमति। ततो भर्त्तारम्। इह स्थानान्तरं गन्तमुद्यता भर्त्तारमपश्यन्ती अपि तद्दर्शनाय न यतते इत्यसमञ्जसम् ॥

Notes.—1. **परिस्फुरति** &c.—This is some new exprience. Had it been the usual quickening felt from the fourth month onwards it would not have been the subject of her remark. She marks it because it is unusual. It was the day of delivery. 2. **आर्यपुत्र** &c.—When she says this she does not notice that **राम** should have accompanied her but keeps himself absent. See Intro.

3 — **प्रथमः अङ्कः समाप्त इत्यर्थः**—**अङ्क** is an Act. The **अङ्क** continues until all the actors leave the stage (See P. 44 line 20-21 ante also). Here all have left and the Act as ended—"**अन्तनिष्क्रान्तनिखिलपात्रोङ्कः परिकिर्तितः**" । See also our Sak. beginning of Act I. Every period ending with all the actors leaving the stage is an **अङ्क**"

N. B.—P. 49 line 9 for "**अनुवाचनानि**" read "**अनुशासनानि**" । P. 49 line 10 for **धर्मवत्**" read **ममर्मवित्**" । P. 92 line 8 for "**दशनमुकुल मुग्धालोकं**" read "**दशनमुकुलैर्मुग्धालोकम्**" । P. I23, line 16, for "**इतत्**"' read '**रतत्**" । P. 134 line 5 "at every touch" read "verily at every touch".

St. 35 **मुह + क्त = मुग्ध** pleasant, also **मढ़** dazed. St. 36 —**सरोरुहे इव अक्षिणीयस्याः । ततः बहुव्रीहौ समासान्तः षच् + ङी । सम्बोधन ।**

उत्तरचरितम्

द्वितीयोऽङ्कः ।

(*l*) (नेपथ्ये)—स्वागतं तपोधनायाः ।

(प्रविश्य अध्वगवेषा)—तापसी—अये वनदेवतेयं फलकुसुमपल्लवार्घ्येण मामुपतिष्ठते ।

(प्रविश्य) वनदेवता (अर्घ्यं विकीर्य)—

यथेच्छं भोग्यं वो वनमिदमयं मे सुदिवसः
सतां सद्भिः सङ्गः कथमपि हि पुण्येन भवति ।
तरुच्छाया तोयं तदपि यपसो योग्यमशनं
फलं वा तदपि न पराधीनमिह वः ॥ १ ॥

(Ie the Tiring room)—welcome to thee rich in asceticism.

(*Enterıng ın the grab of a traveller*) Female Ascetic—Ha, Here is a sylvan deity meeting me with an offering of fruits, flawers and fresh leaves.

(*Enterıng*) Sylvan Deity (*Exhibıting she offerings*)—

This forest is for you to enjoy any way you wish ; a happy day is this for me. Through merit and with great difficulty indeed does a meeting of the good come off with the good. The shade of a tree, water and what food suit your vow, be if fruit or root, all this is not for you at another's disposal here. 1.

मित—। 'तपोधनायाः स्वागतं सुआगमनं भवतु ॥ अध्वानं गच्छतीति 'अध्वगः' पथिकः। तस्य 'वेष' इव वेषो यस्याः।—फलैः कुसुमैः पल्लवैश्च

कल्पितः य 'अर्घ्यः' पूजोपहारः तेन सह 'माम उपतिष्ठते' मया सङ्गता भवति ॥ 'विकीर्य्य' तापसाः पुरो निधाय ॥ यथेच्छमिति । अन्वयः— इदं वनं यथेच्छं भोग्यं वः । अयं मे सुदिवसः । पुण्येन हि कथमपि सतां सद्भिः सङ्गः भवति । इह वः तरुच्छाया, तोयं, यदपि तपसी योग्यमशनं फलं वां मूलं वा तदपि, न पराधीनम् । व्याख्या—सुगमा । पुण्येन हि' पुण्येनैव 'भवति' । तच्च 'कथमपि' अतिकृच्छ्रेण कदाचिदेव भवति इत्यर्थः ॥

Notes.—1. स्वागतम्—आ + गम + क्त भावे आगतम् arrival सुष्ठु आगतं स्वागतम् auspicious arrival. This is the usual word of welcome to a guest. 2. तपोधनायाः—शेषे षष्ठी । चतुर्थी is also seen thus—"कल्पितार्घ्याय तस्मै···स्वागतं व्याजहार", तस्मै ते परमेशाय स्वागतं स्वागतं मे' &c 3. अध्वगवेषा—अध्वन् + गम + ड कर्त्तरि अध्वग traveller. तस्य वेषः । स इव वेषो यस्याः । "सप्तम्युपमान—" इति बहुव्रीहिः । 4. फल &c.– अर्घ्य honour, honouring, अर्थाय इदम् इति अर्घ+यत् अर्घ्यम offering of honour, फलकुसुमपल्लवानि, द्वन्द्व । तत्कल्पितम् अर्घ्यम्, कर्मधा—of the शाकपार्थिवादि class, तेन । सहार्थे तृया । 5. 'उपतिष्ठते—meets. "उपाद्देवपूजा" इति सङ्गतिकरणे आत्मनेपदम् । We do not say उपतिष्ठते = देवताबुद्ध्या पूजयति because the वनदेवता has not yet entered. The अर्घ्य is offered after her entrance (see below), 'She meets me' may be said as soon as a start is made to meet 'But she honours me' seems a bit premature before honour is actually offered. 6. यथेच्छम् &c.—The whole forest is at your disposal. 7. सुदिवसः An auspicious day, the reason follows. 8. सताम &c.—सताम of meritorious people like myself, सद्भिः with people of your stam. It is not good taste to describe one's self as one of the सत् । पुण्येन = हेतौ तृया । Merit is the cause that produces the meeting as its effect. Again, that merit must

be of an extraordinary type, hence such meetings do really happen (कथमपि भवति)। 9. तरुच्छाया—तरोः छाया। तरूणाम् would give तरुच्छायम् by "छाया बाहुल्ये"। 10. पराधीनम्—परस्मिन् अधि इति पर+अधि +ख। सप्तमीतत् with ख attached compulsorily by "अषड्क्ष—आशितङ्गु—अलङ्कर्म—अलं पुरुष-अध्युत्तर-पदात् खः"। The ७मीतत्—is by "सप्तमी शौण्डैः" अधि being of the शौण्डादि class.

(*ll*) तापसो—किमत्रोच्यते।

प्रियप्राया वृत्तिर्विनयमधुरो वाचि नियमः
प्रकृत्या कल्याणी मतिरनवगीतः परिचयः।
पुरो वा पश्चाद्वा तदिदमविपर्यासितरसं
रहस्यं साधूनामनुपधि विशुद्धं विजयते ॥ २ ॥

(इत्युपविशतः)।

Ascetic—What do I say to this ?

Deeds highly agreeable, restraint in speech pleasing from modesty, heart naturally benevolent, acquaintance never denounced—this well-known guileless and stainless secret of the good of which the flavour is unchanged at the beginning and at the end (or—before and behind). rules triumphant. (2).

(*They sit down*).

मित—। 'अत्र' अस्मिन् विषये इमां भवतः उदारतां प्रति इत्यर्थः मया 'किमुच्यते' किम् अन्यत् उच्यताम्? एकमेवात्र वक्तव्यं "साधूनां रहस्यं विजयते" इति ॥ तदेवाह प्रियप्रायेति। अन्वयः—वृत्तिः प्रियप्राया। वाचि विनयमधुरो नियमः। मतिः प्रकृत्या कल्याणी (अतएव) परिचयः अनवगीतः। इदं तत् पुरो वा पश्चाद्वा अविपर्यासितरसं साधुनाम् अनुपधि

विशुद्धं रहस्यं विजयते । व्याख्या—'वृत्तिः' व्यापारः कर्म इत्यर्थः 'प्रियप्राया' प्रायेण बाहुल्येन प्रिया अतिप्रिया इत्यर्थः । साधूनां कर्मभिः जना न केवलं मोदिन्ते परन्तु सुप्रीता भवन्ति इति भावः । आस्तां कर्म रमणीयम्, वाक् पुनरुद्वेगकरी स्यात् इत्याह 'वाचि' साधूनां 'विनयेन' नम्रतया हेतुना 'मधुरः' प्रीतिपदः 'कोऽपि' 'नियमः' संयमी वर्त्तते। साधवो हि पारुष्यं परिहृत्य रमणीयाञ्च कोमलतामाधाय वाचं प्रयुञ्जते, तत् वाचापि तेषां सुप्रीता एव भवन्ति जनाः । भवतु सुशिक्षिततया तेषां कर्मणि वाचि च नियमः स्यात् परं मनः क्रूरं वा भवेत् इत्याह—'मतिः' साधूनां मनः 'प्रकृत्या' स्वभावेनैव न हि शिक्षावशात् 'कल्याणी' शिवा परेषां मङ्गलचिन्तनपरा इत्यर्थः अतएव 'परिचयः' सद्यः परिचितोऽपि जनः 'अनवगीतः' अनिन्दितः येन साधवः परिचिता भवन्ति तस्य निन्दां ते कदापि न कुर्वन्ति इत्यर्थः । मनोवाक्कर्म्मसु मधुराः साधवः इति भावः । 'इदम्' उक्तप्रकारकं 'तत्' प्रसिद्ध 'पुरो वा पश्चाद्वा' प्रथमपरिचये परिचयपरिणतौ च । यद्वा समक्षे च परोक्षे च 'अविपर्य्यासितं' व्यत्ययमभजमानम् अतएव 'अनुपधि' अकपटं 'विशुद्धं' विमलं 'साधूनां रहस्यं चरितं 'विजयते' सर्वान् विजित्य वर्त्तते । साधूनां चरितविजितं हि त्रिभुवनम् इति भाव ।

Notes—1. **किम्** &c.—There is an intonation here (**काकु**) । Do you want to know what I have got to say in this matter ? Her reply follows in the verse. 2. **प्रियप्राया**—Very pleasing. For grammar &c. See. **कष्टप्रायम्**, I. lxviii. 3. **वाचि** etc.—**नि+यम+अप् करणे=नियमः** restraint. This is usually taken to mean that the *Sadhus* are men of few words. The restraint seems better taken with respect to the *quality* of the words used than *quantity*. The speech of the *Sadhu* is weeded of all undesirable words. 3. **अनवगीतः—अव** means **अनुच्च** low, **अवगीत** that which is spoken low. But **निन्दा** is spoken low (whispered). Hence **अवगीत** is **निन्दित । न अवगीतः** not condemned. 4. **परिचयः**

—परि + चि + अच् कर्मणि = परिचय, an acquaintance. The *Sadhus* never condemn acquaintance. The reason is their मति is प्रकृत्या कल्याणी, they cannot think ill of others. 5. पुरः &c.—पूर्वस्मिन् काले इति पूर्व + ङि (७मी) + असि स्वार्थे = पुरः at the beginning. वा implies, समुच्चय *i. e*, it means च। Comp. "सा वा शम्भोस्तदीया वा मूर्त्तिर्जलमयी मम" — *Kumar*. अपरस्मिन् काले इति अपर + ङि (७मी) + अस्ताति स्वार्थे = पश्चात् at the end. Both पुरस् and पश्चात् are अव्यय। Here the two together mean 'at the beginning and at the end 'before and behind in presence and in absence' &c. 6. अविपर्य्यासितरसम् —वि + परि + अस + घञ् भावे = विपर्य्यास reversal. विपर्य्यासं गमित इति विपर्य्यास + णिच (नामधातु) + क्त कर्मणि = विपर्य्यासितः changed. न विपर्य्यासितः। ताद्दशो रसो यस्याः। The *Sadhus* speak well of one in one's presence as well as in absence (अनवगीतः परिचयः) ; hence their ways are *always* sweet (अविपर्य्यासितरसम्) । 7. रहस्यम् — रहसि भवम् इति रहस् + यत्। A secret. It is a *secret* because those who are not *Sadhus* cannot acquire it. 10. अनुपधि—उप + धा कि कर्मणि = उपधि deceit. अविद्यमानम् उपधि अस्मिन्, बहु—। अविपर्य्यासितरस hence अनुपधि। They feel, speak and work sincerely. 9. विजयते—जि to conquer is सकर्मक and we have to take भुवन as the कर्म understood. It also means 'to prosper' उत्कर्षप्राप्ति। In this sense it is अकर्मक। The आत्मनेपद is by "विपराभ्यां जेः"। विजयते conquers (people), prospers, rules triumphant ato.

(*iii*) वनदेवता—कां पुनरत्रभवतीमवगच्छामि।
तापसी—पावं यामि।

वनदेवता—आर्थे आत्रेयि, कुत: पुनरिहागम्यते किम्प्रयोजनो वा दण्डकारण्यप्रचार: ।

आत्रेयी—

अस्मिन्नगस्त्यप्रमुखाः प्रदेशे भूयांस उद्गीथविदो वसन्ति ।
तेभ्योऽधिगन्तुं निगमान्तविद्यां वाल्मीकिपार्श्वादिह पर्यटामि ॥ ३ ॥

Deity—Well, whom do I see in your honoured self ?

Ascetic—I am Atreyi.

Deity—Noble Atreyi, whence do you come here ? What again is the object of your wandering in the forest of Dandaka ?

Atreyi—

In this quarter live many Vedic scholars with Agastya at their head. To learn from them the doctrine of the Vedanta I come here from the side of Valmiki, 3.

मित—। कामिति । किं नाम भवतश इत्यर्थः ॥ आर्ये इति । कुतः कस्मात् स्थानात् । किं प्रयोजनम् अस्मिन् किम्प्रयोजनः । दण्डकारण्ये प्रचारः । दण्डकारण्यप्रवेशे को हेतुरिति भावः ॥ अस्मिन्निति । वाल्मीकेः शिष्या किलाहम्, सम्प्रति अगस्त्यादृषेः उपनिषदः पठितुमिहागता इति भावः । उद्गीथविद् = सामादि वेदज्ञाः ।

Notes—I. अत्रभवतीम्—एषा भवती इति अत्रभवती compounded or uncompounded ; also see "जयमत्रभवान् नं" etc — Kirat XI. 2, दण्डका etc —The word is differently written दण्डक also दण्डका । Comp. "दण्डकायां वने व,", sl. 13 below ; also "प्राप्तानि दुःखानपि 'दण्डकेषु'"—*Raghu.* 3. अगस्त्य etc. —प्रकृष्टं मुखं प्रमुखम् the head, top etc. अगस्त्यः प्रमुखे एषाम् । Agastya was that most prominent among them, hence she means to say that she wants to go directly to Agastya

himself. Comp. "विश्रान्तास्मि भद्रे, सम्प्रत्यगस्त्याश्रमस्य पन्थानं ब्रूहि", para ix below. 4. भूयांसः—अतिशयेन बहव इति बहु+ ईयसुन्—भू+यस्=भूयस्। This is by 'बहोः लोपो भू च बहोः'। 5. उद्गीथ etc.—उच्चैर्गीयते इति उद्+गै+थक् कर्मणि भावे वा=उद्गीथः a section of the सामवेद। ते विदन्ति इति उद्गीथ+विद्+क्विप् कर्त्तरि those that are versed in उद्गीथ। Hence a Vedic scholar in general. 6. तेभ्यः—"आख्याता उपयोगे" इत्यपादाने ५मी। 7. निगम etc.—नितरां गम्यते बुध्यते परतत्त्वम् अनेन इति नि+गम+अप् करणे= निगमः the Vedas. तस्य अन्तः निगमान्तः sequel to the Vedas, i.e., the Upanishads, विद्यते ज्ञायते इति विद्+क्यप् भावे=विद्या knowledge ज्ञानम्। निगमान्तस्य विद्या a knowledge of the Upanishads. 8. वाल्मीकि etc.—वाल्मीके पार्श्वं समीपं वाल्मीकिपार्श्वम्। तस्मात्। ल्यबलोपे कर्मणि ५मी। वाल्मीकिपार्श्वं परित्यज्य इत्यर्थः। Or गम्यमानापाययोगे अपादाने ५मी as in 'कुतोभवान्? पाटलिपुत्रात्।'

(*vi*) वनदेवता—यदा तावदन्येऽपि मुनयस्तमेव हि पुराणब्रह्मवादिनं प्राचेतसमृषिं ब्रह्मपारायणाय उपासते, तत् कोऽयमार्याया दीर्घप्रवासप्रयासः?

आत्रेयी—तस्य महानध्ययनप्रत्यूह इत्येष दीर्घप्रवासोऽङ्गीकृतः।

वनदेवता—कीदृशः?

आत्रेयी—तस्य भगवतः केनापि देवताविशेषेण सर्वप्रकाराद्भुतं स्तन्यत्यागमात्रके वयसि वर्त्तमानं दारकद्वयमुपनीतम्। तत् खलु न केवलमृषीणाम् अपि तु सचराचराणां भूतानाम् आन्तराणि तत्त्वान्युपस्नेहयति।

Deity—When indeed others, even *Munis*, approach that very sage, Prachetasa, that old discourser on Brah-

man for going through the end of the Vedas, why is this attempt of yourself for a long stay away from home ?

Atreyi—There is a great hindrance to study there, hence this long stay out has been decided upon.

Deity—What sort of hindrance ?

Atreyi— Unto that mighty sage were brought by a certain goddess, two infants marvellous in every way, of an age when just weaned from breast-milk. They truly soften the internal entities, not of Rishis only, but of all creatures movable and immovable.

मित- । यदा इति—'यदा तावत् अन्ये' जनाः 'मुनयः अपि न केवलं प्रकृता जनाः ब्रह्मणः वेदस्य 'पारायणाय' पाठेन अन्तगमनाय 'पुराणब्रह्म-वादिनम् आद्यं वेदगुरुं 'तम् ऋषिं' प्राचेतसमेव उपासते तत् भार्य्यायाः अयं दीर्घप्रवासप्रयासः कः कीदृशः ? असमीचीन इति आशयः ॥ तत्रेति—अध्ययनस्य प्रत्यूहः विघ्नः ॥ तस्येति—'देवता विशेषेण भगवतः उपनीतम्' इत्यन्वयः । सर्वप्रकारेण अद्भुतम । स्तने भवं स्तन्यं दुग्धम् । तस्य त्यागः स्तन्यत्यागः लक्षणया स्तन्यत्यागकालः । स मात्रा परिमाणं यस्य तत् 'स्तन्य-त्यागमात्रकम्' । कप्सामामान्तः । तादृशे वयसि वर्त्तमानं 'दारकद्वयं' कुमारयुगलम् 'उपनीतं' समीपमानीय दत्तम् । 'तत्' दारकद्वयम् । 'चरैः' जङ्गमैः 'अचरैः' स्थावरैः 'सह' निखिलानां 'भूतानाम् आन्तराणि' मनोबुद्ध्यादीनि 'तत्त्वानि' पदार्थान् उपस्नेहयति' आवर्जयति ॥

Notes —1. यदा—An अव्यय meaning यतः because, Comp. "यदा बुधैः सर्वगतस्त्वमुच्यसे"—*Kumara.* 2. अन्येऽपि मुनयः—Construe अन्ये मुनयोऽपि । 3. पुराण etc—पुराणश्चासौ ब्रह्मवादी च कर्मधा— । 14. प्राचेतसम्—प्रचेतस् i, e वरुण । तस्य अपत्यं पुमान् प्राचेतसः । This is वाल्मीकि । 5. ब्रह्मपारायणाय—ब्रह्मणः वेदानां पारम्, तस्मिन् अयनं गमनम् । तस्मै । तादर्थ्ये ४र्थी । 6. दीर्घ etc.—प्रवास is staying away from home. 7. कीदृशः—This is meant to refer to अध्ययनप्रत्यूहः । But as दीर्घप्रवासः imme-

diately precedes it and अध्ययनप्रत्यूहः is more remote it naturally goes with दीर्घप्रवासः। Hence it seems better to write कीदृशः अध्ययनप्रत्यूहः। 1. देवता etc. विशेष्यते—इति वि+शिष णिच् घञ् इति, वि+शिष घञ् कर्म्मणि=विशेषः variety. देवतानां विशेषः।

(*v*) वनदेवता—अपि तयोर्नामसंविज्ञानमस्ति ?

आत्रेयी—तयैव किल देवतया तयोः कुशलवाविति नामनी प्रभावश्च आख्यातः।

वनदेवता—कीदृशः प्रभावः ?

आत्रेयी—तयोः किल सरहस्यजृम्भकास्त्राणि आजन्मसिद्धानि इति।

वनदेवता—इति हि भोश्चित्रम्।

Deity—Is there any information about their names ?

Atreyi—It is said that their names, are Kusa and Lava, and their might were revealed by the goddess herself.

Deity—What kind of might ?

Atreyi—We are old, that the Jimbhaka weapons with their secrets have been achieved unto them since birth.

Deity—Ho! This is really strange.

सित—। अपीति-अपि प्रश्ने। 'तयोः' इत्यनन्तरं दारकयोः' इति ग्रन्थः स्खलितः प्रतिभाति। अन्यथा 'दारकद्वयम्' इति प्रस्तुतम्, तदिह 'तस्य' इति स्यात्। एवमुत्तरत्रापि। नाम इति—सम्यक् विज्ञानं संविज्ञानं विशेषबोधः। नाम्नोः संविज्ञानम्। नाम तयोर्जानासि किम् इति प्रश्नार्थः॥ किल इत्यैतिह्ये। जना एवं कथयन्ति इत्यर्थः।

Notes—1. अस्ति—She means अस्ति ते, do you know ? If you do, tell me. 2. आख्यातः—आ चक्ष् or ख्या+क्त कर्म्मणि

Construe नाम्नी आख्याते प्रभावश्च आख्यातः। 3. *Remark*—It seems दारकयोः has been inadvertenly omitted by copyists here after the first तयोः। Otherwise the reference being to दारकद्वयम् we expect तस्य।

(*vi*) आत्रेयी—तौ च भगवता वाल्मीकिना धात्रीकर्म वस्तुतः परिगृह्य पोषितौ परिरक्षितौ च। वृत्तचूडौ च त्रयीवर्जम् इतरा विद्याः सावधानेन परिपाठितौ। समनन्तरञ्च गर्भैकादशे वर्षे क्षात्रेण कल्पेन उपनीय तौ त्रयीविद्यामध्यापितौ। नह्येताभ्यामतिप्रदीप्तप्रज्ञामेधाभ्याम् अस्मदादेः सहाध्ययन-योगोऽस्ति। यतः—

वितरति गुरुः प्राज्ञे विद्यां यथैव तथा जडे
न च खलु तयोर्ज्ञाने शक्तिं करोत्यपहन्ति वा।
भवति च पुनर्भूयान् भेदः फलं प्रति तद् यथा
प्रभवति शुचिर्बिम्बोद्ग्राहे मणिर्न मृदां चयः॥ ४॥

Atreyi—And the two were reared and guarded by worshipful Valmiki literally undertaking the work of a nurse, again with the ceremony of tonsure performed, they were carefully [lit—by him with care] taught the other sciences except the Vedas, and then in the eleventh year from conception, they were initiated after the manner of the Kshattriyas and taught the Vedas. Of such as myself there can indeed be no joining at study with these two of excessively bright grasp and memory ; for—

The teacher gives lessons to the 'sharp' as well as to the dull : surely he does not also increase or decrease their aptitude for grasping. Yet towards the result, there indeed

arises a great difference. It is like this—A flawless gem, not a lump of earth, succeeds in receiving an image. 4.

मित—। धात्रीत्यादि—'वस्तुतः' स्वरूपतः 'धात्रीकर्म्म' उपमातुः कार्य्यं 'परिगृह्य' स्वीकृत्य। स्वयमेव धात्री भूत्वा इत्यर्थः। 'परिरक्षितौ' विपन्नः इति शेषः॥ वृत्तेत्यादि—'वृत्ता' निष्पन्ना 'चूडा' तृतीये वर्षे कार्य्यः संस्कारविशेषः ययोः तौ। 'सावधानेन' कृतमनोयोगेन वाल्मीकिना 'त्रयीं' ऋगयजुःसामरूपस्य वेदत्रयस्य 'वर्जः' वर्जनं यस्मिन् कर्म्मणि तत् यथा तथा 'परपाठितौ' ('गतिबुद्धि—,' इत्यणिकर्त्तुः कर्म्मसंज्ञा)॥ समनन्तरमित्यादि—'गर्भात्' गर्भाधनात् एकादशे वर्षे क्षात्त्रेण' क्षत्रियजात्युक्तेन 'कल्पेन' विधिना 'उपनीय' उपनयनसंस्कारेण योजयित्वा। न ह्येत्यादि—'अतिप्रदीप्ता' प्रखरा 'प्रज्ञा' बुद्धिः 'मेधा स्मृतिः ययो. ताभ्यां सहाधायने' एकत्र पाठे 'योगः न हि अस्ति' न सम्भवति॥ कुत इत्याह वितरतीति। अन्वयः—गुरुः प्राज्ञे तथा एव जड़े विद्यां वितरति,, न खलु तयोर्ज्ञाने शक्तिं करोति अपहन्ति वा। फलं प्रति पुनः भूयान् भेदो भवति च। तथा शुचिर्म्मणिः विम्बोद्ग्राहे प्रभवति मृदां चयः न तथा—तथा स्यात्। व्याख्या—अत्र सहाध्ययनयोगाभावे आचार्य्यदोषो वा इत्यत्राह-'गुरु'—यथा प्राज्ञे तीक्ष्णबुद्धौ शिष्ये तथा एव जड़े मन्दबुद्धौ 'विद्यां वितरति' शास्त्रार्थं विवृणोति। विशेषेण अनुपलक्षितौ युगपदुपस्थितौ द्वावप्यसौ अविशेषेनैव पाठयति, तत् कुत आचार्य्यदोषः। भवतु यद्येवं स्यात तत स एकस्य बुद्धिं पुष्याति इतरस्य च नाशयति ? न इत्याह —'न खलु' अविशेषेणविद्यावितरणव्यतिरिक्तं स 'तयोः ज्ञाने' विवृतार्थबोधे 'शक्तिम्' सामर्थ्यमपि एकस्य 'करोति' इतरस्य अपहन्ति वा' नाशयति वा। यद्येवं फले अविशेषः स्यात् फलं प्रति पुनः पक्षान्तरे फलसम्बन्धे तयोः "भूयान् भेदः महत् वैलक्षण्यं 'भवति च भवत्येव। तन्मनो गुरुगतमपि किञ्चिदिहास्ति। नैवम्—'यथाशुचिर्म्मणिः विमलं रत्नं विम्बोद्ग्राहे' छायाग्रहणे 'प्रभवति' शक्तो भवति 'मृदां चयः, लोष्टः 'न' प्रभवति तथा (तत्) स भेदाविर्भाव.।

स्वभाव एवात् कारणम्। यथा अनघो मणिस्वभावः अनघश्च मृत्स्वभावस्तेन च एकत्र प्रतिबिम्बं दृश्यते नानयत्र, तथा, एकः प्राज्ञस्वभावः अन्यश्च जड्स्वभावः तेन प्राज्ञे विद्या स्फुरति न जडे। न हि कश्चिदत्र गुरोर्दोषः इति भावः।

Notes —1. वस्तुतः—वस्तु is स्वरूप the reality. वस्तुना इति वस्तु+टा (ऐया) तसि स्वार्थे। In reality. Vidyasagar reads वाल्मीकवस्तुतः as a compound and explains वात् करूपात् व्यापारात् with तस् पञ्चम्यथे। 2. परिरक्षितौ—Guarded against accidents, वीरराघव believes that ants are a menace to infant life and परिरक्षण is from the attack of ants. 4. त्रयीवर्जम् eto —This may also be derived as त्रयीं वर्जयित्वाइति त्रयीं +वर्जि (चुरादि) + णमुल् भावे by the rule द्वितीयायाञ्च" । The rule means that when the कर्त्ता of वर्जनक्रिया and final क्रिया is in a hurry णमुल् may be attached with a द्वितीयान्त word as उपपद। We have to suppose there that Valmiki quickly did the वर्जनक्रिया and पाठनक्रिया। As difference of opinion is possible in this supposition we give an alternative in Tika. त्रयीवर्जम् इतरा- seems a bit tautologous त्रयीवर्जं विद्याः or त्रयीतरा विद्याः seems to serve the purpose equally well. The *Vidyas* are 14 in all—"अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः। पुराणं धर्मशास्त्रञ्च विद्याह्येताश्चतुर्दश॥" The boys were taught all these excepting त्रयी i e, the Vedas, ऋच्, यजुस्, सामन् । सावधानेन—अवधान careful attention, तेन सह वर्त्तु-। तेन। Qual. वाल्मीकिना। 5. परिपाठितौ—Here we had originally वृत्तवन्ते (कर्त्ता) विद्याः परिपठितवन्तौ— सावधान (प्रयोजक) वृत्तवृत्तौ (प्रयोज्यकर्त्ता कर्म) विद्या. परिपाठितवान् (with णिच्)। Changing the voice—सावधानेन

बृत्तचूडौ विद्याः परिपाठितो । The rule "गतिबुद्धिप्रत्यवसानार्थशब्दकर्मकमकर्मकाणामणिकर्त्ता स णौ" applies because परिपठम is शब्दकर्म । Also note that by the dictum 'बुद्धिभक्षार्थयोः शब्दकर्मणाञ्च निजेच्छया' we may optionally make बृत्तचूडौ or विद्या. the उक्तकर्म i.e., either वृत्तचूडौ is द्वितीयान्त and विद्याः प्रथमान्त or the reverse. 6. गर्भैकादशे—एकञ्च दश च एकादश, एक becoming एका by निपातन । एकादशानां पूरणम् इति एकादशन्+डट् एकादशम् । गर्भात् एकादशम् सप्तमी । 7. उपनीय—त्रयी shoul not be taught before उपनयन् । 8. त्रयीविद्याम् &c.—The changes are as in Note 5. above. 9. एताभ्याम्—सहार्थे ३या । 10. अतिप्रदीप्त &c.—To understand a lesson is one thing to retain it is another, the first is the work of प्रज्ञा and the second that of मेधा । 11. अस्मदादेः—वयम् (i,e अहम्) आदिः (आद्यः ?) यस्य जहत्समृहस्य सः अस्मदादिः बहु । तस्य । 12 सह &c.—सह अध्ययनं सहाध्ययनम्, सुपसुपा etc. 13. वितरति &c.—प्रजानातीति प्र+ज्ञाक कर्त्तरि प्रज्ञः । स एव इति प्रज्ञ+अण् स्वार्थे=प्राज्ञः । Delivery of the lecture a'one is the Guru's work , he does nothing beyond it. प्राज्ञ जड़े donot take चतुर्थी because there is no सम्प्रदानविवक्षा । विषयाधिकरणे ७मी । 14. न च &c.—च is समुच्चये । He does not at the same time quicken the intellect of one and deaden that of the other. 15. भवति च-च is अवधारणे । 16. तत्—Refers to the manifestation of difference. 17. प्रभवति—Becomes capable It does not mean 'lords it over', hence cannot govern the 4th case ending by "नमः स्वस्ति—" । 18. बिम्बोद्ग्राहे—बिम्ब is image. उद्+ग्रह+घञ्भावे उद्ग्राहः reception. विषयाधिकरणे ७मी । चतुर्थी has no scope (see note 17). 19. *Remark*—The verse is introduced with a यतः hence it professes to be a *reason* why न सहाध्ययनयोगोऽस्ति ।

She means to say teacher goes on lecturing, only the right ones follow him, we lag behind. Hence न सहाध्ययनयोगोऽस्ति ।

(*vii*) वनदेवता—अयमसावध्ययनप्रत्यूहः ?

आत्रेयी—अपरश्च ।

वनदेवता—अथापरः कः ?

आत्रेयी—अथ स ब्रह्मर्षिरेकदा माध्यन्दिनसवनाय नदीं तमसामनुप्रपन्नः । तत्र च युग्मचारिणोः क्रौञ्चयोरेकं व्याधेन विध्यमानमपश्यत्, आकस्मिकप्रत्यवभासाञ्च देवीं वाचमव्यतिकीर्णवर्णाम् आनुष्टुभेन छन्दसा परिणतामभ्युदैरयत्—

मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः ।
यत् क्रौञ्चमिथुनादेकमवधीः काममोहितम् ॥ ५ ॥

Deity—Is this the hindrance to study ?

Atreyi—Yet another.

Deity—Well, what is the other ?

Atreyi—Now, that Brahman-like sage on a certain occasion went to the river Tamasa for his mid day bath. There, out of two herons roaming together, he saw one being shot down by a fowler and forthwith delivered himself of Goddess Speech that suddenly flashed within him measured in Anushtup metre without any syllable in excess or defect (thus)—

Thus shalt have no home, O Nishada, for years eternal, for, of a pair of herons, thou slayest one that is mad with love. 5.

मित—। माध्यन्दिनेति—मध्ये भवम् माध्यन्दिनम् । इह "मध्यन्दिन समये" इति केषाञ्चित् पाठः तत्र वृद्धाभावश्चिन्त्यः । माध्यन्दिन ' इति दिनमध्यभवे रूढम् । "माध्यन्दिनसवनाय' मध्याह्नस्नानाय । 'मध्यो मध्यं

दिनण्वास्मात्'' इति दिनण् प्रत्ययः ॥ अनुप्रपन्नः गतः स्नानार्थमिति शेषः । युग्मेन चरतीः "युगचारिणोः'' सहविहरतीः ॥ 'अकस्मात् अतर्कितं भवः 'आकस्मिकः अचिन्तितोपनतः प्रत्यवभासः स्फुरणं यस्याः ताम्' ॥ 'देवीं' 'वाचम' अमृताम् आम्नः कलाम् ॥ 'अव्यतिकीर्णाः' न्यूनताधिकत्वरहिताः 'वर्णाः' यस्मात् । चतुर्ष्वपि पादेषु समाक्षराम् ॥ अनुष्टुभ् इति अष्टाक्षरं च्छन्दः । अनुष्टुभ एव आनुष्टुभम् आनुष्टुभी वा ॥ मा निषादेति । अन्वयः – हे निषाद, यत् त्वं क्रौञ्चमिथुनात् काममोहितम् एकमवधीः (तत्) शाश्वतीः समाः प्रतिष्ठां मा अगमः । व्याख्या – हे "निषाद व्याध यत् यस्मात् त्वं क्रौञ्चमिथुनात्' 'काममोहितम एकम्' पुमांसमित्यर्थः 'अवधीः' तस्मात् 'शाश्वतीः समा. अनन्तान् वत्सरान् व्याप्य 'प्रतिष्ठाम्' वासस्थानं 'मा अगमः' मा प्राप्नुहि क्रूरेण त्वया एकमनयोर्निहता विहता अनयो गृहचर्या तत् तवापि गृहं न भविष्यति, अनियतनिलया एव निषादजातिर्विचरिष्यति इति शापः ॥

Notes.—1. माध्य etc,—मध्य + दिनण् माध्यन्दिनम् । मध्य becomes मध्यम् by the Varttika "मध्यो मध्यम्—" । सु + ल्यट भावे = सवनम् bath. माध्यन्दिनं सवनम् कर्मधा—। तस्मै । तादर्थ्ये चतुर्थी । Strictly speaking माध्यन्दिन is what occurs in the middle of any thing whatever, it is restricted (रूढ़) to mean what happens at the middle of the day Our reading is from Viraraghava, the usual reading is मध्यन्दिनसमये । मध्यन्दिन without वृद्धि has to be defended saving the वृद्धि is अनित्य etc. It seems better to avoid this reading 2 युग्म &c – युग्मेन चरतः इति युग्म + चर णिनि कर्त्तरि ताच्छील्ये = युग्मचारिणोः roaming in pairs 3. एकम् – The masculine implies that the male bird was shot down 4. आकस्मिक &c — अकस्मात् is an अव्यय meaning अतर्कितम् unexpectedly. अकस्मात् भव इति अकस्मात् ठञ = आकस्मिकः happening unexpectedly. प्रति + अव + भास + घञ् भावे = प्रत्यवभास । Next बहु—। 5 अव्यति &c.—

वि+अति+कृ+क्त कर्मणि व्यतिकीर्ण irregularly scattered. न व्यतिकीर्णा., नञ् तत्—। Regular. Next वहु—।=Having the same number of syllables in each line. 6. आनुष्टुभेन—अनुष्टुभ् is a metrre of 8 syllable in each line. अनुष्टुबेव इति अनुष्टुभ्+अण् स्वार्थे प्रज्ञादि। 7. परिणताम्—The सूक्ष्मा कला of शब्दब्रह्मन् suddenly flashed within him and came out in the shape of a verse in the अनुष्टुभ metre. 8. निषाद – निषीदति पापमस्मिन् इति नि+सद्+घञ् अधिकरणे निषादः a fowler. 8 प्रतिष्ठाम – प्रतितिष्ठति असाम् इति प्रति+स्था+अङ् अधिकरणे प्रतिष्ठा habitation आलय। The Nishadas are a criminal tribe loading a nomad life because, says the poet doomed to it by this curse of the sage. 9. अगमः –भविष्यदर्थे लुङ् by the rule 'माङिलुङ'। But "न माङ्योगे" prohibits अट् and the form ought to be गमः। Some propose to meet the difficulty by taking the मा here as different from माङ् and thus avoding the rule "न माङ्योगे"। The defence though good in case like—मा कुरु धनजनयौवनगर्वम् etc. is not available here because if the मा here is not माङ् the लुङ् itself becomes inadmissible in a भविष्यत् sense—the rule for it being "माङि लुङ"। The best defence is to say this is आर्ष। 18. शाश्वती: - शश्वत् is an अव्यय meaning सदा। शश्वत्भवो इति शश्वत्+अण् स्त्रियां शाश्वता: or शश्वत्+टञ् स्त्रियां शाश्वतिक्यः। ताः। अण् is available from निपातन in the Vartika "शाश्वते प्रतिषेधः", and टञ् by 'काळात् टञ' etc। 11 क्रौञ्च etc—क्रौञ्चमिथुनम् आसाद्य इति ल्यब्लोपे कर्मणि ५मी। Or say when one is singled out there is mental separation from the group (बौद्ध अपाय), thence अपादाने ५मी 12 *Remark*.—(a) The curse is for his wickedness in destroying the domestic felicity of the pair of herons. You have rendered the female heron homeless, so homeless

you go for ever. Even to this day the hunting tribes (बेदिया) have no fixed habitation.

13. *Remark*—(a) Some commentators say this sloka as रामायणवीज, cp "मा लक्ष्मीः निषीदति अस्मिन् तत् सम्बोधनं—मानिषाद। यत् यसमात् क्रौञ्चमिथुनात् मन्दोदरीरावणरूपात् एकं काममोहितं रावणम् अवधीः हतवान् तस्मात् त्वं शाश्वतीः समाः अनेकान् वत्सरान् अद्वितीयां प्रतिष्ठाम् अखण्डैश्वर्य्यानन्दावाप्तिम् न अगमः प्राप्नु हि, तेनाथत. शब्दतः अपि मनाक् काय्यर्थसूचनम्'। See also Valmiki Ramayana for further interpretation, here. Or– त्वं मोहितं यदेकं आत्मानं अवधीः अतः प्रतिष्ठा' न आप्नुहि।

(b) अभि उद+ईर णिच् लुङ् द=अभ्यदेरिरत् uttered.

(*viii*) वनदेवता—चित्रम्! आम्नायादन्यो नूतनश्छन्दसामवतारः।

आत्रेयी—तेन खलु पुनः समयेन तं भगवन्तमाविर्भूतशब्दब्रह्मप्रकाशमृषिमुपगम्य भगवान् भूतभावनः पद्मयोनिरवोचत्—"ऋषे, प्रबुद्धोऽसि वागात्मनि ब्रह्मणि। तत् ब्रूहि रामचरितम्। अव्याहतज्योतिरार्षं ते प्रातिभं चक्षुः। आद्यः कविरसि"। इत्युक्त्वा तत्रैवान्तर्हितः। अथ भगवान् प्राचेतसः प्रथमं मनुष्येषु शब्दब्रह्मणस्तादृशं विवर्त्तमितिहासं रामायणं प्रणिनाय।

Deity—O marvel! A fresh incarnation (Manifestation) of the metres other than those in the Vedas!

Atreyi—Again mighty Padmayoni, the creator of beings, having approached that worshipful sage unto whom the light of Brahman as Sound had appeared by that time, said—"O sage you have become enlightened in Brahman in the shape of Speech, so narrate the deeds of Rama; your saintly eye of inspiration has its light unobstructed. You are the first poet'. Having said this even there and then he vanished. Thereupon the mighty sage Prachetasa composed the historical poem Ramayana, the first evolution of Sound Brahman in that shape among men. [Or better —Thereupon……Prachetasa first composed……the evolution of……men].

मित—। 'आम्नायात् अन्यः' वेदात् भिन्नः नूतनः' अदृष्टपूर्वः छन्दसाम् अवतारः' छन्दोदेवताया आविर्भाव.। बह्वीभिर्भंगिभि किल वेदेषु अवतीर्णा छन्दोदेवता, इयं पुनरस्या नूतनोऽवतारः ॥ तेन समयेन आविर्भूतशब्दब्रह्म-प्रकाशम्' इत्याद्यन्वयः। आविर्भूतः' प्रकटः 'शब्दब्रह्मणः प्रकाशः' ज्योतिः यस्य यस्मिन् वा तम्। आविर्भवनं प्रति ("समयेन" इति अपवर्गे तृतीया)। जन्मनः प्रभृति तन्मुहूर्तं यावत् यः तेन समयेन तावता कालेन इत्यर्थः॥ भूतानि भावयति उत्पादयति इति भूतभावनः' त्रिभुवनविधाता। 'वागात्मनि' शब्दस्वरूपे 'ब्रह्मनि विषये 'प्रबुद्धः असि प्रकर्षेण बोधस्ते जातः' शब्दब्रह्मणः स्वरूपं सम्यगुपलब्धवानसि। 'आर्षं' ते प्रातिभं' प्रतिभारूपं चक्षुः अव्याहतज्योतिः' सर्वदर्शि जातम्। 'आद्यः कविरसि लोके॥ अथ भगवान् प्राचेतसः मनुष्येषु' लोके 'शब्दब्रह्मणः तादृशं प्रथमं विवर्तं परिणामम् इतिहासं रामायणं प्रणिनाय। (यद्वा—अथ—प्राचेतसः प्रथमं मनुष्येषु शब्दब्रह्मणः तादृशं विवर्त्तम् इत्यादि ।

Notes. 1. आम्नायात्—आ + म्ना + घञ् कर्मणि = आम्नायः the Vedas. अन्यशब्दयोगे ५मी। 2 नूतन.—New. The poet intends to say that this is the first time a metre not found in the Vedas is introduced. As worded the line implies that metre outside the Vedas have been invented. This one, however, is a fresh invention. The ambiguity is removed if we read चित्रम् आम्नायादन्यः प्रथमश्छन्दसामवतारः। 3. छन्दसाम् —छन्दस् here includes all *possible* metres; it is a group which is personified, 4. अवतारः—अवतरत्यनेन इत्यादि अव + तृ घञ् करणे। An incarnation 5. समयेन—समयेन—Refers to the whole time from birth to the manifestation of the metre. अपवर्गे ३या। The आविर्भाव of शब्दब्रह्मन् was attained (फलप्राप्ति) by that length of time, 6. भूत &c.—भावयति जनयति इतिभू

णिच् + ल्युट् कर्त्तरि बाहुलकात् भावनः। Next ईतत् – । Also see note 7. 7. पद्मयोनिः—पद्मं विष्णोर्नाभिपद्मं योनिः कारणं यस्य सः। A name of ब्रह्मन्। As this epithet implies that ब्रह्मन् is *born*, we may also derive भूतभावनः thus—भूतानि भाव्यन्ते अनेन इति भूत भावि + ल्युट् करणे the कर्त्ता being विष्णु। 7. अव्याहत &c.—अव्याहतं अविघ्नितं ज्योतिः यस्य तत्। The light of your eye will penetrate every thing unobstructed. You will see all ; the entire life of Rama will stand revealed to you. This is predicated of चक्षुः। Compare Ramayana—'रामस्य सह सौमित्रे राक्षसानाञ्च सर्वशः। वैदेह्याश्चैव यद् वृत्तं प्रकाशं यदि वा रहः। तच्चाप्यविदितं सर्वं ते भविष्यति ॥' 9. प्रातिभम्—प्रतिभाति अनया इति प्रति भा + अङ्करणे प्रतिभा inspiration, प्रतिभा एव इति प्रतिभा + अण् स्वार्थे प्रातिभम्। We have neuter by the maxim 'क्वचित् स्वार्थिका प्रकृतितो लिङ्गवचनान्यति वर्त्तन्ते'। The आर्ष प्रतिभा of the sage is taken as his चक्षुस्। 10. अथ—अनन्तरम्। This was after the twins had finished their course af the Vedas. Hence this was the time when they should have been taken through the Vedantas. 11 प्रथमम्—Construe प्रथमं विवर्त्तम् the first evolution ; or प्रथमं प्रणिनाय first composed. The latter has to be preferred (see next para). 11. मनुष्येषु —Construe मनुष्येषु विवर्त्तम्। This is according to the theory that nothing new is created, every thing is in existence from eternity ; what we call creation is but a manifestation of something preexistent in Brahman. This इतिहास named रामायण had its germ in शब्दब्रह्मन् but that was देवेषु not मनुष्येषु। The sage had mastered शब्दब्रह्मन् (प्रबुद्धोऽसि &c)

hence he saw all and made it known मनुष्येषु in that form (तादृशम्)। 13. विवर्तम्— विवर्तते विभिन्नरूपेण वर्तते अनेन इति वि + वृत घञ्, करणे - विवर्त manifestation, evolution, 14. इतिहासम्—इतिह is an अव्यय meaning पारम्पर्योपदेश.—a statement of succession of events. समास्ते अस्मिन् इति इतिह + आस घञ् अधिकरणे = इतिहासः a book containing narration of past events *i. e.* पुरावृत्तम्। This is the explanation of Amara's commentators. Vardhamana says,— इतिह इति लोकप्रवादागमयोः"। लोकप्रवाद is what people say *i. e.*, tradition story, current in world. The rest as before. This makes इतिहास a systematic collection of stories and traditional knowledge regarding any matter in hand.

(*ix*) वनदेवता—हन्त पण्डितः संसारः।

आत्रेयी—तस्मादवोचम् "महानध्ययनप्रत्यूहः इति।

वनदेवता—युज्यते।

आत्रेयी—विश्रान्तास्मि भद्रे, सम्प्रत्यगस्त्याश्रमस्य पन्थानं ब्रूहि।

वनदेवता—इतः पञ्चवटीमनुप्रविश्य गम्यतामनेन गोदावरीतीरेण।

आत्रेयी (सवाष्पम्)—अप्येतत्तपोवनम्? अप्येषा पञ्चवटी? अपि सरिदियं गोदावरी? अप्ययं गिरिः प्रस्रवणः? अपि जनस्थानदेवता वासन्ती त्वम्।

वासन्ती—अस्त्येतत् सर्वम्।

Deity—Bravo! The world will become wise.

Atreyi—Hence I said there was great hindrance to study.

Deity—Rightly said.

Atreyi—I am rested, gentle friend. Now tell me the way to the hermitage ef Agastya.

Deity—Having entered the Panchavati here, proceed along this bank of the godavari.

Atreyi—(with tears)—Is this Tapovana? Is this Panchavati? Is this the hill Prasravana? Are you Vasanti the deity of Janasthana?

Vasanti—All this is so.

मित—। पण्डित इति—रामायणपाठात् सर्वे प्राज्ञा भविष्यन्ति इति भाव । ('मण्डित" इति पाठान्तरं दृश्यते । तत्र मण्डित इति भूषितः) । गुणगरिम्णा रामायणो ग्रन्थः जगत्यां अलङ्कार इति भावः । तस्मादितरादि—तस्मादकस्मात् । पूर्वत्र 'प्रथमं विवर्त्तम्'' इत्यन्वयः, अध्ययनप्रत्यूहः नैव दृश्यते । "प्रथमम्इतिहासं प्रणिमाय' इति पक्षेतु "प्रथमम् इतिहास' परस्माच्च अन्यत् किञ्चित् आरम्भम्", तेन कार्य्यान्तरे व्यासक्तो मुनिः । निगमान्तविद्यात् नाध्याप्यते इति अध्ययनप्रत्यूह. । अपेतदिति—तपोवनमिति तत्रत्यस्य कस्यचित् प्रदेशस्य नाम स्यात् ॥

NOTES

1. अध्ययन—In the para preceding consture प्रथमम् इतिहासं प्रणिनाय । Now first composed the history' implies that something other than history is engaging the attention now. Hence अध्ययनप्रत्यूह, because the teacher is busy. The construction शब्दब्रह्मणः प्रथमं विवर्त्तं प्रणिनाय does not explain the प्रत्यूह, because the sage has then finished his work and is free to lecture to his pupils. Hence prefer प्रथमम् इतिहासं प्रणिनाय । That the sage was really busy with something else will be evident from प्रणीतो न प्रकाशितः etc in Act IV paras XXXVII—XXXVIII.

2. तपोवनम्—A separate अपि with तपोवन indicates that तपोवन was a proper name like पञ्चवटी गोदावरी, प्रस्रवण, वासन्ती ।

It evidently referred to a tract of land inculding the spot where the two speakers were seated. ब्रू or वच+लुङ् अम्= अवोचम्।

(*x*) आत्रेयी—वत्से जानकि,

स एष ते वल्लभबन्धुवर्गः प्रासङ्गिकीनां विषयः कथानाम्।
त्वां नामशेषामपि दृश्यमानः प्रत्यक्षदृश्यामिव नः करोति ॥ ६ ॥

Atreyi—Child Janaki.

This group of your friends and favourite object of incidental remarks on being seen, makes you as if before my eyes and visible, though your name alone is left to us. 6.

मित—। स इति। अन्वयः—प्रासङ्गिकीनां कथानां विषयः स ते एष वल्लभबन्धुवर्गः दृश्यमानः (सन्) नामशेषामपि त्वां नः प्रत्यक्षदृश्यामिव करोति। व्याख्या—'प्रासङ्गिकीनां' कथान्तरप्रसङ्गे भवानां 'कथानां विषयः' 'स ते एष वल्लभानां' तपोवनपञ्चवटीगोदावरीणां 'बन्धोः' वासन्त्याश्च 'वर्गः' समूहः' 'दृश्यमानः' सन् नाम सीतेति नाममात्र 'शेष.' इहलोके स्थितं यस्याः तादृशीम् (बहुव्रीहिः) 'अपि' लोकान्तरगतामपि 'त्वां नः प्रत्यक्षदृश्यामिव' लोचनगोचरीभूतामिव 'करोति'। चतुर्ष्व एव एषु दृष्टेषु मन्ये त्वामेव सशरीरां पश्यामि इत्याशयः।

NOTES

1 वल्लभ &c.—वल्लभा is favourite वल्लभाश्च बन्धवश्च वल्लभबन्धवः द्वन्द्व। बन्धु should have come first in the compound; because it is अल्पाचतर। But the rule is often violated; comp. "सहद्राभ्राव्" लक्षणहेत्वोः" &c. of पाणिनि himself. वल्लभबन्धूनां वर्गः group of friends. Or वल्लभी बन्धु वर्गः the favourite group of friends. This counts तपोवन, पञ्चवटी and गोदावरी among friends Whether this is reasonable or not it is not easy to say. Trees and animals are often seen regarded as friends. Thus—"यत्र द्रुमा अपि मृगा अपि बन्धवो मे"—Act III. sl. 9 But that very verse excludes the tract of land from

among friends and treats as mere आधार of the friends (पत्र)। Besides there is reason to suppose that the four now spoken of, viz तपोवन, पञ्चवटी गोदावरी वासन्ती were favourite among friends For these reasons the first exposition has to be preferred Against this, however note पूर्वसुहृदो भुमिभागान् of para xxxii which justifies the inclusion of तपोवन &c—among friends

2 प्रासङ्गिकीनाम्—प्र+सञ्ज+घञ् भावे=प्रसङ्ग context, course of conversation प्रसङ्गे भवा इति प्रसङ्ग+ठञ् स्त्रियाम्=प्रासङ्गिक्यः। तासाम्। 3 प्रत्यक्ष &c =अक्ष्णोः प्रति इति प्रति+अक्षि टच समासान्त—प्रत्यक्षम् before the eye अव्ययी—by the गणसूत्र 'प्रतिपरसमनुभ्योऽक्ष्णः। प्रत्यक्ष दृश्या, सुपृष्टा। ताम्। Pred to ताम्।

(xi) वासन्ती—(सभयं स्वगतम्)—कथं नामशेषामित्याह ? (प्रकाशम्) आर्य्य किमत्याहित सीतादेव्याः ?

आत्रेयी—न केवलमत्याहित सापवादमपि।

वासन्ती—कथमिव ?

आत्रेयी—(कर्णे—एवमेवम्)।

वासन्ती—अहह ! दारुणो दैवनिर्घात.। (इति मूर्च्छति)।

आत्रेयी भद्रे समाश्वसिहि। समाश्वसिहि।

भद्र समाश्वसिहि समाश्वसिहि।

वासन्ती—हा प्रियसखि हा महाभागे ईदृशस्ते निर्माणभाग ! रामभद्र ! अथवा अलंत्वया। आर्य्ये आत्रेयि अथ तस्मादरण्यात् परित्यज्य निवृत्ते लक्ष्मणे सीतादेव्याः किं वृत्तमिति काचिदस्ति प्रवृत्तिः ?

आत्रेयी—नहि नहि।

Vasanti—(With alram to herself)—Why does she say name alone is left' ? (Aloud) Noble lady, has any calamity befallen queen Sita ?

Atreyi—Not a mere calamity, with a scandal too.
Vasanti—How so ?

Atreyi—(Whispers in the ear)—Thus and thus.

Vasauti—Ho, A terrible bolt from the blue (faints away). Courage, gentle friend courage.

Vasanti—O ! Dear friend, O ! supremely endowed lady, such is the lot at your creation ? Ramabhadra, Ramabhadra, or no use of thee. Noble Atreyi is there any information as to what happened to queen Sita after Lakshmana had returnee from that forest abandoning her ?

Atreyi—No, indeed no

मित—। अत्याहितमिति—"अत्याहितं महाभीतिः कर्म्म जीवानपेक्षि यत्" इत्यमरः। यत्र प्राणशङ्का तत् अत्याहितम् ॥ अहहेति-अहह इति गुरुदुःखसूचकमव्ययम्। 'निर्घातः' नितरां घातः वज्रपात इत्यर्थः। (तथा च—"निर्घातैग्रः कुञ्जलीनान् जिघांसुर्ज्यानिर्घोषैः क्षोभयामास सिंहान्" इति रघौ) दैवप्रेरितो निर्घातः दैवनिर्घातः' ॥ हा इति—महान् भागः अंशः नैसर्गिको गुणराशिः इत्यर्थः यस्याः तत्संबुद्धौ 'महाभागे'। निर्माणे सृष्टिकाले विहितो 'भागः' भाग्यम्। तस्याः काचित् प्रवृत्तिः वार्त्ता अस्तिकिम् ? ॥

1. अत्याहितम्—अतिशयेन आहितम् इति अति+आ+धा+क्त कर्म्मणि। Something that is laid heavy on one's mind, a calamity. "अत्याहितमहद्भयम्" ।

2. दैवं &c—दैव is destiny. निर+हन् घञ भावे निर्घातः a violent storke, hence, thunder here. दैवस्य निर्घातः thunderbolt sent down by fate. Hence वासन्ती mourns Sita,s luck. Alas ! Sita was struck by a veritable bolt from the blue. Thus thinking of the plight of her friend she herself faints away.

3. प्रियसखि—First प्रियसखी gives प्रियसखी+टच by "राजाहःसखिभ्यः टच्"। This is because by the maxim 'प्रातिपदिकग्रहणे

किञ्चिद्विशिष्टस्यापि ग्रहणम्" what is enjoyed of सखि affects सखी also. Next by पुंवद्भावःwe get प्रियसखि+टच्। The final ई disappearind (टिलोप) we have प्रियसख which in the feminine becomes प्रियसखौ। तदुसख्यौ। Apparently there seems to exist a short cut to the form प्रियसखी if we assume that समासान्तविधि being अनित्य the poet has not affixed टच् at all So that प्रिया सखी प्रियसखी, तदुसंबद्धौ is quite plain saying. But this assumptien is not justified if there is a way to the correct form without अनित्यता। अनित्यता has to be assumed only when there is no other solution.

4. महाभाग—भाग here is अंश share , i. e , the share of virtue allowed to her. "एकदेशांशयोर्भाग ", इति त्रिकाण्डशेषः।

5. निर्माणभागः—निर्माण is सृष्टि। भाग now is भाग्य, भागधेय lot निर्माणे भागः the lot assigned by विधाता at creation ; सृष्टा। "भागोरूपार्द्धके प्रोक्तो भागधेयैकदेशयोः' इति विश्वः।

(*xii*) वासन्ती—हा कष्टम्! अरुन्धतीवशिष्ठाधिष्ठितेषु रघुकटम्बकेषु जीवन्तीषु च प्रवृद्धासु राज्ञीषु कथमिदं जातम् ?

आत्रेयी—ऋष्यशृङ्गसत्रे गुरुजनस्तदासीत्। सम्प्रतितु परिसमाप्तं तत् द्वादशवार्षिकं सत्रम् ऋष्यशृङ्गेण विसर्जिताश्च सम्पूज्य गुरवः। ततो भगवत्यरुन्धती—नाहं वधूविरहितामयोध्यां गमिष्यामि इत्याह। तदेव राममातृभिरनुमोदितम्। तदनुरोधात् भगवतो वशिष्टस्य परिशुद्धा वाचः— वाल्मीकितपोवनं गत्वा तत्र वत्स्यामः—इति।

Vasanti—O woe ! How could this happen, Arundhati and Vasishtha guiding the princes of Raghu's race and the old queens living ?

Atreyi—The elders were then in the sacrifice of Rishyasringa. But now that twelve year-old sacrifice has ended and the elders have beed dismissed by Rishyasringa with due honours. Thereafter worshipful Arundhati has said—I shall not enter Ayodhya which is bereft of my daughter in-law. The same has been fully approved by Rama's mother; out of regard for all this, mighty Vasishtha's unimpeachable words are these—We shall go to the hermitage of Valmiki and live there.

मित—। हा इत्यादि=अरुन्धतीवशिष्ठेन च अधिष्ठितानि अधिकृतानि कर्त्तव्योपदेशैः परिचालितानि, तेषु। 'कदम्बकं' वृन्दं समूहः। रघूणां कदम्बकानि तेषु। रघुवंशीयेषु (भावे क्मी)। रघुकदम्बकेषु 'अरुन्धती-वशिष्ठधिष्ठितेषु सत्सु राज्ञीषु जीवन्तीषु सतीषु इत्यन्वयः। ऋष्येत्यादि। सत्रं यज्ञः। 'परिसमाप्तम्' इत्यनेन वैदेह्यास्त्यागात् द्वादशवत्सरा गताः अयोदशो वर्त्तते इत्यायाति। 'तयोः' अरुन्धती वचनस्य राममातृवचनस्य च अनुरोधः' बाधा, तस्मात्। वाल्मीकितपोवनम्' इति तु कथमुच्यते मावगच्छामः। वशिष्टस्यापि तपोवनमास्ते तत्र वासेऽपि अयोध्यागमनं परिह्रियते एव॥

Notes. अरुन्धती &c.—कदम्ब is समूह। 'वृन्दे कदम्बं नीपे ना' इति त्रिकाण्डशेषः। कदम्बानि एव इति कदम्ब+कन् स्वार्थे—कदम्बकानि by transference of epithets stands for the members of Raghu's race. The idea is—Aurundhati and Vasista guiding the affairs, the renunciation becomes well nigh impossible these can not possibly approve of it; supposing, however that they do approve the old queens interfere Hence राज्ञीषु अपि सतीषु कथमिद जातम्। 5. द्वादश &c.—द्वादशवर्षाणि भूतानि इति ठञ्। तद्धितार्थद्विगु। "वर्षस्याभविष्यति" इति उत्तरपदवृद्धिः। 12 years have passed from the commencement of the सत्र। Sita

was exiled the very day it commenced. Hence this is the 13th year of Sita's exile. 4. वल्मीकि &c.—It is not clear why Valmiki's hermitage was selected. The reason assigned is तदनुरोधात् i. e. because अरुन्धती and the queens do not like to go to Ayodhya. This is not suffient reason because वसिष्ठ has his own hermitage, he could have easily taken them over there to avoid to Ayodhya ; was it out of regard for Valmiki ?

(*xiii*) वासन्ती—अथ स राजा किमारब्धः सम्प्रति ?
आत्रेयी—तेन राज्ञा क्रतुरश्वमेधः क्रान्तः (आरब्धः) ।
वासन्ती – हा धिक् ! परिणीतमपि ।
आत्रेयी—शान्तं शान्तम् ।
वासन्ती—का तर्हि यज्ञे सहधर्मचारिणी ?
आत्रेयी—हिरण्मयी सीताप्रतिकृतिः ।
वासन्ती—हन्त भोः—

वज्रादपि कठोराणि मृदूनि कुसुमादपि ।
लोकोत्तराणां चेतांसि को नु विज्ञातुमर्हति ॥ ७ ॥

Vasanti—Well, how is that king engaged now ?
Atreyi—The sacrifice Asvamedha has been commenced by the King.
Vasanti—O shame ! wedded again !
Atreyi—Peace ! Peace !
Vasanti—Who then is the colleague at the sacrifice ?
Atreyi—A golden image of sita.
Vasanti—O joy !

Of the superhuman, who indeed is worthy enough to know the hearts that are harder than even adamant and softer than flowers even ?

मित्र—1. अथेति—'अथ' इति प्रश्न । 'राजा' इति रामस्य प्रजारञ्जनपरताया गर्हा । 'राजा' प्रकृतिरञ्जनात्' इति तु प्रसिद्धम् । प्रकृतिरञ्जनानुरोधात् प्रियामपि तदवस्थामपि पत्नीं परित्यजति अहो "राजा"—इति गर्हा । 'कः आरम्भः व्यापारः कर्म इत्यर्थः अस्य । वद—। एतदप्याक्षेपपरम् । कृतमेकमनेन जुगुप्सितं कर्म मन्ये अपरमपि तादृशमेव किञ्चित् प्रस्तुतम् इत्यभिप्रायः ॥ हा इति—'परिणीतम्' तेन इति कर्त्तृपदमुह्यम् । 'सस्त्रीको धर्ममाचरेत्' इति वचनात् अश्वमेधे अपरिहार्य्यं पत्नीसाहचर्य्यम्, तन्मन्ये पत्न्यन्तरं गृहीत्वा कृतं सीतापरित्यागानुरूपं कर्म्म तेन इति भावः ॥ का इति—'सह' एकत्र 'धर्म्मं' चरति या सा 'सहधर्म्मचारिणी (णिनि) । हिरण्मयीति—हिरण्यस्य विकारः हिरण्मयीति निपातनात् (मयटिपरे) यलोपः ॥ हन्त इति हर्षे अव्ययम् । वज्रादिति । अन्वयः—लोकोत्तराणां चेतांसि को नु विज्ञातुमर्हति ? तानि वज्रादपि कठोराणि कुसुमादपि मृदूनि (भवन्ति) । को नु (तानि) विज्ञातुमर्हति ?

व्याख्या—ये 'लोकात्' जगतः भूतलगतजनसमुदायादित्यर्थः 'उत्तराः' ऊर्द्ध्वतराः जगद्विलक्षणा इति यावत् तेषां 'चेतांसि' हृदयानि 'को नु कस्तावत् विज्ञातुं' विशेषेणज्ञातुम 'अर्हति' योग्यो भवति, न कोऽपि इत्यर्थः । अविज्ञेयत्वे कारणमाह—तानि च सति प्रयोजने कदाचित् वज्रादपि कठोराणि, लक्ष्यन्ते'तेन कठोरत्वेन विज्ञायन्ते । अन्यथा पुनः प्रयोजनभेदात् 'कुसुमादपि मृदूनि' दृश्यन्ते ततश्च मृदूतया विज्ञायन्ते । इत्थ मृदुत्वकठोरत्वादिविरुद्धधर्मोपेतानि तानि न मृदुतया न च कठोरतयाविज्ञातुं शक्यन्ते । रामोऽपि लोकोत्तर एव न हि प्राकृतो मानवः । अथ स सीतापरित्यागे यदि कठोरः, तस्या प्रतिकृतिग्रहणे नूनं मृदुः । तत् कथं ब्रूयां कठोरो रामो मृदुर्वा प्रकृत्या रामं प्रति कलुषतां परिहृत्य उदासीनतया स्थितिः ॥

1. राजा किमारम्भः—for force etc see मित्र above.

2. अश्वमेधः—मेध्यते हन्यते अस्मिन् इति मेध+घञ् अधिकरण—मेधः sacrfiice. अश्वस्य मेधः horse sacrifice.

3. परिणीतम् –परि+नी क भावे। Nom' तेन understood ; for reasons for the inference see मित—।

4. शान्तम्— Also अव्यय ending in म implying prohibition 'Do not say so" is the sense The duplication (द्विरुक्ति) implies आवेग impatience. Vasanti's inference is hasty and Atreyi impatiently checks her.

5. सह &c —धर्म्मं चरतीति धर्म्म+चर+णिनि कर्त्तरि स्त्रियाम् धर्म्मचारिणी। सह धर्म्मचारिणी, सुपसुपा।

6 हिरण्मयी -हिरण्यस्य विकार इति हिरण्य + मयट्=हिरण्मयः। स्त्रियां हिरण्मयी। The य of हिरण्य disappears by निपातन in the rule "दाण्डिनायन—।" This information surprises Vasanti. She sees the injustice her remark of and in joy exclaims इन्त भो &c.

7. लोकोत्तराणाम –उद् means उर्द्ध। अतिशयेन उत् इति उद्+तर उत्तरः higher लोक is लोकसमुदाय। लोकात् उत्तराः लोकोत्तराः occupying a level higher than that of men. तेषाम्! This उत्तर is different from उत्तर meaning 'north' Hence it is not a सर्वनाम and we have उत्तराः like दक्षिणाः as in दक्षिणाः गाथकाः। Also compare उत्तरे प्रत्युत्तरे च दक्षः।

8. कोनु—नु implies आक्षेप। Who can, i, e, I challenge if any body can. Hence Vasanti's harshness towards Rama is gone ; she admits she cannot judge him.

9. वज्रात् कुसुमात्—विभागे ५मी by the rule "पञ्चमी विभक्ते" It is usually called as उत्कर्षे ५मी as in पाटलिपुत्रात् माथुरा आढ्यतराः।

(*xiv*) आत्रेयी—विसृष्टश्च वामदेवाभिमन्त्रितो मेध्याश्वः उपकल्पिताश्च यथाशास्त्रं तस्य रक्षितारः, तेषामधिष्ठाता च लक्ष्मणात्मजश्चन्द्रकेतुः अवाप्तदिव्यास्त्रसम्प्रदायश्चतुरङ्गबलान्वितः प्रहितः ।

वासन्ती – (सस्नेहकौतुकास्रम्)—कुमारलक्ष्मणस्यापि पुत्रः । हन्त मातर्जीवामि ।

Atreyi—And the sacrificial horse has been let loose consecrated by Vamadeva , its guards too have been appointed in accordance with the sastras ; moreover Chandraketu the son of Lakshamana, who had received intiation in heavenly weapons, has been told off as their leader followed by a force in four divisions. Vasanti —(with tears of joy and affection) A son unto prince Lakshmana too. Hurra ! mother I am living.

मित —। विसृष्टइत्यादि—विसृष्टः मोचितः । वामदेवेन मन्त्रैरभिपूजितः 'वामदेवाभिमन्त्रितः । मेधं यागमर्हतीति मेध्यः.' यजियः अश्वः इत्यर्थः । उपकल्पिताः नियुक्ताः । यथाशास्त्रम्' शास्त्रानुसारतः । 'रक्षितारः' प्रत्येकं शतसंख्यादण्डिनः कवचिनोनिसङ्गिन इति । 'अधिष्ठाता' नायकः नेता इत्यर्थः । सम्प्रदीयते इति सम्प्रदायः गुरुपरम्परागतः समुपदेशः (कर्मणि घञ्) । अवाप्तः गुरोर्लब्धः दिव्यास्त्राणां गुरायुधानाम सम्प्रदायः उपदेशः येन सः । 'चतुरङ्गेन' हस्त्यश्वरथपदातसमन्वितेन बलेन सैन्येन अन्वितः अनुगतः । प्रहितः प्रेरितः । एतत्तुबलम् अश्वरक्षितृभ्यो भिन्नम् । अयमासीत् प्रयाणक्रमः —प्रथमम् अश्वः, ततस्तस्य रक्षितारः, पश्चाच्च चतुरङ्गबलान्वितश्चन्द्रकेतुः ॥ सस्नेहइत्यादि अस्रं नेत्रजलम् आनन्दजनितं जलमिति यावत् । स्नेहस्य कौतुकस्य हर्षस्य च यत् अस्रम् तेन सह 'कुमारलक्ष्मणस्यापि

पुत्रः' इति आनन्दहेतुः। हन्त इति हर्षे। अपि मातः यत्त्वया मांप्रति बाल्ये बहुशोऽभ्युक्तम् 'पुत्रि जीव' इति। अद्यजीवित्वा तत्सफलं मया प्राप्तम्। कुमारलक्ष्मणस्यापि पुत्रप्राप्तिं श्रुत्वा आनन्दानुभवः इति। तत् जीवामि इति महान् हि मे हर्षः। मृता चेत्स्याम् अद्यायमानन्दी न स्यात्।

1. वामदेव etc.—Vamadeva did the duty in the absence of Vasistha

2. रक्षितारः etc—शास्त्रमनतिक्रम्य यथाशास्त्रम्, अव्ययी। See IV. Para xlii "प्रत्येकं शतसंख्याः' etc. The duty of these was to guard the horse only.

3. अधिष्ठाता—The leader. Also Comp "वसिष्ठाधिष्ठिता देव्यः'' Act I. sl 3.

4. अवाप्त etc.—सम्प्रदाय may also be derived with—घञ् भावे without any material alteration of meaning.

5 प्रहितः—प्र+हि+क्त कर्मणि।

6 सत्रे ह etc.—कौतुक is हर्ष joy. स्नेहश्च कौतुकञ्च स्नेहकौतुके। द्वन्द्वः। तयोः अवसम्। तेन सह। तत् यथा तथा।

7. हन्त etc.—You wished me long life mother, and I am glad mother that I am living still. For joy has come to me today at the news of Lakshmana's son. Comp "प्रति जीवन्तमानन्दो वर्षशतादपि''—Live and you are bound to be happy some day.

(xv) आत्रेयी—अत्रान्तरे ब्राह्मणेन पुत्रमारोप्य राजद्वारि सोरस्ताडम् अब्रह्मण्यमुद्घोषितम् ततो "न राजापचारमन्तरेण प्रजास्वकालमृत्युश्चरति" इत्यात्मदोषं निरूपयति करुणामये रामभद्रे सहसैवाशरीरिणी वागुदचरत्—

शम्बूको नाम वृषलः पृथिव्यां तप्यते तपः।
शीर्षच्छेद्यः स ते राम तं हत्वा जीवय द्विजम्॥ ८॥

इत्युपक्रम्य कृपाणपाणिः पुष्पकं विमानमारुह्य—सर्वा दिशोविदिशश्च शूद्रताप-
-सान्वे षणाय जगत्पतिश्चरितु मारब्धवान् ।

वासन्ती—शूद्रः शम्बूको नाम धूमपः अस्मिन्नेव जनस्थाने तपश्चरति ।
तत् अपिनाम रामभद्रः पुनरपि इदं वनमलङ्कुर्यात् ।

Atryi—At this juncture a brahmana laying down his son's, deadbody at the royal gate shouted "murder" beating his breast. Thereupon as compassionate Ramabhadra was looking for some misconduct of himself, because untimely death does not prevail among people without lapse in the ruler, suddenly there arose a voice without a body—

The surdra samhuka is carrying or penance on earth, he has to be unhesitatingly beheaded by you ; O Rama, revive the Brahmana by killing him 8

Having heard this, the lord of the earth, sword in hand, mounting the aerial car Pushpaka has commeneed to scout in all the principal and secondary directicus for a search for the sudra ascetic

Vasanti—Asudra named Sambuka, practises penance in this very Janasthana inhaling smoke only Could it then be that Rambhadra would once again grace this forest ?

मित—। आत्रेतादि। 'अत्र' अस्मिन् अन्तरे अवकाशे मेघशब्-
दविसर्जनात परमित्यर्थः। 'मृतम्' पुत्रम्' 'राजद्वारि आरोप्य' राजद्वारस्य
पार्श्वस्थितायां वेदिकायां निधाय। 'उरसः' आत्मवक्षसः ताडः' ताडनं तेन
सह वक्षसि कराघातं कृत्वाइत्यर्थः। 'अब्रह्मण्यम् अवधारता उद्घोषितम्
"पुत्रशोकात् म्रिये त्रायस्वमाम्" इति उच्चरुच्चारितम्। ततः तदनन्तरं
तच्छ्रुत्वा इति भावः। 'राजन:' अपचारः दुर्व्यवहारः तेन अन्तरेण विना।
'चरति' प्रसरति। राजदोषेणैव अकाले प्रजा म्रियन्ते इत्यर्थः। 'इति' अतो
हेतोः 'आत्मदोषम्' कमपि आत्मनः स्खलनं निरूपयति पर्य्यालोचयति
सति 'करुणामये' ब्राह्मणेनसह समवेदने 'रामभद्रे' इति भावे सप्तमी। शरीरं

नास्ति किमपि । शरीरं नास्ति अस्या उत्पत्तिस्थानत्वेन इति अशरीरिणीवाक् आकाशवाणी इत्यर्थः तद्वत् आविर्भूता । कासावाणी इत्याह—शम्बूकेति । अन्वयः—सुगमः । व्याख्या—'हेराम् शम्बूको नाम वृषलः कश्चित्शूद्रः तपसि अनधिकारी इति शेषः 'पृथिव्यां त्वदीयराज्ये तपः तप्यते' चरति । अपचारीय परं प्रजासु तेन हि त्वयि । स अपचारवृत्तः शूद्रः 'ते शीर्षच्छेद्यः' शिरच्छेदेन नितंर त्वया खड्गहस्तेन दण्डनीयः । तं हत्वा द्विजं ब्राह्मनबालकं जीवय । तस्य हननेनैव ब्राह्मणबालको जीविष्यति इतिभावः । दण्ड्यः स इयन्तं कालंन दण्डितस्त्वया इत्येतन्मात्रस्ते अपचारः नाधिकः । इति इमां वाचमुपश्रुत्य आकर्ण्य कृपाणपाणिः' खड्गहस्तः जगत्पतिः रामः 'दिशः' पूर्वादयः । विदिशः उत्तरपूर्वादयः क्षीणाः चरितुमारब्धवान् । शूद्र इत्यादि । धमं धूममात्रं पिवति इति 'धूमपः' निराहार इत्यर्थः । तर्हि कठोरतरं तप इत्यमनुमीयते—कस्यचित् तरोः शाखया अवाक्शिरमाळम्बते तापसः । अधश्च तस्य भूमौ अग्निर्ज्वलति तदुत्थं धूमं स पिवति तेनैवानशनो जीवति । रामभद्र इति कोमलेन आख्यानपदेन रामं प्रति वासन्त्याः प्रसन्नतामापन्नं चेत इति गम्यते । तच्च हिरण्मयाः प्रतिकृतेः श्रवणादिति मन्तव्यम् । अलङ्कुर्य्यात् 'भूषयेत् आत्मन उपस्थित्या इति शेषः॥

1. **अब्रह्मण्यम्**—See Act I. Para ixxi, Here **अब्रह्मण्यम्** उद्घोषितम् is equivalent to **अब्रह्मण्यम् इति शब्दः उद्घोषितः ।**

2. **राजापचारम्**—अप + चर + घञ् भावे **अपचारः** misconduct. **राज्ञः अपचारः** miscondúcton the king's part. **तम् । अन्तरेण युक्ते द्वितीया ।**

3. **निरूपयति** – नि + रूप + णिच् स्वार्थे (चुरादि) + शतृ । **तस्मिन्** । Qual. **रामभद्रे** (भावे ७मी) । He was searching within himself for some lapse of his.

4. **करुणामये**—This epithet is used to imply that the pity was exeited at the plight of the Brahmana.

5. अशरीरिणी—शरीरम् अस्ति अस्या इति शरीर+इनि मत्वर्थे। न शरीरिणी। Speech cannot actually possess a body. It has the body for its source.

6. वृषलः—A Sudra. As such he was not eligible for practising severe penance. This seems to be a conservative view to us. ज्ञान and तपस्या are open to all. See Gita etc

7. पृथिव्याम्—That is to say in Rama's own kingdom, Hence the misdeed of the शूद्र to do severe तपस् indirectly affect) is king Rama also.

8. तप्यते etc.—Originally we had शम्बूकः तपः तपति with तपः as कर्म। If we went to imply ease in his practice of penance (सौकर्यद्योतन) we may treat तपः as कर्त्ता, but then कर्त्ता will have to be regarded as like कर्म by the rule 'तपस्तपः कर्मकस्यैव"। The लट् now is neither कर्त्तरि nor कर्मणि but कर्मकर्त्तरि, the form being तप्यते with यक्। The case is peculiar as तपः still has कर्मविभक्ति and not कर्त्तृविभक्ति as is usual (witness भिनत्ति काष्ठम् = काष्ठं भिद्यते) insuch cases

9. शीर्षच्छेद्यः—शीर्ष means शिरः head 'उत्तमाङ्गं शिरः शीर्षम्' इत्यमरः। शीर्षस्य छेदः। तं नित्यमर्हति इति शीर्षच्छेद+यत्=शीर्षच्छेद्यः one always deserving to be beheaded. Followers of Panini however suppose that शिरस् has here become शीर्ष in connection with 'यत्। Thus 'शिरच्छेदं नित्यमर्हति शीर्षच्छेद्यः। प्रत्यय सन्नियोगेन शिरसः शीर्षभावो निपात्यते''—Vritikara under the rule "शीर्षच्छेदात् यच्च"। Bhattoji also has the same.

13. ते—This is emphasised. त्वमेव you have to do it personally. It is the duty of the king to punish sinners hence you have to punish him that without fail (नितान्म्)।

11. विदिशः—विभिन्ना दिगभ्यः विदिशः (विदिश् is the प्रातिपदिक) other than the four cardinal points i, e., the intervals between consecutive cardinal points. "दिशोर्मध्ये विदिक् स्त्रियाम्"। चरः। चर is सकर्मक। Comp. "तपश्चरति उभौ लोकौ सञ्चरति धर्मांश्च अमुत्र देवल" etc.

(*xvi*) आत्रेयी—भद्रे गम्यतेऽधुना ।

वासन्ती—आर्य्ये आत्रेयि' एवमस्तु । कठोरीभूतस्तु दिवसः । तथाहि—

कण्डूलद्विपगन्डपिण्डकषणोत्कम्पेन सम्पातिभि-
र्घर्मस्रंसितवन्धनैः स्वकुसुमैरर्चन्ति गोदावरीम् ।
छायापस्किरमाणविष्किरमुखव्याकृष्टकीटत्वचः
कूजत्क्लान्तकपोत कुक्कुटकुलाः कूले कुलायद्रुमाः ॥९॥

(इति निष्क्रान्ते) ॥ विष्कम्भक ॥

Atreyi—Gentle friend I go now.

Vasanti—Be it so noble Atreyi, but the day has avanced. Thus (as you see)—Nesting trees on the bank, on which rest flock of weiry pigeons and of wood-cocks cocking and from the bark of which worms are pulled out with their beaks by birds scratching the trunk in the shade, are worshipping Godavari with their own flowers which have their stalks loosened by the heat drop through the shake given by the rub of the itching lumps on the cheeks of elephants 9 (Exuent) Here ends the Vishkambhaka

मित—कठोरीभूतः' प्रौढतामापन्नः । मध्याह्नो वर्त्तते इत्यर्थ । कण्डूलेति । अन्वयः छायापस्किरमाणविस्किरमुखव्याकृष्ठकीटत्वत्वः कूजत्क्लान्तक-पोतकुक्कुटकुलाः कूले कुलायद्रुमा घर्मस्रंसितवन्धनैः कण्डूलद्विपगन्डपिण्डकषणोत्कम्पेन सम्पातिभिः स्वकुसुमैः गोदावरोम् अर्चन्ति । व्याख्या—पञ्च प्रखरं रविकरं परिहृत्य 'छायासु अपस्किरमाणाः' भोज्यसंग्रहाय नखैरितस्तत अवकेखनतत्पराः ये विसकिराः' पक्षिणः तेषां मुखैः चञ्चुभिरिति यावत् 'व्याकृष्टाः बहिर्निष्काशिताः कीटाः याभ्यः तादृश्यः त्वचः' वल्कलानि येषां तथाविधा', किञ्च कूजन्तः' रुवन्तः क्लान्ताः आतपखिन्नाः ये कपोताः कुक्कुटाश्च तेषां कुलानि समूहा येषु तादृशाः ये कूले तटस्थिता कुलायद्रुमाः' पक्षिणाम्

आवासवृक्षाः ते, घर्मेण आतपेन स्रंसितं शिथिलितं बन्धनं वृन्तं येषां तैः अतएव' कण्डूलानां कण्डूतियुक्तानां द्विपगण्डपिण्डानां वनगजगण्डस्थलीनां यत कषणं घर्षणं ततो यः उत्कम्पः दोलनं तेन 'सम्पातिभिः' बन्धशैथिल्यात् पतद्भिः स्वकुसुमैः निजपुष्पराशिभिः गोदावरीम् अर्चन्ति पूजयन्ति, मध्याह्नकृतं गोदावर्य्याः कुर्वन्ति। एवमातपखिन्नाः पक्षिणो गजा वृक्षाश्च। भवत्या पुनरध्ववाहने अध्यवसायः। तत् शनैः शनैः खेदं परिहृत्य गम्यताम् इति भावः॥

'विष्कम्भक' इति कथांशानां योजकः ("वृत्तवर्त्तिष्यमाणानां कथांशानां निदर्शक। संक्षिप्तार्थस्तु विष्कम्भ आदौ अङ्कस्य दर्शितः' ॥)

NOTES

1. कण्डूल etc.—कण्डू is itch. कण्डूं लाति इति कण्डू+ला+क कर्त्तरि=कण्डलौ prompting itch गण्डयोः पिण्डौगण्डपिण्डौ two lumps on the checks. द्वाभ्यां पिवन्ति इति द्वि+पा+क कर्त्तरि= द्विपाः elephants द्विपानां गण्डपिण्डौ द्विपगण्डपिण्डौ। कण्डूलौ द्विपगण्डपिण्डौ itchy lumps of cheeks of elephants. उत्कम्प is due to कषण। कषणात् उत्कम्पः। Or—कषणस्य उत्कम्पः। षष्ठी। Or हेतु। द्विपगण्डपिण्डयोः कषणोत्कम्पः। तेन। हेतौ तृतीया। It is the हेतु of सम्पतन।

2. सम्पातिभिः—साधु सम्पतन्ति इति सम+पत+णिनि साधुकारिणि कर्त्तरि सम्पातीनि inevitably falling. The reason is they are already loosened from their stalks by the heat, and then the shake given by the elephants drop them.

3. घर्म etc—स्रंस+णिच+क्त कर्मणि - स्रंसितानि loosened. घर्म is heat घर्मसंस्रितं बन्धनं येषाम् &c तादृशैः कुसुमैः।

4. छाया etc—अप+कृ+शानच् कर्त्तरि अपस्किरमाणाः scratching the cover off inquest of food. Here we have आत्मनेपद by the Varttika "किरतेहर्षजीविकाकुलायकरणेषु इति वक्तव्यम्"। जीविकाकरण is भक्ष्यसंग्रह। Next सुट comes in before क by the rule 'अपात् चतुष्पाच्छकुनिषु आलेखने"। क्ष्याकृष्टकीट indicates भक्ष्यसंग्रह। The worms are their food, See मित—।

5 कूजत् etc—The reading कान्त for क्लान्त has little to recommend it कान्तता of the birds seems irrelevant in describing the effects of the solar heat क्लान्त is preferable

6 कुलाय &c —The कुलाय here refers to the bird only. They were out in quest of food and have now come back oppressed by the heat

7 Remark—The verse describes the effects of heat कण्डूल &c is to show that elephants have come back to the shade after the fore-noon grazing घर्म्म &c describes the effects on trees in general छाया &c and कूजत् etc explain how birds are affected All this is to warn Atreyi of the risk she was running by venturing out in a sun that so much affects birds, beasts and trees in the forest She has to proceed carefully The time evidently was summer

8 विष्कम्भक —Sometimes the connection between what is about to follow and what has gone before is shown by something like an introduction to the Act following This introduction is called विष्कम्भक (see मित—here and our Sakuntalam Act III P. 2/7)

(*XVIII*) (ततः प्रविशति सदयोद्यतखड्गो रामचन्द्रः)।

राम —रे हस्त दक्षिण मृतस्य शिशोर्द्विजस्य
जीवातवे विसृज शूद्रमुनौ कृपाणम्।
रामस्य गात्रमसि दुर्वहगर्भखिन्न-
सीताविवासनपटोः करुणा कुतस्ते ॥ १० ॥

(कथञ्चित् प्रहृत्य) कृतं रामसदृशं कर्म्म। अपि जीवेत् स ब्राह्मणशिशुः ?

14

(Then enters Ramabhadra with raised sword but overcome by pity).

Rama—

Heigh Right-hand, drop the sword on the Sudra ascetic for the resuscitation of the dead boy of the Brahmana. You are the limb of Rama, who easily banished Sita, drooping under her hardly bearable womb, whence can there be pity in you? (10).

(Striking with great unwillingness) A deed is done becoming Rama. Would the Brahmana boy revive?

मित—। सदयेति। 'दयया' सह उद्यतः उच्छ्रितः उन्नमितः 'खड्गो' येन यस्य वा इति। अन्वयः—रे दक्षिण हस्त, द्विजस्य मृतस्य शिशोः जीवातवे शूद्रमुनौ कृपाणं विसृज। दुर्वहगर्भखिन्नसीताविवासनपटोः रामस्य गात्रमसि, कुतस्ते करुणा। व्याख्या—'रे दक्षिण हस्त द्विजस्य' ब्राह्मणस्य शिशोः जीवातवे' जीविताय जीवनाय ['जीवातुरस्त्रियां भक्ते जीविते जीवनौषधे" इति मेदिनी। तादर्थ्ये चतुर्थी] 'शूद्रमुनौ कृपाणं विसृज खड्गं पातय। 'दुर्वहेण' अतिगुरुणा 'गर्भेण खिन्ना' तद्वहनक्लिष्टा या 'सीता' तस्याः यत् 'विवासनं' वने वनवासनं तत्र पटोः निपुणस्य अक्लेशेन तदवस्थामपि सीतां त्यक्तवतो 'रामस्य गात्रम् असि तत् 'कुत' ते करुणा नास्त्येव करुणा, अतो 'विसृज शूद्रमुनौ कृपाणम्। एतत्र प्रहारकाले आत्मनि करुणासञ्चारमनुभूय हस्तं प्रत्याह। कथञ्चिदिति—'कथञ्चित' अतिक्लेशेन करुणानभिभूय इत्यर्थः। रामस्य, सदृशम्'। प्राक् निरपराधा पत्नी परित्यक्ता सम्प्रति निरपराधो मुनिर्निहतः। अन्योऽन्यानुरूपमेवैतत् द्वयम् इति भावः।

NOTES

1. सदय &c—सदयम् उद्यतः सदयोद्यतः raised with pity. तादृशः खड्गो यस्य, बहु—। 2. जीवातवे—जीव to live+आतु भावे=जीवातुः (masc.) living, i.e, coming back to life. तस्मै। The word is both masc. and neuter. 4. प्रकृत्य—The

blow kills the ascetic. This is against stage etiquette which prohibits the staging of death &c. 4. जीवेत्—सम्भावनायां लिङ्। अपि adds शङ्का to the सम्भावना। Would he revive i.e., I am not sure if he would.

(*XXI*) (प्रविश्य) दिव्यपुरुषः—जयति जयति देवः।

दत्ताभये त्वयि यमादपि दण्डधारे
सञ्जीवितः शिशुरसौ मम चेयमृद्धिः।
शम्बूक एष शिरसा चरणौ नतस्ते
सत्सङ्गजानि निधनान्यपि तारयन्ति ॥ ११ ॥

(Entering) A Divine Being—Prosper, Sire, Prosper.

With protection even from Yama promised, thou inflicting punishment, that child has revived and mine too is this glory. This is Sambuka, bowed down to thy feet with his head. Resulting from contact with the good, even execution saves (Liberates) beings !. 11.

मित—। देवेति। शम्बूकः—एष शम्बूकः शिरसा ते चरणौ नतः। यमादपि दत्ताभये त्वयि दण्डधारे (सति) असौ शिशुः सञ्जीवितः मम च इयमृद्धिः। सत्सङ्गजानि निधनान्यपि तारयन्ति। व्याख्या—'एष' अयमहं शम्बूकः शिरसा ते चरणौ नतः मूर्ध्ना ते पादौ नमामि। क शम्बूकः। कुत पुनस्ते दिव्यं वपुः इत्याह—यमादपि अभयं भयाभावः 'दत्तं अभयं येन तादृशे अचिन्तनीयप्रभावे 'त्वयि दण्डधारे स्वहस्तेन शासितरि सति 'असौ शिशुः ब्राह्मणबालकः 'सञ्जीवितः यमात् मोचितः प्राणसंयुक्तो जातः, अस्मात् पुनः 'मम च ममापि इयम् ऋद्धिः एषा दिव्यदेहलाभरूपा सम्पत्। देहत्यागात् देवत्वम् इति नैतदाश्चर्यमित्याह—'सतां साधूनां 'सङ्गात्' समागमात् 'जातानि निधनानि अपि' देहपाता अपि तारयन्ति जीवानभ्युदयेन न नाशयन्ति। तद् सत्संयोगे देहपातो मे प्रकृष्टलोकलाभायैव जात इति भावः॥

1. दिव्य &c.—दिवि भवं इति दिव + यत् - दिव्यः। Hence Rama did not at sight know who he ([illegible]) was. 2. यमात्—पञ्चमी in

connection with **अभय** by "**भीत्रार्थानां भयहेतुः**" । 3. **दण्डधारे—दण्डं धारयति इति दण्ड+धारि+अण कर्त्तरि—दण्डधारः** personally inflicting punishment. **तस्मिन्** । 4. **सञ्जीवितः**—This removes Rama's doubt about the revival of the boy, **शम्बूक** knows of this revival because he is **दिव्यपुरुष** now, 5. **ऋद्धिः**—Prosperity. The punishment secures me a promotion. This refers to his resplendent frame (**दिव्यदेह**) । 9. **निधनानि—नि+धा+क्यु भावे=निधन** death. Even death is life 7. Remark—It seems the thought is improved if we transpose the halves of the verse. The salutation should be the first act on meeting the king. Hence—**जयति जयति देवः । शम्बूक एष शिरसा चरणौ नतस्ते** seems quite natural. Besides unless **परिचय** precedes, **मम चेयमृद्धि** is unintelligible.

(*XX*) रामः—द्वयमपि प्रियंनः । तदनुभूयतामुग्रस्य तपसः फलम् ॥—यत्रानन्दाश्च मोदाश्च यत्र पुण्याभिसम्भवाः ।
वैराजा नाम ते लोकास्तैजसाः सन्तु ते ध्रुवाः ॥ १२ ॥

Rama—Both are joy to me. So enjoy the fruit of your grim austerities.

May those luminous regions, secured by merit and known as Vairaja, where there is bliss and where there is joy, be yours for ever. (12),

मित—। द्वयमिति। शिशो सञ्जीवनं तव च ऋद्धिः इति द्वयम् ॥ तदेव तपःफलं दर्शयति—यत्रेति। अन्वयः—यत्र आनन्दाश्च यत्र मोदाश्च ते पुण्याभिसम्भवाः वैराजा नाम तैजसाः लोकाः ते (तव) ध्रुवाः सन्तु । (तव) ध्रुवाः सन्तु । व्याख्या—'यत्र' येषु लोकेषु 'आनन्दाश्च' सुखानि च 'मोदाश्च' हर्षा अपि 'अनुभूयन्ते ["यत्रानन्दाश्च तत्र मामसृतंकृधि" इति यथा,] 'ते' प्रसिद्धा पुण्याभिसम्भवा,' सुकृतिभिर्जिताः उग्रस्य तपसः फलरूपाः 'वैराजा नाम वराजशब्देन आख्याताः तैजसा' ज्योतिर्मयाः लोका

ते तव सम्बन्धे 'ध्रुवाः' सन्तु स्थिरा भवन्तु। मा ते तेभ्यः कदापि प्रच्युतिर्भूत्। लोकास्ते सिद्धास्तपोभिः, आशासे ध्रुवास्ते भवन्तु इति भाव।

Notes :—1. आनन्दाः—आनन्द here is bliss, सुखप्रवाह। 2. मोदाः—मोद is हर्ष joy. पुण्याभिसम्भवाः—पुण्य is तपस्। अभि+सम्+भू+अप् अपदाने=अभिसम्भव that from wich something develops i e sources. पुण्यम् अभिसम्भवः एषाम्। The regions (वैराज) are secured by merit (पुण्य)। 4. वैराजाः—विशेषेण राजन्ते इति वि+राज+क्विप् कर्त्तरि=विराज् the eternal soul. तस्य इमे इति विराज्+अण्=वैराजा 5. तैजसाः—तेजसइमे=तेजस्+अण तैजसाः luminous. 6. सन्तु &c This embodies Rama's wish (आशंसा) on behalf of शम्बूक। आशंसायां लोट्। This seems out of place because the regions are described as तपसः फलम् hence they are independent of Rama's आशंसा। Their permanency too is assured by तपस्। शम्बूक himself in the next para saying एष महिमा takes everything as already achieved and leaves nothing to आशंसा। In fact सन्तु here appears to be copyists' slip for सन्ति। With सन्ति construe वराजा नाम ध्रुवाः, तैजसा लोकाः तेसन्ति। Explain वैराजाः नाम ध्रुवाः नित्याः, तजसा लोकाः सन्ति तप·सिद्धा वर्त्तन्ते। Those regions await you, go and enjoy अनुभूयताम् उग्रस्य तपसः फलम्। Translate—these luminous eternal regions, secured by merit where there is . . joy, are assured unto you. 7, Remark.—The reading यत्रानन्दाश्च मोदाश्च यत्रपुण्याश्च सम्पदः is rejected because it goes against the प्रक्रम here. The verse begins with a यत्र and a च in the first predication. This style should be preserved if possible. It is seen preserved in the last statement यत्र

युष्माकं सम्पदः । Hence भोक्तव्य instead of मम भोक्तव्य is objectionable.

(*XXI*) शम्बूकः—युष्मत्पादप्रसादोपाय एष महिमा न तु तपसः फलम् । अथवा महदुपकृतं तपसा ।

अन्वेष्टव्यो यदसि भुवने भूतनाथः शरण्यो
मामन्विष्यन्निह वृषलकं योजनानां शतानि ।
क्रान्त्वा प्राप्तः स इह तपसां सम्प्रसादोऽन्यथा चेत्
क्वायोध्यायाः पुनरुपगमो दण्डकायां वने वः ॥ १३ ॥

Sambuka—This greatness has the favour of thy revered self for its source, and is not surely the result of penance. Or a great service has been rendered by penance.

That thou, the lord of beings, the refuge, the one to be sought after in the world, has come here having done hundreds of *yojonas* seeking me, this is the favour of penance in this matter. If otherwise, where is thy presence again in the forest of Dandaka from Ayodhya. 13

मित— । युष्मदित्यादि । मान्या यूयं 'युष्मत्पादाः' ("प्रशंसावचनैश्च" इति समासः) । युष्मत्पादानां भवतां नः 'प्रसादः' अनुग्रहः स एव 'उपायः' पन्थाः आगममार्गः यस्य तादृशः 'एष महिमा' अयं मे महान् उत्कर्षः । अथ भवान् मयि न प्राहरिष्यत् लोकानहं न प्राप्स्यम् । तत् भवदनुग्रहान्मे लोकप्राप्तिः न हि तपसा इत्यर्थः ॥ अन्वेष्टव्य इति । अन्वयः—इह भूतनाथः शरण्यः भुवने अन्वेष्टव्यः असि, वृषलकं माम् अन्विष्यन् योजनानां शतानि क्रान्त्वा इह प्राप्तः (इति) यत् स तपसां सम्प्रसादः । अन्यथा चेत् अयोध्यायाः दण्डकायां वने वः पुनरुपगमः क्व ? व्याख्या—'इह' अस्मिन् विषये मम लोकप्राप्तौ इति यावत् 'भूतनाथः' जगदीश्वरः 'शरण्यः' जगत्त्राता अतएव 'भुवने' जगति 'अन्वेष्टव्यः'

परमसंशयत्वेन योगिभिरपि विवेक्तव्यः। मानवदेहेन गूढस्वरूपः सन् न अन्विष्यसे अन्वैष्यथा वा किन्तु सम्प्रति दिव्यरूपोऽहं जानामि अन्वेष्टव्य इति। एवंविधः असि त्वम् (अव्ययमेतत् त्वमर्थे) (यद्वा—'प्राप्तः असि' इति योज्यम्) 'वृषलक' असत्यपि अधिकारे तपश्चरन्तं कुत्सितं वृषलं शूद्रं माम् अन्विष्यन्' विचिन्वन्' 'योजनानां शतानि क्रान्त्वा' अतिक्रम्य इह अस्यां दण्डकायां 'प्राप्तः' आगतः इति यत्स तपसां सम्प्रसादः' अनुग्रह.। 'अन्यथा चेत् यदि विपरीतं स्यात् तपश्चेत् नाचरितम् अयोध्यायाः दण्डकायां वने सुदूरे दण्डकारण्ये 'वः पुनः उपगमः क्व पुनरागमनं कुत्र स्थितम्। असम्भवः उपगम इत्यर्थः। ममास्मिन्नभ्युदये भवता दण्डपातनं हेतुः। दण्डपातने पुनः तपो हेतुः। अत उच्यते मया "महदुपकृतं तपसा" इति ॥

NOTES

1. युष्मत &c — पाद is प्रशंसावचन। "हस्तपाशतटाः पादपाळीमर्चिक्काद्रयः" so says गणकार। But it is प्रशंसावचन only when final in a compound Hence uncompounded it does not imply प्रशंसा। Thus no वाक्य with पाद can be given, consequently we have a नित्यसमास with अस्वपदविग्रह। प्रशस्ता यूयंयुष्मत्पादः। उपेयते फलं प्रत गच्छति अनेन इतिउप इण्‌घ (or अय घञ्) करणे उपाय means. Now see मित— । 2. महिमा—महतो भाव इति महत्+इमनिच=महिमा greatness, i. e. accession to divine status. 4. उपकृतम् उप + कृ + क्त भावे। 5. अन्वेष्टव्यः &c—अनु + इष + तव्य कर्मणि to be sought after. The तव्य is significant. The whole world has to search for you—"has to" search, not that it "has searched or "is searching." This is because no one knows you yet as भूतनाथ, and शरण्य screened as you are in human frame I know because I am divine now. भूतनाथ and शरण्य explain why अन्वेष्टव्य। असि—अव्यय meaning त्वम। Or consture प्राप्तः असि। 7. वृषलकम—कुत्सितो वृषल इति

वृषक+कन् कुत्सिते। 8. स इह etc.—स is masculine because it goes with सम्प्रसादः which is the विधेय and prominent (विधेयप्राधान्यात्) । इह refers to the matter in hand, i.e the lift of शम्बूक। 9. दण्डकायाम्—Both दण्डक and दण्डका are seen,

(XXII) रामः—किं नाम दण्डकेयम्। (सर्वतोवलोक्य) आम्।

स्निग्धश्यामाः क्वचिदपरतो भीषणाभोगरूक्षाः
स्थाने स्थाने मुखरककुभो झाङ्कृतैर्निर्झराणाम्।
एते तीर्थाश्रमगिरिसरिद्गर्त्तकान्तारमिश्राः
सन्दृश्यन्ते परिचितभुवो दण्डकारण्यभागाः ॥ १४ ॥

Rama—Really is this the Dandaka? (Looking round) Yes—

These I see before me are tracts of the Dandaka forest—a jumble of watering-places, hermitages, hills, streams, lakes, woods, of which the grounds are familiar——somewhere attractively blue—elsewere repulsive in their awful expanse—in places again resounding the quarters with the wash of rushing springs. 14.

मित—। किं नामेति—किं प्रश्ने। 'नाम' सम्भाव्ये। वितर्के पर्य्यवसानम् दण्डका न वा इति वितर्कः। 'आम्' इति प्रतिवचनावधारणयोरव्ययम्—इह अवधारणे। दण्डकैव इत्यवधारणम्॥ अवधारणस्य समर्थनमाह स्निग्धेति। अनवयः—एते परिचितभुवःतीर्थाश्रमगिरिसरिद्गर्त्तकान्तारमिश्राः (अतएव) क्वचित् स्निग्धश्यामाः अपरतः भीषणाभोगरूक्षाः स्थाने स्थाने निर्भराणां झाङ्कृतैः मुखरककुभः दण्डकारण्यभागाः सन्दृश्यन्ते। व्याख्या—'एते' पुरोवर्त्तिनः 'परिचिता' दृष्टपूर्वा 'भुः' येषां तादृशाः विदितसन्निवेशा 'तीर्थैः जलावतार 'गिरिभिः शैलैः सरिद्भिः नदीभि गर्त्तैः विलैः सरोभिरित्यर्थ कान्तारैः वनैश्चमिश्राः' सङ्कुलाः अक्रमसन्निविष्टैस्तीर्थादिभिः परिव्याप्ताः अतएव क्वचित् स्निग्धश्यामा' निविडतरुराजिभिः

प्रसन्नहरिताः 'अपरतः' स्थानान्तरे 'भीषणेनभीमेन महता इत्यर्थः आभोगेन' विस्तारेण रूक्षा' अप्रियदर्शनाः स्थाने स्थाने 'निर्झराणां' वारि-प्रवाहाणां झाङ्कृतैः अब पतनशब्दैः मुखरा' निनादिता 'ककुभ' दिशः येषु तादृशा दृण्डकारण्यस्य भागा प्रदेशा. सन्दृश्यन्ते लक्ष्यन्ते ॥

NOTES

1. स्निग्धश्यामा' = स्निह + क्त कर्त्तरि = स्निग्ध lit wet, here attractive. श्याम blue, here green, स्निग्धाश्च ते श्यामाश्च attractively green through an exuberance of foliage 2. भीषण &c.—आभोग is पूर्णता full extension "पूर्णत्वायततावाभोगौ" इत्यनेकार्थः। भीषणाभोगः' कर्म्मधा—। तेन रूक्षा, सप्रुषा। A vast expanse of a monotoneus nature is not at all pleasant. स्थाने स्थाने—At proper places, i.e places where the springs form something like water-falls. Hence here is अवधारण and "स्वार्थे अवधार्य्यमाणे—" इति द्विर्वचनम्। वीप्सा is not intended because that would make all places resound with the noise of water-falls 4 झाङ्कृतैः—झाङ् is an imitation of the splash an onomatopoeia—अनुकरणशब्द। It is a गतिसंज्ञक word by the rule "अनुकरणञ्चानितिपरम"। झाङ+कृ+क्तभावे = झाङकृतानि utterance of the sound झाङ् गतितत्पुरुष। 3. तीर्थ &c—गर्त्त literally is a hole बिल। It stands for natural lakes. In some parts of Bengal these lakes still go by the name of बिल। मिश्रान्ते इति मिश्र + णिच स्वार्थे (चुरादि) + क्तकर्म्मणि = मिश्राः jumbled up. तीर्थ, आश्रम, गिरि &c are all in a confused mass here Hence here स्निग्धश्यामाः there भीषणभोगरूक्षाः, elsewhere मुखरककुभः। 9. Remark—The verse is ordinarily construed thus—क्वचित् स्निग्धश्यामाः अपरतः भीषणाभोगरूक्षाः स्थानेस्थाने निर्झराणां झाङ्कृतैः मुखरककुभः

शीर्णश्रमनिर्झरिदुर्मर्झन्तारम्मिश्राः परिचितभुवः प्रत्येकदण्डकारण्यभाग्या-स्तम्यन्ते । This ignores the force of the different attributes in the verse. We have therefore altered the Prose Order.

(*xxii*) शम्बूकः—दण्डकैवेयम् । अत्र किल पूर्वं निवसता देवेन—

चतुर्दश सहस्राणि रक्षसां भीमकर्मणाम् ।
त्रयश्च दूषणखरत्रिमूर्धानो रणे हताः ॥ १५ ॥

तेन सिद्धक्षेत्रे जनस्थाने मादृशानामपि भीरुजनानाम् अकुतोभयः सञ्चारो जातः ।

Sambuka—This indeed the Dandaka. Formerly, by Sire, living here, we are told (Or—to be sure)—

Were killed at fight fourteen thousand of Rakshasas of dire deeds , also the three—Khara, : Dushana and Trimurdhan (Trisiras) 15.

Whence in Janasthana the land of those that are successful at penance, fearless passage has been secured even unto timid people like myself.

मित—। 'किल' इति, वार्त्तायाम् अवधारणे वा 'पूर्वं हताः' पूर्वं निवसतां इति वा अन्वय ॥ 'सिद्धानां तपःसिद्धानां 'क्षेत्र' तपश्चरणभूमि. यत्र तपस्तप्त्वा सिद्धा भवन्ति तत् ॥ मादृशां भीरुजनानामपि इत्यन्वयः । अविद्यमानं कुतोऽपि भयं यस्मिन् 'सञ्चार' विचरणं स 'जातः' सम्पन्नः ?

Notes :—1. मादृशानाम्—अहमिव दृश्यमानाः मामिव आत्मानं पश्यन्ति इति अस्मद्+दृश+कञ् कर्मकर्त्तरि = मादृशः । तेषाम् । 2. अकुतोभयः—This is a तत्पुरुष (by निपातन् in the मयूरव्यंसकादि class) although the वाक्य (see Mitabh—) tempts one to call it बहुव्रीहि । Qual. सञ्चारः ।

(*xiv*) रामः—न केवलं दण्डका, जनस्थानमपि ।

शम्बूकः—बाढ़म् । एतानि खलु सर्वभूतलोमहर्षणानि उन्मत्तचण्डश्वापदकुलसङ्कुलगिरिगह्वराणि जनस्थानपर्यन्तदीर्घारण्यानि दक्षिणां दिशमभिवर्त्तन्ते । तथाहि—

निष्कूजस्तिमिताः क्वचित् क्वचिदपि प्रोच्चण्डसत्त्वस्वनाः
स्वेच्छासुप्तगभीरघोषभुजगश्वासप्रदीप्ताग्नयः ।
सीमानः प्रदरोदरेषु विलसत्स्वल्पाम्भसो यास्वयं
तृष्यद्भिः प्रतिसूर्यकैरजगरस्वेदद्रवः पीयते ॥ १९ ॥

Rama—Janasthana too, not Dandaka alone.

Samb—Certainly These are indeed the long lines of forests at the outskrits of Janasthana, stretching away to the south (that put up the hair of all beings on end), where the mountain-dens are full of mad and ferocious beasts of prey, Thus (here are)—

The borders, where a little water shines at the bottom of mountain clefts and yet this running sweat of the python is drunk by thirsty lizards, are somewhere still and noiseless, elsewhere again, though full of terrible roars of wild beasts have fire kindled by breath of deep-throated snakes sleeping at ease.

मित –। 'बाढ़म् इदम् जनस्थानमपि । 'बाढ़म्' इति अनन्तरोक्तं द्रढयति । ("बाढ़ं दृढे प्रतिज्ञायाम्" इति विश्वः) 'एतानि दृश्यमानानि 'खलु जनस्थानस्य' यः पर्य्यन्तः' प्रान्तभागः तत्र स्थितानि 'दीर्घारण्यानि सुदूरप्रसृतानि काननानि दक्षिणां दिशम् अभिवर्त्तन्ते तां प्रति गच्छन्ति । किम्भूतानि अरण्यानि—'सर्वभूतानां लोमहर्षणानि' भयङ्कराणि' । पुनः किम्भूतानि ?—'उन्मत्तैः' मदोदग्रैः चण्डैः' प्रकृतिकोपनैः 'श्वापदकुलैः संकुलानि' व्याप्तानि 'गिरिगह्वराणि' येषु तादृशानि दीर्घारण्यानि । लोम-

हृषणत्वं दर्शयति निष्कूजेति। अन्वयः—प्रदरोदरेषु विलसत्स्वल्पाम्भसः सीमानः—याह तृष्यद्भिः प्रतिसूर्य्यकैः अयम् अजगरस्वेदद्रवः पीयते —क्वचित् निष्कूजस्तिमिता क्वचित् प्रोच्चण्डसत्वस्वनाः अपि स्वेच्छासुप्तगभीरघोषभुजगश्वासप्रदीप्ताग्नयः। व्याख्या— प्रदरोदरेषु विलग्नेषु 'विलसन्ति प्रकाशमानानि 'स्वल्पानि अम्भांसि जलानि याह तादृशः 'सीमानः' प्रान्तभुमयः—याह' सीमसु तृष्यद्भि पिपासितैः प्रतिसूर्यकैः' कृकलासैः अयम्' एष 'अजगराणां सर्पाणां स्वेदद्रवः' प्रवाहेण स्रवत् प्रभूतं घर्म्मजल 'पीयते' प्रदरस्थस्य जलस्य स्वल्पतया तत् परित्यज्य प्रभूतमिदं घर्म्मजलं पीयते तादृशयः सीमानः—क्वचित् क्वापि 'निष्कूजास्तिमिताः निश्चलाश्च प्राणिपरिस्पन्द-विरहात् निःशब्दा क्वचित् कुत्रचित् पुन 'प्रोच्चण्डः' अतिभीमाः सत्त्वस्वना. सिंह व्याघ्रगजादिगर्जनानि याह ताद्दशयः 'अपि स्वेच्छया यथेच्छं 'सुप्तानां गभीरघोषाणां' गुरुगर्जनानां भुजगानाम्' अजगराणां श्वासेन सविषेण निश्वासवायुना 'प्रदीप्तः अग्निः' याह (यद्वा— 'भुजगश्वास एव प्रदीप्तः अग्नि' याह तादृश्यः दृश्यन्ते। क्वचित् "निस्कम्पवृक्षा निभृतद्विरेफा मूकाण्डजाः शान्तमृगप्रचाराः" चित्रार्पिता इव सीमानः, अन्यत्र श्वापदानां भैरवरवः तथापि सुप्तमुप्ता अजगराः गुरु च तेषां निःश्वासगर्जनं नासाविवराच्च वायुना सह निःसृतः प्रदीप्तो वह्निः, सुप्तानां प्रवहत् घर्म्मजलञ्च पीयते कृकलासैः इति परकाष्ठा भयानकस्य ॥

Notes.—1. **वाढम्**—वाह + क्त कर्म्मणि = वाढ admitted. This is an emphatic confirmation. Certainly this is Janasthana. Some take this as an **अव्यय** ending in **म**। But the **चादि** and **स्वरादि** lists do not include it However, as those lists are only illustrative not exhaustive (**आकृतिगण**), we may treat it as an अव्यय implying **उक्तिदार्ढ्य**। 2. **सर्वभूत** &c — **लोमानि हृष्यन्ते एभि. इति लोमन् + हृषं + णिच् + ल्युट्करणे = लोमहर्षणानि** those that raise the hairs on end i. e., terrible. 3. **उन्मत्त** &c. **उन्मत्त** refers to a temporary display of temper, **चण्ड** speak

of their nature. Hence उन्मत्त &c. means—ferocious beasts in a stae of excitement, शुनः पदमिव पदमेषां श्वापदाः । श्वपद् is expected, but "शुनो दन्तदंष्ट्राकर्णकुन्दवराहपुच्छपदेषु दीर्घो वाच्यः" lengthens the vowel yielding श्वापदाः । Now see Mitabh. 4. जनस्थान &c —परिगतः अन्तः पर्यन्तः the border-land. Now see Mitabh. 5. निष्कूज &c.—The very stillness is awful. क्वचिदपि—Here again we have differed from commentators and taken अपि with what follows thus completely altering the sense of the verse we believe this is an improvement, 7. प्रोच्चण्ड &c —For समास see Mitabh—The uproar does distrub the huge snakes. See next 8. स्वेच्छा etc—स्वेच्छासुप्त shows that they were sleeping undisturbed by the howling of the beasts of prey ; गम्भीरघोष shows that the snakes were adding to the noise. The breathing of snakes is noisy. श्वासप्रदीप्तानि may be taken in two ways as suggested in the Mitabh—. It may mean that fire was lighted by their breathing, or that the breath itself was blazing fire. The latter is preferable, because with the first explanation we get a forest-fire which will at once rouse the अजगर and cause a general stampede among beasts and birds. 9. विलसत् &c.—The water was स्वल्प, because the time was summer (see verse 9.—कण्ठक etc.) Either through scantiness or from its quality it was beneath notice of the thirsty chameleons. 10. अजगर etc.—The अजगर were the very snakes that were स्वेच्छासुप्त ! One sweats profusely when one sleeps in the summer at mid-day. The sweet of the sleeping snakes ran in-

streams (स्रोतःसु) and was too tempting a delicacy for the thirsty chameleons to refuse ! They shunned the waters in the caves and slaked their thirst here.

रामः—

पश्यामि च जनस्थानं भूतपूर्वखरालयम् ।
प्रत्यक्षानिव वृत्तान् पूर्वाननुभवामि च ॥ १७ ॥

(सर्वतोऽवलोक्य) प्रियारामा हि सर्वथा वैदेह्यासीत्, एतानि तानि नाम कान्ताराणि । किमतः परं भयानकं स्यात् (सास्रम्)—

Rama—I see Janasthana, Khara's abode of old, and simultaneously all the old incidents I feel as if before my eyes. (17).

(Looking round) Verily Vaidehi was ever fond of the woods, and these are those very forests ! What could be more dreadful (painful to me) than this ? (With emotion) (Rama—)

मित—। अन्वयः—भूतपूर्वखरालयं जनस्थानं पश्यामि च पूर्वान् वृत्तान्तान् प्रत्यक्षानिव अनुभवामि च। व्याख्या—भूतपूर्वं 'खरस्य रावणभ्रातुः 'आलयं निवासं' जनस्थानं पश्यामि च' तत्क्षणं च' तत्क्षण 'पूर्वान् वृत्तान्तान्' शूर्पणखासमागमं खरादिनिधनं सीताहरणम् इत्येवं प्रासङ्गिकान् प्रत्यक्षान् इव लोचनपथे इव लोचनपथे वर्तमानम् इव 'अनुभवामि च। स्थलावदर्शनेन युगपत् पूर्ववृत्तानामनुभव इति द्वौ चकारौ बोधकः॥ 'सर्वथा' सर्वप्रकारेण वासकृच्छ्रेऽपि सति इति भावः वैदेही प्रियारामा—वैदेह्याः प्रियाणि 'कान्ताराणि' कुत्र पुनः सा प्रिया मे ? अहो दुःखम् अतःपरं एतद्दर्शनादधिकं तदसम्बन्धे किं भयानकं स्यात् न किमपि। असह्यमेवदर्शनं मे इत्यर्थः॥

Notes—*1.* भूतपूर्व etc.—पूर्वं भूत भूतपूर्वः, सुप् सुपा। भूत leads in the compound (पूर्वनिपात) by निपातन in the rule "भूतपूर्वे चरट्"। भूतपूर्वः खरालय, or भूतपूर्वं खरालयो यस्मिन्। तम्। He speaks of खरालय because he is reminded of it by शम्बूक in sl. 15 above. 1. प्रत्यक्षान्—For प्रत्यक्ष see ante. and sak. 3. पूर्वान्—by पूर्व he refers generaly to all the incidents of his stay in Janasthana. 4. प्रियारामा—आरमति यस्मिन् इति आ+रम+घञ् अधिकरणे=आरामः garden. here, forest, because refers to it by कान्ताराणि। प्रियः आरामः यस्याः प्रियारामा or आरामप्रिया। The पूर्वनिपात of प्रिय is optional by 'वा प्रियस्य'। 5 तानि—Those that were dear to वैदेही। 6. नाम—निश्चये। The very same that were dear etc. 7. कान्ताराणि—कान्तार is कानन। "कान्तारे कानने प्रोक्तम्" इत्यनेकार्थः। This refers to the आराम in प्रियारामा। Hence आराम there has to mean not उपवन but वन। 8. भयानकम्—Because the sight awakens painful memories. 9. साश्रम्—अस्र is अश्रु। अस्रमश्रुणि शोणिते, But the अश्रु here is to be taken as emotion only—emotion that chokes the voice, not actual tears. Ram is careful that his emotion be not noticed by शम्बूकः; hence in Para xxix we find सबाष्पस्तम्भम्। 9. Remark—This could not have been within Sambuka's hearing. The thought is such as a sufferer usully reserves to himself or communicates to a close friend only. Perhaps the text was रामः (स्वगतम्) which has been altered by copyists.

(राम –)

त्वया सह निवत्स्यामि वनेषु मधुगन्धिषु।
इति चारमतेहासौ स्नेहस्तस्याः स तादृशः॥ १८॥
अकिञ्चिदपि कुर्वाणः सौख्यैर्दुःखान्यपोहति
तत्तस्य किमपि द्रव्यं यो हि यस्य प्रियो जनः॥ १९॥

(Rama)—"With thee I will live in sweet-scented forests"—on this view alone she enjoyed it here Such was that love of hers. (II).

He is indeed one's indescribable treasure who is one's beloved. (He) chases away one's sorrows with joy though doing nothing whatsoever. (19)

मित—। इह किं वस्तु तस्याः प्रियमासीदित्याह—त्वयेति अन्वयः—त्वया सह मधुगन्धिषु वनेषु निवत्स्यामि इति च इह असौ अरमत। तादृशः तस्याः सः स्नेहः। व्याख्या—'त्वया' प्रियेण सह' त्वत्साहचर्य्यादेव मत्सम्बन्धे 'मधुगन्धिष' मकरन्दवासितेषु वनेषु निवत्स्यामि इति च इत्येव इह अस्मिन् दुरासदे कान्तारे असौ सीता 'अरमत' ननन्द। वासस्त्वया सह इत्येव मे पर्य्याप्त्यम् एतन्मात्रेणापि काननं सर्वम् उद्गन्धि अपि मधुगन्धि मम सम्पत्स्यते इति तस्या आनन्दः। 'तादृशः तथाविधः अनिर्वचनीय इत्यर्थः तस्या सः स्नेहः आसीत॥ किं कृतं त्वया यत् त्वत्साहचर्यें एवं तस्या बहुमानः इत्याह—अकिञ्चिदिति। अन्वयः—यः यस्य प्रियः जनः' तत् तस्य किमपि हि द्रव्यम्। सः अकिञ्चित् अपि कुर्वाणः सौख्यैः दुःखानि अपोहति। व्याख्या—'यो यस्य प्रियो जनः प्रीतिपात्रं' तस्य' सम्बन्धे किमपि हि इतरविलक्षणम् अनिर्वचनीयमेव द्रव्यं वस्तु। इतरविलक्षणतां दर्शयति अकिञ्चित्' न किञ्चित् 'अपि कुर्वाणः आचरन् सौख्यैः' सुखसन्तानैः 'दुःखानि अपोहति' (अपऊह+ति) दूरीकरोति। सामान्यतो हि लोके कश्चित् प्रीतिकरं किन्चित् कुर्वन् सुखयति अयन्तु अकिन्चिदपि कुर्वाणः इति इतरविलक्षणता। प्रियोऽहमासं सीतायाः अतः किन्चितकरणानपेक्षया अपि "मया सह' इत्येव सा अप्रीयत इति श्लोकयोराशयः॥ [अपोहति—See our Sak III]

Notes—1. मधुगन्धिषु—मधुनः गन्ध इवगन्धः एषाम् एषु वा मधुगन्ध+इत् समासान्त by "उपमानाच्च"। Forest-life is bitter, with you त्वया सह

all will be honey-scented to me. The compound is usually taken as a स्वरूपकथन ; thus—मधुनो गन्धः मधुगन्धः । स अस्ति एषु इति मधुगन्ध+इनि मत्वर्थे । This interpretation lacks the poetry of the first.

2. इति च &c.—इति gives the reason. The च implies अवधारण । This much only, nothing more. इह in the forest. The reason why she enjoyed it here was that she had my company. This is the reading in the Bombay edition with Viraraghava's Commentary. With this, the future in निवत्स्यामि is rather awkward, निवसामि in the present suits better Vidyasagara has इव for इह (इति चारमतेवासौ), which suits निवत्स्यामि if we suppose that the verse speaks of the time of leaving Ayodhya. But the इव—as if she enjoyed it, takes away the च इह which is not desirable. One of Vidyasagara's manuscripts reads इति हा रमते सीता । There the present in रमते is troublesome the reference still being to the moment of leaving Ayodhya. The choice seems to lie between इतिचारमतेहासौ and इति हा रमते सीता ।

3. अकिंचित्‌चित् &c.—The whole पाद is not a compound because अपि intervenes. अकिंचित्‌चित्कुर्वाणः may be allowed as a rare instance of an असमर्थसमास ।

4. सौख्यैः—सुखमेव इति सुख+ष्यञ् स्वार्थे=सौख्यम् । The plural implies a succession of सुख । अप+ऊहति=अपोहति— See Sak.III.also. अप+उह+ति is also अपोहति by पररूप ।

5. तत्—The विधेय is द्रव्य which is neuter and prominent here. The प्रियो जनः is taken not as a प्रियो जनः but as किमपि द्रव्यम् । Hence विधेयप्राधान्यात् क्लीबत्वम् ।

6. किमपि—The अपि adds अनिर्वचनीयता । Comp. "स्फुरतु हृदये कोऽपि पुरुष." "किमपि हृदये कृत्वा मन्त्रयेथे &c. Sak.

(*xxvii*) शम्बूकः—तदलमेभिर्दुरासदैः। अथैतानि मद-कलमयूरकण्ठकोमलच्छविभिरवकीर्णानि पर्वतैः, अविरल-निविष्टनीलबहलच्छायतरुषण्डमण्डितानि असम्भ्रान्तविविधमृगयूथानि पश्यतु महानुभावः प्रशान्तगम्भीराणि मध्यमारण्यकानि।

इह समदशकुन्ताक्रान्तवानीरवीरुत्-
प्रसवसुरभिशीतस्वच्छतोया वहन्ति।
फलभरपरिणामश्यामजम्बू-निकुञ्ज-
स्खलनमुखरभूरिस्रोतसो निर्झरिण्यः॥ २०॥ (शम्बू-)

Samb—Then away with these inaccessible regions [Or—this repulsive scenery]. Now, let your Eminence behold these still and somber forests in the interior with herds of deer of different kinds (roaming) undisturbed, adorned with groups of densely grown dark and very shady young trees strewed with hillocks having the soft look of the throat of a peacock cooing with joy.

Here is flow of hill-stream having clear and cool waters scented by the flowers of cane-twigs that are alighted upon by hilarious birds and whose strong currents murmur as they glide through groups of Jambu trees that are blue through the ripening of their load of berries. (10). (Samb—).

मित—। तदिति। 'तत्' तस्मात् यतो भवतामनाग्रह एतेषु लक्ष्यते तस्मात् 'दुरासदैः दुर्गमैः चाप्रीतिकरैः 'एभिः' पर्यन्तकाननैः 'अलम्'। रामं निवृत्तं पश्यन् एवमाह शम्बूकः॥ 'अथ' महानुभावः' भवान् 'एतानि' इतो दृश्यमानानि 'प्रशान्तानि' निष्कम्पानि गम्भीराणि' अप्रधृष्याणि' उदाराणि 'मध्यमानि' अनन्तरप्रदेशवर्तीनि 'अरण्यकानि' वनानि पश्यतु। किम्भूतानि तानि?—'मदेन' हर्षेण 'कलः मधुरं कूजन् यः

'मयूरः' तस्य 'कण्ठस्य' इव 'कोमला स्निग्धनीला 'छविः' येषु तादृशः 'पर्वतः अवकीर्णानि' व्याप्तानि। पुनः किम्भूतानि? अविरलनिविष्टाः' निविडसंरूढाः 'नीलाः' हरितवर्णाख्याः 'बहलच्छायाः' छायाप्रधानाः ये 'तरुणतरवः' नवपादपाः तेषां षण्डैः' समूहैः 'मण्डितानि भूषतानि। पुनः किम्भूतानि?—असम्भ्रान्तानि' अत्रस्तानि' 'विविधमृगाणां' नानाहरिणानां 'यूथानि' येषु तानि॥ इहेति। अन्वयः—इह समदशकुन्ताक्रान्तवाणीरवीरुत्प्रसवसुरभिशीतस्वच्छतोयाः फलभरपरिणामश्यामजम्बूनिकुञ्जस्खलनमुखरभूरिस्रोतसः निर्झरिण्यः वहन्ति। व्याख्या—'इह' एषु मध्यमारण्यकेषु समदैः मदमत्तैः' 'शकुनैः' पक्षिभिः आक्रान्ताः' उत्पत्य श्रिताः याः 'वाणीरवीरुधः' वेतसलताः तासां 'प्रसवैः' पुष्पैः शकुन्ताश्रयणात् कम्पितपातां लतानां वृन्तच्युतैः पुष्पैरित्यर्थः 'सुरभीणि' वासितानि' अस्मिन् ग्रीष्मेऽपि अनुष्णानि 'स्वच्छानि' विमलानि सुरभित्वशीतत्वस्वच्छत्वैः निदाघसुखपेयानि इति शेषः 'तोयानि' जलानि यासां तादृश्यः किञ्च 'फलराशेः 'परिणामेन' पक्वतया 'श्यामेषु' फलानां कृष्णेषु 'जम्बूपादपगुल्मेषु यत् 'स्खलनं' प्रसरणं तेन मुखराः' पादपप्रतिघातैः शब्दायमानाः भरिस्रोतसः' प्रबलप्रवाहाः यासां तादृश्यः 'निर्झरिण्य.' गिरिनद्यः 'वहन्ति' प्रसरन्ति। अनातपे जम्बूनिकुञ्जे विश्रान्ता क्लान्ता अध्वगाः प.ानि फलानि उपभुज्य सुरभीणि शीतानि स्वच्छानि च तोयानि निपीय ट ति स्वस्था भवन्ति, तत् रमणीयानि इमानि मध्यमारण्यकानि पश्यतु इ ।

NOTES

1. **तदलम्** &c – Rama was musing but not replying to Simbuk's remark—"**एतानि खलु** &c." Hence Sambuka thought that his terrible picture of the outskrits (**निष्कूजस्तिमिता** &c.) was not inviting to Rama. So he drops the subject (**तदलम्** etc) to take up something more agreeable

2. **दुरासदैः—दुःखेन आसद्यन्ते इति दुर+आ+सद+खल् कर्मणि=** &c. Cp – "**दुरसद्** in "**दुरासदवनज्यायान् गम्यस्तुङ्गोपि भुधर**.' Kirat XI.

3 **मदकल** &c. – **This** shows the attractiveness of the scenery.

4. पर्वतैः—Here the reading पर्य्यन्तै seems unsuitable It sounds queer to say पर्य्यन्ते अवकीर्णानि (strewn with outskirts) Besides the पर्य्यन्त has been dropped with तदलम् &c

5 अविरल &c —अविरलनिविष्ट closely grown The epithet shows that it was pleasant here in मध्यमारण्य to roam about because the walks were abundantly shady

6 असम्भ्रान्त &c — असम्भ्रान्त not scared They were accustomed to human presence One can enjoy it here by watching the differeant kinds of deer (of better—of animals in general) grazing at ease

7 इह &c—The verse adds another attraction to those mentioned in the prose preceding When you are tired with the inspection of mountain-scenes and of the animals at ease rest in the shade of one of the numerous Jambu groves you will find plenty of excellent-eating ripe fruits there if you are hungry (फलभर etc,) and water as will —nice cool limpid scented water—to allay your thirst

8 समद् &c Comp उपान्तवानीरवनोपगुढ़ान्यालक्ष्यपारिप्लवसारसानि —Kalidasa The water possessed allthe requirements of an agreeable drink in summer The time was about mid-summer as already pointed out

9 फलभर—etc — भूरि is बहुल plentiful here 'strong'. It is the strength of the current that cause the murmur bv striking against the trees with force

(*XVIII*) (अन्वय—) अपि च

दधति कुहरभाजामत्र भल्लूकयूना-

मनुरसितगुरूणि स्त्यानमम्बूकृतानि ।

शिशिरकटुकषायः स्त्यायते शल्लकीना-
मिभदलितविकीर्णग्रन्थिनिष्यन्दगन्धः ॥ २१ ॥

(Samb)—Moreover,

Here the spluttering of whines of bear-cubs lying in dens, magnified by echoes acquire volume ; the cool, pungent and agreeable odour of the gum oozing from the knots of the Sallaki crushed and scattered by elephants, is intensified,. (Or—pervades all round). (21).

मित—। दधतीति। अन्वयः—अत्र कुहरभाजां भल्लूकयूनाम् अनुरसितगुरूणि अम्बूकृतानि' स्त्यानं दधति। शल्लकीनां शिशिरकटुकषायः इभदलितविकीर्णग्रन्थिनिष्यन्दगन्धः स्त्यायते। व्याख्या—'अत्र' एषु मध्यमारण्यकेषु 'कुहरभाजां गुहागतानां 'भल्लूकयुनां तरुणभल्लूकानाम् 'अनुरसितैः' प्रतिध्वनिभिः 'गुरूणि महान्ति 'अम्बूकृतानि' थुत्कारसमेता ध्वनयः 'स्त्यानं दधति' वृद्धिं भजन्ते। किञ्च 'शल्लकीनां करिप्रियाणां 'शिशिरः' शीतलः 'कटुः' तीव्र 'कषायः सुरभिश्च, 'इभः' गजैः 'दलिताः' मर्दिताः 'विकीर्णा इतस्ततो विक्षिप्ताश्च ये 'ग्रन्थयः शाखासन्धयः तेषां निष्यन्दस्य क्षीरद्रवस्य 'गन्ध स्त्यायते' वर्द्धते। भल्लुकैर्नादितानि गजैर्वासितानि च नातिभीमानि बनानि इति भावः॥

NOTES

1. कुहर etc.—कुहर । गह्वर cave, कुहरं भजन्ते इति कुहर + भज + ण्वि कर्त्तरि = कुहरभाजः, तेषाम्।

2. भल्लूकाश्चासौ युवानश्च। तेषाम्।

3. अनुरसित &c.—अनु + रस + क्त भावे = अनुरसितम् echo, now see Tika.

4. स्त्यानम्—स्त्यै + ल्युट भावे। Intensity, सङ्घात।

5. अम्बूकृतानि—अनम्बु अम्बु कृतानि इति अम्बु + च्वि + कृ + क्त कर्म्मणि growls resembling the sound of spitting.

6. स्त्यायते—स्त्यै + लट् ते कर्त्तरि। The root is परस्मैपदी, the आत्मनेपद seems to be irregular. Or say स्त्यै here means

'to intensify' (**अनेकार्थत्वाद्धातूनाम्**) । Hence we have लट् ते कर्म्मणि । स्त्यायते becomes intensified

(*xxix*) रामः—(सवाष्पस्तम्भम्)—भद्र शिवास्ते पन्थानः । देवयानं प्रतिपद्यस्व-पुण्येभ्यो लोकेभ्यः ।

शम्बूकः—यावत् पुराणब्रह्मवादिनम् अगस्त्यमृषिमभिवाद्य शाश्वतं पदमनुप्रविशामि । (इति निष्क्रान्तः) ।

राम—एतत्तदेव हि पुनर्वनमद्य दृष्टं
यस्मिन्नभूम चिरमेव पुरा वसन्तः
आरण्यकाश्च गृहिणश्च रताः स्वधर्मे
सांसारिकेषु च सुखेषु वयं रसज्ञाः ॥ २२ ॥ (रा—)

Rama—(Checking his tears)—Gentle friend, may your journey be safe. Take to the divine car for the holy regions.

Samb—I will enter the eternal region afterhaving saluted Agastya, that old discourser on Brahman, (Exit).

Rama—Today, here, is seen again that very forest where formerly we residing for a long time indeed, continued as foresters devoted to our duty and as householders as well enjoying the taste of worldly pleasure (22). (R—).

मित—। सवाष्पेत्यादि । वाष्प इति कण्ठगतो वाष्प. न तु अक्षिगत । 'वाष्पस्य स्तम्भः निरोधः' तेन सह ।। एकाकी सीतागतं चिन्तयितुकामः शम्बूकस्य साहचर्य्यं परर्हैत्तमिच्छन् तं विसृजति भद्रेति । देवयानं दैवै. प्रेरितं विमानं 'प्रतिपद्यस्व' स्वीकुरु । 'पुण्येभ्यो लोकेभ्यः (कर्म्मणि ४र्थी) पुण्यान् लोकान् प्राप्तुमित्यर्थ. ॥ 'यावत अवधारणे । 'शाश्वतं' नित्यम् अनपायि तं स्थानम् ॥ एतदिति । अन्वयः—तदेव हि एतत् वनम् अद्य पुनः दृष्टं यस्मिन् पुरा चिरमेव वसन्तः आरण्यकाश्च गृहिणश्च वयं स्वधर्मे रताः सांसारिकेषुसुखेषु रसज्ञाश्च अभूम । व्याख्या—तदेव हि' पूर्वपरिचितम्

'एतत् वनम् अद्य पुनर्दृष्टं यस्मिन् पुरा' दण्डकाप्रवासकाले 'चिरमेव' काल' वसन्तः आरण्यकाश्च 'गृहिणश्च 'वयं' स्वधर्मे मुनिव्रते 'रताः सांसारिकेषु सुखेषु विषये 'रसज्ञाश्च ज्ञातास्वादा अपि 'अभूम' ॥

NOTES

1 सवाष्प &c.—Sambuka's enthusiasm made no impression on Rama. He liked to be left alone to brood over his lot and wanted to utter the words of dismissal to Sambuka. But he knew that in speaking he would run the risk of betraying his emotion by the tremor in his voice. Hence he checks the emotion (सवाष्पस्तम्भम्) and utters the customary farewell (शिवास्ते पन्थानः सन्तु) । The वाष्प is in the throat not in the eyes, Comp. "कण्ठः स्तम्भितवाष्पवृत्तिकलुषश्चिन्ताजडं दर्शनम्" Sakuntala. 2. शाश्वतम्—शश्वत्+अण निपातनात् । शाश्वतिक is also allowed (see ante.) 3. Remark,—Here it is strange that Rama does not think of himself going over to pay his respects to that august sage. Contrast "अनतिक्रमणीयानि श्रेयांसि of Dushynta when in the neighbouthood of हेमकूट on his way back to earth from heaven. The fact is, the poet wants Rama to linger and open his heart to the audience and thus prepare them for the touching scene in Act III. But however desirable this may be, the means employed for this and would have been more acceptable had they not made Rama discorteous and wanting in manners towards his superiors. 4. आरण्यकाः

&c.—रताः स्वधर्मे as आरण्यक and as सांसारिकेषु भावेषु रसज्ञाः as गृहिणः। अरण्ये वसन्ति इति अरण्य+वुञ् शेषे=आरण्यकाः यतिनः। संसारे भवानि इति संसार+ठञ् =सांसारिकाणि। 5. Remark—we may also construe रताः रसज्ञाः वयं चिरमेव वसन्तः अभूम।

(*XXX*) (रा—)—अपि च—

एते त एव गिरयो विरुवन्मयूरा-
स्तान्येव मत्तहरिणानि वनस्थलानि।
आमञ्जुवञ्जुललतानि च तान्यमूनि
नीरन्ध्रनीलनिचुलानि सरित्तटानि ॥ २३ ॥ (रा—)

(R—) Besides.

These are really the same hills with peacocks cooing, the same woodland indeed with the deer wild with joy. Yonder are the very same river-banks with beautiful Vaujula creepers and (overgrown) with dark Nichula clumps without an opening. (23) (R—).

सित—। एते इति। अन्वयः—एते ते एव विरुवन्मयूरा गिरयः। (इमानि) तानि एव मत्तहरिणानि वनस्थलानि। अमूनि च तानि एव आमञ्जुवञ्जुललतानि नीरन्ध्रनीलनिचुलानि सरित्तटानि। व्याख्या—'एते' पुरोवर्त्तिनः 'ते एव पूर्वपरिचिता 'विरुवन्तः' नदन्तः 'मयूराः' येषु तथाविधाः 'गिरयः' पर्वताः। इमानि 'तानि एव' पूर्वदृष्टानि 'मत्त-हरिणानि' प्रहृष्टकुरङ्गाणि 'वनस्थलानि' काननप्रदेशाः॥ 'अमूनि च' दूरे दृश्यमानानि 'तानि एव' पूर्वानुभूतानि 'आमञ्जवः' परमरमणीयाः 'वञ्जुललताः' वेतसलताः येषु तादृशानि किञ्च 'निविडप्ररूढ़ा 'नीलाः' श्यामाः हरितपत्र-बहुला इत्यर्थः निचुलाः' हिज्जलवृक्षाः येषु तादृशानि 'सरित्तटानि नदीतीराणि॥

Remark—The epithets show that the place was very suitable for strolls at ease.

(*xxxi*) (रा—)—

मेघमालेव यश्चायमारादपि विभाव्यते ।
गिरिः प्रस्रवणः सोऽयं यत्र गोदावरी नदी ॥ २४ ॥
अस्यैवासीन्महति शिखरे गृध्रराजस्य वास-
स्तस्याधस्ताद्वयमपि रतास्तेषु पर्णोटजेषु ।
गोदावर्याः पयसि विततश्यामलानोकहश्री-
रन्तःकूजन्मुखरशकुनो यत्र रम्यो वनान्तः ॥ २५ ॥ रा—

(R—)—And this hill, which even from near looks like a row of clouds, is the same Prasravana near which is the River Godavari. (24).

On the giant peak of this very hill was the home of the vulture-king. Below the same we too lived happily in those leaf-huts near which the forest-skirts was charming with singing birds cooing under the foliage and the beauty of its green trees displayed in the waters of the Godavari. (25 (R)

मित—। मेघेति । अन्वयः—अयञ्च यः आरादपि मेघमालेव विभाव्यते सोऽयं गिरिः प्रस्रवणः,यत्र गोदावरी नदी । व्याख्या—'अयञ्च' दृश्यमानः यः आरादपि समीपस्थादपि देशात् मेघमाला इव विभाव्यते अत्युच्चत्वात् शिखराणां वारिदावलिभ्रान्तिं जनयति 'सः अयं गिरिः प्रस्रवणः यत्र' यस्य समीपे 'गोदावरी नदी' प्रवहति। अन्वयः—अस्यैव महति शिखरे गृध्रराजस्य वासः आसीत्। तस्य अधस्तात् तेषु पर्णोटजेषु रताः यत्र गोदावर्य्याः पयसि विततश्यामलानोकहश्रीः अन्तःकूजन्मुखरशकुनः वनान्तः रम्यः। व्याख्या—'अस्यैव, प्रस्रवणस्य 'महति शिखरे' तुङ्गे गृध्रराजस्य' जटायुषः 'वासः' निलयः 'आसीत्'। 'तस्य गृध्रराजनिवासस्य 'अधस्तात्' निम्ने 'वयमपि तेषु पर्णोटजेषु' पत्रकुटीरेषु 'रताः' रममाणाः अभूम 'यत्र'

येषु येषां समीपे इत्यर्थः गोदावर्य्याः पयसि विततः विम्बेन विस्तारिता 'श्यामलानाम् अनोकहां' वृक्षाणां 'श्रीः' यस्य तादृशः किञ्च 'अन्तः' पञ्चमधेः 'कूजन्तः' शब्दायमानाः 'मुखराः' गायन्तः 'शकुनाः' पक्षिणः यस्मिन् तादृशः सन् वनान्तः रम्यः' रमणीय आसीत्। इह पित्रा जटायुषा परिरक्षिताः रम्ये वनान्ते रममाणा एव वयमास्म इति भावः।

NOTES

1 आरादपि—आरात् is an अव्यय meaning दूर also समीप। It is usual here to take आरात् as दूर। But then अपि loses force and the statement falls flat on the ears because every hill looks like a cloud from a distance Hence we take आरात् meaning समीप। The line then means that while other hills give the impression of a cloud only from a distance, प्रस्रवण does it even (अपि) from near, its शिखर is so high (see महति शिखरे below), 2 सोऽयम्—अयम् occurs twice in the verse One of these looks like superfluous. 3 यत्र—अधिकरणे ७मी। The आधार here implies सामीप्य as in गङ्गायां घोषः। 4. वासः—उष्यते अस्मिन् इति वस+घञ् अधिकरणे=वासः house 5 तस्य—May be construed either as वासस्य or तस्य शिखरस्य। 4. अधस्तात्—अधर स्मिन्। अधरस्मिन् इति अधर+ङि (७मी)+अस्ताति स्वार्थे। अधर becomes अध् by 'पूर्वाधरावराणम् असि पुर् अध् अवश्च एषाम्" and "अस्ताति च" also when अस्ताति follows, The word is an अव्यय। 7. रताः—रम+क्त कर्त्तरि वर्त्तमाने=रत enjoying रममाण। 8. तेषु—In those &c तेषुकेषु? 'यत्र रम्यो वनान्तः"। 9. वितत &c.—वि+तन+क्त कर्म्मणि=वितत spread out, exhibited etc. Where exhibited? गोदावर्य्याः पयसि in the water of the Godavari. That is possible only by reflec-tion. For अनोकह tree (see ante). स्निग्ध स्निग्धरि = श्रीः+

beauty शोभा। ङीष् is not added, hence the word is not नदीसंज्ञक। Consquetly the rule "नद्यृतश्च" does not apply and कप् is not attached a sa समासान्त in the final वह्व–। ङीप् is optional by "कदिकारादक्तिनः"। If attached, the form becomes विततश्यामलानोकहश्रीकः with कप्। The forest beauty is transferred to the water by reflection. Comp. "बिम्बागतैस्तीरवनैः समृद्धिं निजां विलोक्यापहृतां पयोभिः &c.—Bhatti, 10, यत्र—येषु इति यद्+ह (७मी)+त्रल् स्वार्थे। Refers to पर्णोटजेषु। अधि ७मी—the आधार implying सामीप्य as in "यत्र गोदावरी नदी" above. 11. रम्यः—रमते अस्मिन् इति रम+यत् अधिकरणे वाहुलकात् or रमयतीति रम+णिच्+यत् कर्त्तरि वाहुलकात्। The वनान्त was रम्य because it appealed to the sense of sight through the charming reflections (वितत—) and to the sense of hearing by reasons of अन्तःकूजत्–। Over and above there was that sense of security that we were being looked after by father जटायुस्। Hence we really enjoyed life there—रताः।

(*xxii*) (रा—) अत्रैव सा पञ्चवटी यत्र चिरनिवासेन विविधविस्रम्भातिप्रसङ्गसाक्षिणः प्रदेशाः, प्रियायाः प्रियसखी वासन्ती च प्रतिवसति। तत् किमिदमापतितमद्य रामस्य। सम्प्रति हि—

> चिराद्वेगारम्भी प्रसृत इव तीव्रो विषरसः
> कुतश्चित् संवेगात्प्रचलित इव शल्यस्य शकलः।
> व्रणो रूढग्रन्थिः स्फुटित इव हृन्मर्मणि पुन-
> र्घनीभूतः शोको विकलयति मां नूतन इव ॥२६॥ (रा-)

(R—) Here indeed is that Panchavati the sites in which, through long residence, are witnesses to the excess of our familiarity in many ways and where lives Vasanti the dear friend of my darling. What then is this that has befallen wretched Rama to-day ?

At this moment—

After a long time indeed, grief intensified, as if fresh, overpowers me like some quick-acting violent poison coursing in the system : like a splinter of a shaft, for some reason or other, moving with great force : like an ulcer in the vitals of the heart re-opened after the cicatrix had been formed (healed). (R—.)

मित—। अत्रैत्यादि। 'विविधानां' नानाप्रकाराणां विश्रम्भानां विश्वस्तकर्मणां यः 'अतिप्रसङ्गः' दूरप्रसरः आतिशय्यमित्यर्थः तस्य साक्षिण' साक्षाद्द्रष्टारः 'प्रदेशाः' सन्ति। तत्तत्प्रदेशानां दर्शनेन वासन्त्याश्च स्मरणेन विकलीकृतोऽहम्। 'किमिदम्' अतिदुःसहं किमपि इत्यर्थः॥ चिरादिति। अन्वयः—चिरात् घनीभूतः नूतन इव शोकः प्रसृत: तीव्रो वेगारम्भी विषरस· इव, कुतश्चित संवेगात् चालितः शल्यस्य शकल इव, हृन्मर्मणि रूढग्रन्थिः पुनः स्फुटितः व्रण इव, मां विकलयति। व्याख्या—'चिरात्' बहोः कालात् परम् अद्यतत्तत्प्रदेशदर्शनात् 'घनीभुतः' गाढतामापन्नः 'शोकः' सीताविरहसन्तापः 'प्रसृतः प्रसर्त्तुमारब्धः (आदिकर्म्मणि क्तः) शिराभिः सन्चरमाणः 'तीव्रः' दारुणः 'वेगारम्भी क्षिप्रकर्म्मा 'विषरस इव', यद्वा 'कुतश्चित्' कुतोपि हेतोः सवेगात् चालितः' वेगेन प्रसृतः 'शल्यस्य शकल इव' देहे विद्धः शङ्कुखण्ड इव अथवा 'हृन्मर्मणि' हृदयस्य मर्मस्थाने रूढग्रन्थिः' सञ्जातबन्धनः विरोपित इत्यर्थः किन्तु 'पुनः स्फुटितः' भूयोऽपि मुक्तबन्धनः व्यात्तमुखः, 'व्रण इव मां विकलयति' विवशं करोति॥

NOTES

1. विविध&c.—विश्रम्भ is विश्वास familiarity : hence deeds of familiarity. अतिप्रसङ्ग long continuance, hence excess. साक्षात् is an अव्यय meaning प्रत्यक्ष। साक्षात अस्ति एषाम् इति साक्षात्

द्रष्टार इति साक्षात्+इनि=साक्षिणः eye-witnesses, hence their sight recalls the incidents. 2, वेगारम्भी—वेगेन आरब्धुं शीलमस्य इति वेग+आ+रभ+णिनि कर्त्तरि। 3. कुतश्चित् &c—The idea is that splinter is embedded within the body, invisible and therefore cannot be removed. For some inexplicable reason, the splinter has commenced to burrow on and is causing pain. 4. रूढग्रन्थिः—रूढ formed. ग्रन्थि knot. रूढः ग्रन्थिः अस्य of which the knot has formed, i.e., which is no longer a gaping wound. The edges of the wound have united and the wound has healed, 5 विकलयति—कला is कलन comprehension, विगता कला अस्य विकल destitute of perception, senseless. विकलंकरोति इति विकल+णिच् (नामधातु)+लट् तिप्। 6 नूतन इव—Some read मूर्च्छयति च। मूर्च्छा and वैकल्य are almost the same If मूर्च्छा is a grade higher then विकलयति becomes superfluous. नूतन इव seems to be the better reading.

(*xxxii*) (रा—) तथापि तान् पूर्वसुहृदो भूमिभागान् पश्यामि। (निरूप्य) अहो अनवस्थितो भूमिसन्निवेशः।
तथाहि—पुरा यत्र स्रोतः पुलिनमधुना तत्र सरितां
विपर्य्यासं यातो घनविरलभावः क्षितिरुहाम्।
बहोर्दृष्टं कालादपरमिव मन्ये वनमिदं
निवेशः शैलानां तदिदमिति बुद्धिं द्रढ़यति॥ २७॥

(रा—)

(R) Even so, I will see my old friend, those tracts of land. (Looking attentively) Ha! the disposition of the ground has changed. Thus—

Where formerly was the current, there now are the sands of the streams, the denseness and sparseness of trees have undergone reversal. The forest, seen after a long

time I deem as if another ? The position of the hills strengthens the surmise that it is the same, (27).

मित—। 'तथापि' सत्यामपि विकलतायाम् । 'अवस्थितः' अविचलितः । न तथा 'अनवस्थितः' परिवर्त्तितः । 'भूमे सन्निवेशः' विन्यासः ॥ पुरेति । अन्वयः—सवितां पुरा यत्र स्रोतः अधुना तत्र पुलिनम् । क्षितिरुहां घनविरलभावः विपर्य्यासं यात । वहोः कालात दृष्टम् इदं वनम् अपरमिव मन्ये । शैलानां निवेशः इदंतत् इति वुद्धिं द्रढ़यति । व्याख्या—'सरितां' नद्दीनां 'पुरा' प्राक् दण्डकावासकाले 'यत' यस्मिन् देशे स्रोतः' आसोत् 'अधुनां' अद्य 'तत्र पुलिनम्' सैकतम् अस्ति । 'क्षितिरुहां' वृक्षाणां, घनविरलभावः' घनत्वं विरलत्वञ्च 'विपर्य्यासं यातः वैपरोत्य' प्राप्तः । वृक्षा यत्र पुरा घनाः तत्र अधुना विरलाः यत्र च विरला तत्र पुनर्घना इत्यर्थः । एवं सरित्सु वृक्षेषु च अपरविधत्वे जाते 'वहोः कालात् परं दृष्टम् इदं वनम् एव 'अपरमिव मन्ये । तत् कथमुक्त' "एतत्तदेव हि पुनवनमद्य दृष्टम्" इति तत्राह—शैलानां निवेशः पर्वतानाम् यथा पुरा व्यवस्थानम् 'इदं तत् देव वनम् 'इति बुद्धिं द्रढ़यति' इदं ज्ञानं व्यवस्थापयति समर्थयते ॥

Notes —1. **अनवस्थितः—अवस्थित;** unchanged **न अव[illegible]** [illegible]। 2. **भूमि** &c.—**सम्+नि+विश+घञ् भावे=सन्निवेशः** location. **भूमेः सन्निवेशः ।** 3. **विपर्य्यासम्—वि+परि+अस्+घञ भावे=विपर्यासम्** interchange 4. **घन** &c —**घन** dense, **विरल** sparse, **घनश्च विरलश्च घनविरलौ, द्वंद्व । तयोर्भावः ।** What was dense is now sparse, and the sparse has become dense. 5, **क्षितिरुहाम्—क्षितौ रोहन्ति इति क्षिति+रुह+क्विप कर्त्तरि—क्षितिरुहः ।** The **प्रातिपदिक** is **क्षितिरुह् । तेषाम् ।** 6. **द्रढ़यति—दृढ़** strong **दृढं करोति इति दृढ़+णिच (नाम धातु)+लट तिप् । दृढ़** becomes **द्रढ़** as in **द्रढिष्ठ** by the Varttika **'णाविष्ठवत् प्रातिपदिकस्य"** ।

(*xxxiii*) (रा—) **इन्त परिहरन्तमपि मामितः पञ्चवटी-स्नेहो बलादाकर्षतीव । (सकरुणम्)**

यस्यां ते दिवसास्त्वया सह मया नीताः पुनः स्वे गृहे
यत्सम्बन्धिकथाभिरेव सततं दीर्घाभिरस्थीयत ।
एकः सम्प्रतिनाशितप्रियतमस्तामद्य रामः कथं
पापः पञ्चवटीं विलोकयतु वा गच्छत्वसम्भाव्य वा ॥२८॥

[R—) Alas! Though I am avoiding it, the love for Panchavati draws me hence as if by force (Pathetically),

How can my vile self—Rama—after having caused the loss of his darling, now see alone, or leave without honouring that Panchavati where those days were by me passed and with long talks of which indeed I ever kept myself engaged with her in my own home? (28).

मित—हन्तेति । 'हन्त' इत्यव्ययमिह विषादे । 'परिहरन्तम्' अतिक्रम्य गच्छन्तम ॥ यस्यामिति । अन्वयः—तया सह मया यस्यां ते दिवसा नाताः पुनः स्वे गृहे दीर्घाभिर्यत्सम्बन्धिकथाभिरेव सततमस्थीयत तांपञ्चवटीं सम्प्रति नाशितप्रियतमः पापः रामः कथमद्य एकः विलोकयतु वा असम्भाव्य गच्छतु वा । व्याख्या—'तया सीतया 'सह मया यस्यां पञ्चवट्यां 'ते पूर्वानुभूता आनन्दमया दिवसा नीता' अतिवाहिताः पुनः' भूयः, 'स्वे गृहे' प्रत्यावृत्य अयोध्यायां दीर्घाभिः यत्सम्बन्धिनीभिः' यदाश्रयाभिः कथाभिरेव सततम्' अविच्छेदेन अस्थीयत यापितम् तां तथाविधां सर्वकालप्रियां 'पञ्चवटीं सम्प्रति' अधुना 'नाशिता विनाशं गमिता प्रियतमा येन तथाविध. अतएव पापः रामः कथम् अद्य एकः' प्रियाविरहितः 'विलोकयतु वा असम्भाव्य तस्या विलोकनरूपां सम्भावना-मकृत्वा वा गच्छतु ।

Notes.—1. तया सह मया These go with both नीताः and अस्थीयत । तया सह मया नीताः—तया सह मया अस्थीयत । 2. यतसम्बन्धि etc.—यस्याः सम्बन्धः यत्सम्बन्धः । स अस्ति आसु इति यत् सम्बन्ध+इनि मत्वर्थे यत्सम्बन्धिन्यः । तादृश्यः कथाः कर्मधा—। ताभिः । इया करणे । 3. अस्थीयत—स्था+लङ् त भावे । 4. एकः —Formerly it was तया सह, now एकः । Hence the painfulness of the situation. 5. सम्प्रति—This refers to the whole

time from the banishment of Sita to the present. 6. नाशित etc.—Note the णिच । It is नाशित' not ,नष्ट । I have myself killed her, प्रियतमा नष्टा—मया प्रियतमा नाशिता । एकः is painful enough ; and to that the fact that I am myself the cause for it , the situation becomss uubearable· 7. Remark The language is rather unhappy here. यस्यां मया नीताः तां रामः विलोकयतु makes the speaker different from राम । The identity of the two can not be restored even if we supply an अहम् । यस्यां मया नीता ताम् अहं रामः विलोकय is bad grammar , the लोट should be in the 1st person—यस्यां मया नीतः ताम् अहं रामः विलोकयानि ।

(*xxxvi*) (प्रविश्य) शम्बूकः—जयति जयति देवः । देव, भगवानगस्त्यो मत्तः श्रुतभवत्सन्निधानस्त्वामाह—परिकल्पितविमानावतरणमङ्गला प्रतीक्षते वत्सला लोपामुद्रा सर्वे च महर्षयः तदेहि सम्भावयास्मान् । अथ प्रजविना पुष्पकेण स्वदेशमुपगम्य अश्वमेधाय सज्जो भविष्यसि—इति ।

रामः—यथाज्ञापयति भगवान् ।

शम्बूकः—इतस्तर्हि देवः प्रवर्त्तयतु पुष्पकम् ।

रामः—भगवति पञ्चवटि, गुरुजनोपरोधात् क्षणं क्षम्यतामतिक्रमो रामस्य ।

[Entering] Samb—Prosper, let sire prosper. Sire, mighty Agastya having heard from me of your presence (here) says to you this , with auspicious arrangements made for your dismounting from the divine car, awaits affectionate Lopamudra, likewise all the sages. So come and honour us. Thereafter having reached your own country, in the swift Puspaka you will get ready for the Asvamedha.

Rama—As his mighty self commands.

Samb—Then let Sire direct the Puspaka this way.

Rama—Worshipful Panchavati, for a moment, excuse Rama's lapse through pressure from superiors.

मित—जयतीत्यादि। 'श्रुतं भवतः सन्निधानं सान्निध्यं येन। आश्रम-समीपे भवानागत इति श्रुत्वा इत्यर्थः। परिकल्पितानि' आहृत्य सम्भृतानि 'विमानात् अवतरणाय मङ्गलद्रव्याणि यया तादृशी सती 'प्रतीक्षते' भवदागमनप्रतीक्षां कुरुते। सर्वे च महर्षयः' आश्रमवासिनो मुनयः प्रतीक्षन्ते। 'अथ' अनन्तरन् अस्मान् सम्भाव्य इत्यर्थः। 'प्रजविना' द्रुतगामिना। इहागमनेऽपि यागकालो नातिवर्तिष्यते द्रुतगामित्वात् पुष्पस्य इति भावः॥ भगवतीति। 'गुरुजनस्य' अगस्त्यस्य' यः 'उपरोधः' आग्रहः तस्मात्, 'क्षणम्' इति प्रत्यावर्त्तनं सूचयति। 'अतिक्रमः उपेक्ष्य गमनम् गुरुजनोपरोधात् क्षणकालम् अतिक्रमः इत्यन्वयः न तु गुरुजनो-परोधात् क्षम्यताम् इति।

Notes :—1 मत्तः—अपादान of the क्रिया in श्रुत। अपादाने पञ्चमी। अस्मद्+तसि (५मी)+ङसि स्वार्थे=मत्तः। An अव्यय। 2. परिकल्पित &c—विमानात् अवतरणम् विमानावतरणम्, उपपुपा। तस्य मङ्गलानि the auspicious arrangements necessary for alighting, परि-कल्पितानि विमानावतरणमङ्गलानि यया। 3. महर्षयः—Supply प्रतीक्षन्ते। 4. एहि—He could not refuse the request. 5. अथ &c,—Here Agastya takes a very charitable view of Rama's omission to visit him. He supposes that Rama thinks he would be late for the sacirfice if he tarries here. The sage allays Rama's apprehension by pointing out the speed of the car—There would be ample time left to get ready for the sacifice. 6. गुरुजन &c.—उप+रुध+घञ् भावे उपरोध importunity. गुरुः जन., कर्मधा—। तस्य उपरोधः। तस्मात्। हेतौ ५मी। हेतु of अतिक्रम।

(*XXXV*) शम्बूकः—देव पश्य पश्य—

गुञ्जत्कुञ्जकुटीरकौशिकघटाघुत्कारवत्कीचक-
स्तम्बाडम्बरमूकमौकुलिकुलः क्रौञ्चावतोऽयं गिरिः।

एतस्मिन् प्रचलाकिनां प्रचलतामुद्वेजिताः कूजितै-
रुद्वेल्लन्ति पुराणरोहिणतरुस्कन्धेषु कुम्भीनसाः ॥ २९ ॥
(श्र—)

Samb—Behold Sire, behold.

This is the hill Kraunchavata where crowds of crows are silenced by the uproar of the clumps of whistling bamboos, which is mingled with the hootings of noisy arrays of owls in ther bower-thickets. On this, huge serpents, on the trunks of old sandal trees, swing about being troubled by the notes of peacocks on the move. (29). (Samb,—)

मित—। गुञ्जदिति। अन्वयः—अयं गुञ्जत्कुञ्जकुटीरकौशिकघटाघुत्कारवत्कीचकस्तम्बाडम्बरमूकमौकुलिकुलः क्रौञ्चावतो गिरिः। एतस्मिन् प्रचलतां प्रचलाकिनां कूजितैः उद्वेजिताः कुम्भीनसा पुराणरोहिणतरुस्कन्धेषु उद्वेल्लन्ति। व्याख्या—'अयम्' एष दृश्यमानः 'गुञ्जन्तः नदन्तः' याः 'कुञ्जकुटीराश्रयिण्यः' लतागृहवर्त्तिन्यः कौशिकघटाः' पेचकसमूहाः तासां यः 'घुत्कारः' घुत-इत्यव्यक्तध्वनिः तेन मिश्रः यः 'कीचकस्तम्बानां वेणुगुच्छानाम् 'आडम्बरः' तुमुलध्वनिः तेन मूकम्' भयनिःशब्द' "मौकुलिकुलः" काकवर्गः यस्मिन् तथाविधः क्रौञ्चावती गिरिः।" 'एतस्मिन् गिरौ 'प्रचलताम्' परिपतताँ 'प्रचलाकिनां मयूराणाम् 'कूजितैः' केकाभिः 'उद्वेजिताः' त्रासिताः कुम्भीनसाः अजगराः पुराणानां रोहिणतरूणां चन्दनवृक्षाणां 'स्कन्धेषु' प्रकाण्डेषु 'उद्वेल्लन्ति' दोदुल्यन्ते [उद्पूर्वक-वेल्लधातोः लटि रूपम्] ॥

Notes :—1 गुञ्जत्—&c —कुञ्ज is an enclosure of creepers (लतादिपिहितोदर)। कुटीर is a leaf-hut. कुञ्जमेव कुटीरं कुञ्जकुटीरम् leaf-hut of a bower, कौशिक is owl. घटा a crowd, कौशिकानां घटाः। कुञ्जकुटीरस्थाः कौशिकघटाः कर्मधा—। गुञ्जन्त्यः घटाः। घुत् is an imitation of the owl's note. 'Ghoot' (घुत्) is the same as the English 'Hoot'. घुत्+कृ+घञ् भावे = घुत् कारः the sound घत। गुञ्जत्कुटीरकौशिकघटानां घत्कारः। स अस्ति अस्मिन् इति मतुप् =गुञ्जत् कुञ्जकुटीरकौशिकघटाघुत्कारवान्। कीचक whistling bamboo.

स्तम्ब clump. **आडम्बर** is **पटहध्वनि** ; here, the hubbub created by innumerable bamboos whistling together but not in unison **कीचकानां स्तम्बाः। तेषाम् आडम्बरः। गुञ्जत्कुञ्जकुटीरकौशिकघटाघुत्कारवान् कीचकस्तम्बाडम्बरः कर्म्मधा—।** **मौकुलि** is **काक।** Now see Mit. The crows are a proverbially-clamorous lot and bamboo clumps are thir favourite resort. Here they were on the bamboos, but dit not open their mouth at all not because owls held revelry and were hooting in very dark thickets close by. But the two sounds got mingled and overawed them. 2 Remark—Note Bhavabhuti's prefernce of the uncommon to the common. He would have **कौशिक** not **पेचक**, **मौकुलि** not **वायस**, **प्रचलाकिन्** not **मयूर**, **रौहिण** not **चन्दन**, **कुम्भीनस** *not* **अजगर।**

(*XXXVI*) (शम्बू—) अपि च—

एते ते कुहरेषु गद्गदनदद्गोदावरीवारयो
मेघालङ्कृतमौलिनीलशिखराः क्षौणीभृतो दक्षिणाः।
अन्योऽन्यप्रतिघातसङ्कुलचलत्कल्लोलकोलाहलै-
रुत्तालास्त इमे गभीरपयसः पुण्याः सरित्सङ्गमाः॥ ३०॥

(इति निष्क्रान्तौ)।

इति पञ्चवटीप्रवेशो नाम द्वितीयोऽङ्कः।

(Samb.)—Moreover.

These are those southern mountains that have the waters of the Godavari gurgling in their caves and have thair peaks blue because the top is adorned with clouds, Here are those holy deep-watered river-confluence resounding with roar of billows that rush along mixed up through impact. (30).

(Exeunt)

(This is the second Act styled—

Entrance into Panchavati.)

मित—। एते इति। अन्वयः—एते ते कुहरेषु गद्गदनद्गोदावरीवारयः मेघालङ्कृतमौलिनीलशिखराः दक्षिणाः क्षौणीभृतः। इमे ते गम्भीरपयसः अन्योन्यप्रतिघातसङ्कुलचलत्कल्लोलकोलाहलैः उत्तालाः पुण्याः सरित्सङ्गमाः। व्याख्या—'एते' इमे दृश्यमानाः ते पूर्वदृष्टाः 'कुहरेषु 'गद्गदम्' अव्यक्तं 'नदन्ति' शब्दायमानानि गोदावर्य्याः वारीणि' जलानि येषु तादृशाः किञ्च 'मेघैः अलङ्कृता' ये मौलयः' शिरोभागाः तैः नीलानि शिखराणि' शृङ्गाणि येषां तथाविधाः 'दक्षिणाः' दक्षिणदिग्वर्त्तिनः क्षौणीभृतः' पर्वताः। इतश्च पुनः इमे' दृश्यमानाः 'ते' पूर्वदृष्टा 'गभीरपयसः अगाधजलाः 'अन्योऽन्यप्रतिघातेन' परस्परसंघर्षेण 'सङ्कुलं' मिश्रं यथा तथा चलता' प्रसर्पतां 'कल्लोलानां तरङ्गानां 'कोलाहलैः' आरावैः 'उत्ताला' उत्कटा अहृद्या, 'पुण्याः' पावनाः 'सरित्सङ्गमाः' नदीसन्निपाताः॥

Notes :—1. गद्गद &c,—For समास see Tika This shows that the hills had partially entered the waters of the गोदावरी। 2 मेघ &c —मौलि head शिखर peak In the case of a hill the head is paek and the peak is head. But to avoid the consequent tautology we have to think of मौलि in a general sense and then refer to शिखर। See Tika 3 दक्षिणाः—दक्षिण here means दक्षिणस्थ by transference of epithets. We cannot have आच् in the sense of दक्षिणस्यां दिशि because आच् gives an अव्यय and the विसर्ग elides 4 अन्योऽन्य &c.—प्रति+हन+घञ्+भावे = प्रतिघात impact. अन्यस्य अन्यस्य प्रतिघातः इति अन्योऽन्यस्य प्रतिघातः = अन्योऽन्यप्रतिघातः, the स in the first अना being retained बाहुलकात्। The varttikas bearing on this point are "कर्म्मव्यतिहारे सर्वनाम्नोर्द्वे वाच्ये समासवच्च वहुलम्" which doubles अन्यस्, "अन्यपरयोर्न समासवत्" prevents the elision of षष्ठी in अन्यस्य। Next 'असमासवद्भावे पूर्वपदस्थ सुपः सुर्वाच्यः" gives अन्यः अन्यस्य = अन्योन्यस्य। 5, उत्तालाः—उद्गतास्तालात् उत्तालाः। 'उत्ताली विकटे श्रेष्ठे' इति मेदिनी। We get श्रेष्ठ if ताल is a palm. tree and विकट when ताल means time measure, The English equivalent in that case is 'discordant, disagreeable. The कोलाहल makes the place disagreeable.

उत्तरचरितम्

तृतीयोऽङ्कः ।

(*i*) (ततः प्रविशति नदीद्वयं तमसा मुरला च)

तमसा—सखि मुरले किमसि सम्भ्रान्तेव ?

मुरला—भगवति तमसे, प्रेषितास्मि भगवतः अगस्त्यस्य पत्न्या लोपामुद्रया सरिद्वरां गोदावरीमभिधातुम—(मु—)

(*Then enter two streams Tamasa and Murala*)

Tam.—Frined Murala, why do you seem to be in a hurry (or agitated) ?

Mur.—Mighty Tamasa, I am sent by Lopamudra, the wife of worshipful Agastya to Godavari to say (this)—(Mur.)

मित— । सम्भ्रमसत्वरा आवेगो वा । 'सम्भ्रान्ता' त्वरावती अवेगवती वा ।

Notes :—1, नदीद्वयम्—by नदी is here meant नदीदेवता, presiding deity of a river. 2. भगवति तमसे—The address भगवति shows मुरला were much lower in status than तमसा । She was quite an ordinary individual, so there is nothing strange in her running errands of लोपामुद्रा ।

(*ii*) (मु)—"जानास्येव यथा वधूत्यागात् प्रभृति ।
अनिर्भिन्नो गभीरत्वादन्तर्गूढघनव्यथः ।
पुटपाकप्रतीकाशो रामस्य करुणो रसः ॥ १ ॥

(Mur)—"You surely know that since the renunciation of his wife (Or—of our daughter in-law Sita),—

Rama's tender feelings, unrevealed through calmness but with the intense anguish hidden within have been like the bakings in a clossed vessel.—(1) (Mur—).

मित—। 'वधूवाः' पत्न्याः स्नुषाया सीतायाश्च वा 'त्यागात् प्रभृति' त्यागकालमारभ्य ॥ अनिर्भिन्नेति । अन्वयः—गभीरत्वात् अनिर्भिन्नः अन्तर्गूढघनव्यथः रामस्य करुणो रसः पुटपाकप्रतीकाशः भवति । व्याख्या—'गभीरत्वात्' आत्मनः अलौकिकात् गाम्भीर्यात् अनिर्भिन्नः हृदयं निर्भिद्य वहिरनागतः किन्तु 'अन्तः' मध्ये हृदये इत्यर्थः 'गूढा निलीना 'घना' गुर्वी 'व्यथा हृदयवेदना यस्य तथाविधः 'रामस्य करुणो रस ' शोकजो मनोविकारः 'पुटे' रुद्धमुखे पात्रे यत् 'पच्यते' तत्तुल्यः 'पुटपाकप्रतीकाशः पुटपक्वद्रव्यवत् प्रतीयते । अत्र रामो रुद्धमुखं पात्रम्, करुणो रसः अन्तःस्थितं पच्यमानं वस्तु । परं पच्यमानस्यैव वेदना न्याय्या, दृश्यते तु पुटतुल्यस्यरामस्य, इत्युपमाक्लेशः ॥

Notes :—1 वधूत्यागात—वधु wife जाया, also स्नुषा danghter in-law, "वधूर्जाया स्नुषा च' इत्यमरः । प्रभृतियोगे ५मी । अनिर्भिन्नः—निर्+भिद+क्त कर्त्तरि=निर्भिन्नः issued out. भिद usually means 'to pierce', here the meaning has changed, The गति which is implied in piercing has become more prominent. Hence गत्यर्थत्वात् कर्त्तरि क्त । Or say निर्+भिद+क्त भावे—निर्भिन्नम् । तत् अस्ति अस्य इति निर्भिन्न+अच्मत्वर्थे=निर्भिन्नः । This applies both to करुणो रसः and the thing baked (पाक) । 3. गभीरत्वात् गभीरत्व is गाम्भीर्य impeturbability, This belonsgs to रामः । This applies to पुट also, गभीरत्व then meaning depth· The vessel must be deep enougn to hold the thing baked and have room to spare.Otherwise the heat will burst it open ; there will be निर्भेद an overflow, and the baking will no longer be अनिर्भिन्न । 4. अन्त &c —Fer समास see Tika.

Mark—The heating affects the baked ; hence the व्यथा belongs to the thing baked which changes colour and does a lot of other thing indicative of the heat. Now as the thing baked is compared to करुणो रसः the व्यथा should also go with it. But whot sort of व्यथा does the करुणो रसः feel in this case ? अन्त refers to both राम and पुट। 5. पुट &c—प्रति + कश + घञ् कर्म्मणि करणे वा प्रतिकाशः or प्रतीकाशः। पच्यते इति पच + घञ् + कर्म्मणि पाकः। पुटे पाकः पुटपाकः baking in a closed vessel, सुप्सुपा। or पुटे पाकः (घञ्भावे) अस्य पुटपाक व्यधिवहु—। Amaras "स्युरुत्तरपदे त्वमी। निभसङ्काशनीकाश-प्रतीकाशोपमादयः॥" implies that प्रतीकाश means like (तुल्य) only when it is final in a compound. Hence though पुटपाकप्रतीकाशः means पुटपाकतुल्य, yet when uncompounded, पुटपाकेन प्रतीकाशः does not mean पुटपाकेन तुल्यः। Cousequently the वाक्य should not contain प्रतीकाश। Thus पुटपाकेन तुल्यः इत्यर्थः=पुटपाकप्रतीकाशः a नित्यसमास of the सुपसुपा class. 6. Remark—राम and पुट are compared, also पाक and करुणरस। The defects in the simile are already noted—see Mitabh and note 4 (above)

(*III*) (मू—) "तेन च तथाविधेष्टजनकष्टविनिपातजन्मना प्रकर्षगतेन दीर्घशोकसन्तापेन सम्प्रति नितरां परिक्षीणोरामभद्रः। रामभद्रेण नियतमेव पञ्चवटीवने वधूसहवासविस्रम्भसाक्षिणः प्रदेशा द्रष्टव्याः। तेषु च निसर्गधीरस्यापि एवंविधायामवस्थायाम् अतिगम्भीराभोगशोकक्षोभसंवेगात् पदे पदे महान्ति प्रमाद-

स्थानानि शङ्कनीयानि रामभद्रस्य। तत् भगवति गोदावरि, त्वया सावधानया भवितव्यम् ।—" (मु—)

(Mur) "Hence indeed Ramabhadra is now extremley emaciated all over through the torture of lasting grief arising from the lamentable loss of such a dear one and which has reached its climax. (My heart trembles as it were on seeing him. Now again, while returning), sites have surely to be seen by Ramabhadra in the forest of Panchavati that are witnesses of familarities while living there with wife. and in them, under such conditious, great occasions of danger from the intensity of the shock of grief of a very deep reach have to be aparehended at every step of Ramabhadra though naturally very firm.

So mighty Godavari, you have to be watchful —

(Mur—).

मित—'तेन च करुणस्य पुटपाककल्पत्वहेतुना 'प्रकर्षगतेन' सातिशयेन 'दीर्घशोकस्य' चिरदुःखस्य' 'सन्तापेन ज्वालया 'सम्प्रति नितराम्' अतीव 'परिक्षीणः कृशतामापन्नः रामभद्रः। किम्भूतेन सन्तापेन ?—'तथाविधः' तादृशः यः 'इष्टःजनः प्रियजनः सीतारूपः तस्य यः 'कष्टः' कष्टकरः दारुणः तस्यामवस्थायाम् अभावनीयत्वात् सुदुःसहः इत्यर्थः 'विनिपातः' तस्मात् 'जन्म यस्य तादृशेन सन्तापेन। असहायायाः पूर्णगर्भाया विश्वस्ताया प्रियेण स्नेहवता च भर्त्रा कृतो विनाशः इति भर्त्तुः सम्बन्धे कष्टत्वं विनिपातस्य। दुःखञ्च रामस्य, न हि दुःखमापन्ना सीता इति, किन्तु मृतैव सा इति। तत् "कष्टविनिपातः" इत्यनेन मरणं लक्ष्यते न तु क्लेशमात्रम्। प्रतिनिवर्त्तमानेन जनस्थानात राजधानीं प्रतिगच्छता नियतं निश्चितम्। वध्वा सह वासे ये विश्रम्भाः' स्वच्छन्दविहाराः तेषां 'साक्षिण' 'तेषु च' प्रदेशेषु 'निसर्गेण' प्रकृत्या 'धीरस्यापि' अविचलनशीलस्यापि रामभद्रस्य एवंविधामवस्थायां कार्य्यान्तरचिन्ताशून्ये काले पूर्ववृत्तान्तस्मारकपदार्थ-

परिव्यासे देशे च 'अतिगम्भीरः अन्तस्तलस्पर्शी आभोगः विस्तारो यस्य तादृशोः यः शोकः' तस्मात् यः 'क्षोभः' चेतोविकारः तस्य संवेगात् वेगातिशयात् 'पदे पदे' प्रतिपदं 'महान्ति प्रमादस्थानानि' भयविषयाः 'शङ्कनीयानि' ऊहितव्यानि। शोकवेगात् यत्र कुत्रासौ व्यापाद्येत इति मे भयम् इति भावः। 'सावधानया' अवधानपरया सतर्कया भवितव्यम् ॥

Notes :—1. तेन च—हेयौ २या। Because पुटपाकप्रतीकाशः, therefore. 2. तथाविध &c—तथा विधा प्रकारः अस्य तथाविधः of that type, बहु—। इष्यते इति इष+क्त वर्त्तमाने इष्टः favourite. इष्टजनः सीता। तथाविधेष्टजनः, कर्म्मधा—। कष्टविनिपात is rendered अनिष्टसङ्घटन by Vidyasagara. But Rama grieved, because Sita was dead and under such tragic circumstances. Hence, though seers like वशिष्ठ, अरुन्धती, अगस्त्य, लोपामुद्रा &c. —know that Sita was not dead, yet it seems better here to suppose that लोपामुद्रा was speaking with reference to Rama's estimation of the matter. Besides from the conversation that follows, it is obvious that Murala herself thought Sita was dead and Lopamudra's कष्ट-विनिपात did not make her think otherwise. We therefore treat कष्ट-विनिपात as a कर्म्मधा—। तथाविधेष्टजनस्यकष्टविनिपातः, ६तत्—। तस्मात् जन्म यस्य तेन, बहु—। This final व्यधिकरणबहु is unavoidable (अवर्ज्य) though against पाणिनि। "अवर्ज्यो बहुव्रीहिर्व्यधिकरणो जन्माद्युत्तरपदः" so says Vamana. 3. नितराम्—नि implies प्रकर्ष excess Further प्रकर्ष is added by तरप् and आम् comes in by "किमेत्तिङव्ययघात् आम्व अद्रव्यप्रकर्षे"। Thus नितरामतिशयेन इति नि+तरप्+आमु नितराम्। The प्रकर्ष lies in क्षीणत्वगुण, hence there is गुणप्रकर्ष not द्रव्यप्रकर्ष and the rule applies. 4. परिक्षीणः—परि+क्षि+क्त कर्त्तरि=परि क्षी+क्त परिक्षीण। The परि here does not imply excess because the excess is already expressed fully by नितराम्। It declares सर्वतोभाव of the क्षीणता, i.e., Rama was lean all over. 5. बध

&c. सह एकत्र वासः सहवासः सुप्सुपा। वध्वा सहवासः, सुप्सुपा। 6. एवंविधायाम् &c.—Refers to both time and place. The time was against him because in the first place he was so weak in body and therefore unable to stand a shock, secondly because having nothing to keep him engaged (the hunt after Sambuka having ended) he was likely to brood. The place, full of reminiscences was obviously against him 5. अतिगम्भीर &c —अतिगम्भीर., प्रादितत्— । अतिगम्भीराभोगः बहु— । &c. See Mitabh—. 6. महान्ति प्रमाद &c —प्र+मद्+ घञ् भावे प्रमाद carelessness, Hence danger which usually results from carelessness. Here the meanning is danger as in "नेपथ्ये—प्रमादः प्रमादः" (Para xu below) प्रमादस्य स्थानानि occasians for danger, महान्ति is made to qualify प्रमादस्थानानि। A प्रमादस्थान is deemed महत् if it is most likely to cause प्रमाद।

(IV) (मु—)

"वीचीवातैः शीकरक्षोदशीतैराकर्षद्भिः पद्मकिञ्जल्कगन्धान् ।
मोहे मोहे रामभद्रस्य जीवं स्वैरं स्वैरं प्रेषितैस्तर्पयेति'—ति ॥३॥

(Mur—) "You refresh the life of Rambhadra at every swoon with breezes sent gently and gently from your waves—breezes that are cool through the pounding of particles of spray and wafting fragranee from lotus filaments" (2)

मित—। वीचीति। अन्वयः—"मोहे मोहे शीकरक्षोदशीतैः पद्मकिञ्जल्कगन्धान् आकर्षद्भिः स्वैरं स्वैरं प्रेषितैः वीचीवातैः रामभद्रस्य जीवं तर्पय"

इतिअभिधातुं प्रेषितास्मि)। व्याख्या—मोहे मोहे प्रतिमोहं यदैव मूर्च्छितो रामभद्रस्तदैव त्वं 'शीकराणां क्षोदेन' पेषणेन 'शीतैः' शीतलैः अतो जीवतर्पणसमर्थैः 'पद्मकिञ्जल्कानां कमलकेशराणां 'गन्धान् आकर्षद्भिः सुरभिभिरित्यर्थः अतश्च जीवतर्पणैः स्वैरं स्वैरं मन्दं 'प्रषितैः प्रेरितैः अतोऽपि जीवतर्पणैः 'वीचीवातैः' तरङ्गवायुभिः करणैः 'रामभद्रस्य जीवं' चेतनाधातुं तर्पय प्रीणय' 'इति' एतत् अभिधातुम् प्रेषितास्मि इति पूर्वेण सम्बन्धः ॥

Notes :—1. वीची &c.—वीचि is both masc. and neutre. The ङीप् is optional, hence वीचि or वीची in the feminine. वीचीसङ्गता वाता. वीचीवाता। तैः। करणे तया। 3. शीकर &c.—क्षुद् to pound + घञ् भावे क्षोद pounding. शीकर is जलबिन्दु। These come from the वीची। शीत is better left to be inferred instead of being broadly stated. For समास see मित—। The breeze is acceptable if it is mild, cool and fragrant. This epithet attaches coolness to the breeze. 3. पद्म etc. This makes the breeze fragrant. 4. स्वैरं स्वैरम्—स्वः ईरः प्रेरणं अस्मिन् स्वरम् self-determined, hence mild. The duplication is by "प्रकारे गुणवचनस्य"। स्वैरंस्वैरम् = मन्द-प्रकारम्। But then the double form has to be treated as a कर्म्मधारय by the rule "कर्म्मधारयवदुत्तरेषु"। This gives स्वैरस्वैरम्। स्वैरं स्यैरम् hence is a poetical licence,—Irregularity. See Act I. sl' 27. and मन्दम् मन्दम् in Megha.

(V) तमसा—उचितमेव दाक्षिण्यं स्नेहस्य ; सञ्जीवनोपायस्तु मौलिक एव रामभद्रस्यात्र सन्निहितः।

मुरला—कथमिव ?

तमसा—श्रूयताम। पुरा किल वाल्मीकितपोवनोपकण्ठात् परित्यज्य गते लक्ष्मणे सीतादेवी प्राप्तप्रसववेदनमात्मानम्

अति-दुःखसंवेगात् गङ्गाप्रवाहे निक्षिप्तवती। तदैव तत्र दारकद्वयं प्रसूता, भगवतीभ्यां पृथ्वीभागीरथीभ्यामभ्युपपन्ना रसातलञ्च नीता। स्तन्यत्यागात् परेण च तत् दारकद्वयं तस्याः प्राचेतसस्य महर्षेर्गङ्गादेवी स्वयमर्पितवती।

Tam. This kindness is indeed worthy of the affection The very fundamental means of reviving Ramabhadra, however, is at hand to-day.

Mur—How so ?

Tam.—Listen. In the past queen Sita (Lakshmana having returned from the neighbourhood of the penance grove of Valmiki, leaving her there) under the impulse of violent grief, threw herself into the currents of Ganga with the labour pains on , that very moment there she gave birth to two boys, and favoured by mighty Earth and Bhagirathi, was taken to the nether regions, After they had been weaned from mother's milk, again, these two boys of hers were delivered unto the great sage Prachetasa by the goddess Ganga herself.

मित—। उचितमिति—'दाक्षिण्यम्' उदारता। एतत् 'दाक्षिण्यम्' इयमुदारता रामं प्रति तस्याः 'स्नेहस्य उचितमेव। 'तु' पक्षान्तरे 'अद्य रामभद्रस्य मौलिक मूले सीतारूपे प्रधानायतने भवः 'सञ्जीवनोपायः' जीवतर्पणविधिः 'सन्निहितः करप्राप्तः॥ श्रूयतामित्याहि=उपगतः कण्ठम् 'उपकण्ठ' समीपवर्ती देशः। 'वाल्मीकितपोवनस्य उपकण्ठः' तस्मात् (अपादाने ५मी)। अतिदुःखस्य' प्रवलवेदनायाः यः 'संवेगः' दारुणता तस्मात् हेतोः। 'अभ्युपपन्ना' अनुगृहीता। तस्याः तत् दारकद्वयं स्तन्यत्यागात् परेण कालेन स्तन्यत्यागमात्रमेव इत्यर्थः 'स्वयं गङ्गादेवी प्राचेतसस्य महर्षेः' वाल्मीकेः (सम्बन्धसामान्ये षष्ठी) 'अर्पितवती॥

Notes :—**मौलिकः**—मूले भव इति मूल ठञ **मौलिकः** original, fundamental. **मूल** is here **सीता**। 2. **प्रसूता**—प्र+सू क्त कर्त्तरि

आविष्कर्म्मणि स्त्रियाम्। Or सू means प्राणिप्रसव which implies motion of the foetus. Hence the root is in a manner गत्यर्थ and as such takes क्त in the कर्त्तृवाच्य by the rule "गत्यर्थाकर्मक—" । 3. परेण—पर here is परवर्त्तिकाल। तेन। अपवर्गे तृया। No definite period of time is meant. No sooner परवर्त्तिकाले came they were brought to Valmiki. 4. प्राचेतसस्य—प्रचेतस् is वरुण। तस्य अपत्यं पुमान् इति प्रचेतस् + अण् प्राचेतसः। तस्य। सम्बन्धसामान्ये षष्ठी as in रजकस्य वस्त्रं ददाति।

(VI) मुरला (सविस्मयम्)—
ईदृशानां विपाकोऽपि जायते परमाद्भुतः।
यत्रोपकरणीभावमायात्येवंविधो जनः॥ ३॥

Mur (*In wonder*)—

Of such persons, adversity too becomes highly interesting—adversity in which people of this stamp play the part of servers (3).

मित—' ईदृशानामिति। अन्वयः—ईदृशानां विपाकोऽपि परमाद्भुतः जायते, यत्र एवंविधो जनः उपकरणीभावम् आयाति। व्याख्या—ईदृशानाम् एवंविधानाम् अप्राकृतानां जनानां सीताप्रमुखाणामित्यर्थ 'विपाकोऽपि' विषमोऽपि परिणामः 'परमाद्भुतः अत्याश्चर्य्यो जायते' भवति 'यत्र' विपाके एवंविधः ईदृशः गङ्गाप्रमुखः जनः उपकरणीभावम् उपकारकताम् आयाति भजते, उपकारको भवति। स्वयं गङ्गा उपकारिणी पृथ्वी च इत्यद्भुतता सीताया विपदः इति भावः॥

Notes—1. विपाकः—पच + घञ् भावे कर्म्मणि वा पाकः development परिणतिः। विषमः पाकः विपाकः an untoward turn, a calamity. प्रादि-तत—। 2. उपकरणीभावम्—उपक्रियते अनेन इति उप+कृ+ल्युट् करणे उपकरणम् help, hence benefactor उपकारकः।

Or उप + कृ ल्युट् कर्त्तरि बाहुलकात् उपकरणम् benefactor उपकारकः । अनुपकरणम् उपकरणं भवति i e., उपकरणस्य भावम् आयाति इति उपकरण + च्वि + भू + लट् ति उपकरणीभवति (i e. उपकरणीभावम् आयाति) । This is directly expressed with घञ्—thus अनुपकरणस्य उपकरणस्यभाव इति उपकरण + च्वि + भू + घञ् भावे उपकरणीभावः । तम् ।

(VII) तमसा—इदानीन्तु शम्बूकवृत्तान्तेनानेन सम्भावितजनस्थानागमनं रामभद्रं सरयूमुखादुपश्रुत्य भगवती भागीरथी यदेव भगवत्या लोपामुद्रया स्नेहादाशङ्कितं तदेवाशङ्क्य सीतासमेता केनचिदिव गृहाचारव्यपदेशेन गोदावरीं विलोकयितुमागता ।

Tam—But just now, having heard from the mouth of Saraju that, through the Sumbuka affair, Ramabhadra's visit to Janasthana is assured, mighty Bhagirathi apprehending just what is feared by Worshipful Lopamudra through affection, has under the pretext of some family observance, come to see Godavari, accompanied by Sita.

मित—। 'इदानीं तु' सम्प्रति पुनः 'सरय्वाः' नद्याः मुखात् अनेन शम्बूकस्य वृत्तान्तेन' "तदाश्यो वृषलस्तपस्तपाते तं हत्वा जीवय द्विजम्" इति वृत्तान्तेन 'सम्भावितं' सम्यक्भावितं निश्चितमित्यर्थः 'जनस्थानागमनं' यस्य तादृशं रामभद्रम् उपश्रुत्य' नूनं शम्बूकं हन्तुं' जनस्थानं गमिष्यति रामभद्र इत्येव सरय्वा विज्ञापिता भगवती भागीरथी 'केनचिदिव' येन केनचित् 'गृहाचारस्य कुलक्रियायाः 'व्यपदेशेन' छलेन हेतुना इदंमे कुलकर्म्म गोदावरीसमीपे कर्त्तव्यम् इति 'यथामति किञ्चित् छलमवलम्ब्य इत्यर्थः 'गोदावरीं विलोकयितुमागता' तत्रैव रामेण-सीता समेष्यति इति ॥

Notes :—1. शम्बूक &c—This does not refer to the beheading of शम्बूक. but to the prediction made by the voice in the air. See next. 2. सम्भावित &c.—सम + भू + णिच + क्त कर्म्मणि सम्भावितम् ।

Usually this means likely, here sure, fully guessed &c.—(सम्यगूहित)। In this sense compare सम्भावनीय in—सम्भावनीयानुभावा अस्य आकृतिः—Sakuntala. The voice in the air having declared the condition of the boy's revival, Rama was bound to go to जनस्थान where शम्बूक was and his presence there could be clearly seen (सम्भावित)। But whether we mean likely or sure, शम्बकवृत्तान्त cannot refer to the beheading of शम्बूक। For in that case राम has to be taken as already come to जनस्थान, because शम्बूक was practising penance is जनस्थान। Comp, Vasanti's "अस्मिन्नेव जनस्थाने तपश्चरति" in Act II. Hence, he being already there, it is absurd to say he is likely or sure to come. 3. गृहाचार &c—This आचार is not the ग्रन्थिबन्धन referred to by तमसा below. But something that came up to her at the time—it was altogether imaginary, a hoax, as is obvious from इव in केनचिदिव। भागीरथी gave सीता a plausible reason for the visit and asked her to accompany—which सीता did.

(VIII) मुरला—सुविचिन्तितं भगवत्या "राजधानीस्थितस्य खलु नैस्तैर्जगतामाभ्युदयिकैः कार्य्यैर्व्यापृतस्य रामभद्रस्य नियताश्चित्तविक्षेपाः। अव्यग्रस्य पुनरस्य शोकमात्रद्वितीयस्य पञ्चवटीप्रवेशो महाननर्थः" इति। तत् कथमिदानीं सीतादेव्या रामभद्र आश्वासनीय स्यात् ?

Mur. It is well guessed by her mighty self—the commotions of Ramabhadra's mind are indeed checked while staying in his capital occupied with all those

measures of beneficence to the worlds ; but entrance into the Panchavati is highly undesirable (a great mishap) for him unoccupied and with grief alone for his second. Well, then how is Ramabhadra to be consoled now by queen Sita ?

मित—। 'राजधान्यां स्थितस्य जगताम् आभ्युदयिकैः' मङ्गलविधायकैः कार्यैः व्यापृतस्य' आसक्तचित्तस्य 'रामभद्रस्य चित्तविक्षेपाः' जानकीविरह-भावनाजनिताः मनसः क्षोभाः 'नियता ' नियन्त्रिताः । 'अव्यग्रस्य पुन ' किन्तु विषयान्तरैः अनासक्तस्य 'शोकमात्र' द्वितीयं' सहाय इत्यर्थः यस्य तादृशस्य 'अस्य पञ्चवटीप्रवेशो महान् अनर्थः' अनिष्टम् 'इति' एतत् 'भगवत्या' भागीरथ्या 'सुविचिन्तित' निपुणमवधारितम् । 'तत् तस्मात् अनर्थे पञ्चवटीप्रवेश इति हेतोः पृच्छामि—सति अनर्थे सीतादेव्या कथं रामभद्रः आश्वासनीयः स्यात् । गोदावरीहृदे स्थितया सीतया रामभद्रस्य समागम एव न स्यात, आस्ताम् आश्वासनम् इति भावः ॥

Notes —1 सुचिन्तितम्—Well thought of The कर्म is इति following , and इति refers to the whole from राजधानी to अनर्थः। 2. आभ्युदयिकैः—अभि+उद्+इ+अच् भावे अभ्युदय prosperity. अभ्युदय: प्रयोजनम् एषाम् इति अभ्युदय ठञ् आभ्युदयिकानि । तैः । 3. नियताः—नि+यम+क्त कर्मणि checked 4. अव्यग्रस्य—न व्यग्रः अव्यग्रः unoccupied. 5 शोक etc. शोक एव शोकमात्रम्, मयूर-व्यंसकादि तत्— । तत् द्वितीयं यस्य without any other companion but शोक । He will then brood over शोक । 6. अनर्थ—अर्थ is प्रयोजन the end, the end be wished for. न अर्थः अनर्थः what is not wished for, hence a mishap. 7. कथम् &c —I do not see how Sita could console Rama. She is under water with गोदावरी, while राम is here in पञ्चवटी।

(XI) तमसा—उक्तमत्र भगवत्या भागीरथीदेव्या—वत्से देवयजनसम्भवे सीते, अद्य खलु आयुष्मतोः कुशलवयोर्द्वादश-

—संवत्सरस्य संख्यामङ्गलग्रन्थिरभिवर्त्स्यति। तत आत्मनः पुराणश्वशुरम् भगवतो मानवस्य राजर्षिवंशस्य प्रसवितारं सवितारम् अपहतपाप्मानं देवं स्वहस्तावचितैः पुष्पैरुपतिष्ठस्व। न च त्वामवनिपृष्ठचारिणीम् अस्मात्प्रभावात् वनदेवता अपि द्रक्ष्यन्ति किं पुनर्मर्त्त्याः" इति। अहञ्च आज्ञापिता—"तमसे, त्वयि प्रकृष्टप्रेमैव वधूर्वत्सा जानकी। अतस्त्वमेवास्याः प्रत्यन्तरीभव" इति। साहमधुना यथादिष्टमनुतिष्ठामि।

Tam—In this matter has been said this by the mighty goddess Bhagirathi .—

"Child Sita, sprung from the ground for divine sacrifice, this very day is being tied the auspicious knot for the enumeration of the twelfth year of Kusa and Lava of long life. So do you worship, with flowers, plucked with your own hand, your primeval father-in-law the god Sun, the destroyer of sin, the progenitor of this race of royal sages descended from great Manu. Through my power, even forest-deities shall not see you, moving on the surface of the earth, how again mortals ?' And I have been commanded thus :—'Tamasa, our daughter-in-law child Janaki, is indeed greatly attached to you ; so be you her close companion." (Thus commissioned) I now do as bid.

मित—। 'अत्र' अस्मिन् विषये सीताकर्तृकरामसमाश्वासनप्रस्तावे। द्वादशस्य संवत्सरस्य या 'संख्या' गणना तस्या 'मङ्गलकरो ग्रन्थिः' बन्धः अभिवर्त्स्यते ग्रथ्यते यो हि ग्रन्थिः प्रतिवर्षमायुष्मतोर्जन्मतिथौ सूत्रे तस्मिन् बध्यते एकादश च येषां ग्रन्थीनां बद्धाः तेषां द्वादशो ग्रन्थिर्बध्यते इत्यर्थः। 'पुराणम्' प्राचीनम् आद्यमित्यर्थः 'श्वशुरम्'। 'मानवस्य' मनुसम्बन्धिनः वैवस्वतमनोर्जातस्य वंशस्य। 'अपहतः' विनाशितः 'पाप्मा' पापं येन तम् सवितारं 'स्वहस्तेन अवचितैः पुष्पैः उपतिष्ठस्व' पूजय। ननु अत्र कुतः

पुष पाणि, तत् पुष्पार्थं मया समीपवर्त्तिनि वनस्थाने भ्रमितव्यम्। जनाश्च मां मृतां जानन्ति, तत् यदि केनचित् दृष्टा स्याम् अनिष्टं प्रसज्येत इत्यत्राह—अवन्याः पृष्ठे विचरन्तीं त्वाम् अस्माकं प्रभावात् ममैव सहिता 'वनदेवता' अपि न द्रक्ष्यन्ति किं पुनर्मर्त्याः' कुतो वा मानुषाः पश्येयुः तन्निःशङ्कं गच्छ। त्वयि 'प्रकृष्टप्रेमा'-- स्वं परमानुरागा। सती 'प्रत्यन्तरीभव अनुचरीभव॥ 'यथादिष्टम्' आदिष्टमनतिक्रम्य अहमेतत् अनुतिष्ठामि।

Notes—1. कुशलवयोः—मुरला does not know who कुश and लव are. In द्वादश etc.—द्वौ च दश च 'द्वादश' twelve दि becomes दा by "द्व्यष्टनः संख्यायाम्—"। द्वादशानां पूरण इति द्वादशन्+डट्= द्वादशः twelfth. A knot is tied on a silk string at the completion of each year of the childs age. The twelfth year is complete to-day (अद्य खलु)। The boys were born on the day सीता was abandoned. That very day Rishyasringa's sacrifice commenced It was to last 12 years We are already informed that the sacrifice is over (see Act II– विष्कम्भक)। Hence we have to suppose that तमसा and मुरला met on the day of the completion of the sacrifice. 2. उपतिष्ठस्व—देवपुजायाम् आत्मनेपदम् owing to the Vartika "उपाद्देवपुजा—। 3. प्रकृष्टप्रेमा —प्रकृष्टः प्रेमा or प्रकृष्टं प्रेम यस्याः सा। Here the प्रातिपदिक is प्रकृष्टप्रेमन् in the original masculine. In the fem. ङीप् is barred by "मनः। Hence the fem. form is also प्रकृष्टप्रेमन्। 4. प्रत्यन्तरीभव—No समास, we have two distinct words प्रत्यन्तरी and भव by the rule "उपपदमतिङ्"। अन्तर is अवकाश interval, opportunity &c. प्रतिगता अन्तरं प्रत्यन्तरा one who is ready at the right moment, i. e., a companion, प्रादिवत्। अप्रत्यन्तरा प्रत्यन्तरा भव इतिप्रत्यन्तरा+च्वि+भूलोट्हि।

(*x*) मुरला—अहमप्यमुं वृत्तान्तं भगवत्यै लोपामुद्रायै निवेदयामि। रामभद्रोऽपि आगत एव इति तर्कयामि।

तमसा—तदियं गोदावरीह्रदाविष्क्रम्य—

परिपाण्डु दुर्बलकपोलसुन्दरं दधती विलोलकबरीकमाननम्।
करुणस्य मूर्त्तिरिव वा शरीरिणी विरहव्यथेव वनमेति जानकी ॥४॥

Mur—I too will communicate this news to mighty Lopamudra. Rambhadra also, I guess, has indeed arrived-

Tam —Well, then here, emerging from Godavari's pool—

Janaki enters the wood with her beautiful face, wan lean in the cheeks, with her braid of locks dangling about —like the very person of the sentiment Karuna, or indeed like the pang of separation embodied. (4).

मित—। अहमित्यादि। रामभद्रोऽपि आगत एव इति तर्कयामि'—प्राप्त एव समाश्वासनकालः कुत्र नु सीता इति भावः॥ यत् त्वं राममागतमेव मन्यसे 'तत्' ब्रवीमि—तदिति—सीतापि आगता एव मा शङ्किष्ठाः॥ परीति। अन्वयः—परिपाण्डु दुर्बलकपोलसुन्दरं विलोलकबरीकम् आननं दधती जानकी करुणस्य मुर्त्तिरिव शरीरिणी विरहव्यथा इव वा वनमेति। व्याख्या—परिपाण्डु' पाण्डुरवर्णौ 'दुर्बलौ' क्षामौ 'कपोलौ' गण्डौ यस्मिन् तथाविधं सुन्दरं' मनोहरञ्च अतएव द्रष्टॄणां करुणोद्दीपकम् तथा 'विलोला बन्धनाभावात् दोदुल्यमाना 'कबरी यस्मिन् तथाविधम् अतएव विरहिणीत्वं प्रख्यापयत् 'आननं' मुखं दधन्ती 'जानकी करुणस्य' मुर्त्तिरव मूर्त्तिमानिव करुणो रसः 'शरीरिणी' धृतदेहा 'विरहव्यथा इव वा अथवा' सशरीरा वियोग-वेदना इव वनम् इति जनस्थानकाननं एति प्रविशति॥

Notes—1. रामभद्रोऽपि &c.—She fancies she sees signs of Rama's arrival, Hence her apprehension that disaster is immient while there are no signs of Sita's presence to avert

it. Tamasa reassures her with तदिदम् &c. 2. तदिदम् &c — Be not alarmed, here is Sita coming. 3. परिपाण्डु &c.—पाण्डु pale. परिपाण्डु very pale. दुर्बलौ weak, emaciated. परिपाण्डु च तौ दुर्बलौ च परिपाण्डुदुर्बलौ pale and emaciated, कर्म्मधा—। ताहशौ कपोलौ यस्मिन्। तच्च तत् सुन्दरम् च, कर्म्मधा—। Usually this is taken to mean that though the cheeks were pale and hollow yet the face looked beautiful (Vidyasagara), Or—beautiful because it was pale and emaciated (Viraraghava) Both these make the सौन्दर्य्य prominent. i. e, the observer is impressed by the सौन्दर्य्य at its sight. In other words he sees no करुणस्यमूर्त्तिः। We therefore take the सौन्दर्य as a natural attribute and परिपाण्डुता and दुर्बलता striking the observer as merely incidental and holding up to him an image of the havoc done by paleness etc., to a beautiful face. This is करुणस्यमूर्त्तिः 4. विलोल—etc विलोल dangling. कवरी a braid of hair. The कप् is समासान्त in बहु—। The कवरी was विलोल i. e., it was not tied up as in dressing the hair of toilet. This is the usual sign of the विरहिणी। It gives the observer the image of शरीरिणी विरहव्यथा। The comparison is thus two-fold—करुणस्य मूर्त्तिरिव through परि-पाण्डु etc. and शरीरिणी विरहव्यथेव from विलोल etc. It is not that the epithet परिपाण्डु etc. plays no part in the second comparison. There is the word व्यथा joined to विरह, and परिपाण्डु etc. indicates व्यथा। It is the बाधा, the torment of विरह that has taken the colour off the cheeks and hollowed them out. The second comparison is an improvement over the first.

(*xi*) मुरला—इयं हि सा ।

किसलयमिव मुग्धं बन्धनाद्विप्रलूनं
हृदयकुसुमशोषी दारुणो दीर्घशोकः ।
ग्लपयति परिपाण्डु क्षाममस्याः शरीरं
शरदिज इव घर्मः केतकीगर्भपत्रम् ॥५॥

(इति परिक्रम्य निष्क्रान्ते) ।

विष्कम्भकः ॥

(=See under Act II)

Mur.—Thus is indeed she !

Just as the heat, developedın autumn, does with respect to the leaf at the core of the ketaki, so the terrible and lasting grief, that hat blasted her flower-like heart, is drying up her extremely wan and lean body which resembles a beautıful new leaf picked from ıts stalk. (5).

(Exeunt goıng roung the stage).

Here ends the Vıshkambhaka

मित—। 'इयं हि सा' इतिप्रत्यभिज्ञा ॥ किसलयेति। अन्वयः— हृदयकुसुमशोषी दारुणः दीर्घशोकः (हृदयकुसुमशोषी) शरदिजः घर्म्मः केतकीगर्भपत्रमिव अस्याः बन्धनात् विप्रलूनं मुग्धं किसलयमिव परिपाण्डुक्षामं शरीरं ग्लपयति। व्याख्या—द्विविधमस्मिन् श्लोके साम्यम् शरीरग्लपनं केतकीगर्भपत्रग्लपनमिव इत्येकम्, शरीरं किसलयमिव परिपाण्डुक्षामम् इति द्वितीयम्। कुसुमतुल्यं हृदयं शोषयति, यस्तादृशः 'दारुणः' कठोरः 'दीर्घशोकः' चिरविरहवेदना 'हृदयस्थित पत्रकोषगं 'कुसुमं' केतकीकुसुम् शोषयति' यस्तादृशः 'शारदिजः' घर्म्मः तत्र शरत्कालसम्भव आगतः केतक्या गर्भपत्रमिव पुष्पावरकं पत्रमिव अस्याः बन्धनात् विप्रलूनं वृन्तात् छिन्नं

'मुग्धं' सुन्दरं किसलयमिव नवपल्लवमिव परिपाण्डु छिन्नत्वात् म्लानं म्लानं शोषं 'शरीरं ग्लपयति पीडयति ॥

Notes.—1. किसलय—The sibilant is dental not palatal. Compare the यमक in "किसलयैः सलयैरिव पाणिभिः—Raghu. 2. बन्धनात् &c.—Hence it is परिपाण्डुक्षाम । 3. हृदय &c—This goes with both दीर्घशोक and घर्म्म । See Mitabh—। हृदय heart (दीर्घशोक); also interior (घर्म), by transference of epithets हृदयं कुसुममिव (दीर्घशोक), also हृदये कुसुमम् (हृत्सूपा), or हृदयस्थितं कुसुमम् (शाकपार्थिवादि (कर्म्मधा—) in the case of घर्म्म । तत् शोषयतीति हृदयकुसुम+शुष+णिच्+णिनि कर्त्तरि ताच्छील्ये । 4. ग्लपयति—ग्लै+णिच+लट् तिप = ग्लापि + ति = ग्लापयति or ग्लपयति the आ here becming अ optionally by 'ग्लास्नावनुवमां च" । 5. परिपाण्डु &c.—lean and pale as she is like a fresh twig, plucked and exposed to the sun, the terrible grief is still gnawing at the core of her heart. 6. शरदिजः—शरदि जात इति शरद + जन+ड कर्त्तरि = शरदिजः the सप्तमी being retained by "तत्पुरुषे कृति बहुलम्" । 7. घर्म्मः – This is आतप sun-light, i, e., heat. 8. केतकी &c —केतकी is the flower together with its casing of leaves The core is the flower, the casing next to the flower is the गर्भपत्र and outside there are other leaves. These with the flower encased within are the केतकी of the market now. The flower is supposed to have withered through heat (हृदयकुसुमशोषी) । 9 Remark – It is strange that मुरला can see सीता । भागीरथी has declared that not even a वनदेवता can see her. The following are compared—(c) Sita's heart is tender like a flower. (b) Her pale and lean body is like a

fresh twig that has been plucked and has become discoloured and shrivelled through heat. (c) Her torment of grief is like the onslaught of autumnal heat on the innermost leaves of the Ketaki flower.

(*xii*) (नेपथ्ये) प्रमादः प्रमादः।

(ततः प्रविशति पुष्पावचयव्यग्रा सकरुणौत्सुक्यमाकर्णयन्ती सीता)।

सीता—अम्मो जानामि पियसही मे वासन्ती वाहरदि [अहो जानामि प्रियसखी मे वासन्ती व्याहरति]।

(पुनर्नेपथ्ये)—

सीतादेव्या स्वकरकलितैः शल्लकीपल्लवाग्रै-
रग्रे लोलः करिकलभको यः पुरा पोषितोऽभूत्।

सीता—किं तस्स [किं तस्य] ?

(पुनर्नेपथ्ये)—

वध्वा सार्धं पयसि विहरन् सोऽयमन्येन दर्पा-
दुद्दामेन द्विरदपतिना सन्निपत्याभियुक्तः ॥६॥

(In the tiring room)—(A) mishap ! (A) mishap !!

(*Then enters Sita occupied with gathering flowers and listening with sorrow and anxiety*)

Sita—Ha ! My dear friend Vasanti is shouting, I believe.

The young elephant, full of fun in her presence, that was reared formerly by queen Sita with tips of Sallaki twigs collected with her own hand—

Sita—What of him ?

(Again in the tiring room)

He, the same sporting in water with his mate, is attacked by an irresistible leader of tuskers defiantly rushing in through sheer insolence. (6).

मित—। 'प्रमादः' विपदित्यर्थः। एतत्तु वासन्त्या भाषितम् ॥ पुष्पाणामवचयः' हस्तेन सङ्कलनं तत्र 'व्यग्रा व्यापृता । वासन्तीसन्निधानात् 'करुणा'। प्रमादवर्णनात् विशेषविज्ञातार्थम् 'औत्सुक्यम्' ॥ पुनर्नेपथ्ये' इत्यत्र पुनरिति व्यर्थम् ॥ सीतेति । अन्वयः—पुरा सीतादेव्या य अग्रे लोलः करिकरभकः स्वकरकलितैः शल्लकीपल्लवाग्रैः पोषितः अभूत स. अयं वध्वा सार्द्धं पयसि विरहन् अन्येन उद्दामेन द्विरदपतिना दर्पात् सन्निपतत अभियुक्तः। व्याख्या—'पुरा' दण्डकावासकाले 'सीतादेव्या यः अग्रे सीतासमक्षं 'लोलः' चपलः शैशवोचितचाञ्चल्यविशिष्टः 'करिकरभकः' गजपोत 'स्वकरकलितैः' स्वहस्तावचितैः 'शल्लकीपल्लवानां कोमलैः 'अग्र : पोषितः वर्द्धितः अभुत सः अयं वध्वा' करेणुकया 'सार्द्धं' पयसि विहरन् जले क्रीडन् 'अन्येन अपरेण न तु येन केनचित् अपरेण किन्तु उद्दामेन द्विरदपतिना अमितबलेन कुनचित् गजेन्द्रेण दर्पात् गर्वात् सन्निपतत अभिधाव्य 'अभियुक्त' आक्रान्तः। इति प्रमादोऽयमापतितः ॥

Notes.—1. पुष्प &c —अव+चि+अच् भावे=अवचयः plucking. This is irregular. घञ् is enjoined in this sense by "हस्तादाने चेरस्तेये"। Also compare our कुसुमावचयव्यग्रहस्ता—Sakuntala, Act IV. 2. सकरुणा &c —करुणा sorrow Her sorrow strengthens because she hears Vasanti, her dear friend, speak. "स्वजनस्य हि दुःखमग्रतो विवृतद्वारमिवोपजायते"। औत्सुक्य eagerness. This is to know the details of the mishap to which Vasanti refers. 3. पुन नेपथ्ये—The पुनर् is useless The simple नेपथ्ये is enough. In fact one of Vidyasagar's manuscripts omits पुनर्। 4. स्वकर &c.— कलित plucked—Vidyasagara.

Viraghava says 'offered'. But plucked, implies more concern for the little one than offered, and is to be preferred. 5. **लोलः—लोल** restless. The restlessness is usually explained as due to his longing for the twigs in Sita's hand. It seems better to attribute it to the playfulness of childhood. In "**येनोद्गच्छद्विसकिसलयेस्निग्ध दन्ताङ्कुरेण व्याकृष्टस्ते सुतनु लवलीपल्लवः कर्णमूलात्**" (sl 15. below) Rama refers to **लोलत्व** in connection with the childhood of this elephant. 6. **करि** &c.—**करभ** a young elephant camel or horse. Here a young animal in general. **स एव करभकः। करी चासौ करभकश्च** or **करिणः करभकः। 7. वध्वा** &c.—This means that he is a grown up elephant now, 8. **उद्दामेन—दामन्** chain, curb. In the feminine it becomes **दामन्+डाप्=दामा। उद्गतो दामाया उद्दामः, प्रादितत्—। तेन।** There is nothing to curb him, he is irresistable. 9. **द्विरद** &c—**द्वौ रदौ दन्तौ एषां द्विरदाः**. elephants. This is a misnomer Only two of the teeth are visible, but there are others also the grinders. **द्विरदानां पतिः।** Hence the **प्रमाद** (danger). He is quite young while this assailant is a mighty leader of tuskers. 10. **सन्निपत्य—सम्+नि+पत+ल्यप्।** Both **सम्** and **नि** are intensive. Together they imply a defiant trespass. Compare "**किमुक्तैः सन्निपत्यैव पताकां यो हराम्यहम्**—Act. IV sl 26. There defiance is obvious. Hence we take **सन्निपत्य** here as implying a wanton attack, a supposition which confirms the **पौर्वापर्य** here.

(*xiii*) सीता (ससम्भ्रमं कतिचित् पदानिदधती)—
अज्जउत्त परित्ताहि परित्ताहि मम तं पुत्तअं [आर्यपुत्र परित्रायस्व परित्रायस्व मम तं पुत्रकम्]। (स्मृतिमभिनीय सवैक्लव्यम् ह्वौ)

हद्धी ताइं एव्व चिरपरिचिदाइं अक्खराइं पञ्चवटीदंसणेण पुणो वि मं मन्दभाइणिं अणुबन्धन्ति । हा अज्जउत्त [हा धिक् हा धिक्, तान्येव चिरपरिचितानि अक्षराणि पञ्चवटीदर्शनेन पुनरपि मां मन्दभागिनीमनुबध्नन्ति । हा आर्यपुत्र] । (इति मूर्च्छति)।

(प्रविश्य) तमसा—वत्से समाश्वसिहि समाश्वसिहि ।

Sita (Taking a few steps in alarm)—Save, my husband, save that poor darling of mine. (Acting recollection—In despair) Alas ! Those very letters, long familiar, come up to my ill-fated self once again at the sight of the Panchavati. Ah ! My husband ! (Faints away).

(Entering) Tamasa—Cheer up my child, cheer up.

मित—। 'सम्भ्रमेण' आवेगेन सह 'ससम्भ्रमम्' । 'कतिचित् कानिचित् पदानि दधती पदक्षेपान् कुर्वती । 'पुत्रकम्' इतरनुकम्पायां ह्रस्वे वा कन् । 'स्मृति' परित्यागवृत्तान्तस्मरणम् 'अभिनीय' अभिनयेन दर्शयित्वा । 'वैक्लव्यम्' अवसादः तेन सह,तत् यथा तथा सवैक्लव्यम् । 'चिरं' दीर्घकालं 'परिचितानि अभ्यस्तानि अक्षराणि' वर्णा आर्यपुत्रशब्दघटका वर्णाः । 'अनुबध्नन्ति' अनुसरन्ति पूर्वसंस्कारवशादुपतिष्ठन्ते अधुनापि ।

Notes.—1' कति &c —काः संख्या एषाम् इति किम्+डति = कति in the Ist case plural. चित् is an अव्यय adding indefiniteness to the words preceding, No समास, two distinct words कतिचित् कियन्ति अपि । 2. स्मृतिम्—Her appeal to her आर्य्यपुत्र was due to foregetfulness of the present. After having uttered the word आर्य्यपुत्र she recollects (स्मृति) that neither is her आर्य्यपुत्र with her at the time, nor is she entitled to appeal to him thus Hence the वैक्लव्य । 3. सवैक्लव्यम्—क्लव literally is

अथ hence despair विषादः क्लवः अलसः विक्लवा। तस्याः भावः इति विक्लवा + ष्यञ् वैक्लव्यम्। तेनसह—बहु। 4. हा धिक् &c.—She explains how she forgets the present. It is पञ्चवटीदर्शनेन। The sight of पञ्चवटी brings the past vividly before her and she forgets the present.

(*xiv*) नेपथ्ये—विमानराज, अत्रैव स्थीयताम्।

सीता (आकर्ण्य समाध्वसोल्लासम्)—अम्महे जलभरिदमेहत्थणिदगम्भीरमंसलो कुदो णु एसो भारदीणिग्घोसो भरिज्जमाणकण्णविवरं मं वि मन्दभाइणिं झत्ति उस्सावेदि [अहो जलभरितमेघस्तनितगम्भीरमांसलः कुतो नु एष भारतीनिर्घोषो भ्रियमाणकर्णविवरां मामपि मन्दभागिनीं झटिति उच्छ्वासयति] ?

तमसा (सस्नेहास्रम्)—अपि वत्से

किमव्यक्तेऽस्मिन्निनदे कुतस्त्येऽपि त्वमीदृशी।
स्तनयित्नोर्मयूरीव चकितोत्कण्ठितं स्थिता ॥७॥

(In the tiring room)—O the best of balloons, stop just here.

Sita (Coming round—With joy and agitation)—Ha ! Whence does this pronunciation of speech, deep and full like the rumble of a water laden cloud, quickly revives even me the ill fated whose ear holes are becoming full of it ?

Tam. (With tears of affection)—O my child.—

Why do you thus placed, stand startled and uneasy even at an uncomprehended and un-located sound like a pea-hen at that of a cloud ? (7).

मित—। हे विमानराज' इति पुष्पकं प्रति। रामस्य कण्ठ एषः ॥ 'साध्वस' भयम्। कुत इह रामस्य कण्ठः, भ्रमोऽयं मे स्यात् इति भयम्। ततो रामस्यैव इति तयोः सह निश्चयः तेन च उल्लासः'। 'जलेन भरितः' सञ्जातभरः ...

'मेघ.' तस्य स्तनित'—ध्वनि तथाविधो 'गम्भीरः' गम्भीर्य्यपूर्णः 'मांसलः' विपुलश्च। 'भारत्याः' वाण्याः 'निर्घोषः'' ध्वनिः। 'भ्रियमाणम्' आपूर्य्यमाणं कर्णविवरं यस्याः तथाविधां मां कुर्वन् 'उच्छ्वासयति' उज्जीवयति ॥ किमिति। अन्वयः—ईदृशी त्वम् अव्यक्ते कुतस्त्ये अपि निनदे स्तनयित्नोः मयूरीव किं चकितोत्कण्ठितं स्थिता असि। व्याख्या—ईदृशी एवंविधा मोहमापन्ना इत्यर्थः त्वम् अव्यक्ते अपरिस्फुटे 'कुतस्त्ये' अविज्ञातकण्ठादागते 'अपि निनदे' ध्वनौ 'स्तनयित्नोः मेघस्य निनदे .मयूरी इव किं कथं 'चकितं त्रस्तं यथा तथा 'उत्कण्ठितं' यथा तथा च 'स्थिता असि। किमुच्यते को वा वक्ता न ज्ञातं तथापि मूर्च्छिताय अपि ते चकितता उत्कण्ठा च इति किम् इत्यर्थः ॥

Notes—1. **जलभरित** etc. **भर+इतच् जातार्थे (तारकादि) भरित** laden Now see Mitabh—**गम्भीर** deep, **मांमल** full. It is difficult to distinguish between the two. The full is usually deep and vice versa. 2. **अव्यक्ते—वि+अञ्ज+क्त कर्म्मकर्त्तरि व्यक्त** clear **परिस्फुट। न व्यक्तः अव्यक्तः तस्मिन्।** The import of the words is not clear. Here some have **अपरिस्फुटनिक्वाणे** for the first quarter. This seems preferable (see next para). Explain thus—'**ईदृशी त्वम् कुतस्त्ये अपि अपरिस्फुटे अव्यक्ते निक्वाणे ध्वनौ** etc. as before 3. **निनदे-नि+नद+अप् कर्म्मणि=निनद** or **घञ् कर्म्मणि=निनाद।** **घञ** alternates with **अप्** by "**नौ गदनद—**"। 4 **कुतस्त्ये—किम्+ङसि (५मी)+तसि स्वार्थे=कुतः।** This is an **अव्यय।** Next **कुत आगत इति कुतस्+त्यप् कुतस्त्यः।** **अव्यय** words with **तसि** take **त्यप** by the Varttika "**अमेहक्वतसित्रेभ्यस्त्यब्वीवयोऽव्ययात् स्मृतः**"। The source of the words is unknown 5. **ईदृशी**—Thus circumstanced i. e, in a swoon From the character of the sound as described (**अव्यक्त—कुतस्त्य**, even one wide awake ought not to beimpressed, yet you were affecte d even in

your swoon. 6. स्तनयित्नोः—स्तन to utter the rumble of cloud (अदन्त चुरादि) + णिच् स्वार्थे इत्नु कर्त्तरि ता स्त्रीलिङ्गे स्तनयित्नुः। तस्य। 7. चकित &c.—चकितश्च तत् उत्कम्पितश्च, कर्म्मधा – । तत् यथा तथा। The reading चकितोत्कम्पिता is perhaps better.

(xv) सीता—भअवदि किं भणासि अपरिप्फुडे त्ति ? मए उण सरसंजोएण पच्चभिआणिदं अज्जउत्त एव्व वाहरदि [भगवति, किं भणसि अपरिस्फुटमिति ? मया पुनः स्वरसंयोगेन प्रत्यभिज्ञातम्—आर्य्यपुत्र एव व्याहरति]

तमसा—श्रूयते तपस्यतः शूद्रस्य दण्डधारणार्थम् ऐक्ष्वाको राजा जनस्थानमागत इति ।

सीता—दिट्ठिआ अपरिहीणराअधम्मो सो राआ [दिष्ट्या अपरिहीणराजधर्मः खलु स राजा] ।

नेपथ्ये—

यत्र द्रुमा अपि मृगा अपि बन्धवो मे
यानि प्रियासहचरश्चिरमध्यवात्सम् ।
एतानि तानि बहुनिर्झरकन्दराणि
गोदावरीपरिसरस्य गिरेस्तटानि ॥८॥

Sita—My worshipful friend, do you say 'indistinct'? I again recognise from the modulation of the voice that it is my husband himself that speaks.

Tam.—We hear that the king, the descendant of Ikshvaku, has come to Janasthana to inflict punishment on a Sudra, practising penance.

Sita—O Joy, that king is indeed without lapse in his kingly duties. [Lit—has his kingly duties un-neglected].

(In the tiring room)—These are those slopes, with numerous streams and caves, of the hill that has the Godavari at its skirts (hill Prasravana), slopes which I long occupied in company with my darling, where even the deer, (nay) even the trees were like friends to me, 8.

मित—। 'भगवति' महिममयि तमसे अपरिस्फुटमिति भणसि किम् ? भण। अपरिस्फुटमेव ते भवतु न मे काचित् क्षतिः। 'मया पुनः, पक्षान्तरे स्वरस्य संयोगेन' उच्चारणप्रकारेण एव 'प्रत्यभिज्ञातम्' अवधारितम् 'आर्य्यपुत्र एव व्याहरति' भाषते। एतत्तु "किमव्यक्तेऽपि निनदे" इति पाठे न सङ्गच्छते, तन्मन्ये "अपरिस्फुटनिक्वाणे" इत्येव तत्रत्यः पाठः ॥ 'तपस्यत' तपश्चरतः 'शूद्रस्य सम्बन्धे 'दण्डधारणार्थं' राजशासननिर्वाहार्थं 'जनस्थानमागतः'। कुतस्तस्य तत्राग्रहः—इत्याह – राजा' स, प्रजासु अपचारप्रशमनं राजधर्म्मः' तत् अपचारप्रवृत्तस्य शूद्रस्य दमनार्थमागतः। भवतु कः अन्यो राजा एवं करोति इत्याह – ऐक्ष्वाको राजा इति। राजधर्म्मपालनमिक्ष्वाकूणां कुलव्रत तदिह दण्डस्य अनिपातने स कुलधर्मो व्याहन्यते इति आगतः। यदि आगतः दर्शनमपि स्याद्वा इति भर्तृसमागमे अभिलाषीकरणं सीतायाः ॥ 'दिष्ट्या इति हर्षे अव्ययम्। 'अपरिहीणः' अव्याहतः 'राजधर्म्मः यस्य तादृशो 'राजा'। अक्षतो राजधर्म इत्यन्वर्थसंज्ञः स राजा, स च ममैव भर्त्ता इत्यानन्दः। एवं राजधर्मकुलधर्मयोः परिपालने यद्यहं त्यक्ता, शोच्य. स न निन्द्यः, इति समर्थनमुखेन समाश्वासनमपि वैदेह्या ध्वन्यते ॥ यत्रेति। अन्वयः—यानि प्रियासहचरः (सन्) चिरम् अध्यवात्सम्, यत्र मृगा अपि द्रुमा अपि मे बन्धवः, तानि बहुनिर्झरकन्दराणि गोदावरीपरिसरस्य गिरेः तटानि प्रियासहचरः' सीतासमेतः सन् 'चिरम् अध्यवात्सम्' दीर्घनिवासेन समभाजयम् 'यत्र' चिरवासादेव मृगा अपि द्रुमा अपि वृक्षाश्च 'मे बन्धवः' बन्धुतुल्या अजायन्त तानि चिरपरिचितानि 'बहवो निर्झराः' जलप्रवाहाः 'कन्दराः' गह्वराणि येषु तानि 'गोदावरीपरिसरः' प्रान्तभूमिः यस्य तादृशस्य 'गिरेः' प्रस्रवणस्य 'तटानि सानूनि एतानि' दृश्यन्ते ॥

Notes—1 अपरिस्फुटम्—&c.—You may call it अपरिस्फुट। To me it is unnecessary to know what the voice announces (अपरिस्फुट) or whence the voice proceeds (कुतस्त्य); the modulation of the voice (स्वरसंयोग) is enough for me for identification as the voice of my husband, and that is all that I care for. 2. तपस्यतः—तपश्चरति इति तपस्+क्यङ् (नाम धातु)+शतृ तपस्यन्। तस्य। क्यङ् usually gives the आत्मनेपद but तपस has परस्मैपद by the Varttika "तपसः परस्मैपदञ्च"। 5 ऐक्ष्वाकः—इक्ष्वाकोर्गोत्रापत्यम् इति इक्ष्वाकु+अञ्=ऐक्ष्वाकः, the उ disappearing by निपातन in the rule "दाण्डिनायन हास्तिनायन—"। She says ऐक्ष्वाको राजा avoiding the familiar रामभद्रः। The reason is she wants to emphasise Rama's duty as राजा and also the faithful observance of those duties by kings of the line of इक्ष्वाकु। Hence both kingly duty and family tradition make it imperative on Rama's part to come out personally and chastise the Sudra 4. दिष्ट्या &c—His kingly (राजा) duties are unimpaired (अपरिहीण) and this is a matter for joy to her (दिष्ट्या) because this dutiful king (राजा) is her own husband In his terrible bereavement it would not be surprising if there were lapses in the discharge of his arduous duties. But स्त्रिया विरहो राजधर्म्मात् प्रच्यावयति इत्यसह्यमेतत्। Luckily he has escaped this scandal. O joy (दिष्ट्या)। Hence the surmise that from this point of view perhaps she judges Rama leniently in the matter of her own abandonment. 5. मृगाः This may also mean all the animals there. 6. बान्धव,—बन्धु friend. By transference of epithets=like friends. 7.

यानि—The आधार of अध्यवात्सम् appearing as कर्म by "उपान्व-ध्याङ्वसः"। अधि+वस+लुङ् अम्=अध्यवात्सम्। 8. बहु &c—There are springs for the thirsty and caves for the homeless, hence a suitable place for residence. 9. गोदावरी &c.—परि+सृ+घ संज्ञायां परिसरः outskirts. गोदावरी परिसरो यस्य। Refers to the hill प्रस्रवण। Comp—" स्निग्धनीलपरिसरारण्यपरिणद्धगोदावरीमुखरकन्दर ·····गिरिः प्रस्रवणो नाम—Act I, ante.

(*xvi*) सीता (दृष्ट्वा)—हा कहं! पहादचन्दमण्डलापण्डुरपरिक्खामदुब्बलेण आआरेण अअं सोम्मगम्भीराणुभावमेत्तपच्चभिआणिदो अज्जउत्तो एव्व। ता मं धारेहि धारेहि [हा कथम्! प्रभातचन्द्रमण्डलापाण्डुरपरिक्षामदुर्बलेन आकारेण अयं सौम्यगम्भीरानुभावमात्रप्रत्यभिज्ञातः आर्यपुत्र एव। तत् मां धारय धारय]। (इति तमसामाश्लिष्य मूर्च्छति)।

तमसा (धारयन्ती)—वत्से समाश्वसिहि समाश्वसिहि।

नेपथ्ये—अनेन—पञ्चवटीदर्शनेन—

अन्तर्लीनस्य दुःखाग्नेरद्योद्दामं ज्वलिष्यतः।
उत्पीड़ इव धूमस्य मोहः प्रागावृणोति माम्॥ ९॥

हा प्रिये जानकि।

Sita—(Spying)—Ha! How so! This one, with a frame pale and wan and weak like the lunar orb at dawn is indeed my husband recognised by his grave and attractive majesty alone. Then hold me, hold me, (Faints having embraced Tamasa).

Tam (Holding)—Courage, my child courage.

(In the Tiring room)—At this sight of the panchavati—

Sutpor shrouds me first like a column of smoke from the fire of grief that lurks within and will blaze up unchecked to-day, (9).

Alas ! Janaki, my darling.

मित—। 'कथम' इत्याश्चर्ये। 'प्रभाते' यत् चन्द्रमण्डलं' तदिव 'आपाण्डुरः विवर्णः किञ्च 'परिक्षामः' कृशः 'दुर्वलश्च' य 'आकारः' देहः तेन परिलक्षितः 'अयं सौम्यः' मनोरमः 'गम्भीरः' अप्रधृष्यश्च यः अनुभावः' तन्मात्रेण प्रत्यभिज्ञातः परिलक्षित 'आर्य्यपुत्र एव'। एतद्दर्शनेन शोक-विह्वला पतामि धारय मां'॥ अन्तरिति। अन्वयः—अद्य उद्दामं ज्वलिष्यतः अन्तर्लीनस्य दुःखाग्नेः धूमस्य उत्पीड इव मोहः प्राक् माम् आवृणोति। व्याख्या—'अद्य उद्दामम्' अनियन्त्रित' यथा तथा 'ज्वलिष्यतः' दीपिष्यमाणस्य अन्तर्लीनस्य' हृदि गूढस्य 'दुखाग्ने', अग्नितुल्यस्य शोकस्य 'धूमस्य उत्पीड इव' धूमराशितुल्यो 'मोहः प्राक्' प्रथमं 'माम् आवृणोति प्रच्छादयति। अत्र शोकाभिभवात् पूर्वं मोहः परं वा इति चिन्तनीयम्, किञ्च दुःखस्य ज्वलन मोहस्य च आवरकता रूपके एव युज्यते न उपमायाम्॥

Note 1. प्रभात &c.—The resemblance with चन्द्रमण्डल lies in the आपाण्डुरता only, क्षामता and दुर्वलता have nothing to do with it. Expound प्रभातचन्द्रमण्डलमिव आपाण्डुरः। तथाच परिक्षामश्च &c. 2. आकारेण—उपलक्षणे ३या। Or—better सहार्थे ३या। 3. धारय &c. आवेगे द्विरुक्तिः। The reading here is adopted from Vidyasagara's manuscript No. 4. Vidyasagara himself perfers तत् धारय तु मां प्रियसखी of No 3. But तमसा replies वत्से etc. it does not seem to come well from a प्रियसखी। 4. दुःखाग्नेः—दुःखं अग्निरिव, उपमितकर्मधा—। The रूपक viz, दुःखरूपः अग्निः has to be avoided because in the next half we have उपमा in उत्पीड etc. See under ज्वलिष्यतः below. 5. उद्दामम् see sl. 6. उद्दामेन। Apte takes उद्दामम् as a मकारान्त अव्यय। But उद्गतं दामाधाः etc. given in sl. 6. is

available here also, while the indeclinable does not suit sl. 6. 6. ज्वलिष्यतः—In दुःखाग्नि we have दुःखत्व prominent not अग्नित्व, so ज्वलिष्यतः is out of place. ज्वलन of दुःख is possible through a रूपक only. Hence say ज्वलियष्यतः प्रकोपिष्यतः प्रकटीभविष्यतः etc. (धातूनामनेकार्थत्वात्)। 6. प्राक्—Here a difference of opinion is possible. Some might think that the shock of grief comes first and then swoon as the consequence. We may defend saying that ज्वलन here is manifestation to outside people through lamentation etc The shock may be so intense that swoon occurs first and lamentation follows after consciousness is regained. 7. आवृणोति —here again मोहत्व is prominent, not धूमोत्पीडत्व। Hence आवरण is unsuitable Say आवृणोति अभिभवति (धातूनामनेकार्थत्वात्)।

(*xvii*) तमसा—(स्वगतम्)—इदं तदाशङ्कितं गुरुजनेनापि।

सीता (समाश्वस्य)—हा कहं एदं [हा कथमेतत्]।

नेपथ्ये—हा देवि दण्डकारण्यवासप्रियसखि, हा देवि विदेहराजपुत्रि। (इति मूर्च्छति)।

सीता—हद्धी हद्धी मं मन्दभाइणिं वाहरिअ आमीलन्तणेत्तणीलुप्पलो मुच्छिदो एव्व अज्जउत्तो। हा कहं धरणीविट्टे णिरुस्साहणीसहं विपल्हत्थो। भअवदि तमसे परित्ताहि परित्ताहि जीवावेहि अज्जउत्तं [हा धिक् हा धिक्! मां मन्दभागिनीं व्याहृत्य आमीलन्नीलोत्पलः मूर्च्छित एव आर्यपुत्रः। हा कथं धरणीपृष्ठे निरुत्साहनिःसहं विपर्यस्तः! भगवति तमसे, परित्रायस्व परित्रायस्व, जीवय आर्यपुत्रम्]। (पादयोः पतति)।

तमसा—

त्वमेव ननु कल्याणि सञ्जीवय जगत्पतिम् ।
प्रियस्पर्शो हि पाणिस्ते तत्रैव नियतो भवः ॥ १० ॥

Tam. (To herself) This is what the superiors too apprehended.

Sita (Having recovered)—Ha ! How is this ?

(In the tiring room)—Ah ! Queen, my dear companion during my stay in the Dandaka. Alas ! my queen the daughter of the king of Videhas. (Faints away).

Sita—Fie on me ! Naming me the ill-fated, my husband has indeed fainted away with the blue-lotus of his eyes closing up How so ! Alas ! He lies on his face spiritless and powerless, on the surface of the ground. Help ! Worshipful Tamasa, help ! Save my hasband, Falls at her feet).

Tam—Do you yourself revive the lord of the earth, O blessed one. The touch of your hand is indeed dear to him ; therein alone lies the weal (10).

मित—'इदं तत् इति' रामस्य गुरुशोकाभिभवः॥ 'कथमेतत् इत्यपि शोकाभिभवमेव लक्षयति विशेषतश्च मोहावरणम्॥ 'मां मन्दभागिनीं व्याहृत्य इति अहमेव मोहकारणम्। 'आमीलन्नेत्र' निमीलन्नेत्रं तदेव नीलोत्पलं यस्य सः। 'निरुत्साहः निश्चेष्ट। 'निःसह दुर्बलः। 'विपर्य्यस्तः विपर्य्यासेन पतितः अधोमुखः पतित इत्यर्थ। 'परित्रायस्व' मामित्यथः। कथं इत्याह—'जीवय आर्य्यपुत्रम्' आर्य्यपुत्रस्य उज्जीवनेन मामपि मरणाद्रक्ष इति भावः॥ त्वमेवेति। अन्वयः—ननु कल्याणि, त्वमेव जगत्पतिं जीवय। पाणिस्ते प्रियस्पर्शी हि। तत्रैव भवः नियतः। व्याख्या—ननु आक्षेपे। यद्वा—अनुजानामि त्वां, हे 'कल्याणि रावणवधात् जगन्मङ्गलदायिनि सीते जगत्पतेर्मोहात् भूयोऽपि दुःखितं जगत्तत् 'त्वमेव जगत्पतिं' जीवय मोहावरणात् मोचय तेन च न केवलं तव अपि तु कृतघ्नस्यापि जगतः परित्राणं भवति। मा मामाक्रन्द परित्रायस्वेति।

कथं स मया जीवनीय इत्याह—'पाणिस्ते तव करः 'प्रियस्पर्शो हि रामस्य सम्बन्धे तव करस्य स्पर्शः सुतरां प्रियः। भवतु किं तत ? 'तत्र एव' तव करस्पर्शे एव रामस्य 'भवः मङ्गलं मोहापगमः 'नियतः निश्चितत्वेन अवधारितः। तत् पाणिना स्पृशैनम्, अपयातु मोहः जगद्य स्वस्थं भवतु॥

Note—1. कथमेतत्—Sita had heard Rama to say मोहः आवृणोति and the intensity of Rama's grief surprises her. 2 निरुत्साह &c —सहते इति सहः strength, पचाद्यच। उत्साह stir. निरुत्साह still निःसह powerless निरुत्साहश्च निःसहश्च यथा तथा। Adv Qual. विपर्य्यस्तः। निरुत्साह alone is enough to give the required impression of helplessness. 3. विपर्य्यस्तः – वि+परि +अस+क्त कर्मणि। वि and परि give the idea of विपरीतता। He was lying on his stomach, not on his back. 3 परित्रायस्व—The appeal is for herself. The swoon of her husband is sure to kill her 5. त्वमेव ननु—implies—You do it yourself, why call on me? 6. ननु-आक्षेपे वा अनुज्ञायाम्। The एव seems to declare for आक्षेप (contradiction) अनुज्ञा also gives good sense I permit you to touch Rama. •7. कल्याणि —कल्याण is मङ्गल, by transference of epithets मङ्गलकर। स्त्रियां कल्याण+ङीष कल्याणी, also कल्याणा with, टाप् (बह्वादि)। For force see Tika. जगत्पतिम् This particular epithet is chosen to show that the whole world is in jeopardy, so be quick with the rescue. 9 तत्रैव—तत्र तस्मिन् पाणौ एव। How ? प्रियस्पर्शोहि पाणिः। Hence apply पाणिस्पर्श। The एव implies अवधारण (अन्ययोगव्यवच्छेद)। There is no other alternative. Hence I permit—पाणिस्पर्शे (ननु अनुज्ञायाम्—"नन्वाक्षेपे परिप्रश्ने-प्रत्युक्तावधारणे। वाक्यारम्भेऽप्यनुनयामन्त्रणानुज्ञयोरपि" इति हैमः।

(*xviii*) सीता—जं होदु तं होदु जहा भअवदी भणादि [यद्भवतु तद्भवतु, यथा भगवती भणति]।

(इति ससम्भ्रमं निष्क्रान्ता)।

(ततः प्रविशति भूमौ निपतितः सास्रया सीतया स्पृश्यमानः साह्लादोच्छ्वासो रामभद्रः)।

सीता (किञ्चित् सहर्षं स्वगतम्)—जाणे पुणोवि पच्चाअदं विअ जीविदं तिल्लोअणाहस्स [जाने पुनरपि प्रत्यागतमिव जीवितं त्रिलोकनाथस्य]।

रामः—हन्त भोः किमेतत् ?

प्रश्च्योतनं नु हरिचन्दनपल्लवानां
निष्पीडितेन्दुकरकन्दलजो नु सेकः
आतप्तजीविततरोः परितर्पणो मे
सञ्जीवनौषधिरसो नु हृदिप्रसिक्तः ॥ ११ ॥　　　(रा—)

SITA—Come what may, I do as your worshipful self says (*Exit hurriedly*).

(*Then enters Ramabhadra, stretched on the ground in joyful consciousness being rubbed gently by Sita in tears*)

SITA (*To herself with slight satisfaction*)—Methinks it looks like life come back to the lord of the three worlds,

RAMA—O joy ! What is this ?

Is it the dripping of the leaves of the Harichandana (nectar) that is poured into my heart ? Or the juice of the pressed sprouts of moon-beams ? Or the juice of the herb that vivifies—the refresher of the scorched tree of my life ?

(II)　(R—)

मित— 'यथा भगवती भणति' तथैव करोमि इति वाक्यशेषः। अत्रान्तरे आर्य्यपुत्रस्य स्पर्शः युक्तो वा अयुक्तो वा यथवास्ते तथैव आस्ताम्, मया तु तत् न विचार्य्यते। भगवती तमसा स्पर्शमिच्छति इत्येव मे पर्य्याप्तम् इत्यर्थः॥ 'आह्लादः' आनन्दः 'उच्छ्वासः' पुनरुज्जीवनम्। ताभ्यां सह वर्त्तमानः॥ त्रयवयवो लोक, त्रिलोकः, त्रिभुवनम् तस्य 'नाथ.'। तस्य॥ प्रश्चोतनमिति। अन्वयः—हृदि मे हरिचन्दनपल्लवानां प्रश्चोतनं नु निष्पीड़ितेन्दुकरकन्दलजः सेको नु आतप्तजीविततरोः परितर्पणः सञ्जीवनोषधिरसः प्रसिक्तो नु। व्याख्या—"हृदि मे मदीये हृदये 'हरि-चन्दनस्य देवतरुविशेषस्य यानि 'पल्लवानि नवपत्राणि तेषां 'प्रश्चोतनं नु' रसस्रावः किं पतितः? 'निष्पीड़िताः' निष्पिष्टाः ये 'इन्दुकर-कन्दलाः चन्द्रकिरणाङ्कुराः तेभ्यो जातः सेको नु' प्रोक्षणं किम्? आतप्तः दुःखैर्दग्धप्रायः 'जीविततरुः' वृक्षतुल्यं यज्जीवनं तस्य 'परितर्पणः' आप्यायनः 'सञ्जीवन्याः' प्राणप्रदायाः 'ओषधेः' लताविशेषस्य 'रसः प्रसिक्तो नु वृष्टः किम्। मूर्च्छिते मयि कृपालुना केनचिन्महापुरुषेण प्रश्चोतनं सेको वा कृतः नो चेत कथं झटिति प्रत्युज्जीवनम्, तज्जीवितस्यच एतावान् आनन्दः इत्यर्थः॥

Notes 1. **सास्रया—अस्र** tears. **अस्रेण सह वर्त्तमाना सास्रा वा सहास्रा। तया।** She was weeping at Rama's plight. 2 **साह्लाद** &c.—**उच्छ्वास** breath, **आह्लादश्च उच्छ्वासश्च। ताभ्यां सह।** He had come back to sense and was feeling joyful. 3. **त्रिलोक** &c—**त्रयवयवोलोकः त्रिलोकः, शाकपार्थिवादि। तस्य नाथः।** Avoid **त्रयाणां लोकाणां नाथः।** Such **ततपुरुष** is irregular. Bhattoji in his Manorama also says about the word **त्रिलोकनाथ—"त्रिपद-ततपुरुषस्य इह दुर्लभत्वात्"।** Usually **ततपुरुष** compounds are of two words only. (See our Kum, V.). Sita is still thinking of the worlds—should anything happen to Rama how would the worlds bear it? 4. **किमेतत्**—A question to which he cannot find a definite answer. The verse following suggests three likely answer. 5. **प्रश्चोतनम्—प्र+श्चुत** (to

drip) + ल्युट भावे। The drippings are nectar. 6. हरिचन्दन &c —हरिचन्दन is one of the five divine trees that drip nectar. These are "मन्दारः पारिजातश्च। सन्तानः कल्पवृक्षश्च पुंसि वा हरिचन्दनम्॥" Comp "श्रीरेषा पाणिरप्यस्या पारिजातस्य पल्लवः॥ किमन्यथा स्रवत्येषस्वेदच्छद्मामृतद्रवम्॥"—*Ratnavali*. 7. निष्पीडित &c —कन्दल is young shoot. निष्पीडित pressed. See now Tika. 8. आतपत &c,—जीव + क्त + भावे = जीवितं life. जीवितं तरुरिव जीविततरुः। आ सम्यक् तप्तः आतप्तः। Next कर्म्मधा—। We avoid जीवितरूपःतरु because this makes तरुत्व prominent. But सञ्जीवनोषधिरस is never applied to a tree 9. सञ्जीवन &c.—सञ्जीवयति अनया इति सम + जीव + णिच + ल्युट् करणे स्त्रियाम् = सञ्जीवनी vivifying ओषधि hero. सञ्जीवनी ओषधिः सञ्जीवनौषधिः कर्म्मधा—। 10 Remark—The verse leaves Rama in doubt as to the correct answer to his question हन्त भोः किमेतत्। But he is sure that it must be one of the three enumerated in the verse.

(*xix*) (रा—)—

स्पर्शः पुरा परिचितो नियतं स एष
सञ्जीवनश्च मनसः परिमोहनश्च।
सन्तापजां सपदि यः प्रतिहृत्य मूर्च्छा-
मानन्दनेन जड़तां पुनरातनोति॥ १२॥

(R—) Surely it is that touch—the same touch, familiar of old, the reviver as well as the stupefier of the mind, which having instantly dispelled the swoon arising from grief, develops stupor again by causing delight. (12)

मित—। स्पर्श इति। अन्वयः—नियतं परिचितः स्पर्श एषः। स पुरा परिचितः मनसः सञ्जीवनश्च परिमोहनश्च (स्पर्शः) यः सपदि सन्तापजां

मूर्च्छां प्रतिहत्य आनन्देन पुनः जडताम् आतनोति। व्याख्या—एवं पूर्वत्र वितर्कमारूढे रामे सहसा स्मृतिरायातः, दृष्टश्च पूर्वोक्तेषु त्रिष्वपि पक्षेषु भ्रमः। ततः पक्षान्तरेण चतुर्थेन निश्चयमाह—'नियतं स्पर्श एषः न प्रश्नोत्तरं नापि लेकः। न हि य· कश्चित् स्पर्शः किन्तु 'स पुरा परिचितः, प्राक् नित्यमनुभूतः 'मनसः सञ्जीवनश्च' समाश्वासनश्च परिमोहनश्च अवसादनश्च स्पर्शः यः सपदि अनुभवक्षणे एव 'सन्तापजां' दुःखकृतां 'मूर्च्छाम्' अचेतनतां 'प्रतिहत्य' सञ्जीवनधर्मेण विधूय 'आनन्देन प्रहर्षजननेन 'पुनः भूयोऽपि जडतम्म आतनोति परिमोहनधर्मेण मोहमादधाति। नूनमिह सीता प्राप्ता अवश्यं स्पर्शस्तस्याः नान्यत् किञ्चित इति निश्चयः॥

Notes :—1. **पुरा—अव्यय।** In the days before Sita's exile 2. **परिचितः**—I know it. hence I can unerringly identify it. This is the basis of the **निश्चय।** 3 **सञ्जीवनश्च** &c—This characteristic is peculiar to Sita's touch with regard to Rama, and distinguishes the touch from that of any other woman Comp. "**तव स्पर्शे मम च परिमूढेन्द्रियगणो विकारश्चैतन्यं भ्रमयति समुन्मीलयति च**" I sl 36. 7. Both **परिमोहण** and **परिमोहन** are correct. 4 **सन्तापजाम्** &c. The touch does it because it is **मनसः सञ्जीवनः।** 5. **आनन्देन** &c.—This also it can do because it is **मनसः परिमोहनः।** But this with a differnce.

The Previous **मोह** (**मूर्च्छाम्**) was **सन्तापज** (**सन्तापजाम्**) and the **मोह** (**जडता**) now overtaking me is from excess of delight (**आनन्देन**)। 6. Remark—Some editions introduce this verse with **अपि च।** This entirely misses the connection of the two verses. **अपि च** adds something similar to what has gone before ; the verse following, however, contradicts the conclusion of the preceding verse.

(*xv*) सीता (ससाध्वसकरुणं किञ्चिदपसृत्य)— एत्तिअं एव्व दानीं मे वहुदरं [एतावदेव इदानीं मे बहुतरम्]।

रामः (उपविश्य)—न खलु वत्सलया सीतादेव्या अभ्युपपन्नोऽस्मि ?

सीता—हद्धी हद्धी किंत्तिमं अज्जउत्तो मग्गिस्सदि [हा धिक्हा धिक् किमिति माम् आर्य्यपुत्रो मार्गिष्यति] ?

रामः—भवतु पश्यामि।

सीता—भअवदि तमसे ओसरह्म, जइ दाव मं पेक्खिस्सदि तदो अणव्भणुण्णादसण्णिधाणेण अहिअदरं मम महाराओ कुविस्सदि [भगवति तमसे, अपसराव:, यदि तावत् मां प्रेक्षिष्यते तत: अनभ्यनुज्ञातसन्निधानेन अधिकतरं मम महाराज. कोपिष्यति]।

तमसा—अयि वत्से, भागीरथीवरप्रभावात् वनदेवतानामप्यदृश्या संवृत्तासि।

सीता—आम्, अत्थि एतत्।

Sita (*Falling back slightly in alaram and grief*)—This much indeed is enough for me now,

Rama (*Sitting up*)—Have I not been favoured by my affectionate queen Sita ?

Sita—O fie ! O fie ! Would my husband search for me ?

Rama—Well, I will see,

Sita—Worshipful Tamasa, I will fall back ! if indeed he sees me, the great king will be very angry with me for unauthorised presence,

Tamasa—Dear child, under the influence of Bhagirathi's boon, you have become invisible to forest deities even,

Sita—So it is indeed. .

मित—। 'साध्वसं भयम्। 'करुणं' दुःखम्। रामेण प्रत्यभिज्ञाता इति साध्वसम्। 'अपसरणम्' इति करुणम्। मुहूर्त्तमपि यस्य अदर्शनम-सह्यमासीत् ततोऽप्यद्यअपसरणम्, अहो दैवम्' साध्वसकरुणाभ्यां सह। अपसरणक्रियाविशेषणमेतत्। प्रत्यागतप्राणः त्रिलोकनाथः तत्र च अहमेव हेतुः इति 'एतावदेव इदानीं' वियोगकाले मे बहुलम्' एतेनैव मया अद्य सन्तोष्टव्यम्। जीवत्यार्यपुत्र. जीवति भुवनेश इत्येव पर्य्याप्तं मे। तत अद्य अपसरणदुःखं न मया मन्तव्यम् इति ससाध्वसकरुणमित्यस्य पाक्षिक आक्षेपः॥ 'उपविश्य' पार्श्वं शून्य विलोक्य विस्मित आह—'सीतादेव्या अभ्युपपन्नः' अनुगृहीतः 'न खलु' न किम? मम तु स एवासीत् निश्चयः सा च नेह दृश्यते किमेतत्? हा धिगिति—'किमिति' इह वितर्के। रामस्य आकारं दृष्ट्वा सन्दिग्धा सीता आह 'मां मार्गिष्यति' विचेष्यति न वा॥ भगवतीति। अपसरावः' दूरं गच्छाव। प्राकृतु किञ्चिदपसृता दूरतरंयातु-मिच्छति। कारणमाह—'यदि तावत्' इत्यादिना। 'अनभ्यनुज्ञातम्' अननुमोदित यत्सन्निधानं समीपगमन तेन हेतुना। जना जानन्ति भवत्या समागमः परिहृतो मया स एव समागमस्तया घटितः। राजभावश्च मे विघ्नित इति कोपकारणम्, अतएव च महाराज इत्यु क्तिः। राजत्वपुरस्कारे-णैव दर्शनम् न भर्त्तृत्वपुरस्कारेण। आमित्यादि। 'आम्' इति मकारान्तम-व्ययम् अवधारणार्थकम् स्वीकारेवा। सत्यम् ईदृश्येव जाताहम् इत्यर्थः॥

Notes :—1. **ससाध्वस** &c —We may take **करुण** or **करुणा** as the word here. Both can mean 'grief' by transference of epithets **साध्वसञ्च करुणञ्च करुणाच साध्वसकरुणे। ताभ्यां सह। करुणा** because it breaks her heart to think that she has to be at a distance (**अपसृत्य**) from Rama. 2. **एतावदेव** etc.—The usual interpretation is that she deems it reward enough that even now Rama remembers her touch We explain diffenently (see Tika). Henceforth whatever Rama says is heard by Sita and Tamasa but the talk of these two is **जनान्तिक** (aside to Rama). 3. **न खलु** &c—Rama expected

to see Sita by his side. But on not seeing her questions within himself—"Have I not been really touched by Sita." 4. हा धिक् &c. Rama's remark raises suspicions in Sita that he would search for her. 5. भवतु &c.—Sita's suspicion is confirmed. 6. भगवति &c. Sita has in her excitement forgotten the fact that she has become invisible to Rama by Bhagirathi's boon 7. महाराजः—for propriety see Tika For gram in मम कोपिष्यति—say सम्बन्ध विवक्षया षष्ठी" । 8. आम्—This implies अवधारण । Comp. आम्—क्लिमघस्यामाः क्वचिदपरतो भीषणाभोगरूक्षा" &c. 11 sl. 14. She actually sees that Rama cannot see her, Hence the अवधारण ।

(*xxi*) रामः—प्रिये जानकि ।

सीता—(समन्यु-गद्गदम्) अज्जउत्त असरिसं क्खु एदं वअणं इमस्स वुत्तान्तस्स [आर्यपुत्र, असदृशंखलु एतत् वचनम् अस्य वृत्तान्तस्य]। (सास्रम) अहवा किं त्ति वज्जमई जन्मन्तरेसु वि पुणो असम्भाविददुल्लहदंसणस्स मं एव्व मन्दभाइणिं उद्दिसिअ वच्छलस्स एवंवादिणो अज्जउत्तस्स उवरि णिरणुक्कोसा भविस्सं । अहं एदस्स हिअअं आणामि मम एसोत्ति [अथवा किमिति वज्रमयी (सती) जन्मान्तरेष्वपिपुनरसम्भावितदुर्लभदर्शनस्य मामेव मन्दभागिनीमुद्दिश्य वत्सलस्य एवंवादिन आर्यपुत्रस्य उपरि निरनुक्रोशा भविष्यामि । अहमेतस्य हृदयं जानामि मम एष इति] ?

रामः (सर्वतोविलोक्य सनिर्वेदम्)—हा ! कथम् ! अत्र न कश्चिदपि ।

Rama—Janaki, my darling.

Sita—(*In a voice sobbing with pique*)—My husband these words are indeed inconsistent wish this state of things, (with tears) Or, I know his heart, he mine then why should I be becoming adamantine, be unkind, towards my husband whom I can hardly get a glimpse even in other births, and who, with a fondness for my own ill-fated self is talking thus ?

Rama—(Looking round—in despair)—Alas ! strange ! There is no one here.

मित। प्रिये इत्यादि। यत्तप्रागुक्तं "भवतु पश्यामि" इति तस्यैवायमनुबन्धः। पार्श्वतस्तामपश्यन् समीपे क्वापि तिरोहिता अस्ति न वा सीता इति परिज्ञानार्थं क्रोशति—"प्रिये जानकि" इति॥ समन्यु इति। 'मन्युः' प्रणयकोपः। तेन 'गद्गदम्' अव्यक्तकण्ठध्वनिविशिष्टं यथा तथा आह। 'एतत्' वचनम्' प्रिये जानकि इत्युक्तिः अस्य वृत्तान्तस्य' परित्यागरूपस्य व्यापारस्य 'असदृशम्' अननुरूपम्। न हि प्रिया केनचित् त्यज्यते इत्यर्थः। अहं 'वज्रमयी' वज्रकठिना सती। 'असम्भावितम्' अचिन्तितम्' असम्भवम् 'दुर्लभं' दुर्घटं दर्शनं' यस्य तथाविधस्य आर्य्यपुत्रस्य। 'निरनुक्रोशा' अकरुणा 'किमिति भविष्यामि कथं स्याम्? नैव स्याम् इत्यर्थः। प्रकृष्टतरं कारणमाह—'अहमेतस्य' इत्यादिना। अहं जानामि मयि वत्सल आर्य्यपुत्रः, एषोऽपि जानाति वत्सलाहमस्मिन्निति। 'निर्वेदः दैन्यम्—सीताया अदर्शनात् दैन्यम् इति यावत्।

Notes—1. प्रिये &c.—Rama has made up his mind to make a search (भवतु पश्यामि) and accordingly he is now shouting for her (प्रिये जानकि)। The readind हा प्रिये जानकि seems out of pleace in search. The हा makes it a mere moan not a shout. 2. असदृशम् &c.—The address प्रिये has piqued her and she points out its inconsistency with what has transpired (see *Mitabh*—). 3. अथवा Here she corrects

herself. I should not be so petulant towards him, because —(I) Even if he is inconsistent, the fact remains that I never expected (असम्भावित) to meet him in this birth or in future births either. If then chance has brought about a meeting this is not the time for me to become unkind. (ii) There is no longer any inconsistency now. He has become actually वत्सल towards me and is openly declaring (एवं वादिनः) his वत्सलता। The declaration is sincere, for in spite of all that has happened, I know his heart just as he knows mine. 4. सर्वतः &c —He was sure that Sita had touched him and was expecting a response to his shout of प्रिये जानकि। Not receiving any one he knew Sita was not there, and this threw him into despair. But why did he not notice तमसा there? The poet has not prepared us sufficiently to expect that तमसा also should remain invisible to राम। She was visible to मुरला who certainly is not as high a personage as राम।

(xxii) सीता—भअवदि तमसे तहा णिक्कारणपरिच्चाइणो वि एदस्स एवंविहेण दंसणेण केरिसो विअ मे हिअआणुबन्धो त्ति ण आणामि [भगवति तमसे, तथा निष्कारणपरित्यागिनोऽपि एतस्य एवंविधेन दर्शनेन कीदृश इव मे हृदयानुबन्ध इति न जानामि]।

तमसा—जानामि वत्से जानामि।

तटस्थं नैराश्यादपि च कलुषं विप्रियवशा-
द्वियोगे दीर्घेऽस्मिन् झटितिघटनोत्तम्भितमिव।
प्रसन्नं सौजन्याद्दयितकरुणैर्गाढकरुणं
द्रवीभूतं प्रेम्णा तव हृदयमस्मिन् क्षण इव ॥ १३ ॥

Sita—Worshipful Tamasa on seeing him thus, though he abandoned me in that fashion without cause, I do not know what the inclination of my heart is.

Tam.—I know it my child, I know it.

Your heart, paralysed as it were at the unexpeceted meeting after this long separation, then indifferent through despair, next offended by reason of wrong done, afterwards appeased through his goodness thereafter deeply grieved at the grief of your darling, has at this moment turned liquid as it were through love (Or—thorough his love). (13).

मित। 'तथा' तेन प्रकारेण निर्दयमित्यर्थ। इति कोपकारणम्। 'निष्कारण' कारणं विनैव परित्यागिनः' त्यक्तवतः। एतदपि कोपकारणम् द्वाभ्यामप्येताभ्यां स्थिरकोपं प्रति हृदयौनुवन्धो न युक्तः। तथा 'अपि' सत्यपि चिररोषकारणे 'एतस्य एवं विधेन' अचिन्तितेन करुणोद्दीपकेन च 'दर्शनेन मे हृदयस्य' मनस 'अनुवन्धः' पश्चात्तापदर्शनजनितांवस् था 'कीदृश. इति न जानामि'॥ तटस्थमिति। अन्वयः—दीर्घे अस्मिन् वियोगे झटितिघटनोंत्तम्भितमिव तव हृदयं नैराश्यात् तटस्थम् अपि च विप्रियवशात् कलुषम् सौजन्यात् प्रसन्नम्, दयितकरुणैः गाढ़करुणम्, प्रेम्णा अस्मिन् क्षणे द्रवीभूतमिव। व्याख्या—'दीर्घे अस्मिन् वियोगे' चिरसन्तते विंरहे। प्राक्तु लङ्कायां वर्षादप्यूनकालं विरह आसीत्, अद्य .पुनः द्वादश-वर्षेभ्योऽधिकः। 'झटितिघटनया' अचिन्तितसमागमेन 'उत्तम्भितमिव' जड़ीभूतमिव 'तव हृदय नैराश्यात् पुनः समागमाशाविरहात् 'तटस्थम्' उदासीनम् 'अपि च' किञ्च विप्रियवशात्' निष्कारणपरित्यागात् 'कलुषम्' अप्रसन्नम् सौजन्यात्' दयितस्य सदाशयतया 'प्रसन्न' 'विमलं' दयितस्य प्रियस्य रामस्य 'करुणै.' दुःखैः 'गाढ़करुणं' गुरुशोकम्, 'प्रेम्णा' भर्त्तुःत्वदाश्रयया प्रीत्या 'अस्मिन् क्षणे' एतन्मुहूर्त्तं द्रवीभूतमिव' रसमयमिव। एवं क्रमेण अनुवन्धात् अनुवन्धान्तरं भजमानं ते हृदयम् इति न त्वया ज्ञायते मया तु बुध्यते एव।

Notes. 1. *Remark*—Here तमसा points out the different stages through which Sita's heart has passed. These are expressed in order of succession by the epithets उत्तम्भित, तटस्थ, कलुष, गाढ़करुण and द्रवीभूत। The grounds for this statement are given below, 2. झटिति &c.—उद्+स्तम्भ+णिच्+क्त कर्म्मणि उत्तम्भित paralysed. Comp. "हा कथम्...आर्य्यपुत्र एव। तत् मां धारय धारय" Para xvi. The order of succession of the stages is not observed in the first two lines of the verse. It becomes all right if lines change places 3. तटस्थम् &c.—तटे तिष्ठति इति तट+स्था+क कर्त्तरि। Lit. one sitting at the margin and not touching the water, hence indifferent, Comp, जाने पुनरपि...त्रिलोकनाथस्य—Para xvii. Here सीता thinks not of herself but of what the worlds gain if राम lives. Also compare "एतावदेव इदानीं मे बहुतरम्"—Para xx 4. कलुषम् &c. Compare "आर्य्यपुत्र असदृशं खलु एतत् वचनमस्य"—Para xxi. 5. प्रसक्तम् &c —Compare "अथवा किमिति वज्रमयी &c.—Para xxi. 6. दयित &c.—करुण is शोक। गाढ़ं करुणं यस्य यस्मिन् वा गाढ़करुणम् of a deep pathos. Comp "हा धिक्...जीवय आर्य्यपुत्रम्"—Para xvii, also 'अहमेतस्य...मम एषः"—Pare xxi. 7. द्रवीभूतम् &c—Comp. "एतस्य एवंविधेन दर्शनेन जानामि"। This will appear more clearly in the parts that follow.

(*xxii*) रामः—देवि,

प्रसाद इव मूर्त्तस्य स्पर्शः स्नेहार्द्रशीतलः।
अद्याप्यानन्दयति मां त्वं पुनः क्वासि नन्दिनि ॥ १३ ॥

सीता—एदे क्खु दे अगाधदंसिदसिणेहसम्भरा आणन्दणिस्सन्दिणो सुहामआ अज्जउत्तस्स उल्लावा जाणं पच्चएण णिक्कारणपरिच्चाअसल्लिदो वि बहुमदो मे जम्मलाहो [एते खलु ते अगाधदर्शितस्नेहसम्भारा आनन्दनिस्यन्दिनः सुधामया आर्यपुत्रस्य उल्लापा येषां प्रत्ययेन निष्कारणपरित्यागशल्यितोऽपि बहुमतो मे जन्मलाभः] ।

रामः—अथवा कुतः प्रियतमा ? नूनंसङ्कल्पाभ्यासपाटवोत्पाद एव रामभद्रस्य भ्रमः ।

Rama—My queen !

The touch wet and cool through affection, as if favour incarnate, even at this moment is delighting me but where art the delighter ? (14).

Sita—These are really the same ambrosial words of my husband, pouring joy, that disclose carefully cherished love of bottomless depth, through trust in which my coming into *being*, though beset with the thorn of causeless abandonment, is highly esteemed by me.

Rama—Or, whence could my darling (be here) ? Surely this is a delusion of Ramabhadra arising from the predisposition (proneness) created by the frequency of thought.

मित । प्रसाद इति । अन्वयः—स्नेहार्द्रशीतलः ते स्पर्शः मूर्त्तः प्रसाद इव अद्यापि माम् आनन्दयति । हे नन्दिनि, त्वं पुनः क्वासि । व्याख्या—स्नेहात्' प्रीत्या आर्द्रः सरसः शीतश्च ते स्पर्शः मूर्त्तः' मूर्त्तिमान् 'प्रसाद इव' अनुग्रह इव अद्यापि' अस्मिन् क्षणे अपि स्पर्शविरहे अपि माम् आनन्दयति' आनन्देन योजयति । स्पर्शजनितआनन्दो मामुज्झित्वा नाद्यापि विरमति, किन्तु हे नन्दिनि' तस्य आनन्दस्य कर्त्री त्वं' पुनःक्व असि' । त्वत्कृत आनन्दः अनुभूयते त्वं तु न दृश्यते इति किम् ? इत्यर्थः ॥ 'अगाधः' अतिगम्भीरश्च 'दर्शितः प्रकटितश्च 'स्नेहसम्भारः चिरसञ्चितः

स्नेहः येषु अतएव 'आनन्दनिष्यन्दिनः' हर्षस्राविणः आनन्दप्लावितां मां कुर्वन्त इत्यर्थः 'आर्य्यपुत्रस्य सुधामया उल्लापाः' विलापवचनानि। 'येषां येषु इत्यर्थः (सप्तमी तु युक्ता) 'प्रत्ययेन विश्वासेन। 'निष्कारणपरित्यागरूपं' यत् शल्यं शङ्कुः तत् जातं यस्य तथाविधः 'अपि जन्मलाभः' अद्य जन्म मे जन्मलाभः इत्यर्थः ॥ 'अथवा इति प्रागुक्तस्य आक्षेपः। "त्वं पुनः क्वासि" इत्यनेन स्थितामपि त्वां न पश्यामि इत्युच्यते एतदयुक्तम् 'कुतः' इह 'प्रियतमा' सीता मे ? नास्त्येवसा। यदि नास्ति कुतः स्पर्शः ? उच्यते— 'एष रामभद्रस्य भ्रमः'। किमस्ति भ्रमकारणम् ?—सीतया पुनः समागमो भवतु इति यः 'सङ्कल्पः' या चिन्ता तस्यः 'अभ्यासः' पुनः पुनरावृत्तिः तस्मात् जातं यत् 'पाठवं' पटुता, इय सीता आगच्छति अयं तस्याः स्पर्शः इत्यादि परिकल्पननैपुण्यं तस्मात् 'उत्पादः' उत्पत्तिर्यस्य तादृशोऽयं 'भ्रमः'। निरन्तर मया सीता एव ध्यायते, तेन ध्यानानुरूपवस्तुकल्पनाप्रवणोऽहं जातः कल्पनागता च सीता मया तात्त्विकीति मन्यते, नेह वस्तुतः सीता अस्ति इत्यर्थः ॥

Notes. 1. प्रसाद &c—मूर्च्छ्+क्त कर्त्तरि मूर्त्तः embodied. you have touched me. That is a favour done—favour personified in the touch. 2. स्नेह &c.—It was an affectionate touch (स्नेहार्द्र) that cooled down (शीतल) my heated heart. 4. अद्यापि &c.—You have withdrawn, but the pleasure of the touch thrills me still. 4. त्वं पुनः—नन्दयति इति नन्द्+णिच+णिनि कर्त्तरि ताच्छील्ये बाहुलकात स्त्रियाम्=नन्दिनी। You cannot be very far away then why do you not respond to my call ? 5. अगाध &c.—Your affection is fathomless (अगाध); It is openly declared (दर्शित) and not left to me to infer ; it is not a momentary display but affection cherished for years together (सम्भार)। सम्+भृ+घञ् भावे=सम्भार collection. स्नेहस्य सम्भारः स्नेहसम्भारः *i. e.* सम्भृतः स्नेहः by the dictum "भावानयने

इष्णामयममू" । Such being the character of the affection, there must be प्रत्यय in it (येषां प्रत्ययेन) । 6 निष्कारण &c.— only the thought that I was abandoned without cause still rankles within me, I regret the past only, I am reconciled with the present. 7. सङ्कल्प &c.—Ipicture to myself lots of things about Sita. One such picture (that she touched me) I have taken as a reality—Sita cannot be here, or she would have answered,

(*xxiv*) नेपथ्ये—प्रमादः प्रमादः । ("सीतादेव्याखकरकलितैः" इत्यर्धं पठ्यते) ।

रामः (सकरुणौत्सुक्यम्)—किं तस्य ?

नेपथ्ये—("वध्वा सार्धम्" इत्युत्तरार्धं पठ्यते) ।

सीता—को दाणिं अहिउज्जिस्सदि [क इदानीम् अभियोक्ष्यते] ।

रामः—क्वासौ क्वासौ दुरात्मा यः प्रियायाः पुत्रकं वधूद्वितीयमभिभवति ? (इत्युत्तिष्ठति) ।

(प्रविश्य सम्भ्रान्ता) वासन्ती—कथं देवो रघुनन्दनः !

सीता—कहं पिअसही मे वासन्ती [कथं प्रियसखी मे वासन्ती] !

(In the tiring room)—Mishap ! Mishap ! (The half of the verse "सीतादेव्या स्वकरकलितैः" &c. is repeated).

Rama—(*With sorrow and anxiety*)—What of him ?

(In the tiring room)—(*The latter half* "वध्वा सार्धम्" *is repeated*).

Sita—Who now will set about it ?

Rama—Where is he ? Where is that vile-hearted wretch that troubles my darling's adopted son accompanied by his mate ? *Gets up*).

(*Entering in a hurry*) Vasanti—What ! King Raghunandana !

Sita—What ! My dear friend Vasanti !

मित—। 'अभियोक्ष्यते' द्विरदपतेः प्रतिभटो भविष्यति ॥ कृत्रिमः पुत्रः इति 'पुत्रकः'। 'कथं प्रियसखी' इत्यादिकं न श्रूयते, नापि सीता दृश्यते वासन्त्या रामेण वा ॥

Notes.—अभियोक्ष्यते=will fight अभि+युज+लृट् स्यते कर्त्तरि। 2. पुत्रकम्—The affix is कन् by the गणसूत्र "पुत्रःकृत्रिमे"। 3. कथं प्रियसखी &c.—Even वासन्ती does not see सीता or hear her (because the speech is rather जनान्तिके)। Comp. "न च त्वां .. वनदेवता अपि द्रक्ष्यन्ति' &c. ante.

(*xxv*) वासन्ती—जयति जयतिदेवः।

रामः—(निर्वर्ण्य)—कथं देव्याः प्रियसखी वासन्ती !

वासन्ती—देव त्वर्य्यतां त्वर्य्यताम्। इतो जटायुगिरिशिखरस्य दक्षिणेन सीतातीर्थेन गोदावरीमवतीर्य्य सम्भावयतु देव्याः पुत्रकं देवः।

सीता—हा ताद जटाऊ सुण्णं तुए विणा जणट्ठाणं [हा तात जटायो अद्य शून्यं त्वया विना जनस्थानम्]।

रामः—अहह हृदयमर्म्मच्छिदः खल्वमी कथोद्घाताः।

वासन्ती—इत इतो देवः।

Vasanti—prosper, let Sire prosper.

Rama—(*Marking*)—What ! The queen's dear friend Vasanti !

Vasanti—Quick Sire quick. Having gone down to the Godavari from here by Sita's landing place or Ghat to the right of the peak of Jatayus hill, let Sire greet (or help) queen's adopted son.

Sita—Alas! Father Jatayu, without thee Janasthana is a void to day.

Ramh—Ah! These allusions to old stories indeed pierce the vitals of the heart.

Vasanti—this way, sire, this way.

मित –। 'जटायोर्गिरिः जटायुगिरिः जटायुना अध्युषितो गिरिरित्यर्थः। तस्य 'शिखरं' श्टङ्गम्। तस्य दक्षिणेन (एनपा षष्ठी अपि इष्यते)। सम्भावयतु 'सम्भावयतु' सम्मानयतु सहायकेन इत्यर्थः। 'उद्घातः' आरम्भः प्रसङ्गः। हृदयमर्मच्छिदः' प्राग्वृत्तस्मरणात् मर्मभेदिनः।

Notes—1 कथम्—Implies surprise 2. त्वर्य्यताम्—सम्भ्रमे द्विरुक्तिः। त्वर्य्यतां त्वया इति वाक्यशेषः। 3. इतः—This seems superfluous 3 दक्षिणेन=दक्षिण+एनप्दक्षिणेन। The एनप usually gives द्वितीया as in "दक्षिणेन वृक्षवाटिकाम्"—*Sakuntala*. But by योगविभाग of एनपा in "एनपा द्वितीया" we get षष्ठी also 4. जटायु &c.—The word is spelt जटायुस् also जटायु। "जटायोर्जम्भेदं विफलमगमद्भाग्यरहितम्" &c. Also see sl 43. The reading जटायुगिरिशिखरस्य occurs in Vidyasagara's manuscripts No I and 4. 5. कथोद्घाताः—उद्+हन+घञ भावे उद्घात commencement, introduction, allusion &c. कथानाम उद्घाताः। उद्घात in the sense of आरम्भ occurs in "उद्घातः प्रणवो यासाम्"—*Kumar*. They hurt because they remind him of all the old incidents. 6 *Remark*—जटायुगिरि &c describes the route here. This is quite useless because वासन्ती herself is leading. The

poet is on the lookout for an opportunity to introduce the name of जटायु hence जटायुगिरि etc, though superfluous.

(*xxvi*) सीता—भअवदि सच्चं एव्व वणदेवदा वि मं ण पेक्खदि [भगवति, सत्यमेव वनदेवतापि मां न प्रेक्षते]।

तमसा—अयि वत्से सर्वदेवताभ्यः प्रकृष्टमैश्वर्यं भागीरथीदेव्याः तत् किमित्याशङ्कसे ?

सीता—तदो अणुसरम्ह [ततः अनुसरावः]। (इति परिक्रामतः)।

रामः (परिक्रम्य)—भगवति गोदावरि नमस्ते।

वासन्ती (निरूप्य)—देव देव मोदस्व विजयिना वधूद्वितीयेन देव्याः पुत्रकेण।

रामः—विजयतामायुष्मान्।

सीता—अम्महे एरिसो एस सो संवुत्तो [अहो ईदृश एष स संवृत्तः]।

Sita—Worshipful Lady ! is it really true that even forest deities do not see me.

Tam—Dear child, the power of the goddes Bhagirathi is higher than that of all other deities. Then why do you hesitate (in this) ?

Sita—Then we follow. (*They go round the stage*).

Rama—(*Going round the stage*).—Worshipful Godavari, salution to thee.

Vasanti (*Marking*)—Sire Sire, rejoice at the victory of the queen's adopted child accompanied by his mate.

Rama—Let the long-lived one prosper.

Sita—Ha ! He has grown to this one of such size !

मित—। 'सतमेव' इति प्रश्नकाकुः। 'सवदेवताभ्यः' इति लक्षणया 'सर्व देवलैश्वर्येभ्यः' इत्यर्थे वर्तते। .आशङ्कसे' वासन्ती मां पश्येदिति ॥ गोदावरि नमस्ते' इति उक्त' तदा जाते गोदावरीदर्शने ॥ निरूप्य निपुण दृष्ट्रा। 'पुत्रकेण' इति हेतौ तृतीया ॥ एषः सः' वालः ईदृशः' प्रतापवान् महाकायः 'एव संवृत्तः' ॥

Notes —1. अनुसराव:—She assumes that तमसा also remains invisible We have to assume that this was through Tamasa's own power. She chooses to remain invisible to Vasanti, so Vasanti cannot see her. To मुरला she wanted to reveal herself and मुरला saw her. 2. विजयताम्—आत्मनेपद by "विपराभ्यां जे: ।—This refer to the future and expresses a hope. Let him live long (आयुष्मान् and be victorious (विजयताम्) in his encounter.—(Or—be prosperous)

(*xxvii*) रामः—देवि दिष्ट्या वर्द्धसे ।

येनोद्गच्छद्बिसकिसलयस्निग्धदन्ताङ्कुरेण
व्याकृष्टस्ते सुतनु लवलीपल्लवः कर्णमूलात् ।
सोऽयं पुत्रस्तव मदमुचां वारणानां विजेता
यत् कल्याणं वयसि तरुणे भाजनं तस्य जातः ॥ १५ ॥

सीता—अविउत्तो दाणीं अअं दीहाउ इमाए सोम्मदंसणाए समं होदु [अवियुक्त इदानीमयं दीर्घायुः अनया सौम्यदर्शनया समं भवतु] ।

Rama—you prosper. my queen, Ojoy !

O fair-limbed lady, he by whom the stalk of the *Lavali* creeper used to be pulled off the root of thy ear with the shoot of his tusk that looked smooth like a sprout of lotus growth, the same son of thine now the vanquisher of tuskers shedding ichor, has become the recipient of blessing that unfold in youth. (15,

Sita—May this long-lived one now continueun-separated from this good-looking mate.

मित—। 'दिष्टिः' भाग्यम्। तथा। यद्वा—दिष्ट्या' इत्यव्ययम् हर्ष आग्रे च। 'वर्द्धसे त्वम् अहो हर्षः भाग्यं वा॥ हर्षकारणमाह येनेति। अन्वयः—हे सुतनु येन उद्गच्छद्बिसकिसलयस्निग्धदन्ताङ्कुरेण ते कर्णमूलात् लवलीपल्लवः व्याकृष्टः सः अयं तव पुत्रः मदमुचां वारणानां विजेता (सन्) तरुणे वयसि यत् कल्याणं तस्य भाजनं जातः। व्याख्या—हे सुतनु चारुगात्रि देवि सीते, येन बालेन तव पुत्रेण उद्गच्छन् भूमिं भित्त्वा ऊर्ध्वं गच्छन् यत् 'बिसकिसलयं' मृणालाङ्कुरः तदिव स्निग्धेन कोमलेन दन्ताङ्कुरेण अचिरोद्गतेन 'ते कर्णमूलात् लवलीपल्लवः अवतंसमूत इति शेषः व्याकृष्टः' बालचापल्यात् वाकृष्य पातितः 'सः अयं तव पुत्रः मदमुचां' दानस्राविणाम् उद्दामानामित्यर्थः 'वारणानां करिणां विजेता' सन् 'तरुणे वयसि' यौवने 'यत् कल्याणं यत् भद्रमुपजायते तस्य भाजनं' पात्रं 'जातः' तत् सर्वमनुभवति इत्यर्थः॥ 'अवियुक्तः' वियोगरहितः भवतु॥

Notes—1. दिष्ट्या—दिष्टि means हर्ष, rarely भाग्य। तथा। हर्षेण, or भाग्येन इत्यर्थ। इती रेया। Or दिष्ट्या is an अव्यय implying भाग्य or हर्ष। It is an exclamation—what luck! or O joy! "दिष्टिरानन्दे मानेच" इति हेमः। "दिष्ट्या हर्षे मङ्गले च" इति मेदिनी। 2. उद्गच्छन् etc —For समास see Tika. Elephants often drag things with their teeth, रेया करणे। Vidyasagara makes a बहुव्रीहि of it qualifying येन, thus—उद्गच्छन् यत् बिसकिसलयं तदिव स्निग्धदन्ताङ्कुरो यस्य तेन। 5 व्याकृष्टः—सीता used to feed it with शल्लकीपल्लवाग्र। While eating these he with one of his newly acquired teeth playfully removed the लवलीपल्लव from her ear! 5. सुतनु—सम्बोधन of सुतनू। तनु शब्दोऽत्रकान्तावाची। Then by कर्म्मधा—we get सु शोभना तनुः इति सुतनुः। Adding ऊङ् by "ऊङुतः" the form is सुतनू (like वधू)। If we make a बहु—of सु and तनु short उ, then the सम्बोधन form will be सुतनो। बहु—of सु and तनू (long) will give सुतनूक।

Hence the recourse to कर्मधा—। cp "वरतनुरिति बहुव्रीहौ यदि ह्रस्वान्ततनु-शब्दस्ततः 'सम्बुद्धौ च' गुणप्रसङ्गः। दीर्घान्ते तु नदीलक्षणः कप् प्राप्नोति। केचिदाहुः तनुशब्दः स्त्रीजातौ कविभिः प्रयुज्यते। तस्मात् ऊङुत इति ऊङि कृते कर्म्मधारयः अयम्।"—Haradatta ; "सुतनू प्रत्यादेशव्यलीकमुपैतु ते"—Sak. 4 भाजनम्—भाजन is नित्यक्लीब। We left him quite a child, he is now a full-grown young tusker! 5. अवियुक्तः etc—Let him enjoy life and not pine away in solitude like myself.

(*xxiii*) रामः—सखि वासन्ति, पश्य पश्य कान्तानुवृत्तिचातुर्य्यमपि शिक्षितं वत्सेन।

लीलोत्खातमृणालकाण्डकवलच्छेदेषु सम्पादिताः
पुष्यत्पुष्करवासितस्य पयसो गण्डूषसंक्रान्तयः।
सेकः शीकरिणा करेण विहितः कामं विरामे पुन-
र्यत्स्नेहादनरालनालनलिनीपत्रातपत्रं धृतम्॥ १६॥

सीता—भअवदि तमसे अअं दाव एरिसो जादो ते उण ण आणामि कुसलवा एत्तिएण कालेण कीदिसा विअ होन्ति [भगवति तमसे, अयं तावदीदृशो जातः तौ पुनर्न जानामि कुशलवौ एतावता कालेन कीदृशौ इव भवतः]।

तमसा—यादृशोऽयं तादृशौ तावपि।

Rama—Behold, friend Vasanti, behold, cleverness in humouring his beloved has also beenacquired by our child.

For, through affection, transference of sips of water, scentd with blooming lotuses, has been executed at intervals between mouthfuls of lotus shoots dug up with ease, thorough sprinkling has been done with this trunk full of spray ; at the end of it again is now held an umbrella of a lotus-leaf with a straight stalk. (16). 1

Sita—Worshipful Tamasa this one has grown thus ; I do not know how they again, kusa and Lava, look like by this time.

Tamasa — As this one is, so too are they.

मित—। 'कान्तायाः' प्रियाया या अनुवृत्तिः' आनुगुण्यम् अनुरञ्जनं तत्र यत् 'चातुर्यं' पटुता तत् ॥ तदेव दर्शयति लीलेति। अन्वयः—यत् स्नेहात् लीलोत् खातमृणालकाण्डकवलच्छेदेषु पुष्यत्पुष्करवासितस्य पयसो गण्डूषसंक्रान्तयः सम्पादिताः शीकरिणा करेण कामं सेको विहितः, विरामे पुनः अनरालनालनलिनीपत्रातपत्रं धृतम। व्याख्या — यत्' यस्मात् 'स्नेहात्' प्रीतिवशात् हेतोः लीलया' अनायासेन 'उत्खाताः' दन्ताग्रेण भूमिं विदार्य्य उत्पाटिता ये 'मृणालकाण्डाः' बिसस्थम्बा तद्रूव ये 'कवलाः' प्रियार्थे दत्ता ग्रासाः तेषां 'छेदेषु' विरामेषु 'पुष्यद्भिः' विकसद्भिः पुष्करैः' पद्मैः 'वासितस्य' आमोदितस्य 'पयसः' (जलस्य) 'गण्डूषसंक्रान्तयः' स्वमुखात् उद्धृत्य मुखपूरणादानानि 'सम्पादिताः' अनुष्ठिताः। मुखरोचकं भक्ष्यं दत्तम्, क्षणे क्षणे सुवासितञ्च पेयम् इति भावः। ततः आतपखेदनोदनाय 'शीकरिणा' जलकणपूर्णेन करेण' शुण्डेन करणेन 'सेको विहित' वर्षणं कृतम्। 'विरामे पुनः वर्षणान्ते तु 'अनरालम्' अवक्रं 'नालं' दण्डो यस्य तादृशं यत् 'नलिनी-पत्रं पद्मपत्रं तद्रूपम् 'आतपत्र' छत्र 'धृतम्' ऊढम् ॥ भगवतीति। 'ईदृशः महाबल इत्यर्थः। एतावता कालेन द्वादशवर्षमितेन कालेन ॥ तादृश इत्यादि। तावपि तादृशौ महाबलौ जातौ इत्याशयः ॥

Notes—1. लीला etc—His mate showing an inclination to eat, he himself finds foods for her—sparing her the trouble to procure it herself This he does easily (लीला) with his powerful tusks. For समास see Tika छेद is troublesome here. Vidyasagara takes it as खण्ड, अंश etc— 'कवलच्छेदेषु ग्रासांशेषु'। The idea is that he digs up the lotus-shoot, reserves a share for himself and offers the rest to his mate. We interpret छेद as विराम। The Plural is natural, because

after a few mouthfuls of food the desire for drink arises. Forthwith he drags water with his trunk and transfers (संक्रान्ति) it to the mouth of his mate This is done *several times* until she has her fill of food and drink. **विरामे पुनः** in the third line seems to support this sense. 2. **पुष्यत्** etc—The time was summer (see Act II sl 9). The blooming of lotues in profusion so as to scent the water of the river sounds odd. 3. **सेक** etc —They were out in the sun ; and, meal being over, felt the heat. Thes second half of the verse describes what the elephant does to allay the heat of his mate. One is apt to think that a dip in the water and retreat to some shady place would be the best for it, 4. कालेन—अपवर्गे ३या। पुष्यत् is from पुष दिवादि।

(*xvix*) सीता—एरिसो अहं मन्दभाइणी जाए ण केअलं णिरन्तरं अज्जउत्तविरहो, पुत्तविरहो वि [ईदृशी अहं मन्दभागिनी यस्या न केवलं निरन्तरम् आर्यपुत्रविरहःपुत्रविरहोऽपि]।

तमसा—भवितव्यतैयमीदृशी

सीता—किं वा मए पसूदाए जेण तारिसाणं मम पुत्तकाणं ईसिविरलकोमलधवलदसणुज्जलकवोलं अणुबद्धमुद्धकाअलिविहसितं णिबद्धकाअसिहण्डअं अमलमुहपुण्डरीअजुअलं ण परिचुम्बिदं अज्जउत्तेण [किं वा मया प्रसूतया ? येन तादृशयोर्मम पुत्रकयोः ईषद्विरलकोमलधवलदशनोज्ज्वलकपोलम् अनुबद्धमुग्धकाकलिविहसितं निबद्धकाकशिखण्डकम् अमलमुखपुण्डरीकयुगलं न परिचुम्बितमार्यपुत्रेण]।

तमसा—अस्तु देवताप्रसादात्।

Sita—Such am I the ill-fated of whom there is ceaseless separation not from husband alone but from sons too.

Tama—such is your fate,

Sita—What was the good of my lying in ? For of Such boys of mine, the spotless pair of lotus faces, with hair made up into side locks, with bright cheeks and soft white teeth that are slighly apart, with laughter followed by a charming lips, were not kissed by my husband.

Tam—Be it so (kissed) through the grace of God.

मित। 'निरन्तरम्' अविच्छेदं यथा तथा वर्त्तते 'आर्य्यपुत्रेण विरहः पुत्राभ्यां च विरहः॥ 'भवितव्य' भावी। तस्य भाव' 'भवितव्यता' अवश्यम्भावः। भागधेयमिति फलितम्। इयम् एषा त्वदीया 'भवितव्यता' नियतिः ईदृशी एवंविधा,—अत्र मानुषः प्रतिकारो नास्ति॥ "प्रसूतया प्रजातया जातापत्यया मया इत्यर्थः किं न किमपि स्यात्। कारणमाह—'येन' हेतुना यतः इत्यर्थः 'मम पुत्रकयो: अमलमुखपुण्डरीकयुगलं न परिचुम्बितमार्य्यपुत्रेण'। 'ईषद्विरलाः' अनतिनिविडाः अचिरोद्गतत्वात् 'कोमलाः धवलाः शुभ्राः ये दशनाः' तैः उज्ज्वलौ भ्राजमानौ 'कपोलौ' गण्डौ यस्मिन् तत्। 'अनुबद्धा' अनुगता 'मुग्धा' मनोहरा 'काकलिः' अव्यक्तध्वनिः यत्र तादृशं विहसितं' हासो यस्मिन् तत्। प्रथमं हासः पश्चात् काकलिध्वनिरित्यर्थः। 'निबद्धाः काकशिखण्डकाः' काकपक्षाः यस्मिन् तत् मुखयुगलम्॥ 'अस्तु' परिचुम्बितमस्तु देवताप्रसादात॥

Notes.—1. भवितव्यता—भु+तव्य कर्त्तरि बाहुलकात् भवितव्यम् that which has to be. तस्य भावः। Refers of Sita's luck. 3. प्रसूतया—For प्रसूता, see दारकद्वय' प्रसूता part v, ante. अनुबद्ध &c.—कलि is sound शब्द। ईषत् कलिः कुशब्देन समासः। 'ईषदर्थेच" इति कुशब्दस्य कादेशो काकलिः low sound. ङीष् is optional in the feminine by "कृदिकारादक्तिनः। Hence both काकलिः and काकली। For समास see Tika निबद्ध &c—Tufts of hair at the sides, and here and there on the head, left after shaving, are called

काकपक्ष or शिखण्डक। काकशिखण्डक is unusual. 5 *Remark*—The para is an adoption of Kalidasa's आलक्ष्यदन्तमुकुलान-निमित्तहासैरव्यक्तवर्णरमणीयवचःप्रवृत्तीन्। अङ्काश्रयप्रणयिनस्तनयान् वहन्तो धन्यास्तदङ्गरजसा मलिनीभवन्ति ॥" 6. अस्त &c—तमसा flows close by Valmiki's hermitage. Hence perhaps she was aware of the preparations that were in progess at the hermitage to bring about the re-union of Rama and Sita, and here she hints at them (see Act VII). देवतानुग्रहात भविष्यति।

(*xxx*) सीता—भगवदि तमसे एदिणा अवच्चसंसुमरणेण उस्सिदपण्हुदत्तणी तामं च पिदुणो सण्णिधाणेन खणमेत्तं संसारिणी म्हि संवुत्ता [भगवति तमसे, एतेन अपत्यसंस्मरणेन उच्छ्वसितप्रस्नुतस्तनी तयोश्च पितुः सन्निधानेन क्षणमात्रं संसारिणी अस्मि संवृत्ता]।

तमसा—किमत्रोच्यते। प्रसवः खलु प्रकर्षपर्यन्तः स्नेहस्य। परमश्चैतदन्योन्यसंश्लेषणं पित्रोः।

अन्तःकरणतत्त्वस्य दम्पत्योः स्नेहसंश्रयात्।
आनन्दग्रन्थिरेकोऽयमपत्यमितिबध्यते ॥ १७ ॥

Sita—Worshipful Tamasa, I have just for a moment turned a householder with my breasts throbbing and dripping at this recolletion of my children and owing to the presence of their father.

Tam—What are you talking about it? Offspring is indeed the limit of the intensity of affection, it is really the most powerful source of the mutual attachment of the parents.

This, what is called offspring, is, through the centering of affection in it, a strange delightful knot tied to the mental entities of the parents. (17)

सिव—। भगवतीति—'उच्छ्वसितौ' कम्पमानौ प्रस्नुतौ क्षीरनिष्यन्दिनौ च 'स्तनौ' यस्याः सा। 'संसारः' गार्हस्थ्यम् तदस्त्यस्या इति। अस्मिन् क्षणे मन्ये पतिपुत्रवती संसारधर्मं चरन्ती एवाहम् न तु भर्त्रा परित्यक्ता पुत्राभ्याञ्च वियुक्ता मन्दभागिनी सीता इत्यर्थः। ("संभ्रमस्नेह" इत्यादि हेतौ ३या ॥ किमिति—'प्रसवः' अपत्यम्। 'स्नेहस्य यः 'प्रकर्षः' आतिशय्यं तस्य पर्य्यन्तः' सीमा। अपत्ये एव स्नेहस्य पराकाष्ठा दृश्यते इत्यर्थः। 'एतत् प्रसवरूपं वस्तु पित्रोः परमं सातिशयम् 'अन्योऽन्यस्य परस्परस्य संश्लेषणं मेलनसाधनम्। अतएव अपत्यसंस्मरणात् स्नेहातिशयस्ते, भर्तु-दर्शनात् भर्त्रा सङ्गतमेवात्मनं मन्यसे तेन चोच्यते "संसारिणी अस्मि संवृत्ता" इति ॥ अन्तरेति। अन्वयः—अपत्यमित्ययं स्नेहसंश्रयात् दम्पत्योः अन्तःकरणतत्त्वस्य एकः आनन्दग्रन्थिः बध्यते। व्याख्या—अपत्यम् इति अयं स्नेहस्य पित्रोः प्रीतेः 'संश्रयात्' समाश्रयणात् हेतोः 'दम्पत्योः' जायापत्योः अन्तःकरणरूपस्य तत्त्वस्य' मनोरूपस्य पदार्थस्य 'एकः' अनिर्वचनीयः 'आनन्दमयो ग्रन्थिः परस्परबन्धनं 'बध्यते' इष्यते। उभयोरपि एकस्मिन्नपत्ये स्निह्यति मनः इति मनसोर्बन्धनमेव तदपत्यम्। इतर-विलक्षणञ्च तत् बन्धनम्, यतः प्राकृत बन्धनं क्लेशकर भवति इदन्तु आनन्दकरम् इति ॥

Notes 1. संसारिणी &c—संसरण is पुनर्जन्मग्रहण। संसरत्यस्मिन् इति सम्+सृ+घञ् अधिकरणे संसारः the world. सः अस्ति अस्या इति संसार.+इनि मत्वर्थे स्त्रियाम्=सांसारिणी। I am no longer a woman of the world, yet for the time being I feel like one. 2. किमत्र &c.—अत्र in the matter of your feeling just now. What you say is superfluous. 3. प्रसवः—प्र+सूअप् कर्म्मणि प्रसवः offspring. 4. प्रकर्ष etc.—The extreme limit of excess. "Offspring is the highest grade of affection" is intended to mean "The highest grade of affection is centered in offspring," 5. अन्योऽन्य etc.—अन्यस्य अन्यस्य अन्योऽन्यस्य by "कर्म्मव्यतिहारे सर्वनाम्नोः—etc (see ante). सम् श्लिष्य+णिच+ल्युट् करणे संश्लेषणम् that which unites, *i. e.* a knot (as in the verse below).

अन्योऽन्यस्य संश्लेषणम् । 6. पित्रो – माता च पिता च पितरौ । तयोः । 7. अन्तः etc.—करण is इन्द्रिय । अन्तःस्थितं करणम् अन्तःकरणम् the inner sense, *i e.*, the mind तत्त्व is पदार्थ principle, entity. अन्तःकरणरूपं तत्त्वम् । तस्य । शेषे षष्ठी, reloted to आनन्दग्रन्थि । 8. दम्पत्यो:—जाया च पतिश्च जायापती, जम्पती also । The प्रातिपदिक is दम्पति । तयोः । शेषे षष्ठी, related to अन्तःकरणतत्त्व । दम्पत्योः अन्तःकरणतत्त्वस्य आनन्दग्रन्थिः is the same as अन्योऽन्यसंश्लेषण पित्रोः of the prose above. 9. स्नेह etc.—सं श्रयणम् इति सम्+श्रि+अच भावे संश्रयः सम्यगवलम्बनम् । स्नेहस्य संश्रयः स्नेहः—संश्रयः the thorough centering of affection. तस्मात् । हेतौ५मी । The अपत्य is the स्नेहसंश्रय । For this reason it is दम्पत्योः अन्तःकरणतत्त्वस्य आनन्दग्रन्थिः । Remembering that सम् in संश्रय is intensive we see that अपत्यं स्नेहसंश्रयः is the same as प्रसवः खलु प्रकर्षपर्यन्तः as in the prose above. आनन्दग्रन्थिः—ग्रन्थि is the same as संश्लेषणं स्नेहस्य above. II एकः—Unique. Its distinction, from an ordinary ग्रन्थि lies in the fact it is blissful while any other ग्रथि is painful. 12. *Remark*—The verse is an exact translation of the foregoing prose—आनन्दग्रन्थिरपत्ये बध्यते ।

(*xxx*) वासन्ती—इतोऽपि देवः पश्यतु ।
अतरुणमदतारुढवीतसवाम्त -
व्वयमचिरोन्नतमुग्धलोलवर्हः ।
मणिमुकुट इवोच्छिखः कदम्बे
नदति स एष वधूसखः शिखण्डी ॥ १८ ॥

Vasanti—Let Sire look this way too.
Here is the same peacock, with a tuft grown on his crest

and with a fine not-long fledged sweeping tail, crowing in company with his mate at the end of every festive frantic dance through great hilarity on the Kadamba as if on a crown of gems.

मित — अतरुणेति । अन्वयः—एषः स अयम् उच्छिखः अचिरोद्गतमुग्धलोलबर्हः शिखण्डी वधूसखः (सन्) अतरुणमदताण्डवोत्सवान्तेषु इव कदम्बे नदति । व्याख्या – 'एष' दृश्यमानः सीतया परिवर्द्धितः, शिशुः 'स अयम्' सम्प्रति तरुणे वयसि 'उच्छिखः' उद्गतया शिखया मण्डितः 'अचिरोद्गतं' नवोद्भिन्नं 'मुग्धं' मनोहरं 'लोलं' चञ्चलं खेलत् इतस्ततः बर्हःपिच्छं यस्य तादृशः 'शिखण्डी' मयूरः 'वधूसखः' (वध्वाः सखा इति 'राजाहःसखिभ्यष्टच्) सन् करिकरभक इव वध्वा सार्द्धम् 'अतरुणः' प्रौढ़ः यः 'मद' आनन्द तेन हेतुना ये 'ताण्डवोत्सवाः उद्धतनृत्तामोदाः तेषाम् 'अन्तेषु' विरामेषु मणिमकुटे इव कदम्बे पुष्पिते अधो विस्तारवति ऊर्ध्वम् च आनुपूर्व्यां सङ्कुचिते अतएव 'मणिमये मुकुटे इव अस्मिन् सीतया एव परिवर्द्धिते कदम्बे 'नदति आरटति । करिकभक इव एष शिखण्डी कदम्बे ''यत् कल्याणं वयसि तरुणे भाजनं तस्य जात' इति भावः ॥

Notes—1. अतरुण &c.—The plural shows that several times in the day he enjoys such bouts of merry dance on the top of the कदम्ब and crows at its end at the top of his voice Comp the plural in कवलच्छेदेषु, sl. 16. this is the reading in three of Vidyasagara's four manuscripts. The fourth has अन्ते in the singular and then स्वयम् etc. स्वयम् does not give good sense. अन्तेषु अयम् (अन्तेष्वयम्) does not offend against the metre ; Comp. "उपान्तवानीरवनोपगूढान्यालक्ष्यपारिप्लवसारसानि"—*Raghu*. 2. अचिर etc —लोलता of the बर्ह lies in the fat that the बर्ह can be truned any way and it was

being so turned. 3. **मणिमुकुट इव**—The is usually taken as **मणिमुकुटः इव** qualifying शिखण्डी which overlooks the fact that **मुकुट** is neuter. We take it as coming from **मणिमुकुटे इव** by **सन्धि**। A well grown **कदम्ब** tree is broadest where it branches off, the branches growing almost horizontally all round. It then tapers to a point at the top and looks from a distance like a cone placed vertex upwards which has just the appearance of a **मुकुट** । Besides even to this day a **मुकुट** is never made without a peacock at its crest 4. **वधूसख**—See Tika. Thus both the elephant-calf and the paacock are prospering well.

(*xxxiii*) सीता (सकौतुकास्रम्)—एसो सो [एषः सः]।

रामः—मोदस्व वत्स मोदस्व।

सीता—एव्वं होदु [एवं भवतु]।

रामः—भ्रमिषु कृतपुटान्तर्मण्डलावृत्ति चक्षुः
प्रचलितचतुरभ्रूताण्डवैर्मण्डयन्त्या।
करकिसलयतालैर्मुग्धया नर्त्यमानं
सुतमिव मनसा त्वां वत्सलेन स्मरामि ॥ १८ ॥

Sita (*With interest and tears*)—It is he indeed !

Rama—Enjoy it, darling, enjoy it.

Sita—So be it.

Rama—With a loving heart I remember you as though my own son—being danced by the charming (Or—artless) girl with the clapping of her leaf-like palms at each whirl, adding grace with the play of her gracefully moving eye brows, to the eyes that turned in a circlein their sockets 4(14)

मित—। भ्रमिष्विति। अन्वयः—भ्रमिषु कृतपुटान्तमण्डलावृत्ति चक्षुः प्रचलितचतुरभ्रूताण्डवैः मण्डयन्त्या मुग्धया करकिसलयतालैः नर्त्तमानं त्वां सुतमिव, वत्सलेन मनसा स्मरामि। व्याख्या—'भ्रमिषु' देव्याः परितो त्वदीयेषु मण्डलशो भ्रमणेषु 'कृता, पुटान्तः' अक्षिकोटराभ्यन्तरे 'मण्डलावृत्तिः तवानुवृत्तिः चक्रभ्रमणं येन तथाविधं चक्षुः प्रचलितयोः प्रकम्पितयोः 'चतुरयोः' लीलानिपुणयोः सुन्दरयोर्वा 'भ्रुवोः ताण्डवः' नृतैः 'मण्डयन्त्या' भूषयन्त्या 'मुग्धया' मनोहारिण्या सरलया वा सीतया 'करकिसलययोः' पाणिपल्लवयोः 'तालैः' कालमानार्थं दत्ताभिः करतालिकाभिः 'नर्त्तमानं त्वां सुतमिव' निजमिव पुत्रं वत्सलेन' स्निग्धेन मनसा स्मरामि। यद्वा 'सुतमिव' सीतया आत्मतनयमिव 'नर्त्तमानं त्वां स्मरामि इत्यर्थः॥

Notes.—1 प्रचलित &c—चतुर may also be rendered सुन्दर, सुभग &c Mallinath under तां बोद्य लीलाचतुरामनङ्गः expounds लीलाचतुरां=विलाससुभगाम्। ताण्डव here is quick motion right left or up and down. तैः। 2. मण्डयन्त्या—मण्ड+णिच स्वार्थे+शतृ स्त्रियाम् मण्डयन्ती। तया=(मुग्धया)। The eyes were beautiful but their beauty was enhanced by the play of her eye-brows 3. करकिसलय &c.—करौ किसलयमिव करकिसलयौ। उपमितकर्मधा—। The comparison with किसलय is to add grace to the palm. This act of keeping time was specially beautiful 4. नर्त्तमानं स्मरामि—I can picture before me the whole scene. She, in the perfection of her beauty, standing at the centre, you going round her in a circle, her beautiful eyes looking still more beautiful through the play of her restless eye-brows and her graceful hands keeping time in a charming manner.

Cp —"तालैः शिञ्जद्वलयसुभगैः कान्तया नर्त्तितो मे"—*Meghadutam.*

(*xxxiii*) (का—) हन्त तिर्यञ्चोऽपि परिचयमनुरुध्यन्ते।
कतिपयकुसुमोद्गमः कदम्बः
प्रियतमया परिवर्द्धितो य आसीत्। (२०—)

सीता—(निरूप्य सास्रम्)—सुट्ठु पच्चहिआणिदं अज्जउत्तेण [सुष्ठु प्रत्यभिज्ञातमार्यपुत्रेण]।

रामः—स्मरति गिरिमयूर एष देव्याः

स्वजन इवात्र यतः प्रमोदमेति ॥ २० ॥

(R—) Even the lower order of beings (as birds) respect acquaintanceship!

The Kadamba has now a show of a few flowers—the Kadamba that was reared by my darling (20 –)

Sita (*Marking—with tears*)—My husband has well recognised it.

Rama—The queen's hill peacock remembers it [Or—hill peacock remembers the queen], for, he feels joy here as with a kinsman (20)

मित –। 'हन्त' इति विषादे। तिर्य्यञ्चः पशुपक्षिणो नीचा जातयः 'अपि परिचयं पूर्वानुभूतं प्रणयम् 'अनुरुन्धन्ते' सम्मानयन्ति। तिर्य्यञ्चोऽपि अनुरुध्यन्ते मया पुनर्मानुषजात्यभिमानिना अननुरुध्यैव परिचयं त्यक्ता प्रियतमा इति सविषादमात्माधिक्षेपः। कतिपयेति। अन्वयः—कदम्बः कतिपयकुसुमोद्गमः य प्रियतमया परिवर्द्धित आसीत्। व्याख्या—'कदम्बः' एष दृश्यमानो नीपः 'कतिपयकुसुमोद्गमः स्वल्पैरेव कुसुमैरलङ्कृतः 'यः' कदम्बः 'प्रियतमया 'परिवर्द्धित आसीत्॥ स्मरतीति। अन्वयः–एष गिरिमयूरः देव्याः स्मरति यत. स्वजने इव अत्र प्रमोदमेति। व्याख्या–स्वल्पेऽपि कुसुमे बहुकुसुमान् अपरान् वृक्षान् परिहृत्य इहैवायं मोदते मयूर इतेऽतावता मन्ये 'एष गिरिमयूरः देव्या. सीतागतं ध्यायति. प्रियाया; परिचयमनुरुध्यते. तेनैव 'स्वजने इव सीतासम्पर्कात् निजे इव भ्रातरि 'अत्र अस्मिन् कदम्बे प्रमोदम् इति आनन्दमनुभवति। द्वयोरपि आवयो पोषणात् एकैव माता सीता तेन भ्रातायं मे इति सीतासम्पर्कं स्मृत्वा इहैवायं मोदते॥

Notes.—1 तिर्य्यञ्चः—तिरः वक्रम् अञ्चन्ति इति तिरस् + अञ्च किन् कर्त्तरि birds and beasts. 2. अपि—Even the lower creation,

note 1, This is self-condemnation (see Tika). अनु + रुध दिवादि लट् अन्ते कर्त्तरि here = अनुरुध्यन्ते ॥ Also Cp.—"रुध in मामनुरुन्धन्ति" —p. 268. 3. कतिपय etc.—कुसुमानाम् उद्गमाः कुसुमोद्गमाः which means उद्गतानि कुसुमानि by the dictum 'भावानयने द्रव्यानयनम्'। कतिपया कुसुमोद्गमाः अस्य, बहु—। Avoid कतिपयानि कुसुमानि तेषाम् उद्गम अस्मिन्। In the first place कतिपयानि कुसुमानि gives कुसुमकतिपयानि by the rule "पोटायुवति"—। Secondly the व्यधिकरण बहु—with षष्ठी in the पूर्वपद is objectionable. 4 प्रिय &c—Vasanti has not identified the कदम्ब, but Rama has recognised it. 5. देव्या —Construe देव्या स्मरति remembers of the queen (without कर्म्मविवक्षा of देवी)। षष्ठी शेषे, by 'अधीगर्थ'। The construction देव्याः गिरिमयूर ignores the drift of the speech and omits the कर्म्म of स्मरति। 6. *Remarks*—It is summer time and kadambas are not expected to bloom. This seems to me an anomaly.

(*xxiv*) वासन्ती—अत्र तावदासनपरिग्रहं करोतु देवः।

एतत्तदेव कदलीवनमध्यवर्त्ति
कान्तासखस्य शयनीयशिलातलं ते।
अत्र स्थिता तृणमदाद्बहुशो यदेभ्यः
सीता ततो हरिणकैर्न विमुच्यते स्म ॥ २१ ॥

Vasanti—Meanwhile let Sire take his seat here

This is the very same stone-slab which was your bed inside the plantain grove when accompanied by your beloved. It has not been deserted by the deer yonder, because seated here, Sita often offered grass to them. (21)

मित—'अत्र' इति वक्ष्यमाणं शिलातलं निर्दिशति ॥ एतदिति। अन्वयः—एतत् तदेव ते कान्तासखस्य कदलीवनमध्यवर्त्ति शयनीयशिला-

तलम्। यत् सीता बहुशः अत्र स्थिता एभ्यः तृणमदात् ततः हरिणकैः न विमुच्यते स्म। व्याख्या – एतत्' दृश्यमानं 'तदेव ते कान्तासखस्य वधू-द्वितीयस्य 'कदलीवनमध्यवर्त्ति' सावरणमित्यर्थः 'शयनीयं शिलातलम्'। 'यत्' यस्मात् सीता बहुशः अत्र' अस्मिन् शिलातले स्थिता' सती 'एभ्यः' पुरोवर्त्तिभ्यः हरिणेभ्यः 'तृणम् अदात् (दा+लुङ्) ततः' एभिः हरिणकैः' मृगैः 'न विमुच्यते। 'स्म' इति पादपूरणे। असत्यपि अधुना इह भोज्ये सीतायाः स्मरन्तः इमे आगतात्र विश्राम्यन्ति। यथा अयं मयूर यथा इमे मृगाः। तत् सत्यमेवोक्तं देवेन परिचमनुरूध्यन्ते तिर्य्यञ्च अपि इति॥

Notes—1. कान्तासखस्य– कान्ताया सखाइति कान्ता सखि+टच् समासान्त 2. हरिणकैः—Some thirteen years have passed since these enjoyed Sita's company here. The darlings are new more than full-grown deer. Hence the क cannot be अल्पे or ह्रस्वे। Take it as स्वार्थे। 2. स्म—An अव्यय here पादपूरणे। We cannot take it as giving a past sense to विमुच्यते। For that would mean that in the past the deer did not leave it i e., they continued to come here for some time after Sita had left and then ceased to come. But this contradicts एभ्यः which shows that the deer were present there at the time; Vidyasagara has rightly taken स्म as पादपूरणे। We think the text is corrupt. The correct reading is perhaps something else. पादपूरण is for people who do not know how to make up a verse and is not desirable in भवभूति। Besides the कर्म्म of विमुच्यते has to be gathered with some effort. विमुच्यतेऽदः meets all these objections. The objection, that अदस् speaks of some विप्रकृष्ट object and therefore अदः is inadmissible, is immaterial. Poets sometime do use अद to point out something close by. Compare "अदश्चराचरं विश्वम्"—

Kumara. We therefore propose to read "सीता ततो हरिणकेन विमुच्यतेऽद्य:" । 3. *Remark*—Vasanti here endorses Rama's Remark "तिर्यञ्चोऽपि परिचयमनुरुध्यन्ते" । तिर्यञ्चः includes birds and beasts. Birds are represented by the मयूर of which Rama has spoken, Vasanti points out the beasts here in हरिणके. । The deer too remembers सीता = "परिच्यमनुरुध्यन्ते" ।

(*xxxv*) रामः—इदं तावदशक्यमेवद्रष्टुम् । (इत्यन्यतो रुदन् उपविशति) ।

सीता—वासन्ती किं तुए किदं अज्जउत्तस्स मम अ एदं दंसअन्तीए । हद्धी ! हद्धी ! सो एव्व अज्जउत्तो, तं एव्व पञ्चवटी-वणं सा एव्व पिअसही वासन्ती, ते एव्व विविहवीसम्भसाक्खिणो गोदावरीकाणणुद्देसा, ते एव्व जादणिव्विसेसा मिअपक्खिपादवा, सा एव्व चाहं, मम उण मन्दभाइणीए दीसन्तं पि सव्वं एव्व एदं णत्थि । ता एरिसो जीअलोअस्स परिवत्तो [सखि वासन्ति, किं त्वया कृतमार्यपुत्रस्य मम च एतत् दर्शयन्त्या ? हा धिक् ! हा धिक् ! स एव आर्यपुत्रः, तदेव पञ्चवटीवनम्, सा एव प्रियसखी वासन्ती, ते एव विविधविस्रम्भसाक्षिणो गोदावरी-काननोद्देशाः, ते एव जातनिर्विशेषा मृगपक्षिपादपाः, सा एव चाहम् ; मम पुनर्मन्दभागिन्याः दृश्यमानमपि सर्वमेवैतन्नास्तीति । तत् ईदृशो जीवलोकस्य परिवर्तः ।]

Rama—It is indeed impossible for me to look at. (*Sits sits elsewhere weeping*).

Sit :—Friend Vasanti, in showing this, what have you done unto me or to my husband ? Alas ! Alas ! here is my husband as before, the very same forest of panchavati, the very same Vasanti, and my dear forest tracts of the Godavari, witnesses to our various confidences, the same indeed the deer, the birds, and the trees, not at all different from our children (i. e. looked upon as our children), and I am the same to be sure But to me the ill-fated, the whole of it, though being seen, is as if nonexistent ! Such then has been the change in the land of the living !

मित—। 'विविधविस्रम्भसाक्षिणः तद्द्रष्टार इति व्याख्यातं प्राक्। 'गोदावरीश्लिष्ट' यत् 'काननं तस्य उद्देशाः। 'जातम्' अपत्यम्। 'जातेभ्यो निर्विशेषाः' अभिन्नाः। अपत्यवल्लालिता इत्यर्थः। मृगाः शिलातलसमीपस्थिता हरिणाः। 'पक्षी' मयूरः। 'पादपः' कदम्बः। 'जीवानां लोकः भुवनम्'। तस्य 'परिवर्त्तः' अवस्थान्तरम्। एकस्यामवस्थायां सर्वमस्ति अवस्थान्तरे सर्वमेव नास्ति।

Notes.— किं त्वया &c,—What have you done ? you have done a disservice to both of us. We suffer by seeing. 2. दृश्यमानमपि &c,—They exist, yet to me they are non—existent. I have changed (परिवर्त्तः) and in consequence these have changed (परिवर्त्तः) from existent to non-existent.

(*xxxvi*) वासन्ती—सखि सीते, कथं न पश्यामि रामस्यावस्थाम् ?

कुवलयदलस्निग्धैरङ्गैर्ददौ नयनोत्सवं
सततमपि ते स्वेच्छादृश्यो नवं नवमेव यः ।
विकलकरणः पाण्डुः सोऽयं शुचा परिदुर्बलः
कथमपि स इत्युन्नेतव्यस्तथापि दृशां प्रियः ॥ २२ ॥

सीता—पेक्खामि सहि पेक्खामि [प्रेक्षे सखि, प्रेक्षे] ।

तमसा—पश्यन्ती प्रियं भूयाः ।

Vasanti—Friend Sita, why don't yon notice Rama's plight ? He the same who though to be always seen at will, gave fresh joy indeed to your eyes with limbs pleasing like the petals of the blue lotus, is, now through grief—wan, greatly weakened, with senses failing, yet delighter of the eyes always—hardly recognisable thy beloved as he. (22).

Sita—I see it, friend, I see it.

Tam—May thou be seeing thy beloved (at your will as before) !

मित - कुवलयेति । अन्वयः—सततं स्वेच्छादृश्यः अपि य कुवलयदल-स्निग्धैः अङ्गैः नवं नवमेव ते नयनोत्सवं ददौ, शुचा पाण्डुः विकलकरणः परिदुर्बलः तथापि दृशां प्रियः स. अयं कथमपि स इत्युन्नेतव्यः । व्याख्या—'सततं' सदा स्वेच्छया दृश्यः अपि, अनियन्त्रितदर्शनोऽपि 'यः कुवलयदलैः' नीलोत्पलपत्रैः इव स्निग्धैः' नेत्रतर्पणः अङ्गैः नवं नवमेव नवप्रकारमेव 'ते नयनोत्सवं' नेत्रानन्दं ददौ । पुरा इति शेषः, सम्प्रति 'शुचा' शोकेन त्वद्विरहजनितेन इति शेषः 'पाण्डुः' 'अपरक्तः' विकलकरणः' क्षीणेन्द्रिय-परिदुर्बलः बलहीनः तथापि दृशां प्रियः.' लोचनाह्लादनः सः अयं कथमपि अतिकृच्छ्रेण सः' एवायम् 'इति उन्नेतव्यः' प्रत्यभिज्ञातव्यः । कृच्छ्रेणैवायं राम इति ज्ञायते ईदृशी शोचनीया अस्य अवस्था जाता किन पश्यसि सखि सीते । नह्येतत् सीतां प्रति । मृता सीता इत्येव वासन्ती जानाति, परलोकस्थां तां प्रत्येतत् ॥ प्रियं पश्यन्ती भूयाः' इत्याशीः ॥ अचिरेणैव प्रियस्य दर्शनम् अविघ्नं तेऽस्तु ॥

Notes—1. **नवं नवम्**—The repetition is **प्रकारे** । Like new. The **विभक्ति** should have disappeared yielding **नवनवम्** as in "**नवनवा वनवायवः**" । But **भवभूति** has his own will, compare "**मन्दं मन्दमासत्तियोगात्**" (1. 27). **शुचा**—This goes with all the

three विकल्पकरणः पाण्डुः, परिदुर्बलः। 3. *Remark*—In the explanation usually given इयं प्रिय is the predicate This draws attention to Rama's प्रियदर्शनता which cannot excite pity In her appeal कथं न पश्यसि &c. Vasanti means to say that Rama is in a very pitiable plight—"Friend Sita, you do not notice Rama's plight or you would have come down to him from heaven out of compassion" This is Vasanti's thought, hence he is इयं प्रियः, is inadmissible as a predicate. We have therefore made कथमपि स इत्युत्प्रेक्षतव्यः as the predicate. This serves Vasanti's purpose. 4. भूयाः—भू + आशिषि लिङ्। Tamasa hopes for a reunion of the pair.

(*xxxii*) सीता—हा देव्व एसो मए विणा, अहं एदेण विणा त्ति केण सम्भाविदं आसी। ता मुहुत्तअं वि जम्मन्तरादो विअ लद्धदंसणं वाप्पसलिलन्तरेसु पेक्खामि दाव वच्छलं अज्जउत्तं [हा दैव, एष मया विना अहमेतेन विना इति केन सम्भावितमासीत्। तत् मुहूर्तकमपि जन्मान्तरादिव लब्धदर्शनं वाष्पसलिलान्तरेषु प्रेक्षे तावत् वत्सलमार्यपुत्रम्]। (इति सतृष्णः पश्यति)।

तमसा (सस्नेहास्रं परिष्वज्य)—

विलुलितमतिपूरैर्बाष्पमानन्दशोक-
प्रभवमवसृजन्ती तृष्णयोत्तानदीर्घा।
स्नपयति हृदयेशं स्नेहनिस्यन्दिनी ते
धवलबहुलमुग्धा दुग्धकुल्येव दृष्टिः॥ २३॥

Sita—O fate! By whom could it be imagined that he would be parted from me or I from him? So I will see,

even though for a moment, at intervals between floods of tears, my loving husband whose sight has been obtained as if through re-birth. (*Looks wistfully*).

Tam—(*Embracing with tears of affection*)—

your eye, wide and long through ardour, mainly white yet charming, pouring love and shedding tears that are caused by joy and grief and flowing in great profusion bathes the lord of your heart like a stream of milk. (23).

मित—। 'सम्भावितं' चिन्तितम्। मुहूर्त्तकम् इति स्वार्थे कन् (व्याख्यार्थे २था)। 'जन्मान्तरात् हेतोः 'लब्धं दर्शनं' यस्य तादृशम्'। इह जन्मनि दर्शनम् इत्यर्थः। वाष्पसलिलानाम्' अश्रु जलानाम् अन्तरेषु अवकाशेषु, यदा यदा अश्रु जलानाम् एक. प्रवाहो निवृत्तः द्वितीयश्च न तावदुद्गत तदा तदा। 'वत्सलं' मयोत्र सस्नेहम्॥ विलुलितेति। अन्वय.—अतिपूरैः विलुलितम् आनन्दशोकप्रभवं वाष्पम् अवसृजन्ती तृष्णया उत्तानदीर्घा धवलबहुलमुग्धा दुग्धाकुलेव ते दृष्टिः स्नेहनिस्यन्दिनी (सती) हृदयेशं स्नपयति। व्याख्या—'अतिपूरैः महद्भिः' प्रवाहैः 'विलुलितं विगलितम्, भर्तृदर्शनात् यः आनन्दः भर्त्तुरवस्थादर्शनाच्च यः 'शोकः' तत्—तज्जनितं' 'वाष्पम्' अश्रु 'अवसृजन्ती पातयन्ती, 'तृष्णया' दर्शनोत्कण्ठया 'उत्ताना' विस्फारिता 'दीर्घा' कर्णान्तलम्बिनी च परित्यागरोषापगमात् 'धवलबहुला' अतिशुभ्रा 'मुग्धा' प्रकृत्या मनोहरा च अतएव स्फारत्वदीर्घत्वधवलत्वादिभिः पय प्रवाहेण च 'दुग्धकुलेव' दुग्धपूर्णा कृत्रिमसरिदिव लक्ष्यमाणा 'ते दृष्टि' चक्षुः स्नेहनिस्यन्दिनी' प्रीतिवर्षिणी सती 'हृदयेशं प्राणेश्वरं रामं स्नपयति' स्नातवत् करोति। चक्षुष क्षरिता स्नेहधारा भर्त्तरि पतति मन्ये तया तस्य स्नानमेव भवति इत्यर्थः॥

Notes—1. आनन्द &c.—आनन्दश्च शोकश्च आनन्दशोकौ। तौ प्रभव कारणं यस्य ; तम। आनन्द because she has met her lord and the lord is वत्सल। शोक because she has met in this plight also because the meeting brings back to memory the

incidents that caused the almost unbelievable separation. (Comp हा दैव, एष मया विना &c). 2. उत्तानदीर्घा—Bhavabhuti believes that eagerness to see not only widens the eye but lengthens it also. Comp. 'तृष्णादीर्घस्य चक्षुष —III. sl. 46. स्नपयति—The मित्व of स्ना is optional by "ग्लास्नावनुवमां च। Hence स्ना + णिच्= स्नापि or स्नपि, and स्नापयति also is correct. Here there is no actual स्नान hence, though स्नपयति means स्नातं करोति we render it as स्नातवत् करोति। 3. स्नेह &c– स्नेहं निस्यन्दयतीति स्नेह + नि + स्यन्द + णिच + णिनि साधुकारिणि कर्त्तरि स्त्रियाम्। The derivation स्नेहनिस्यन्द अस्ति अस्याम् 'इनि मत्वर्थे) puts the कर्तृता of दृष्टि in the back ground which is not desirable. दृष्टि is the हेतुकर्त्ता। The reading स्नेहनिष्यन्दिनी is derived with इनि मत्वर्थे and is therefore avoided. If we attach णिच the rule 'अनुविपर्यभिनिभ्यः स्यन्दतेरप्राणिषु" does not apply because as a rule the enunciation of a root does not usually cover its णिजन्त form also We have therefore rejected निष्यन्दिनी। The reading however becomes available if we suppose that स्यन्द in निष्यन्दिनी is अन्तर्भावितण्यर्थ।

(*xxxviii*) वासन्ती—

ददतु तरवः पुष्पैरर्घ्यं फलैश्च मधुश्च्युतः
स्फुटितकमलामोदप्रायाः प्रवान्तु वनानिलाः।
अविरलकलं रज्यत्कण्ठाः क्वणन्तु शकुन्तयः
पुनरिदमयं देवो रामः स्वयं वनमागतः॥ २४॥

Vasanti—Here, Sire Ram has of his own accord come to this forest again ; let trees shedding honey offer *Arghya*

with fruits and flowers; let forest breezes blow, rich in fragrance of full-blown lotuses; let birds having a voice tuned to music sing sweetly and uninterruptedly. 4

मित—। ददत्विति। अन्वयः- मधुश्च्युतः तरवः पुष्पैः फलैश्च अर्घ्यं ददतु। स्फुटितकमलामोदप्रायाः वनानिलाः प्रवान्तु। रज्यत्कण्ठाः शकुन्तयः अविरलकलं क्वणन्तु। अयं देवो रामः स्वयम् इदं वनं पुनरागतः। व्याख्या— येषां पुष्पाणि सुरभीणि फलानि च सुरसानि तादृशः 'मधुश्च्युतः' मधुवर्षिणः 'तरवः पुष्पैः फलैश्च अर्घ्यं' पूजोपहारं ददतु'। अनादेयं पुष्पं वा इह मास्तु। ये च 'स्फुटितकमलामोदप्रायाः' विकसितपद्मगन्धबहुलाः तादृशाः 'वनानिलाः' वनवाताः 'प्रवान्तु' वहन्तु। पूतिगन्धयो वायव इह मा चरन्तु। ये पुनः 'रज्यन्' सरागः कण्ठो' येषां तादृशः मधुरभाषिणः 'शकुन्तयः' पक्षिणः ते एव 'अविरलम्' अजस्रं 'कलं' मधुरं 'क्वणन्तु' गायन्तु। कठोररवाः काकादय इह मा रटन्तु। कारणमाह—'अयं देवो रामः स्वयम्' स्वेच्छया एव, प्राक्तु पित्राज्ञया परवशः अद्य युष्मत्प्रीत्या 'इदं वनं पुनरागतः' तन्मोदध्वं सर्वे यूयम्॥

Notes —1. मधुच्युतः- च्युत (श्च्युतिर्) means क्षरण to trickle down, and is usually अकर्मक। Comp. 'एतास्ता मधुनो धाराश्च्योतन्ति सविषास्त्वयि" sl 54. Hence say श्च्युत here is अन्तर्भावितण्यर्थ। मधु+श्च्युत+क्विप् कर्त्तरि। 2. स्फुटित &c—स्फुटितकमलानाम् आमोदः स्फुटितकमलामोदः। स्फुटितकमलामोदस्य प्रायः बाहुल्यम् एषु, अथवा बहु—। "प्रायश्चानशने मृत्यौ तुल्य बाहुल्ययोरपि" इति विश्वः। or—स्फुटितकमलामोदेन प्रायाः बहुलाः)। Here स्फुटितकमल is a bit tautologous, for कमल itself is a full-blown lotus, 3. रज्यत्कण्ठाः—रज्यत् (रञ्ज of the दिवादि class+शतृ) is रागयुक्त tuned. She wants the sweet-throated birds only to sing. The reading रत्युत्कण्ठाः means रामे या 'रतिः' प्रीतिः तया उत्कण्ठा

'उदग्रीवाः । In that case statement of the reason in the fourth line becomes superfluous Besides, it does not fit in with epithets मधुमत्ताः and स्फुटित-कमलामोदप्राया which exclude undesirables. स्तुतकण्ठाः excludes no birds 4. *Remark*—Here again we must remember that the time being summer स्फुटितकमल is hardly available in quantity.

(*xxxix*) रामः—एहि सखि वासन्ति, नन्वितः स्थीयताम् ।

वासन्ती (उपविश्य सास्रम्)—महाराज, अपि कुशलं कुमारलक्ष्मणस्य ?

रामः—(अश्रुतिमभिनीय)—

करकमलवितीर्णैरम्बुनीवारशष्पै-
स्तरुशकुनिकुरङ्गान् मैथिली यानपुष्यत् ।
भवति मम विकारस्तेषु दृष्टेषु कोऽपि
द्रव इव हृदयस्य प्रस्तरोद्भेदयोग्यः ॥ २५ ॥

Rama—Come, friend Vasanti, do sit down here.

Vasanti (*Sitting down—With tears*)—O mighty king, is it all right with prince Laksmana ?

Rama, (*Acting as if not listening*)—

On seeing the trees, birds and deer which Maithili tended with water, wild grain and fresh shoots of grass, distributed with her lotus-hand, a strange change overtakes me as if there was a rush of the melted heart capable of bursting rocks. (25).

मित—। 'ननु' इत्यनुनये ॥ करकमलेति । अन्वयः—यान् तरुशकुनिकुरङ्गान् मैथिली करकमलवितीर्णैः अम्बुनीवारशष्पैः अपुष्यत् तेषु दृष्टेषु (सत्सु) मम प्रस्तरोद्भेदयोग्यः हृदयस्य द्रवइव कोऽपि विकारो भवति । व्याख्या—सुगमा । 'तरुशकुनिकुरङ्गान् अम्बुनीवारशष्पैः' इति यथाक्रमं

नेयम् । 'अमुना तरु' कदम्बम् अपुष्यत्, नीवारेण शकुनि मयूरमपुष्यत, 'शष्पेण कुरङ्गान्' अपुष्यत् इति । 'प्रस्तरस्य उद्वेगे' दारुणे 'योग्य.' (or उद्वेगस्य योग्यः) समर्थः हृदयस्य द्रवः इव विकारः । मन्ये हृदयं मे द्रवीभवति स द्रवः आत्मप्रवाहेण प्रस्तरमपि भिन्द्यात् मनोविकारश्च प्रकटीभवेत् ।

Notes—I. करकमल &c.– वि + तृ + क्त कर्म्मणि वितीर्ण offered. This applies to अम्बु नीवार and शष्प—all these were वितीर्ण i. e दत्त । विकारः—Construe मम विकार. । 3 प्रस्तर &c.—Hence the द्रव will come out i. e my lamentations will be unchecked to-day

(*XL*) वासन्ती—महाराज, ननु पृच्छामि अपि कुशलं कुमारलक्ष्मणस्य ?

रामः (स्वगतम्)—अये महाराजेति निष्प्रणयमामन्त्रणपदं सौमित्रिमात्रे च वाष्पस्खलिताक्षरः कुशलप्रश्नः । तथा मन्ये विदितसीतावृत्तान्तेयमिति । (प्रकाशम्) आं कुशलं कुमारस्य । (इति रोदिति) ।

वासन्ती—अयि देव, किमिति दारुण. खल्वसि ?

सीता—सहि वासन्दि किं तुमं सि एव्वं वादिणी ?

पिआरुहो क्खु सव्वस्स अज्जउत्तो विसेसदो मम पिअसहीए

[सखि वासन्ति, किं त्वमसि एवंवादिनी ? प्रियार्हः खलु सर्वस्य आर्य्यपुत्रो विशेषतो मम प्रियसख्याः] ।

Vasanti—Well, Maharaja, I ask, is it well with prince Lakshmana ?

Rama (*To himself*)—Ha ! The word of address is "Maharaj" which is colourless (indifferent) ; the enquiry after welfare is about Saumitri alone and in accents faltering with tears ; I think she is informed of the facts about Sita.

(*Aloud*) Yes ; the prince is well (*Weeps*).

Vasanti—O Sire, why indeed hast thou become so cruel ?

Sita—Friend Vasanti, why dost thou speak thus ? My husband deserves kind words of all, especially of my dear friend.

मित—। 'महाराज' इति सखिभावं परिहृत्य राजभावमात्रमाहृत्य उक्तम् अतो निष्प्रणयम् आमन्त्रणपदं सम्बोधनपदम्। 'सौमित्रिमात्रे' सौमित्रावेव न तु सीतायामपि 'कुशलप्रश्नः'। किं च 'वाक्येन' कण्ठवर्त्तिना उष्मणा 'स्खलितानि गद्गदानि अक्षराणि यस्मिन् तथाविधः कुशलप्रश्न.। त्रिभिरेभिर्निमित्तैर्मेऽत्र 'विदित सीतावृत्तान्तो' यस्याः तादृशी इयम्। 'आम्' इत्यव्ययमिह प्रतिवचने। '(आमिति प्रतिवचनावधारणयोः इति वर्द्धमानः'॥ ' प्रियार्हः"=प्रियवचनार्हः॥

Notes.—1. ननु—Implies अनुनय। आम्—In the sense of अवधारण also . here compare 'आम् - सिन्नाश्रयामा कृचिदपरतो –" (II sl. 14 "आम् अस्त्येतत्" III. para 23. 3. प्रियार्ह—प्रियं प्रियवचनम् अर्हति इति प्रिय+अर्ह+अच् कर्त्तरि।

(*lxi*) वासन्ती—

त्वं जीवितं त्वमपि मे हृदयं द्वितीयं
त्वं कौमुदी नयनयोरमृतं त्वमङ्गे।
इत्यादिभिः प्रियशतैरनुरुध्य मुग्धां
तामेव—शान्तमथवा किमिहोत्तरेण॥ २६॥

(इति मूर्च्छति)

रामः—स्थाने खलु वाक्यनिवृत्तिर्मोहश्च। सखि समाश्वसिहि समाश्वसिहि।

वासन्ती (समाश्वस्य)—तत् किमिदमकार्यमनुष्ठितं देवेन ?

Vasanti—"To me thou art life, thou art a second heart, thou art moon-light to the eyes, thou art ambrosia to the body"—with hundreds of such endearments, having indeed won over that artless one—. Or peace, I why (refer to) the sequel in this matter ? (26).

(*Faints away*)

Rama—The break in the speech and the swoon are right (Or—are in the right place) indeed. Take courage, friend, take courage.

Vasanti (*Coming round*)—Well then, why was this misdeed done by Sire ?

मित –। त्वमिति। अन्वय – त्वं (मे जीवितम्, त्वं मे द्वितीयं हृदयमसि, त्व नयनयो कौमुदी, त्वम् अङ्गे अमृतम्। इत्यादिभि. प्रियशतैः तां मुग्धाम् अनुरुध्य एव – अथवा शान्तम्। इह उत्तरेण किम्? व्याख्या— 'त्वं मम 'जीवितं प्राणा असि। त्वामन्तरेण नाहं जीवामि। 'त्वं मे द्वितीयम हृदयमसि हृदयं यथा भावं जानाति तथा त्वमपि मे सर्वं जानासि किञ्चिदपि त्वत्तो गोपितं नास्ति मे। 'त्व मे नयनयोः कौमुदी असि ज्योत्स्नेव मेनेत्रानन्दकरी त्वम्। 'त्वं मे 'अङ्गे अमृतम्' असि स्पर्शेनैव मां जीवयति। 'इत्यादिभि' एवम्प्रकारकै' 'प्रियशतै' चाटुपरम्पराभिः तां मुग्धां सरलाम् अनुरुध्य वशीकृत्य 'एव' प्रतारितवानसि इति उपालम्भगर्भो वाक्यशेष,। 'अथवा शान्तम्' यातु तत्। अस्मिन् कितवव्यवहारे 'उत्तरेण' परवर्त्तिना व्यापारेण प्रतारणरूपव्यापारोल्लेखेन 'किम् किमपि फलं नास्त्येव। कितवे प्रतय्य एवमेव परिणमति इति प्रसिद्धम्, निष्फला तदालोचना निषफलश्च तदाश्रय उपालम्भः इत्यर्थः॥ स्थाने' इत्यव्ययं युक्तार्थे। प्रतारक एवाहम् उचित मदुपालम्भ इत्यर्थ.।

Notes —1. अनुरुध्य –अनुरुध् is literally to play importunities, here to win over. 2. एव—We have taken it with अनुरुध्य। अनुरुध्य एव having indeed gained her confidence. Or

construe सुग्धाम् अनुरूपां तामेव अनुरोधवशीभूतामेव &c. 3. स्थाने—may also be treated here as the सप्तमी of स्थान which means here यथास्थान the right place. 5. अकार्य्यम्—कृ + यत् कर्मणि कार्य्यं करणीयम्। तद्विरुद्धम् अकार्यम् a wrong.

(*xii*) सीता—सहि वासन्दि विरम विरम [सखि वासन्ति, विरम विरम]।

रामः—लोको न मृष्यतीति।

वासन्ती—तत् कस्य हेतोः ?

रामः—स एव जानाति किमपि।

तमसा—उचितस्तदुपालम्भः।

वासन्ती—अयि कठोर यशः किल ते प्रियं

किमयशो ननु घोरमतः परम्।

किमभवद्विपिने हरिणीदृशः

कथय नाथ कथं वत मन्यसे ॥ २७ ॥

Sita—Cease, friend Vasanti, cease.

Rama—Because the people are intolerant.

Vasanti—What for is that ?

Rama—They alone know whatever it is.

Tamasa—The censure then is merited [Or—A rebuke is a right thing for them].

Vasanti—Is it really fame that is dear to thee, O hard-hearted one ? Well, what infamy could be more dire than this ? What befell to the fawn-eyed one in the woods ? Tell me alas ! my lord, how you take it. (27).

मित—। 'लोको न मृष्यति' न सहते, सीताया गृहे वासम् इति शेषः ॥ तत्, अमर्ष. कस्य हेतोः' किं निमित्तम् ॥ 'स लोकः एव जानाति किमपि' मया

मया कारणं न दृश्यते ॥ 'तत् तस्मात् यदि कारणमविज्ञायैव त्यक्तवानसि पत्नीं तदा 'उपालम्भः वासन्त्या कृत, उचितः' युक्त एव। यद्वा—'तस्य' लोकस्य 'उपालम्भः' तिरस्कारः 'उचितः' आसीत् न वैदेह्याः परित्यागः ॥ अयीति। अन्वयः—अयि कठोर यशः किल ते प्रियम् ? ननु अतः परं घोरम् अयशः किम् ? नाथ कथय विपिने हरिणीदृशः किमभवत्, कथं वत मन्यसे। व्याख्या —'अयि' भोः 'कठोर' निर्दय यशः किल ते प्रियम् इति काकुः। 'ननु' आक्षेपे 'अतः परं' तथाविधायाः सीतायाः तादृशात् परित्यागात् अधिकं घोरम् अयशः अयशस्करं 'किं' स्यात्। हे 'नाथ' प्रभो कथय विपिने' असहायायाः 'हरिणीदृशः' मृगलोचनायाः सीतायाः 'किमभवत्' इत्यत्र 'कथं वत' खेदे 'मन्यसे' तर्कयसि ॥

Notes—1. कस्य हेतोः—"षष्ठी हेतुप्रयोगे" इति षष्ठी। 1. अयि—the tone is one of censure. किल—Implies अरुचि disapproval, disbelief &c. You say fame is dear to you. I do not believe it. There is an intonation here which makes it a question. You love fame ? I do not believe it. 3. परम्—पर means अधिक। परं घोरम् घोरतरम्। Hence the तरप् is dispensed with—वाक्येन प्रत्ययार्थस्य उक्तत्वात्। 4. वत—Implies खेद।

(*xlii*) सीता—तुमं एव्व सहि वासन्दि दारुणा कठोरा अ जा एव्वं अज्जउत्तं पदीत्तं पदीवेसि [त्वमेव सखि वासन्ति दारुणा कठोरा च या एवमार्यपुत्रं प्रदीप्तं प्रदीपयसि]।

तमसा—प्रणय एवं व्याहरति शोकश्च।

रामः—सखि किमत्र मन्तव्यम् ?

त्रस्तैकहायनकुरङ्गविलोलदृष्टे-

स्तस्याः परिस्फुरितगर्भभरालसायाः।

ज्योत्स्नामयीव मृदुबालमृणालकल्पा
क्रव्याद्भिरङ्गलतिका नियतं विलुप्ता ॥ २८ ॥

Sita—Hard-hearted art thou rather, friends Vasanti and fierce too , as thou art inflaming my husband who is already in flames.

Tamasa—It is love that speaks thus, and grief too.

Rama—Friend, what is there to think of in this matter ? The twig of her body, like soft young shoot of the lotus, as if made of moon-beams, and weary with the weight of her quivering womb, surely destroyed by eaters of raw meat even as her wandering eyes rolled like those of an one-year old fawn frightened. (28).

मित—। त्वमिति। स्वयं प्रदीप्तं' शोकेन, दुर्वचोभि. भूयोऽपि 'प्रदीपयसि' तापयसि ॥ प्रणय इति। वयस्ये रामे यः 'प्रणयः' 'प्रश्रयः' तेन राजोचितं समुदाचारं परित्यज्य 'व्याहरति। किं पुनर्व्याहारकारणमित्याह 'शोकश्च' तदावस्थां विचिन्त्य शोकतप्ता वासन्ती वत्स्य' रामं निर्मर्य्यादमुपालभते इत्यर्थः ॥ त्रस्तेति। अन्वय —नियतं परिस्फुरितगर्भभरालसायाः त्रस्तैकहायनकुरङ्गविलोलदृष्टेः तस्याः मृदुबालमृणालकल्पा ज्योत्स्नामयीव अङ्गलतिका क्रव्याद्भि. विलुप्ता। व्याख्या—नियतं' नूनं तदानीं विपिने हिंस्रेभ्यः पलायनोद्यतायाः तस्याः प्रयत्नवशात् 'परिस्फुरितः' कम्पितः यः गर्भः तस्य 'भरेण भारेण अलसायाः' मन्थरायाः धावनविरताया इत्यर्थं अतएव निश्चितं ग्रहणं मृत्युश्च इति हेतोः 'त्रस्त;' यः चकित 'एकहायनकुरङ्गः' वर्षमात्रवयस्को हरिणशिशुः तस्य इव 'विलोला' चञ्चला शरणमन्विष्यन्ती इत्यर्थः दृष्टिः यस्या. तथाविधायाः तस्याः सीतायाः 'मृदु' कोमलं यत् बालमृणालं' बिसकिसलयं तत्तुल्या सुखभक्ष्या इति शेषः ज्योत्स्नामयीव' ज्योत्स्नागठितेव 'अङ्गलतिका' देहलता 'क्रव्याद्भि.' श्वापदैः 'विलोपं गमिता भक्षिता इत्यर्थः ॥

Notes—1. त्रस्त etc—For समास see Tika. Or say she was त्रस्ता, hence एकहायनकुरङ्गविलोलदृष्टिः । त्रस्ता because she saw there was no escape, विलोल in scarch of help. त्रस्ता चासौ एकहायदकुरङ्गविलोलदृष्टिश्च । दृष्टि eye. she lost hope because she couldnot run. 2. परिस्फुरित &c—That was the day of delivery. The womb quivered at the slightest effort. Comp. "परिस्फुरतीव मे गर्भभारः तत् शिथिलं गच्छामि—I, para ixxv. 3. ज्योत्स्नामयीव—ज्योत्स्ना प्रकृतिरस्या इति ज्योत्स्ना +मयट् स्त्रियाम् ज्योत्स्नामयी made of moon-light. The इव implies a mere surmise (उत्प्रेक्षा) । See next, 4 मृदु &c,—मृणाल is white and tender. मृदु and बाल are to intensify the whiteness and tenderness. ईषत्समास मृदुबालमृणालम् इति मृदुबालमृणाल+कल्पप् स्त्रियाम् । Such Such being the character, the surmise follows ज्योत्स्नामयीव । 5. क्रव्याद्—For क्रव्याद् see I sl 49. "क्रव्याद्भ्योवलिमिव निर्घृण क्षिपामि" । 6. विलुप्ता—लुप is सकर्म्मक when meaning छेदन (तुदादि) वि+लुप+क्त कर्म्मणि स्त्रियाम् विलुप्ता quartered.. *i. e.* eaten up. Or take the अकर्म्मक लुप meaning अदर्शन and assume it to be अन्तर्भावितण्यर्थ ।

७. *Remark*—The thought is the same as in Act 1. sl. 49.

(*xliv*) सीता—अज्जउत्त धरामि पसा धरासि [आर्य्यपुत्र ध्रियै, एषा ध्रियै] !

रामः—हा प्रिये जानकि क्वासि ।

सीता—हद्धी हद्धी अज्जउत्तो वि पमुक्तकण्ठं रुण्णो [हा धिक् हा धिक् आर्य्य पुत्रोऽपि प्रमुक्तकण्ठं रुदितः] ।

तमसा—वत्से साम्प्रतिकमेवैतत् । कर्त्तव्यानि दुःखितैर्दुःखनिर्वापणानि । यतः—

पूरोत्पीडे तडागस्य परीवाहः प्रतिक्रिया ।
शोकक्षोभे च हृदयं प्रलापैरेव धार्य्यते ॥ २९ ॥ (तम—)

Sita—I live, my husband, I live.

Rama—O dear Janaki, where are you ?

Sita—Alas ! Alas ! My husband, too is weeping at the top of his voice.

Tamas—Child, this is right indeed. The relief of their affliction has (thus) to be achieved by the afflicted , for—

When there is pressure of flood in a tank the remedy is a drain , and when there is shock of grief, the heart is steadied by wails alone. (29). (Tam—)

मित—। ध्रियें' जीवामि (धृ तुदादि) ॥ साम्प्रतम् इत्यव्यय युक्तार्थे । साम्प्रतमेव इति 'साम्प्रतिकम्' । ठक् स्वार्थे । 'निर्वापणानि' प्रशमनानि ॥ पूरेति । अन्वयः—तडागस्य पूरोत्पीडे परीवाहः प्रतिक्रिया । हृदयञ्च शोकक्षोभे प्रलापैरेव धार्य्यते । व्याख्या—'तडागस्य' जलाशयस्य 'पूरकृते जलवृद्धिजनिते 'उत्पीडे विमर्दे सति 'परीवाहः पयःप्रणाल्या जलनिर्गमः एव 'प्रतिक्रिया' प्रतीकारः । अन्यथा जलभरेण तडागतटं भिद्यते । एवं 'हृदयमपि 'शोककृते क्षोभे' सति 'प्रलापैरेव' धार्य्यते' रक्ष्यते. अन्यथा शोकभरेण भिद्यते हृदयम् ॥

Notes—1. आर्य्यपुत्र &c—of course this is not heard by Rama. 2. रुदितः—रुद्+कर्त्तरि क्तः । 3. साम्प्रतिकम्—साम्प्रतम् is an अव्यय meaning युक्त । साम्प्रतमेवइति साम्प्रतम्+ठक् स्वार्थे । विनयादि is आकृतिगण and साम्प्रतम् is supposed to belong to this class. 4. दुःख &c.—निर+वा—णिच्+ल्युट् करणे निर्वापणानि the means to allay. दुःखस्य निर्वापणानि । 5. पूर &c.—पूर flood. उद्+पीड्+घञ् भावे उत्पीड. pressure. पूरस्य उत्पीड: । Here तडाग is the कर्म्म and पूर the कर्त्ता of उत्पीडनक्रिया । Both take षष्ठी.

by "शेषेविभाषा" । 6. परीवाह—परिवाह्यते अनेन इति परि+वह+घञ् करणे परिवाहः or परीवाहः ; the ई being optional by "उपसर्गस्य घञि अमनुष्ये बहुलम्" । 7. प्रतिक्रिया—प्रति+कृ श करणे the remedy. cut a drain, let out the surplus water and the tank is saved. 8. शोकक्षोभे—शोक is the counterpart of पूर and क्षोभ of उत्पीड़ । 9. प्रलापः—प्रलाप is the counterpart of परीवाह । प्रलाप lets out some शोक and the heart is steadied. Hence प्रलाप is a way for दुःखनिर्व्वापण and becomes कर्त्तव्य । see sv. IV also

(*xlv*) (तम—) विशेषतो बहुतरप्रकारकष्टो रामभद्रस्य जीवलोकः ।

इदं विश्वं पाल्यं विधिवदभियुक्तेन मनसा
प्रियाशोको जीवं कुसुममिव घर्म्मः क्लमयति ।
स्वयं कृत्वा त्यागं विलपनविनोदोऽप्यसुलभ-
स्तदद्याप्युच्छ्वासो भवतिननुलाभो हि रुदितम् ॥३०॥

Tam—To Ramadhadra especially the land of the living is beset with troubles of many sorts.

This world has to be duly guarded with a mind, fully applied, on the other hand grief for his darling is oppressing his soul as the heat does a flower. The relief of laments is not available to him, he having himself (i e, of his own accord) adopted the abandonment, hence even now, out-bursts do occur, Verily weeping is is a boon to him (30)

मित—। 'बहुतराः' विविधाः 'प्रकाराः' भेदाः येषां तादृशानि 'कष्टानि' यस्मिन् तादृशो 'जीवलोकः' संसारः ॥ कष्टबाहुल्यमेव दर्शयति—इदमिति । अन्वयः—अभियुक्तेन मनसा इदं विश्वं विधिवत् पाल्यम् । प्रियाशोकः

घर्मः कुसुममिव जीवं क्लमयति । स्वयं त्यागं कृत्वा विलपनविनोदः असुलभः । तत् अद्यापि उच्छ्वासो भवति ; ननु रुदितं लाभो हि । व्याख्या –'अभियुक्तेन मनसा' अवहितेन चेतसा 'इदं विश्वं' कृत्स्नमेव जगत् विधिवत् तथा-शास्त्रं 'पाल्यम्' राज्ञः कर्त्तव्यतया रक्षणीयम् । कृत्स्नं विश्वं पाल्यं तेन हि न सुकरा रक्षा । विधिवत् रक्ष्यमिति परमदुष्करता रक्षायाः । अतः अभियुक्तेन मनसा पालनम् इतेकं कष्टम् । 'प्रियाशोकः' सीताविरहसन्तापः घर्म्मः' आतपः 'कुसुममिव जीवं' प्राणान् क्लमयति । तेन हि मनसः अभियुक्तता दुःसाध्या इति कष्टं द्वितीयम् । एतच्च न स्यात् यदि पूरोत्पीडे तडागस्य परीवाह." इव विलापः सुलभः स्यात्, किन्तु 'स्वयं' स्वेच्छया 'त्यागं कृत्वा' सीतां परित्यज्य स्थितस्य तस्य 'विलपनं विलापः तद्रूपो . विनोदः, शोकप्रश-मनोपायः 'असुलभः' दुर्लभः । यत् स्वेच्छया त्यज्यते तस्यार्थे विलापः न सङ्गच्छते इति भावः । इति कष्टं तृतीयं, बहुत्वञ्च कष्टस्य । अत उच्यते 'बहुतरप्रकारकष्टो रामस्य जीवलोकः'' । इति तत् तस्मात् इत्थं प्रतिक्रिया-विरहात्' अप्रशमिते हृदयस्य शोकक्षोभे' अद्यापि द्वादशवर्षाधिककाले व्यतीतेऽपि 'उच्छ्वासः' शोकोच्छ्वासः 'भवति' जायते । तत् किमुच्यते "हा धिक्" इति । 'ननु रुदितं' विलापः 'लाभो' हि' लाभाय एव । इयन्तं कालम् असुलभेन अद्य तु लब्धेन विलापेन हृदयं तस्य धार्य्यते एव, अतो मा त्वं व्यथिष्ठाः ॥

Notes—1. **विधिवत्**—विधि is शास्त्रविधि । विधिम् अर्हति इति विधि+वति । An अव्यय । 2. **अभियुक्तेन** &c.—The sphere of operation is vast (**विश्व**) and the quality of the work is to be high (**विधिवत**) hence the necessity of supreme attention (**अभियुक्तेन मनसा**) । This is the trouble No 1. 3. **प्रियाशोकः** &c.—This though is the same as in "**किसलयमिव मुग्धम्** &c" (sl. 5). This is trouble No. 2. It interferes with the work '**इदंविश्वम्**" &c. The necessary attention cannot be given to the work. 4. **स्वयंकृत्वा** &c.—This

introduces trouble. No. 3. The heart cannot be releived because the only relief is lamentation (प्रलापैरेव धार्यते") and lamentation is not available to him. This establishes बहुत्व of कष्ट and justifies the remark "बहुतरप्रकारकष्टः" Here note grammar—असुलभः has तेन for its nominative understood. The खल् in सुलभ bars the षष्ठी in the कर्त्ता। Or we may say स्वयं रुवा ' कृत्वा स्थितस्य तस्य असुलभः with शेषे षष्ठी in तस्य not कर्तरि षष्ठी। 6. तद्यापि &c.—उद्+श्वस +घञ भावे उच्छ्वास outburst. The pentup grief has at last found a vent. This will benefit him. 6. ननु—Implies आक्षेप। why exclaim हा धिक at his wails? You are wrong. Hail this outburst with joy, it will steady his heart. Cp—"एवं बुद्धिः प्रसादं याति"—Bhass.

(*xlvi*) रामः—कष्टं कष्टम्!

दलति हृदयं गाढोद्वेगं द्विधा तु नभिद्यते
वहति विकलः कायो मोहं न मुञ्चति चेतनाम्?
ज्वलयति तनूमन्तर्दाहः करोति न भस्मसात्
प्रहरति विधिर्मर्मच्छेदी न कृन्तति जीवितम् ॥३१॥

सीता—एव्वंण्णेदं [एवमेतत्]

Rama—Misery! O misery!

The heart, with deep agitation, becomes pounded but does not cleave into two. The frame, unnerved, develops a swoon but does not renounce consciousness. The internal heat burns the body (Or—The heat burns the body within) but does not reduce it to ashes. Fate is piercing the vitals, but does not sever off life. (31).

Sita—So it is.

भित—। दलतीति। अन्वयः—गाढोद्वेगं हृदयं दलति द्विधा तु न भिद्यते। विकलः कायः मोहं वहति चेतनां न मुञ्चति। अन्तर्दाहः तनूं ज्वलयति भस्मसात् न करोति। विधिः मर्मच्छेदी (सन्) प्रहरति जीवितं न कृन्तति। व्याख्या—'गाढः' प्रबलः उद्वेगो' विचलितता यस्य तादृशं मम 'हृदयं दलति' निष्पिष्टं भवति 'द्विधा तु किन्तु द्वयोर्भागयोः 'न भिद्यते' भिन्नं न भवति। यदि तथा स्यात् मृत एव स्यां दुःखानुभवश्च न स्यात्। किञ्च 'विकलः कायः' असारो मे देहः 'मोहं वहति' मूर्च्छां तनोति किन्तु चेतनां न मुञ्चति' चैतन्यस्वरूपं तत्वतो न जहाति। अथ यदि जह्यात् चिरयैव अचेतनः स्यां दुःखानुभवो न स्यात्। अपि च 'अन्तर्दाहः' मनस्तापः सन् ज्वलयति' देहं दहति 'भस्मसात् न करोति' भस्मीभूतं न करोति। कुर्याच्चेत् मृतः स्यां दुःखानुभवश्च न स्यात्। "कष्टं भोः कष्टम्!" मन्ये विरूपो मे 'विधिः' दुःखसंवेदनं स्यात् इति 'मर्मच्छेदी' मर्माणि छित्वा 'प्रहरति किन्तु' जीवितं न कृन्तति' प्राणान् न छिनत्ति। "दुःखसंवेदनायैव रामे चैतन्यमाहितम्। मर्मोपघातिभि प्राणैर्वज्रकीलायितं स्थिरैः॥"—इति भावः॥ एवमेतत् ममापि एवमेवानुभवः इति रामेण आत्मनस्तुल्यावस्था विज्ञाप्यते॥

Notes—दलति—दल implies भेदन and is usually सकर्मक। Here the sense is altered and it means भिन्नीभवन and is अकर्मक। 2. गाढ़ etc. उद्+विज+घञ् भावे करणे वा उद्वेग shock (करणे), agitation (भावे)। prefer करणे। 3. भिद्यते—भिद्+लट्ते कर्मकर्त्तरि। 4. विकलः—कला is कलना any movement of imaginative work; hence सामर्थ्य strength. "कलनाकालयोः कला" इति विश्वः। विगता कला अस्य। 5. ज्वलयति—ज्वल+णिच्=ज्वलि or ज्वालि optionally by "ज्वलह्वल-ह्मलनमाम् अनुपसर्गात् वा"। Hence ज्वालयति is also correct. 6. अन्तर्दाहः—Here we may also take अन्तः as uncompounded and construe दाहः तनूम् अन्तः ज्वलयति the burn of grief inflames the body within. if compounded, say अन्तः मध्ये दाहः अन्तर्दाहः internal heat,

छपछपा । 7. भस्मसात्—साकल्येन भस्म इति भस्म+साति completely reduced to ashes. An अव्यय । 8. प्रहरति &c—This sums up the matter of the preceding three lines.—The heart does not burn to ashes &c. hence I infer—That the Ordainer (or fate) strikes and at the same time purposely preserves life so as to make me feel the pain in full. The verse is an amplification of "दुःखसंवेदनायैव &c." (Act I, sl 48). 9. एवमेतत्—Sita endorses Rama's view. I too feel it thus! I suffer unspeakable misery yet life persists in me.

(*xlii*) रामः—हे भवन्तः पौरजानपदाः,

न किल भवतां स्थानं देव्या गृहेऽभिमतं तत-
स्तृणमिव वने शून्ये त्यक्ता न चाप्यनुशोचिता ।
चिरपरिचितास्ते ते भावाः परिभ्रमयन्ति मा-
मिदमशरणैरद्याप्येवं प्रसीदत रुद्यते ॥३२॥

Rama—O ye citizens and villagers—

The Queen's stay at home, I was told, was not to your liking, so, like straw, she was abandoned in the lonely forest and not mourned, even now helpless I weep thus, all those long familiar objects bewilder me. O pardon me. (32).

मित—। न किलेति । अन्वयः—देव्याः गृहे स्थानं भवतां न अभिमतं किल, ततः (सा) तृणमिव शून्ये वने त्यक्ता न च अनुशोचिता अपि । अद्य अपि चिरपरिचिताः ते ते भावाः मां परिभ्रमयन्ति' अशरणैः (अस्माभिः) इदम् एवं रुद्यते, प्रसीदत । व्याख्या—'देव्याः' सीतायाः 'गृहे' राजभवने 'स्थानं' स्थितिः निवासः 'भवतां न अभिमतं सम्मतः किल इति श्रुतं मया 'ततः' तस्मात् सा देवी 'तृणमिव' अकिञ्चित्करमिव किञ्चित् वस्तु

'शून्ये वने' विजने कानने 'त्वत्कृता' निर्वासिता। 'इत्थं मृतायै दत्ता सा 'च च' नैव अनुशोचिता अपिपश्चात्तापेनापि सम्भाविता। 'अद्य अपि' अधुना च तस्या अर्थे यो विलापः तत्र ब्रवीमि 'चिरपरिचिताः' दीर्घं कालं सीतया सह अनुभूताः 'ते ते भावाः' तरुशकुनिकुरङ्गादयः गिरिकाननादयश्च पदार्थाः अद्य दृष्टाः सन्तः 'मां परिभ्रमयन्ति, विकलयन्ति, तेन च 'अशरणैः' निरुपायैः अस्माभिः 'इदम् एतत् 'एवम्' अनेन प्रकारेण उच्चैरिति शेषः रुद्यते' (भावे or कर्मणि लट्) विलप्यते। अत्र मे अनिच्छाकृतरोदने 'प्रसीदत' प्रसन्ना भवत मा कुप्यत इत्यर्थः ॥

Notes—1. किल—अव्यय implying ऐतिह्य reported matter. 1 heard it from my man दुर्मुख। 2 भवताम्—कर्त्तरि षष्ठी in connection with अभिमत (which see) 3. अभिमतम्—अभि + मन् + क्त कर्म्मणि वर्त्तमाने :by "मतिबुद्धि"—। This gives षष्ठी in the कर्त्ता by "क्तस्य च वर्त्तमाने"। 4 परिभ्रमयन्ति—परिभ्रम + णिच् = भ्रमि not भ्रामि because the root is मित्। परिभ्रमयन्ति bewilder. 5 इदम—Take this with रुद्यते। or इदम् points at the क्रिया, i. e. रोदनक्रिया। Comp "इदं रक्षोभिवृत्तम्" (I. sl. 28) 6. अशरणैः—शरण is रक्षण help "शरणं रक्षणे गृहे" इति विश्वः। अविद्यमानं शरणमेषाम्। तैः। Refers to himself. अनुक्त कर्त्तरि ३या। He has spoken above of himself in the singular (माम्), hence it would have been more natural to say अशरणेन मया रुद्यते। 7. प्रसीदत—Weeping is an offence against you. Excuse me (प्रसीदत) I am helpless in the matter.

(*xviii*) तमसा—अतिगभीरमवगूरणं शोकसागरस्य।
वासन्ती—अतिक्रान्तो धैर्यमवलम्बतां देवेन।
रामः—सखि किमवलम्ब्यते धैर्यमिति ?

देव्या शून्यस्य जगतो द्वादशः परिवत्सरः ।
लुप्तं सीतेति नामापि न च रामो न जीवति ॥३३॥

Tamasa—A very deep whirl-pool of the sea of sorrow ?

Vasanti—Let Sire have patience in the matter of what is past.

Rama—Friend, do you cry 'patience in this matter' ? This is the twelfth year of the world bereft of the queen. Even the name 'Sita' is forgotten, but it is not that Rama does not live. (33).

मित—। 'अवगूरणम्' आवर्त्त इति विद्यासागरपादाः ॥ 'अतिक्रान्ते' विगते सीताविनाशेविषये । 'अत्र' अतिक्रान्ते विषये इत्यर्थः । अकार्ये त्वया उक्तं धैर्य्यमिति । अवलम्बितमेव मया धैर्य्यमित्याह—देव्या इति । अन्वयः—सुगमः । व्याख्या—देव्या' सीतया 'शून्यस्य' विरहितस्य 'जगतः' अद्य 'द्वादशः परिवत्सरः' वर्षं वर्त्तते । इतः प्राक् द्वादशे वत्सरे मृता सीता (द्वादश इति भ्रमः त्रयोदश इति युक्तम्) । सीत इति नाम अपि लुप्तं तिरोहित जगति । कोऽपि नाद्य सीतेति नाम स्मरति । किन्तु 'राम.' न च नैव 'न जीवति 'जीवत्येव—वज्रमयो राम. । किमतः परमुच्यते धैर्य्यमिति ।

Notes —1 अवगूरणम—The root गूर means गति । अव means निम्न । अवगूर्य्यते (दिवादि आत्मनेपदी) अधो गच्छति अस्मिन्नितिअव +गुर+ल्युट् अधिकरणे अवगुरणम् a place where the motion is down-wards. But at every whirl pool there is a strong downward suction. Hence अवगूरण is आवर्त्त whirl-pool. 2. द्वादशः—This is a miscalculation. Sita was abandoned on or a about the day शृङ्गऋष्य commenced his यज्ञ । This lasted 12 years and was finished a day or two before राम came to पञ्चवटी । Hence it was the thirteenth year of her exile then running. But तमसा gives us (para ix) a contradictary report. She says that very day the twelfth year com-

pleted. Any way राम perhaps should have said अयोदश: परिवत्सरः। 3, न च—च implies अवधारण। 4. न न—The two negatives make a strong affirmative rendering च well nigh supefluous.

(*xlix*) सीता—मोहिदम्हि एदेहिं अज्जउत्तवअणेहिं [मोहितास्मि एतैरार्यपुत्रवचनैः]।

तमसा—एवं वत्से,

नैताः प्रियतमा वाचः स्नेहार्द्राः शोकदारुणाः।

एतास्ता मधुनो धाराश्च्योतन्ति सविषास्त्वयि ॥२४॥

Sita—I am dazed by these words of my husband.

Tamasa—Just so, my child.

These words, tender with love, being terrible with grief, are not very pleasant to you. These are streams of honey pouring on you mixed with poison. [Or—These as they are, pour on you streams of honey mixed with poison]. (24).

मित—'मोहिता' मोहमापादिता। मोहः विकलता। आर्य्यपुत्रस्य, शोकोद्गारिभिर्वचनैः अहमपि शोकेन विवशा जाता। 'एवं' युक्तमेतत्। रामस्य वचनानि दुःखकराण्येव ते। कारणमाह—नैता इति। अन्वयः—स्नेहार्द्राः शोकदारुणा एता वाचः प्रियतमा न ता एताः सविषा मधुनो धाराः त्वयि श्च्योतन्ति। व्याख्या—'स्नेहेन वात्सल्येन 'आर्द्राः' सजलाः कोमला इत्यर्थः किन्तु 'शोकेन' भर्त्तुः शोकेन दारुणा' कठोराः दुःसहा इति यावत् 'एता वाचः' रामोक्तानिवचनानि 'प्रियतमाः न' त्वत्सम्बन्धे नितरां प्रीतिप्रदा नैव भवन्ति। 'ताः' तथाविधा स्नेहार्द्राः शोकदारुणा 'एता' वाचः न हि मन्ये वाच एव किन्तु 'सविषाः विषसंसृष्टाः मधुनः धाराः' मधुप्रवाहाः 'त्वयि श्च्योतन्ति'। (श्च्युत्तिर् क्षरणे अकर्म्मकः। सकर्म्मक पक्षे—'ता एताः' रामवाचः 'सविषाः' विषमिश्राः 'मधुनो धाराः मधुप्रपातान् 'त्वयि श्च्योतन्ति' पातयन्ति)।

Notes—. मोहिता—मुह+णिच्+क्त कर्मणि स्त्रियाम्। 2. प्रियतमा—No comparison is implied, तमप् expresses आतिशय्यमात्र here. 3. श्चोतन्ति—For a सकर्मक use compare—मधुश्चुतः (sl. 24). Those who do not admit the सकर्मक sense have to suppose श्चुतिर् (भ्वादि) to be अन्तर्भावितण्यर्थ in such instances.

(*l*) रामः—अयि वासन्ति, मया खलु—

यथा तिरश्चीनमलातशल्यं प्रत्युप्तमन्तः सविषश्च दंशः।
तथैव तीव्रो हृदि शोकशङ्कुर्मर्माणि कृन्तन्नपि किं न सोढः ॥२५॥

सीता—एव्वं ह्मि मन्दभाइणी पुणो वि आआसआरिणी अज्जउत्तस्स [एवमस्मि मन्दभागिनी पुनरपि आयासकारिणी आर्यपुत्रस्य]।

Rama—O Vasantiby me, indeed,—

Is not the keen shaft of grief being borne in the heart though rending the vitals like a bent spike of glowing coal driven in or like the bite of some venomous snake. *(35)*.

[N. B—The verse is obscure.].

Sita—Thus have I, the ill-starred, become again an afflic-ter of my husband.

मित—। 'मया खलु' इति परिवर्तिना श्लोकेन अन्वितत् ॥ यथेति। अन्वय.— यथा अन्तः प्रत्युप्तं तिरश्चीनम् अलातशल्यं सविषः दंशश्च तथैव मर्माणि कृन्तन्नपि तीव्रः शोकशङ्कुः हृदि मया खलु सोढः न किम्? व्याख्या— यथा' यद्वत 'अन्तः' मध्ये 'प्रत्युप्तं' तिरश्चीनं वक्रम् 'अलातम्' 'अलातम्' अङ्गार एव 'शल्यं' कीलकः 'सविषः' गरलसंयुतः 'दंशश्च सर्पदंशः' वा तथैव तद्वदेव 'मर्माणि जीवनस्थानानि 'कृन्तन्नपि

छिन्दन्नपि 'तीव्रः' दारुणः 'शोकशङ्कुः' शोकरूपः कीलकः 'हृदि' हृदये 'मया खलु' नूनं 'सोढः न किम् = सोढ एव। इदमपि न किं धैर्य्यमिति त्वया सम्भाव्यते') एवमिति। 'एवम्' अनेन प्रकारेण 'पुनरपि' प्राक्तनावस्थातः अवस्तु परित्यक्ता सती 'आयासकारिणी दुःखदायिनी ॥

Notes—1. तिरश्चीनम्—तिरस् means वक्र। तिर्यञ्च् is a प्रातिपदिक also meaning वक्र। This is an अव्यय and different from the तिर्य्यञ्च् derived from तिरस्। 'तिर्यक तिरोऽर्थे वक्रे च विहङ्गादौ त्वनव्ययम्'—*Visva* and *Medini*. तिर्यगेव इति तिर्यञ्च् + स्वार्थे ख = तिरश्चीनम् by the rule "विभाषाञ्चेरदिक्स्त्रियाम्"। 2. अलात &c. —अलात is a fire brand. अलातरूपं शल्यम्, कर्मधारय शाकपार्थिवादि—of the शाकपार्थिवादि class 3. च—The word means वा here *i.e.* implies पक्षान्तर। 'च पादपूरणे पक्षान्तरे हेतौ विनिश्चये' इति त्रिकाण्डशेषः। 4. दंश:—Snake-bite सर्पक्षत। "दंशो कर्मणी भुजगक्षते" इति हैमः।

(*li*) राम—एवम् अतिनिष्कम्पस्तम्भितान्तः करणस्यापि मम संस्तुततत्तत्प्रियवस्तु दर्शनात् उद्दामोऽयमावेग.। तथाहि—

लोलोल्ललक्षुभितकरुणोज्जृम्भणस्तम्भनार्थं
यो यो यत्नः कथमपि समाधीयते तं तमन्तः।
भित्त्वा-भित्त्वा प्रसरति कोऽपि चेतोविकार-
स्तोयस्येवाप्रतिहतरयः सैकतं सेतुमोघः ॥ ३५ ॥

सीता—एदिणा अज्जउत्तस्स दुव्वारदारुणारम्भेण दुक्खसंखोहेण पसफुरिदणिअदुक्खं विअ आकम्पिदं मे हिअअं [एतेन आर्यपुत्रस्य दुर्वारदारुणारम्भेण दुःखसंक्षोभेण प्रस्फुरितनिजदुःखमिव आकम्पितं मे हृदयम]।

Rama—To me, even with the heart thus steadied so as not to waver in the least, this agitation has become uncontrollable at the sight of all those familiar objects. Thus—

An indescribable agitation of the mind prevails forcibly nipping up in the interval (अन्त.) whatever effort I somehow make to check the outburst of grief (करुण) excited like a surging billow [Or—outburst of the heart (करण) so agitated as to become fickler than the ficklest], just as the current of water with its force unchecked does a sandy dam. (36).

Sita—My heart shudders as if with its own grief awakened by my husband's shocks of grief, the grim progress of which is uncontrollable.

मित। एवमिति—'अतिनिष्कम्पं' सुनिश्चलं यथा तथा ''स्तम्भित'' स्थिरीकृतम् अन्तःकरणं मानसं येन, तथाविधस्य 'अपि मम संस्तुतस्य' पूर्वपरिचितस्य तस्य तस्य प्रियवस्तुनः' करिमयूरादेः दर्शनात् उद्दामः' उच्छृङ्खलः दुर्दम इत्यर्थः 'अयम् आवेगः विकारः॥ उद्दामतामेव दर्शयति—लोलेति। अन्वय—लोलोल्लक्षुभितकरुणोज्जृम्भणस्तम्भनार्थं मया यो यो यत्नः कथमपि आधीयते तं तम् अप्रतिहतरयः तोयस्य ओघः सैकतं सेतुमिव अन्तः बलात् भित्त्वा कोऽपि चेतोविकारः प्रसरति। व्याख्या—'लोलः' धावन् यः उल्लोलः' महोर्मिः स एव क्षुभितः' संस्तुतवस्तुदर्शनात् प्राप्तसंक्षोभः यः 'करुणः' करुणोरसः लक्षणया शोकः तस्य यत् 'उज्जृम्भणं' परिव्यक्तिः तस्य 'स्तम्भनार्थं मया यो यो यत्नः कथमपि' अतिकृच्छ्रेण आधीयते' अवलम्ब्यते' 'तं तं यत्नम् अप्रतिहतः' अनिरुद्धः 'रय' वेगो यस्य तथाविधः 'तोयस्य ओघः जलप्रवाहः 'सैकतं वालुकामयं सेतुमिव' बन्धं यथा करोति तथा 'अन्तः' मध्ये आधानस्तम्भनयोरन्तराले 'बलात्' उद्दामताहेतुकरभसेन 'भित्त्वा' भित्त्वा विधूय विधूय 'कोऽपि' अननुभूतपूर्वः 'चेतोविकारः' चित्तविक्षोभः 'प्रसरति' प्रवर्त्तते। क्षुभित करण' इति पाठे 'लोलात्' चञ्चलादपि 'उल्लोल' चञ्चलं यथा तथा ''क्षुभितं'' यत् 'करणम्' अन्तःकरणं हृदय-

मित्यर्थः इत्यादि कथञ्चित् व्याख्येयम् ॥ एतेनेति—'हृदयं मे आकम्पित' कम्पते। किम्भूतं हृदयत् ?—'प्रस्फुरितम्' आविर्भूतं निजदुःखम् आत्मशोक. यस्मिन् तथाविधमिव हृदयम्। आर्य्यपुत्रस्यानिष्टशङ्कया एवं नाम कम्पते मे हृदयं येन मन्ये हृदयस्यैव गुरुदुःखं किमप्यापतितमद्य। कुतः शङ्का ?—दुःखसंक्षोभेण' शोकाभिघातेन। ननु निग्रहीष्यते शोकः—'दुर्वारः' दुर्निग्रह. 'दारुणः। विषमः 'आरम्भ प्रवृत्तिः यस्य तथाविधेन दुःखसंक्षोभेण। अनिवार्य्या अस्य संक्षोभस्य क्रिया तत् न जाने किमत्याहितं तस्य स्यादिति शङ्का ॥

Notes.—1. अतिनिष्कम्प &c.—निर्गतः कम्पः अस्मात् निष्कम्पम् बहु—। The निर् is privative but often instead of indicating complete privation, it implies scarcity only, in such cases अति is added to indicate entire absence, Comp. "अतिनिष्करुणस्य शुद्धशीला"—*Sakuntala.* अतिशयेन निष्कम्पम् अतिनिष्कम्पम्। 2. संस्तुत—सम्+स्तु+क्त कर्मणि संस्तुतस known. Cp. "असंस्तुतानामपि भावसार्द्रम्'—Kirat. तानि च तानि च तत्तानि those there and those yonder, द्वन्द्। प्रियाणि वस्तूनि प्रियवस्तूनि। तत्तानि प्रियवस्तूनितत्तत प्रियवस्तूनि। संस्तुतानि तत्तत्प्रियवस्तूनि। तेषां दर्शनम्। तस्मात् 3. उद्दामः—See उद्दामेन, sl. 6. Vidyasagra reads अद्याममावेग. which is almost as good. Our reading occurs in Viraraghava and three of Vidyasagar's manuscripts. The verse suggests उद्दामता and seems to support our reading. 4. लोल &c.—उल्लोल billow. "अथोर्मिषु। महत्सुमुल्लोलकल्लोलौ" इत्यमर.। क्षुभ+णिच्+क्त कर्मणि=क्षुभित or क्षुब्ध। For समास see Tika, with the reading करण say करण is अन्तःकरण, thence by लक्षणा it is हृदयावेग। 5. यः यः, तं तम्—वीप्सायां द्विरुक्तिः। All my efforts 6. अन्तः—अन्तर is an अव्यय meaning मध्ये। Vidyasagara construes अन्तः प्रसरति। 7. भित्त्वा &c.—The repetition implies frequency (नित्यता)। भित्त्वा itself shows उद्दामता। 8. बलात्—Another indication of

उद्दामता। वलमवलम्ब्य इति ल्यब्लोपे ५मी। 9. सैकतम्—सिकता is बालुका। It is usually in the feminine plural.—"आपः सुमनसो वर्षा अप्सरःसिकताः समाः। एते स्त्रियां बहुत्वे स्युरेकत्वेऽप्युत्तरत्रयम्॥" सिकतानामयम्=सिकता+अण्—सैकत.। तम्। 10. दुर्वार &c—दुर् वारि+खल् कर्म्मणि दुर्वारः irresistable. त्रिपद बहु—(see Tika). 11. प्रस्फुरित &c.—निज here refers to the pang of the heart itself 12 हृदयम्—The heart is personified. She does not say *my* grief but the *heart's* grief.

(IIL) वासन्ती (स्वगतम्)—कष्टमभ्यापन्नो देवः तदन्यतः क्षिपामि तावत्। (प्रकाशम्) चिरपरिचितानामिदानीं जनस्थानभागानामवलोकनेन आत्मानमानन्दयतु देवः।

रामः—एवमस्तु। (इत्युत्थाय परिक्रामति)।

सीता—सन्दीवणाइं एव्व दुक्खस्स पिअसही विणोदणोवाओ त्ति मण्णेदि [सन्दीपनान्येव दुःखस्य प्रियसखी विनोदनोपाय इति मन्यते]।

वासन्ती—देव देव,

अस्मिन्नेव लतागृहे त्वमभवस्तन्मार्गदत्तेक्षणः
सा हंसैः कृतकौतुका चिरमभूद्गोदावरीसैकते।
आयान्त्या परिदुर्मनायितमिव त्वां वीक्ष्य बद्धस्तया
कातर्य्यादरविन्दकुड्मलनिभो मुग्धः प्रणामाञ्जलिः॥ ३७॥

Vasanti (*To herself*)—Sire is in a sad plight, so I will draw him elsewhere. (*Aloud*) Let Sire now divert himself with a sight of these long familiar sites of Janasthana.

Rama—So be it (*Rises and goes round the stage*).

Sita—My dear friend deems as sources of diverion the very thing that are inciters of grief.

Vasanti—Sire, Sire.

In this very bower of creepers you stood with your eyes fixed on her track, while she tarried long on the sand-banks of the Godavari making fun with the swans. While approaching, seeing you as if annoyed, she, in distress, made in supplication a charming fold of the palms that is like a lotus-bud. (37.

मित। 'देव;' राजा रामः 'कष्ट'' सङ्कटं शोच्यामवस्थामित्यर्थः 'अभ्यापन्नः' प्राप्तः। 'तत् अन्यतः' अन्यस्मिन् हृद्यतरे विषये 'क्षिपामि' प्रेरयामि॥ 'सन्दीपनानि'—दुःखस्य उज्जृम्भणानि वस्तूनि॥ अस्मिन्निति। अन्वय.—अस्मिन्नेव लतागृहे त्वं तन्मार्गदत्तेक्षणः अभवः, सा हंसैः कृतकौतुका सती गोदावरीसैकते चिरम् अभूत। आयान्त्या तया त्वां परिदुर्मनायितमिव वीक्ष्य कातर्य्यात् अरविन्दकुड्मलनिभः मुग्धः प्रणामाञ्जलि बद्धः। व्याख्या—'अस्मिन्नेव' पुरोवर्त्तिनि 'लतागृहे' कुञ्जे 'त्वं' 'तस्याः सीतायाः 'मार्गे' वर्त्मनि 'दत्ते स्थापिते 'ईक्षणे' लोचने येन तथाविधः सन् 'अभवः' अस्थाः, 'सा' सीता पुनः 'हंसैः कृतं कौतुकं क्रीडामोदः यया तादृशी सती गोदावर्य्याः सैकते पुलिने 'चिरम् अभूत व्यलम्बयत्। इतस्त्वं सोत्कण्ठः ततः सा क्रीडापरा इति कोपहेतुः। 'आयान्त्या' गोदावर्य्याः लतागृहं प्रत्यावर्त्तमानया 'तया त्वां परिदुर्मनायितमिव' अप्रसन्नचेतसमिव 'वीक्ष्य दृष्ट्वा ममैवात्रापराधः इति कातर्य्यात्' दुःखात्' पुनःप्रसन्नताविधानार्थं तव, 'अरविन्दकुड्मलनिभः कमलकोरकोपमः अतएव 'मुग्धः' मनोहरः प्रणामाञ्जलिः' प्रणिपातसूचकः करपुटः 'बद्धः' रचितः॥

Notes :—1. चिरपरिचितानाम् &c.—This reading occurs in three of Vidyasagar manuscripts. The fourth has "चिरपरिचितान् एतान् जनस्थानभागान् अवलोकयतु देव."। But Sita's remark "प्रियसखी विनोदनोपायः इति मन्यते" requires a direct mention of विनोदन or आनन्दन in Vasanti's speech. Hence

we reject the reading of the fourth manuscript though supported by the weighty authority of Vidyasagar. 2. देव देव—सम्भ्रमे द्विरुक्तिः। सम्भ्रम is त्वरा। Perhaps they were passing by without noticing the bower when suddenly वासन्ती drew Rama's attention to it. Here three of Vidyasagara's manuscripts have "(सकरुणम्) देव देव"। But a piteous appeal (सकरुणम्) like that is bound to affect Rama the more, hence this is inconsistent with Vasanti's determination to divert Rama's attention (अन्यतः क्षिपामि) and to give him some sort of joy (आनन्दयतु)। Hence सकरुणम् is rejected. 3. सा हंसैः &c.—She was playing with the swans Usually this is taken to mean—her curiosity was roused at the sight of the swans But why ? The sight was before her the whole day, every day. So there can be no room for curiosity. Whereas play with the swan is always possible like one's play with one's own pet dog. 4. आयान्त्या—आ+या+शतृ स्त्रियाम् आयन्ती or आयाती। तया। Note the शतृ। आयन्त्या not आयातया। She had not yet entered the bower, but from a distance, on her way to it, she noticed that Rama sat morose. 5. परिदुर्मनायितम्—परिदुर्म्मनाय is a नामधातु (see under दुर्म्मनायमानाम्, Act I, pare xxii), परिदुर्म्मनाय+क्त कर्त्तरि परिदुर्म्मनायितः looking very moody. 6. अरविन्द &c.—अरविन्दकुड्मलः, ६तत्— । अरविन्दकुड्मलेन तुल्य इत्यर्थे नित्यसमास of अरविन्दकुड्मल and निभ। निभ means तुल्य only when it is an उत्तरपद in a समास। Consequently no वाक्य with निभ can be given and we have an अस्वपदविग्रह—a नित्यसमास। 7. कातर्य्यात्—कातरा is दुःखित sorry. तस्या भाव इति कातरा+ष्यञ् कातर्यम्। कातरा need no

become कातर here by पुंवद्भाव the आ will disappear by "यस्येति च"। The पुंवद्भाव is however available by "भस्याढे तद्धिते"। 8. *Remark*—The incident occurred in privacy, But Vasanti being a deity nothing could be hidden from her.

(*liii*) सीता—दारुणासि सहि वासन्दी दारुणासि जा एदेहिं हिअअमम्मगुढसल्लघट्टणेहिं पुणो पुणो मं मन्दभाइणिं अज्जउत्तं अ सन्दावेसी [दारुणासि सखि वासन्ती दारुणासि या एतैः हृदयमर्मगूढशल्यघट्टनैः पुनः पुनर्मां मन्दभागिनीम् आर्यपुत्रञ्चसन्तापयसि]।

रामः—चण्डि जानकि, इतस्ततो दृश्यसे इव न चानुकम्पसे।

हा हा देवि स्फुटति हृदयं ध्वंसते देहबन्धः
शून्यं मन्ये जगदविरतज्वालमन्तर्ज्वलामि।
सीदन्नन्धे तमसि विधुरो मज्जतीवान्तरात्मा
विष्वङ्मोहः स्थगयति कथं मन्दभाग्यः करोमि ॥३८॥
(इति मूर्च्छति)।

Sita—Cruel you are, friend Vasanti, cruel you are who, as it with shakes of the shaft, buried in the vitals of the heart, again and again torture my ill-fated self and my husband as well.

Rama—Janaki, O Fury, you are as if seen here and there but you do not pity me.

Alas! Alas! my queen, my heart bursts, my bondage to the body ceases, the world I deem a void; within I burn in a ceaseless fire, my innermost self, helpless and despairing, sinks in a blinding gloom, stupor veils me all round; ill-fated as I am, what can I do? (38).

(*Faints away*).

मित। दारुणेति—'या' त्वं हृदयस्य मर्मणि जीवस्थले "गूढं" तावता निखातं यत् शल्यं शङ्कुः तस्य 'घट्टनैः' सञ्चालनैः तत्सदृशैरित्यर्थः 'एतैः' लता-गृहप्रदर्शनादिभिः कार्यैः सन्तापयसि। हृदयमर्मशल्यघट्टनमिव दुःखाकर-मेतत् लतागृहप्रदर्शनम् इति भावः। चण्डीति। 'हरयसे इव' त्वद्गतया भावनया निर्माय इव पुरो निधीयसे। भागीरथीवरप्रभावात् वस्तुतस्तद्दर्शनं तत्कथाश्रवणञ्च न सम्भाव्यते॥ हाहेति। अन्वयः—हा हा देवि हृदयं स्फुटति, देहबन्धः ध्वंसते:, जगत् शून्यं, मन्ये, अन्तः अविरतज्वालम् ज्वलामि, सीदन् विधुरः अन्तरात्मा अन्धे तमसि मज्जतीव, मोहः विष्वक् स्थगयति। मन्दभाग्यः (अहम्) कथं करोमि। व्याख्या—हा हा' अहो खेदः 'देवि' सीते मे 'हृदयं' स्फुटति' विदीर्य्यते; 'देहबन्धः' आत्मनः शरीरेण योगः 'ध्वंसते' नश्यति, मन्ये देहत्याग एव मे भवति इत्यर्थः, 'जगत्' संसारम् शून्यम् असारं मन्ये: अन्तः' मध्ये, अविरतज्वालं सन्ततवेदनं यथा तथा 'ज्वलामि दह्ये', 'सीदन्' अवसन्नो भवन् 'विधुरः' विकलः 'अन्तरात्मा' देहमध्यस्थश्चिन्मय. पुरुषः 'अन्धे दृष्टिरोधकरे 'तमसि' ध्वान्ते 'मज्जति इव अवतरतीव 'मोह' विचेतनता 'विष्वक्' समन्तात् 'स्थगयति' निरुणद्धि। 'मन्दभाग्यः' भाग्यहीनः अहं 'कथं करोमि' केन प्रकारेण प्रतिविधास्ये।

Notes :—1. हृदय &c.—There was actually no shaft embedded in the heart of राम or सीता to which वासन्ती was now and then giving a shake, सीता means that by drawing attention to the मयर the marble slab, the bower &c., वासन्ती was distressing her and राम and the pain they were feeling was like that felt when a shaft of that kind is shaken. Hence explain शल्यघट्टनैः—शल्यघट्टन तुल्यैः। 2. हरयसे—This is only Rama's imagination, actual sight was impossible because for Bhagirathi's boon. Sita is said as चपिड highly sensitive, hence she does not pity Rama (नानुकम्पसे)। 3. देहबन्धः—देहेनबन्धः the tie with the body. सपदपा। 4. अन्धे—

अन्धं करोति इति अन्ध+णिच् (नामधातु)+अच् कर्त्तरि अन्धम् that which blinds. तस्मिन् । 5. अन्तरात्मा—अन्तःस्थ: आत्मा the self within, कर्म्मधा— । 6. विष्वक्—विषुis an अव्यय implying सर्वतोभाव । विषुमञ्चतीति+विषु+अञ्च+क्विन् कर्त्तरि विष्वक् that which goes all round तत् यथा तथा । Qual. स्थगयति । Or qualifie-मोह: । विष्वक् मोह: (a pervading stupor)—may be compounded or uncompounded. 7. स्थगयति—स्थगalso means "to fill up" Comp. "रवश्रवणभैरवः स्थगितरोदसीकन्दर:"—*Venisamhara* 8, कथं करोमि—Vidyasagara explains कमुपायमवलम्बे ।

(*liv*) सीता—हद्धी हद्धी पुणोविप्पमूढ़ो अज्जउत्तो (हा धिक् हा धिक पुनरपि प्रमूढ़ आर्य्यपुत्र:) ।

वासन्ती—देव, समाश्वसिहि समाश्वसिहि ।

सीता—हा अज्जउत्त मं मन्दभाइणीं उद्दिसिअ सअल-जीअलोअमङ्गलाधारसस दे वारं वारं संसयिदजीविददारुणो दसापरिणामो । हा ह्रदम्हि [आर्य्यपुत्र मां मन्दभागिनामुद्दिश्य सकलजीवलोकमङ्गलाधारस्य ते वारं-वारं संशयितजीवितदारुणो दशापरिणामः । हा हतोस्मि] । (इति मूर्च्छति) ।

तमसा—वत्से समाश्वसिहि समाश्वसिहि । पुनस्त्वत्पाणि-स्पर्श एव जीवनोपाय रामभद्रस्य ।

वासन्ती—कथमद्यापि नोच्छ्वसिति ! हा प्रियसखि सीते, क्वासि ? सम्भावय आत्मनो जीवितेश्वरम् ।

Sita—Alas ! Alas ! my husband has fainted again.

Vasanti—Take courage, Sire take courage.

Sita—Alas ! My husband ! With reference to me

the ill-starred, is over and over coming unto you, the abode of blessings for the whole living world, this terrible change of condition in which life is endangered. Alas! I am lost. (*Faints away*).

Tamasa—Take courage, child, take courage. Again the touch of your hand alone is the means for the reviving of Ramabhadra.

Vasanti—How so! Even now he does not recover! Alas! Dear friend Sita, where are you? Do resuscitate the lord of your life.

मित—'सकलस्य' कृत्स्नस्य 'जीवलोकस्य' प्राणिजगतः यत् 'मङ्गल' कल्याणं तस्य 'आधार.' निलयः, यदधीनं विश्वस्य शुभं तस्य 'ते'। 'वारं वारं' पुनः पुनः। 'संशयितं' सङ्कटापन्नं 'जीवितं' प्राणाः यस्मिन् अतएव 'दारुणः' घोरः 'दशायाः अवस्थायाः 'परिणामः' परिवर्त्तः॥ 'जीवनस्य' पुनर्जीवनस्य 'उपायः' पन्थाः॥ 'उच्छ्वसिति' प्रत्युज्जीवति। 'सम्भावय' सम्यक् भावय=प्रकृतिस्थं कुरु। यद्वा—'सम्भावय' मानय आत्मोपस्थित्या तर्पय।

Notes.—1. हा धिक् &c--She blames her own luck. 2. प्रमूढः—प्र+मुह+क्त कर्त्तरि has fainted. 3. वारं वारम्—वार is क्षण opportunity, interval. अत्यन्तसंयोगे द्वितीया the क्रिया being भवति understood. वारंवारं दशापरिणामो भवति means अनेकवारं दशापरिणामो भवति। Duplication by "स्वार्थे अवधार्य्यमाणे—' See under स्थाने स्थाने, Act II, sl. 14 4. सम्भावय—सम्+भू+णिच्+लोट हि। In the sense 'to succour'—comp "सम्भावय देव्याः पुत्रकम्"—Para xxv. Or here as well as there we may apply लक्षणा and have वीप्सायां द्विर्वचनम्। Thus वार is अवसर occasion i.e., the right occasion. वारं वारम् at every right occasion. Similarly स्थाने place i.e. the right place, स्थाने at every suitable place,

(lv) सीता—(ससम्भ्रममुपसृत्य हृदि ललाटे च स्पृशति)।

वासन्ती—दिष्ट्या प्रत्यापन्नचेतनो रामभद्रः ।

रामः—आलिम्पन्नमृतमयैरिव प्रलेपैः

रन्तर्वा बहिरपि वा शरीरधातून् ।

संस्पर्शः पुनरपि जीवयन्नकस्मा-

दानन्दादपरविधं तनोति मोहम् ॥३८॥

(आनन्दनिमीलिताक्ष एव) सखि वासन्ति, दिष्ट्या वर्धसे ।

Sita—(*Hastily advadcing touches him on the heart and forehead.*

Vasanti—Luckily Ramabhadra has his consciousness restored to him.

Rama—Unexpectedly, yet again the touch, as if smearing, with ambrosial ointments, the constituents of my body within and without, revives me and through joy, promotes stupor of a different kind.

(*Continuing with eyes closed in joy*) friend Vasanti, luckily you are blessed.

मित— । 'प्रत्यापन्ना' पुनरागता 'चेतना' यस्य स. ॥ अलिम्पन्निति । अन्वयः—अकस्मात् पुनरपि संस्पर्शः अन्तर्वा बहिरपि वा शरीरधातून् अमृतमयैः प्रलेपैः आलिम्पन्निव जीवयन् आनन्दात् अपरविधं मोहं तनोति । व्याख्या—'अकस्मात्' सहसा 'पुनरपि संस्पर्शः' पूर्वानुभूतः सीतापाणिस्पर्शः 'अन्तर्वा' मध्ये च बहिरपि वा' बहिश्च देहस्य 'शरीरधातून्' शरीरोपादानानि त्वङ्मांसप्रभृतीनि 'अमृतमयैः' सुधाप्रकृतिकैः 'प्रलेपैः' विलेपनैः आलिम्पन्निव सम्यक् लिम्पन्निव 'जीवयन्' लेपनेनैव माम् उच्छ्वासयन् लेपनजनितात् 'आनन्दात्' अपरविधं पूर्वानुभूतात् मोहात् विलक्षणं 'मोहं' विमुग्धतां 'तनोति' विस्तारयति ॥

Notes :—1. प्रत्यापन्न &c—पद means 'to go', आ+पद means 'to come'. Compare याति means 'goes', आयाति means 'comes'

Hence प्रत्यापन्ना *has come back*. See Tika now. 2 अमृतमयैः—अमृतस्य विकारा इति अमृत+मयट् अमृतमयाः made of nectar, तैः। Qual प्रलेपैः। 3. अन्तर्वा &c —वा implies सहचय as in "सा वा शम्भोस्तदीया वा मूर्त्ति जलमयी मम"। Also comp. "अतोऽर्हसि क्षन्तुमसाधु साधु वा"—Kirat 1. Here Malli says "वा शब्दोऽप्यर्थे। 4. अपरविधम्—अपरा विधा अस्य &c. Comp.—"तव स्पर्शे स्पर्शे मम च परिमूढे न्द्रियगणो विकारश्चैतन्यं भ्रमयति समुन्मीलयतिच"—Act I sl. 36, also "सन्तापजां सपदि यः प्रतिहृत्य मूर्च्छामानन्देनजडतां पुनरातनोति"— Act III, sl. 12. 5. आनन्दनिमीलिताक्षः—निमीलिते अक्षिणीऽस्य निमीलिताक्षि+षच् समासान्त – निमीलिताक्षः by "बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् षच्"। आनन्देन निमीलिताक्षः।

(*lvi*) वासन्ति—देव कथमिव ?

रामः—सखि, किमन्यत्, पुनः प्राप्ता जानकी।

वासन्ती—अयि देव क्व सा ?

रामः—(स्वर्गसुखमभिनीय)—पश्य नन्वियं पुरत एव।

वासन्ती—अयि किमिति मर्मच्छेददारुणैरेभिः प्रलापैः प्रियसखीदुःखदग्धामपि पुनर्मन्दभागिनीं दहसि माम् ?

सीता—ओसरिदुं इच्छामि एसो उण चिरसव्भावसोम्मसीअलेण अज्जउत्तप्फंसेण दीहदारुणं वि सन्दावं झत्ति हरन्तेण वज्जलेवोवणद्धो विअ सिज्जन्तणोसहविवत्थो वेवदि अवसो विअ मे हत्थो [अपसर्तुमिच्छामि एष पुनश्चिरसद्भावसौम्यशीतलेन आर्यपुत्रस्पर्शेन दीर्घदारुणमपि सन्तापं झटिति हरता वज्रलेपोपनद्ध इव स्विद्यन्निःसहविपर्यस्तो वेपते अवश इव मे हस्तः]।

Vasanti—How so, Sire ?

Rama—What else, friend ? Janaki has come back.

Vasanti—Well, where is she, O Sire ?

Rama—(*Acting the joy of touch*)—Why, look, here she is just in front of you

Vasanti—Why O, with these ravings, frightful because piercing the vitals, do you again burn me, the illfated, though burnt already with sorrow for my dear friend ?

Sita—I wish to withdraw, but this my hand—as if cemented with Vajralepa by the touch of my husband which is cool and pleasing through lasting good-will and is quickly removing my long and terrible anguish—is sweating, languid, supine and trembling like one paralysed.

मित । 'कथमिव' कथं वद्धे इत्यर्थः ॥ किमन्यत् ।' उच्यताम् इति वाक्यशेषः ॥ 'पुरतः एव' तव पुरोवर्त्तिनी एव सा ॥ 'मर्मणः' जीवस्थानस्य ये छेदाः' कर्त्तनानि ते इव 'दारुणाः' घोराः । तैः प्रलापैः' असम्बद्धभाषितैः करणैः 'प्रियसख्या' सीतायाः एते इति यत् ' दुःखं' तेन 'दग्धां तापिताम् । 'दहसि' इति रामस्यार्थे एव शोकः तेन च दाहः । प्रलापैर्ज्ञायते आगत उन्माद इति । ततो मूर्च्छा तदनु मरणं स्यात् इति हि दशाक्रमो विरहिणाम् । तत् रामस्य विपदमाशङ्कमाना दह्यते वासन्ती ॥ अपसर्त्तुं दूरे यातुम् इच्छामि' ·किन्तु, हस्तो मे भवश इव वेपते' तेन अपसर्त्तुं न शक्नोमि । कथमवशः ?--'खिद्यन्' सस्वेदः 'निःसहः' 'विपर्य्यस्त' उत्तानश्च हस्तः । भवतु प्रधाव्य अपसर पादौ तु न भवशौ –'वज्रलेप' इति प्रसिद्धेन दृढेन प्रलेपेन 'उपनद्धः' आर्य्यपुत्रस्य शरीरेण सह वद्ध 'इव' जातो मे हस्तः तत् कथमपक्षिप्यताम् ? तदपि कथम् ?—आर्य्यपुत्रस्पर्शेन करणेन । किम्भूतेन च स्पर्शेन एवमुपनद्धो हस्तः ?—दीर्घं दारुणमपि मे सन्तापं झटिति हरता स्पर्शेन । कथञ्च तत् ?—'चिरसद्भावेन' स्थायिन्या प्रीत्या यः स्पर्शः सौम्यशीतल ईषच्छीतलः न वा उष्णः न चातिशीतलः, तेन । मयि अद्यापि

स्नेहवान् आर्य्यपुत्र इति तस्य स्पर्शो मां सुखयति, तेन नापसरामि इति सरलार्थः।

Notes :—1 **पुरत**—This is ambiguous. It may mean before *you* or before *me*. But **पश्य** suggests facility=facility for **वासन्ती** to see. Now if **सीता** is in front of **राम**, it doesnot necessarily follow that she is visible to **वासन्ती**। Hence we prefer 'before *you*'. Some derive **पुरत** as **पूर्व+अतसुच**। But in that case **पुर्** can not be ordered in place of **पूर्व**। So Bhattoji takes **पुरतः** as **अव्युत्पन्न**। 2. **मर्म्म** &c—**मर्मच्छेद इव दारुणा**., **उपमान कर्मधा**—। Here **वासन्ती** takes Rama's talk as the ravings of a mad man, because through Bhagirathi's boon he can not see **सीता**। The thought rends her vitals (**मर्मच्छेद**) as it were because the last three stages of **विरह** are **उन्माद मूर्च्छा** and **मरण**। She has noticed thefirst two in Rama already and now apprehends the last Comp. Vidusaka's '**गृहीतोनेन पन्था उन्मत्तानाम**' in Sakuntala. Act VI, 3. **प्रियसखी** &c—**प्रियसख्याःदुःखम्** the grief caused by Sita, **तेन दग्धा**। Sita has already given me a shock and you are now going to cause another 4. **चिरसद्भाव** &c—**सन् भावः सद्भावः** good will, i.e love, **चिर** is **चिरस्थायी**। **चिरः सद्भावः** lasting, unshaken love **सौम्य** is **सुभग** pleasing **सोम्यश्वासौ शीतलश्चतेन**। See Tika 5 **दीर्घ** &c.—**दीर्घश्चासौ दारुणश्च, तम्**। 6 **वज्र** &c—**वज्रलेप** is a kind of cement of a very firm grip. **तेन उपनद्धः**। My hand has stuckfast on my husband's person. I can not remove it; hence it is impossible for me to recede. 7. **स्विद्यन्** &c.—The whole may be taken as a compound. **स्विद्यन्** perspiring, **निःसह** powerless, **विपर्यस्त** upturned **स्विद्यं श्च**

निःसहश्च खिन्नश्चिःसहः। तथा चासौ विपर्यस्तश्च। Or निस:हं यथा तथा विपर्यस्तः निःसहविपर्यस्तः। खिन्नश्चासौ निःसहविपर्यस्तश्च। Also compare "निरुत्साहनिःसह—विपर्यस्तः ante

(*lvii*) रामः—कुतः प्रलापः ?

गृहीतो यः पूर्वं परिणयविधौ कङ्कणधर-

श्चिरंस्वैच्छास्पर्शैरमृतशिशिरैर्यः परिचितः।—

सीता—अज्जउत्त सो एव्व दाणिं सि तुम् [आर्य्यपुत्र, स एव इदानीमसि त्वम्]।

रामः—

स एवायं तस्यास्तुहिननिकरौपम्यसुभगो

मयालब्धःपाणिर्ललितलवलीकन्दलनिभः ॥ ४० ॥

(इति गृह्णाति)

Rama—Friend, how ravings ?

The one carrying the nuptial thread that was accepted by me at the wedding-ceremony, the one long known by its cool nectar-like touch obtained at will ,—

Sita—That is just what you are my husband

Rama—Here has been found by me the very same hand of hers agreeable through resemblance with a hump of ice and like the soft shoot of the *Lavali* (40). (*Seizes it*).

मित—। गृहीत इति। अन्वयः—पूर्वं परिणयविधौ ,कङ्कणधरः यः गृहीतः, अमृतशिशिरैः स्वेच्छास्पर्शैः यः चिरं परिचितः— व्याख्या— 'पूर्वं' प्राक् जनकभवने 'परिणयविधौ विवाहानुष्ठाने 'कङ्कणधरः' धृतोद्वाह-सूत्रः 'यः' पाणि 'गृहीतः' आसीत् तत परम् 'अमृतम्' इव शिशिरैः शीतलैः सन्तापहरैरिति यावत् स्वेच्छास्पर्शैः इच्छामात्रलब्धस्पर्शैः सुलभस्पर्शैरित्यर्थः 'यः चिरं' बहुकालं परिचितः' अनुभूतः—आर्य्यपुत्रेति—पूर्ववर्त्तिनः श्लोकार्द्धेन अन्वितमिदम्। अन्वयः— पूर्वं परिणयविधौ कङ्कणधरः यः

गृहीतः अमृतशिशिरः स्वेच्छास्पर्शैः यः चिरं परिचितः स एव इदानीं त्वमसि। व्याख्या—'पूर्वं परिणयविधौ कङ्कणधरः' विवाहसूत्रमण्डितकरः' यः गृहीतः भर्त्तृत्वेन मया लब्धः ततः 'अमृतशिशिरैः स्वेच्छास्पर्शैः यः चिरं परिचित स एव इदानीम्' इति वाक्यालङ्कारे—त्वमसि। यत्तु सीताया. पाणिं प्रति वक्तुमिष्यते रामेण तदेव इह सीतया वाग्भङ्ग्या रामं प्रति समर्प्यते 'आर्य्यपुत्र' इत्यादिभिः॥ स एवेति। अन्वयः—तुहिननिकरौपम्य-सुभगः ललितलवलीकन्दलनिभः स एव अयं तस्याः पाणिः मया लब्धः। व्याख्या—तुहिननिकरेण' तुषारराशिना सह यत् औपम्यं' सादृश्यं स्पर्श-विषये इति शेषः तेन 'सुभग' हृद्य किञ्च ललितं कोमलं मनोहरं वा यत् 'लवलीकन्दल' लवलीलतायाः अङ्कुरः तत्तुल्यः 'स एव अयं तस्याः पाणि.' हस्त 'मया लब्धः प्राप्तः। तत् कुत प्रलापः।

Notes :—1. **कङ्कणधर**—**कङ्कण** is **मङ्गलसूत्र** tied on the hand of both bride and bridegroom at marriage. In the case of the bride, comp "**अयमुद्गृहीतकमनीयकङ्कणस्तव मूर्त्तिमानिव महोत्सवः करः**"—Act I, sl. 8. For the bridegroom "**देव्यः कङ्कणमोक्षणाय मिलिता राजन् वरः प्रेष्यताम्**"—*Viractarita*. This refers to **पाणि** in Rama's speech and to **राम** himself in what **सीता** says below 2 **अमृतशिशिरैः**—Here **शिशिर** is not **शीतल** for **अमृत** is not known as a particularly cool substance. Hence we render it as **सन्तापहर**। Qual. **स्वेच्छास्पर्शैः**, which has **करणे** **३या**। 3. &c **स एव**—To Sita **राम** was precisely of that character. For **इदानीम्** implying **वाक्यालङ्कार** comp. "**क इदानीमुष्णोदकेन नवमालिकां सिञ्चति**"—*Sakuntala* Or say **इदानीम् अस्मिन् क्षणे**। 4. **तुहिन**—&c. **उपमाया भाव इतिउपमा+ष्यञ् (स्वार्थेवा) औपम्यम्** similarity. The similarity is in temperature. The low temperature revives my heated frame. The word **औपम्य** seems superfluous **तुहिननिकरसुभगः** serves equally well. **निकर** occurs in three of Vidyasagara's manuscripts. The fourth

has **करका** instead. But **तुहिनकरका** sounds tautologous. **करका** (hail) *is* cf **तुहिन**। "**वर्षोपले स्त्री करका**" इति त्रिकाण्डशेषः। If **तुहिन** means **शीतल** the same difficulty arises, for **करका** as a matter of course is **शीतल**। Hence prefer **निकर**। 5. **लुलित**&c —**नित्यसमास** with **निभ** as in **अरविन्दकुड्मलनिभः**, sl. 37. The resemblance here is in the consistency. It was soft like the **लवलीकन्दल**। **तुहिन** etc —**तुहिन** and **लुलित** etc both refer to the sense of touch. The first makes it *cool*, the second *soft*.

(*liii*) सीता—हद्धी हद्धी अज्जउत्तप्फंसमोहिदाए पमादो क्खु मे संवुत्तो [हा धिक् धिक्! आर्यपुत्रस्पर्शमोहितायाः प्रमादः खलु मे संवृत्तः]।

रामः—सखि वासन्ति, आनन्दनिमीलितेन्द्रियः साध्वसेन परवानस्मि। सत्त्वं तावदेनां धारय।

वासन्ती—कष्टमुन्माद एव।

सीता—(ससम्भ्रमं हस्तमाक्षिप्य अपसर्पति)।

रामः—हा धिक् प्रमादः।

करपल्लवः स तस्याः सहसैव जडाज्जडः परिभ्रष्टः।
परिकम्पिनः प्रकम्पीकरान्मम स्विद्यतः॥ ४१॥

Sita—Alas! Alas! Carelessness has indeed occurred on my part, infatuated as I was with the touch of my husband.

Rama—Friend Vasanti, with the senses deadened through joy I am overcome by agitation, so do you take hold of her.

Vasanti—O misery! Madness indeed.

Sita—(*Hastily releases her hand and retires*).

Rama—O fie, a mishap!

The twig-like hand of hers has suddenly slipped out of my hand—the benumbed out of the benumbed, the sweating out of the sweating. (41).

मित—। आर्य्यपुत्रस्य स्पर्शेन मोहिता कर्त्तव्यविमूढा । 'प्रमादः' अनवधानता । कर्त्तव्यविमूढा सती अनवधाना जाता चिरमार्य्यपुत्रसमीपे स्थिता, गृहीताहम् । सावधाना चेत् अभविष्य' नाग्रहीष्यत् माम् । 'हा धिक माम्' 'हा धिक्' माम् इत्यात्मनिन्दा ॥ सीताया पुनःप्रतिजनितेन 'आनन्देन निमीलितानि' मुदितानि स्फुरणहीनानि इत्यर्थ इन्द्रियाणि यस्य तादृशोऽहं साध्वसेन सम्भ्रमेण भूयो वा नश्येत् इत्यावेगेन इत्यर्थः 'परवान्' परतन्त्रः अभिभूत इत्यर्थ; ॥ 'उन्मादः' उन्मत्तता ॥ ससम्भ्रमं सत्वर' 'हस्तम् आक्षिप्य रामस्य हस्तादाकृष्य 'अपसर्पति दूरे याति ॥ 'प्रमादः' अनवधानता, तज्जनिता विपत्तिरिति यावत् । तामेव विपत्तिं विवृणोति—करेति । अन्वय: —स्विद्यन् प्रकम्पी जड़ः स तस्याः करपल्लवः स्विद्यत परिकम्पिनः जड़ात् मम करात् सहसा एव परिभ्रष्टः । व्याख्या—'स्विद्यन्' सखेदः 'प्रकम्पी सवेपथुः 'जड़ः' विवशः सः मया गृहीतः 'तस्याः' सीताया 'करपल्लवः' किसलयसदृशः करः स्विद्यतः खेद' प्रकटयतः परिकम्पिनः' वेपथुमतः जड़ात्' अवशात् 'मम करात् सहसा अतर्कितम् 'एव परिभ्रष्ट ' च्युतः । इति महान् प्रमादः ॥

Notes.—1. प्रमादः &c.—I should have avoided being caught. But I was not sufficiently careful (प्रमाद) because I was मोहिता by the touch of my husband 2 आनन्द &c.—निमीलित is मुदित closed. My senses are not awake hence a fear (साध्वस) has seized me (परवान्) that she might escape. 3. साध्वसेन &c —पर master. परवान् one having a master. I have become परवान् by साध्वस, *i.e.*, साध्वस is my master. साध्वसेन has अभेदे करणे ३या, पर and साध्वस being identified (अभेद) । 4. प्रमादः—This is in a secondary sense,

i.e., mishap. 5. करपल्लव— कर पल्लव इव । उपमित कर्मधा—6. सः—प्रकान्तत्वात् न यच्छब्दद्व्यपेक्षा । The hand that was मया लब्धः sl. 40. 7. जडात् &c—Both of us were showing सात्त्विकभाव । जड is स्तब्ध and स्तम्भ is a सात्त्विकभावः । 8. परिकम्पिनः —परि + कम्प + णिनि साधुकारिणि कर्तरि परिकम्पी । तस्मात् । No ण because 'इजादेश्च सनुमः" is restrictive prohibting णत्व with roots that have नुम् but do not begin with इच् । कम्प—It is another सात्त्विकभाव । 9 स्विद्यतः—स्वेद too is a सात्त्विक भाव । It is not necessary that the same भाव should appear in both male and the female or that certain भाव are restricted to male and certain to females. Compare— "आसीद्वरः कण्टकितप्रकोष्ठः स्विन्नाङ्गुलिः संववृते कुमारी" "रोमोद्गमः प्रादुरभूदुमायाः स्विन्नाङ्गुलिः पुङ्गवकेतुरासीत्" etc

(*LIX*) सीता—हद्धी हद्धी अज्ज वि अणवट्ठिदत्तिमिदमुढ़-घुग्गन्तणअणो ण पज्जवत्थावेदि अत्ताणअं [हा धिक् हा धिक् अद्यापि अनवस्थितस्तिमितमुढ़घूर्णन्नयनो न पर्यवस्थापयत्यात्मानम्) ।

तमसा—(सस्नेहहासकौतुकं निर्वर्ण्य)

सस्वेदरोमाञ्चितकम्पिताङ्गी जाता प्रियस्पर्शसुखेन वत्सा ।
मरुन्नवाम्भःप्रविधूतसिक्ता कदम्बयष्टिः स्फुटकोरकेव ॥ ४२ ॥

Sita—Alas ! Alas ! With eyes now restless again still, now dull again rolling, he is even now unable to collect (rally) himself.

Tamasa—(*Marking with a loving laugh and curiosity*)

With her person sweaty, trembling and having the hairs on end, through joy from the touch of her beloved, my dar-

ling has become like a Kadamba twig with the buds blown and shaken and wet by the wind and the first shower of the season. (42).

मित—। 'अद्यापि अस्मिन्नपि मुहूर्ते। 'अनवस्थिते' अस्थिरे च ते स्तिमिते निश्चले च 'अनवस्थितस्तिमिते। 'मूढ़े जड़े स्वरूपग्रहणविकले च ते 'घूर्णती' रूपग्रहणाय मण्डलशो भ्रमन्ती च 'मूढ़घर्णती। अनवस्थितस्तिमिते मूढघर्णती नयने यस्य। एवं नयनयोर्विरुद्धधर्म्मदर्शनात् मन्ये 'अद्यापि अयम् 'आत्मानं न पर्य्यवस्थापयति' न प्रकृतौ पुन. स्थापयति॥ स्नेहपूर्णः ह्रासः स्नेहह्रासः। 'कौतुकं:' कौतुहलम्। ताभ्यां सह। सस्वेदेति। अन्वयः—प्रियस्पर्शसुखेन वत्सा मरुन्नवाम्भः प्रतिधूतसिक्ता स्फुटकोरका कदम्बयष्टिरिव सस्वेदरोमाञ्चितकम्पिताङ्गो जाता। व्याख्या —'प्रियस्य' भर्त्तुः रामस्य स्पर्शात् यत् 'सुखं तेन 'वत्सा' सीता 'मरुता' वायुना 'नवाम्भसा प्रथमेन वर्षेण च यथाक्रमं 'प्रतिधूता' प्रकम्पिता' 'सिक्ता' अभिवृष्टा च 'स्फुठकोरका' प्रफुल्लकुट्मला 'कदम्वयष्टिरिव कदम्बशाखा इव 'सस्वेदं' घर्म्मार्द्रं रोमाञ्चितं पुलकितं कम्पितं' वेपथुमत् च 'अङ्गं' यस्याः तथाविधा जाता। अतः परं किमेषा करोति इति कौतुकम्॥ स्वगतमेतत्तमसायाः, अन्यथा 'जाता वत्सा' इति न सङ्गच्छते।

Notes—1. अनवस्थित &c.—For समास see Tika. We may also expound thus—मूढं यथा घूर्णत् मूढ़घूर्णत् rolling meaninglessly. अनवस्थितस्तिमितं मूढ़घूर्णत् नयनं यस्य। 2. सस्नेह &c.—For समास see टीका, कौतुक is curiosity. She is curious to see what follows this. 3. सस्वेद &c.—स्वेद, रोमाञ्च कम्प are सात्त्विक भाव। A चतुष्पद वहु—। The ङीष् is optional by "अङ्गगात्रकण्ठेभ्य इति वक्तव्यम्"। 4. मरुन्नवाम्भः &c.—नवाम्भः refers to the first new showers at the beginning of the rains. प्रतिधूत or प्रतिधुत goes with कम्पित of सीता, सिक्त with सस्वेद, स्फुटकोरक with

।रोमाञ्चित। 5. कदम्बयष्टिः—यष्टि is a twig. Females are often compared to twig of trees. Thus—"सञ्चारिणी पल्लविनी लतेव" "इमां तटाशोकलताञ्च तन्वीम्" etc. 6. स्फुट etc—स्फुट is विकसित। A full-blown flower of the कदम्ब has its filaments placed all round like hairs on end.

(*xl*) सीता (स्वगतम्)—अम्महे अवसेण एदेण अत्ता-णएण लज्जाविदह्मि भअवदीए तमसाए। किं त्ति किल एसा मणिस्समदि एसो परिच्चाओ एसो अ हिअआसङ्गोत्ति [अहो अवशेन एतेन आत्मना लज्जापितास्मि भगवत्याः तमसायाः! किमिति किल एषा मंस्यते—एष परित्यागः एष च हृदयासङ्ग इति]

रामः (सर्वतोऽवलोक्य)—हा कथं नास्त्येव। नन्वकरुणे वैदेहि—

सीता—सच्चं अकरुणम्हि जा एवंविधं तुमं पेक्खन्ती गं धरामि एव्व जीविदं [सत्यमकरुणास्मि या एवंविधं त्वां प्रेक्षमाणा ननु धराम्येव जीवितम्]।

रामः—क्वासि। देवि प्रसीद। न मामेवंविधं परित्यक्तु-मर्हसि।

Sita—(*To herself*)—O, I am ashamed before the worshipful Tamasa by this uncontrolled self of mine. Such being the renunciation and such the attachment of the heart, what would she think ?

Rama—(*Looking all round*)—Alas ! How is this ? Not here indeed, pitiless Vaidehi,—

Sita—Truly I am pitiless who, O fie, seeing you in this plight, does preserve life.

Rama—Where art thou ? Be gracious, my queen. It behoves thee not to forsake me in this plight.

मित—। 'अवशेन' अनायत्तेन 'एतेन आत्मना' प्रयोजकेन कर्त्ता अहं 'भगवत्याः तमसायाः सम्बन्धे लज्जापिता' लज्जया योजिता अस्मि। अधुना भगवतीं वीक्ष्य अहं लज्जे इति भावः। लज्जाकारणमाह—'एष ईदृशः अभावनीयः 'परित्याग· भर्त्रा, 'एवं व ईदृश· पुनः 'हृदयस्य आसङ्ग· पक्ष· पातो मे भर्त्तरि 'इति' एतत असदृशं वीक्ष्य 'किमिति किल एषा' भगवती 'मंस्यते' सम्भावयिष्यति। अपदार्था सीता इति मंस्यते ततो मे लज्जा॥ अत्रान्तरे रामः 'सर्वतोऽलोक्य' सीतामपश्यन् सखेदमाह 'हा कथ' नास्त्यैव 'ननु इत्यनुनये। 'हे अकरुणे' निर्दय 'वैदेहि' इत्यर्द्धक्ते तदेव अनुमोदमाना सीता प्राह 'सत्यमकरुणास्मि यतः 'ननु जीवितं धरामि' इतत्र आक्षेपे ननु।

Notes—1. लज्जापिता—लज्जा shame लज्जया योजिता इति लज्जा+णिच् (नाम धातु) + क्त कर्म्मणि = लज्जपिता put to shame. This is by the Vartika ' प्रातिपदिकात् धात्वर्थे etc. 2. भगवत्याः तमसायाः— This is usually rendered भगवत्या तमसया in the तृतीया। The sense then becomes—I have been put to shameby तमसा। Reference is of course to Tamasa's remark 'सख्ये द—" etc., in the verse above. But then the verse is स्वगत (See Tika on that verse) so सीता cannot possibly refer to it. Besides if the reference is to the remark already made by तमसा then मंस्यते in the future is unsuitable, because तमसा must have first drawn her conclusion and then made the remark. मंस्यते should then be altered into अमंस्त। Hence भगवत्याः तमसाया· in सम्बन्धे षष्ठी is preferable, both forms being available from the प्राकृत। 3 नन्वकरुणे etc —सीता does not let him finish his sentence. She hastily interrupts and confirms Rama's remark. ननु implies अनुनय entreaty (see also note 5).

4. ननु धरामि—Here ननु implies आक्षेप censure, I ought to be ashamed (निन्दा—censure) that I am still alive (धरामि जीवितम्) । Here घृ is भ्वादि । 9. क्वासि—This completes Rama's sentence—नन्वकरुणे वैदेहि क्वासि—O pitiless वैदेहि ,whither art thou, I entreat (ननु) you let me have a sight of you. Or say ननु आक्षेपे—It is cruel (अकरुणे वदेहि) of you to remain invisible. 6. एवंविधम in this pitiable plight=ईदृशं शोकविह्वलम् ।

(*xli*) सीता—अइ अज्जउत्त विवरीदं विअ पदं [अयि आर्य्य पुत्र, विपरीतमिवैतत्] ।

वासन्ती—देव प्रसीद प्रसीद । स्वेनैव लोकोत्तरेण धैर्य्येण संस्तम्भय अतिभूमिगतविप्रलम्भमात्मानम् । कुतोऽत्र मेप्रिय-सखी ?

राम.—व्यक्तं नास्ति । कथमन्यथा वासन्त्यपि तां न पश्येत् ? अपि खलु स्वप्न एषः ? न चास्मि सुप्तः कुतो वा रामस्य निद्रा । सर्वथा स एव भगवान् अनेकवारपरिकल्पना-निर्मितो विप्रलम्भः पुनः पुनरनुवध्नाति माम् ।

सीता—मए एव्व दारुणया विप्पलद्धो अज्जउत्तो [मया एवदारुणया विप्रलब्ध आर्य्य पुत्रः] ।

Sita—O my husband, this seems contrary to facts.

Vasanti—Excuse me. Sire, excuse me. By your superhuman firmness itself do steady yourself of which the delusion has transcended its bounds. Whence could my dear friend be here ?

Rama—Evidently she is not here ; or, why should not even Vasanti see her ? It is really a dream. But I am

not asleep whence is sleep for Rama ? Verily it is the very same mighty delusion, built by imgination and many times indulged in, that time and again follows me.

Sita—My husband has been deluded by my cruel self itself.

मित—। विपरीतं तत्त्वतो विरुद्धम। त्वयाहं परित्यक्ता इति हि तत्त्वम् ॥ लोकोत्तर—व्याख्यातं प्राक्। संस्तम्भय' धारय स्थिरीकुरु। अत्युच्चा भूमिः 'अतिभूमिः ऊर्ध्वतमं तलम्। तां 'गतःतत्रारूढ इत्यर्थः। तथाविधो 'विप्रलम्भः' भ्रमः प्रणष्टप्रियजनस्य भावनाजनिता वञ्चना इति यावत्तस्य तादृशम् आत्मानम् ॥ 'व्यक्त' स्फुटम् असंशयम्। 'भगवान्' महाप्रभावः। 'परिकल्पनया' सङ्कल्पेन 'निर्म्मितः' जनितः। 'अनेकवार' बहुशः 'परिकल्पनानिर्म्मितः कल्पितः विप्रलम्भः' वञ्चना काल्पनिके सीता-समागमे परमार्थबोधः इत्यर्थः 'पुनः पुनः माम् अनुबध्नाति' अनुसरति। अनिशं सीतासमागममनुचिन्तयतो मे 'पुनः प्राप्ता जानकी" इति महान्-भ्रमः इति भावः ॥ 'विप्रलब्धः' प्रतारितः। अथ तुयोऽयमस्य विप्रलम्भः नह्येष परिकल्पनानिर्म्मितः किन्तु 'मया एव अदृश्यरूपया जनितः ॥

Notes—1 **विपरीतम्**—**वि** implies opposition, **परि** is **सर्वतोभावे**, **वि+परि+इ+क्त कर्त्तरि—विपरीत** altogether opposite. just the reverse. You discarded me, not I you. 2. **प्रसीद** She is going to cantradict Rama and hence begs his pardon. 3 **अतिभूमि** &c.—**भूमि** is **तल** storey, **अतिभूमि** the topmost storey. Or **भूमि** station. **भूमिम् अतिक्रान्तः अतिभूमिः** outside the station. Now see **टीका**। 4. **सर्वथा** &c.—He is now reconciled to his fate with the conviction that **सीता** is lost to him for ever.

(*XLII*) वासन्ती—देव पश्य पश्य

पौलस्त्यस्य जटायुषा विघटितः काष्णायसोऽयं रथः

पश्यैते पुरतः पिशाचवदनाः कङ्कालशेषाः खराः।

खड्गच्छिन्नजटायुपक्षतिरितः सीतां ज्वलन्तीं वहन्
अन्तर्व्याकुलविद्युदम्बुद इव द्यामभ्युदस्थादरिः ॥४३॥

Vasanti—Look, Sire look.

Here is Paulastya's car of steel smashed by Jatayus. Behold in front of you these demon-faced mules of which the skeletons now remain. From here the enemy, with the roots of Jatayu's wings chopped off with the sword, lifting the glowing Sita ascended the sky like a cloud with lightning playing within (48).

मित । 'देव' इत्यादि परवर्त्तिना श्लोकेन अन्वितम्। पौलस्त्यस्येति। अन्वय—देव पश्य पश्य अयं जटायुषा विघटितः पौलस्त्यस्य कार्ष्णायसः रथः पश्य पुरत एते कङ्कालशेषाः पिशाचवदना खराः। इतः खड्गच्छिन्नजटायु-पक्षतिः अरिः ज्वलन्तीं सीतां वहन् अन्तर्व्याकुलविद्युत् अम्बुद इव द्याम अभि उदस्थात्। व्याख्या—हे देव रामभद्र 'पश्य द्रष्टव्यमस्ति। अयम् एष 'जटायुषा' गरुडात्मजेन 'विघटितः' भग्नः 'पौलस्त्यस्य रावणस्य 'कार्ष्णायसः लौहरचित' रथः। पश्य पुरत'' अग्रे स्थिताः एतेकङ्कालशेषाः' अस्थिपञ्ज रावशिष्टाः' पिशाचवदना ' राक्षसमुखा खराः' जटायुषैव निहता अश्वतराः रथवाहा इत्यर्थः। 'इत ' अस्मात प्रदेशात् खड्गेन छिन्ने जठायोः पक्षती पक्षमूले येन तथाविधः 'अरिः' रिपु' रावणः ज्वलन्तीं दीप्यमानां अनसूया-प्रदत्तेन अङ्गरागेन स्फुरत्प्रभामण्डलामित्यर्थः 'सीतां वहन्' नाशात् हस्ता भ्यामेव धारयन् 'अन्तः अभ्यन्तरे' 'व्याकुला' चञ्चला 'विद्युत्' यस्य तादृशः 'अम्बुद इव मेघ इव 'द्याम् आकाशम् 'अभि' अभिलक्ष्य उदस्थात् उत्पपात ॥

Notes—1. **पौलस्त्यस्य**—**पुलस्त्य** was Brahman's son, one of the Saptarshis. His son was **विश्रवस्** who again had **रावण**, **कुम्भकर्ण** and **विभीषण** for sons.

Some read पुलस्ति for पुलस्त्य । In that case say पुलस्त्येर्गोत्रापत्यं पुमान् इति पुलस्ति + यञ् (गगादि) पौलस्त्यः &c, तस्य । 2. कार्ष्णायसः— अयस् is लौह । कृष्णम् अयः इति कृष्ण + अयस् + टच् समासान्त कृष्णायसम् a variety (जाति) of iron i e., steel. This is by "अनोऽश्मायस्सरसां जातिसंज्ञयोः" । Next कृष्णायसस्य विकारः इति कृष्णायस + अण् or मयट् कार्ष्णायसः or कृष्णायसमयः । It was a steel car, very hard to break. Yet it was smashed to pieces, so fierce was Jatayu's onslaught. 5. पिशाचवदनाः—पिशित is आममांस raw meat. पिशितम् अश्नातीति पिशित + अश + अण् कर्त्तरि = पिशाच where पिशित has become पिश and आश becomds आच the word being of the पृषोदरादि class पिशाचस्य वदनं पिशाचवदनम् । तदिव वदनं येषाम् वह । 4. ज्वलन्तीम्—This was due to the glitter of the permanent unguent given her by अनसूया, the wife of the sage अत्रि । Comp "स्फरत्प्रभामण्डलमानसूयं सा बिभ्रती शाश्वत-मङ्गरागम् । रराज शुद्धे ति पुनः स्वपुर्य्यें सन्दर्शिता वह्निगतेव भर्त्रा ॥"—*Raghu.* 5. खड्ग &c —पक्ष + ति = पक्षति which means पक्षमूल। Both जटायु and जटायुस् are correct. now See Tika. अन्तः etc.— ज्वलन्ती सीता compares with स्फुरितविद्युत् and swarthy रावण with the dark अम्वद । 7 द्याम्—द्यौ is आकाश and fem. ताम् । अभियोगे (कर्म्मप्रवचनीये) द्वितीया । उद् + स्था लुङ् द = उदस्थात् । no आत्मनेपद due to ऊर्ध्वकर्म ।

(*lxiii*) सीता (सभयम्)—अज्जउत्त तादो वावादी-अदि अहं अवहरीआमि, परित्ताहि [आर्य्यपुत्र, तातो व्यापाद्यते अहञ्च अपह्रिये—परित्रायस्व परित्रायस्व]।

रामः (सवेगमुत्थाय)—आः पाप तातप्राणसीतापहारिन् क्व यासि ?

वासन्ती—अयं देव राक्षसकुलप्रलयधूमकेतोः अद्यापि ते मन्युविषयः ?

सीता—अम्मो उन्मत्तिआ म्हि संवुत्ता [अहो उन्मत्तिकास्मि संवृत्ता]।

Sita—(*In fright*)—My husband, father (Jatayu) is being killed and I am being carried off. Save us ! Save us !

Rama—(*Hastily rising up*) Ha ! Villain, that takes off father's life and Sita, whither are you going ?

Vasanti—O Sire, the comet of destruction to the race of the Rakshasas does the object of your wrath exist even now ?

Sita—Ha—I have become insane

मित—। 'तातो व्यापाद्यते' इत्यादि पूर्ववृत्तान्तस्मरणम् ॥ 'राक्षसकुलस्य प्रलये' प्रलयविषये 'धूमकेतुः'—यथा धूमकेतोरुदये कस्यचित् राजवंशस्य प्रलयः सूच्यते तथा तवाभ्युदये राक्षसवंशस्य । मन्योः कोपस्य विषयः पात्रं 'मन्युविषयः' रावण इति काकुः । मन्युविषयो निराकृतस्त्वया ॥ 'उन्मत्तिका अस्मि असम्बद्धभाषणात् तादृशी अहम् ॥

Notes—1 व्यापाद्यते—वि+आ+पद्+णिच्+लट् ते कर्मणि । The past is mistaken for the present. 2. सवेगम् &c.—Rama also forgets that it is a past affair to which वासन्ती refers and takes it as present. Here राम does not act on hearing Sita's exclamation. As already remarked तमसा and सीता speak जनान्तिके (aside) with respect to राम and वासन्ती, so राम is supposed as not to have heard Sita's call for help at all. Vasanti's speech affects both सीता and राम exactly in the same manner and they act in a like fashion accordingly. 3. राक्षसकुल &c.—Comp. पौलस्त्यकुलधूमकेतो·, Act I Para iv. 4. उन्मत्तिका &c—उन्मत्त+कन्+स्त्रियाम् । She sees the absurdity of her fright.

(*LXIV*) रामः—अन्वर्थ एवायमधुना प्रलापो वर्त्तते ।
उपायानां भावादविरतविनोदव्यतिकरै-
र्विमर्दैर्वीराणां जगति जनितात्यद्भुतरसः ।
वियोगो मुग्धाक्ष्याः स खलु रिपुघातावधिरभूत् ।
कथं तूष्णीं सह्यो निरवधिरयं त्वप्रतिविधः ॥४४॥

सीता—णिरवधि त्ति हा हदह्मि मन्दभाइणी [निरवधिरिति हा हतास्मि मन्दभागिनी]। (इति रोदिति)।

Rama—This raving has indeed become full of meaning now (अन्वर्थः) ।

That loss of the lovely-eyed which by encounters of heroes had provided the world with a taste of the supremely marvellous—encounters which from the existence of remedies were attended by steady relief [*Or*—ceaseless diversion] had indeed its end in the slaying of the enemy. But how is this irremediable and unending one to be borne in silence ? (44)

Sita—He says "Unending" ! I am lost, ill-fated as I am (Weeps).

मित—। अर्थम् अनुगतः' अन्वर्थः युक्त इत्यथः'। अयं प्रलापः' अद्य यस रोदनादिकं मया कृतं तत् युक्तमेव ॥ अन्यर्थतां दर्शयति उपायानामिति, अन्वयः- उपायानां भावात् अविरतविनोदव्यतिकरैः वीराणां विमर्दैः जगति जनितात्यद्भुतरस. मुग्धाक्ष्याः स वियोगः रिपुघातावधि खलु अभूत। किं तु'अप्रतिविधः निरवधिः अयं कथं तूणीं सह्यः। व्याख्या—'उपायाना' प्रतीकाराणां 'भावात्' वर्त्तमानत्वात् लभ्यत्वादित्यर्थः प्रतीकाराः सन्ति इति हेतोः 'अविरतः' अविच्छिन्नः 'विनोदव्यतिकरः' दुःखलाघवसम्पर्कः येषु तादृशैः 'वीराणां कपिराक्षसभटानां विमर्दैः सम्प्रहारैः 'जगति' भुवने 'जनितः उत्पादितः 'अत्यद्भुतस्य' परमविस्मयस्य 'रसः' स्वादः येन तथाविधः

'छायास्या' छलोचनायाः सीतायाः स वियोगः असौ रावणकृतः पूर्वविरहः रिपु घातः शत्रु निपातः अवधिः सीमा यहा 'रिपुघाते अवधिः अन्तः यस्य तथाविधं 'खलु' तादृशं एव 'अभूत रावणनाशेन सहैव तस्य पर्य्यवसानमभूत्। किं 'तु' पक्षान्तरे 'अप्रतिविधः प्रतिकाररहितः अतएव 'निरवधिः अनन्त 'अयम्' एष वर्त्तमानो विरह कथं तूष्णीं निर्वचनं 'सह्यः' सोढुंशक्य, न कथमपि शक्यः. अतः 'अन्वर्थः अधुना प्रलापः'' ॥ निरवधिः इति आह अतः हाहतास्मि इति वाक्यशेषः ॥

Notes—1. अयम् &c—प्रलाप is असम्बद्धभाषण as in 'सखि कुतः प्रलापा'' (para lvii). also प्रलाप as in शोकक्षोभे च हृदयं प्रलापैरेव धार्य्यते'' (sl 29) Here both are intended. अयम् refers to all the occurrences of the day, 2 उपायानाम् &c—उपसमीपे फलस्य समीपे अयते एभिः इति उप+अय+घञ् करणे=उपाया means adopted to a certain end. Here the steps taken to remove the वियोग। भावात् has हेतौ ५मी -because (हेतु) there were remedies. The existence of उपाय was the reason whence विनोदव्यतिकर was possible. 3 अविरत &c.—विनोद relief. also diversion वि+अति+कृ+अप भावे=व्यतिकर occurrence hence *presence*. for समास see टीका। Qual. विमर्दै। The encounters kept me incessantly occupied (विनोद=diversion). Or the encounters gave me steady relief (विनोद=relief). Steady implies that each single विमर्द ended in victory of Rama's party 1 जनित &c—रस is स्वाद taste "पारदस्वाद्यो रसः" इत्यादि त्रिकाण्डशेष। विमर्द is the प्रयोजक and रस the प्रयोज्य। रसो जात=विमर्दैः रसो जनित। The world for the first time then knew what the अत्यद्भुत—was. 5. रिपु &c.—अवधि a time limit. The वियोग was attended by विनोदः, it also hadan अवधि।

6. **तूष्णीम्**—A **मकारान्त अव्यय** meaning silently. The implication is that there is no **विनोदव्यतिकर** । 7. **निरवधिः**—Why so ? Because **अप्रतिविधः—प्रति + वि + धा + अङ् भावे प्रतिविधा** remedy. **अविद्यमाना प्रतिविधा अस्मिन्** । Contrast this with **उपायानां भावात्** । The previous **वियोग** was attended with **विनोदव्यतिकर**, this has to be suffered **तूष्णीम्** । The other was **रिपुघातावधिः**, this is **निरवधि** ।

(*XLV*) रामः—हा कष्टम् ।

व्यर्थं यत्र कपीन्द्रसख्यमपि मे वीर्यं हरीणां वृथा
प्रज्ञा जाम्बवतोऽपि यत्र न गतिः पुत्रस्य वायोरपि ।
मार्गं यत्र न विश्वकर्मतनयः कर्तुं नलोऽपि क्षमः
सौमित्रेरपि पत्रिणामविषये तत्र प्रिये क्वासि मे ॥४५॥

सीता—बहुमाणाविदाह्मि पुव्वविरहम् [बहुमानितास्मि पूर्वविरहम्] ।

Rama—O woe !

In what place not within the reach of Saumitri's arrows too, are you, my darling, with regard to which my friendship with the monkey-chief is useless to me, towards which the prowess of the monkeys as well as the wisdom of Jambavat is futile, where there is no access for the wind-god too, to which Nala too the son of Visvakarman is unable to make a track ? (45).

Sita—I am respected with regard to former separation.

मित—। अप्रतिविधत्वं वर्त्तमानवियोगस्य निरवधित्वे हेतुरुक्तम् । तत् अप्रतिविधत्वं परिष्कुर्वन् पूर्वविरहे ये उपायाः तेषां वर्त्तमाने निष्फलतां दर्शयति—व्यर्थमिति । अन्वयः—हे प्रिये, सौमित्रेरपि पत्रिणामविषये क्व तत्र असि यत्र मे कपीन्द्रसख्यमपि व्यर्थम्, हरीणां वीर्यं जाम्बवतः प्रज्ञा अपि वृथा, यत्र वायोः पुत्रस्य अपि गतिः न, यत्र विश्वकर्म्मतनयः नलः

अपि मार्गं कर्त्तुं न क्षमः । व्याख्या—हे 'प्रिये मे मदीये जानकि 'सौमित्रेरपि' एकधनुर्द्धरस्य लक्ष्मणस्य च पत्रिणां वाणानां 'अविषये' अगोचरे क तत्र असि' कस्मिन् देशे वर्त्तसे यत्र मे मत्सम्बन्धे 'कपीन्द्रेण' वानरराजेन सुग्रीवेन (सह) यत् 'सख्यं' मित्रता तत् 'अपिव्यर्थं' विफलम् , हरीणां वानराणां नलनीलादीनां 'वीर्य्यं' पराक्रमः 'जाम्बवतः प्रज्ञा अपि ऋक्षराजस्य बुद्धिरपि 'वृथा' विफला 'यत्र वायोः पुत्रस्य अपि' मारुतेश्च गतिः न, प्रवेशो न विद्यते 'यत्र' विश्वकर्मतनयः विश्वकर्म्मणः पुत्रः 'नलः अपि मार्गं द्वारं 'कर्त्तुं न क्षमः असमर्थः एवम् उपायानामत्यन्ताभावे सति अप्रतिविध एष वियोगः ॥ 'पूर्वविरहं बहु यथा तथा 'मानिता' बोधिता 'अस्मि' । पूर्वविरहो वरमासीत् इति मे वोधो जातः ॥

Notes.—1. कपीन्द्र &c = कपीन्द्र is सुग्रीव । He was Rama's कृत्रिममित्र—friend by deed. It was he who collected the army of monkeys. 2. प्रज्ञा &c —जाम्बवत् was the bear prince. He was a veritable repository of the words of wisdom and had twice saved the brothers from peril, once when they were fettered with नागपाश and again when लक्ष्मण was pierced with the शक्ति by रावण । न गतिः &c —Refers to हनमान् । It was he who crossed the sea and traced सीता to the अशोकवन । He again brought the द्रोणाद्रि to लंका and saved लक्ष्मण । 4. मार्गम् &c.—नल was the architect to bridge the sea and let the monkey host cross over to लंका । 5. सौमित्रेः &c,—As his brother, he was Rama's सहजमित्र । To his arrows Rama owed victory over इन्द्रजित्, the redoubtable son of रावण । Thus backed by सहजमित्र, कृत्रिममित्र, a vast army of a capable general (सुग्रीव), perfect counsels (जाम्बवत्, विभीषण etc.) and a host of invincible fighters हनुमत् , अङ्गद etc. राम was fully equipped to fight the first वियोग (उपायानां भावात्) । 6. मानिता —मन is बुद्ध्यर्थं hence the अणिकर्ता becomes कर्म्म, thus—अहं

पर्वविरहं वहु मन्ये, एष मां पूर्वविरहं बहू मानयति । Changing the voice एतेन अहं पूर्वविरहं बहुमान्ये (वहु मानिता) ।

(*LXVI*) रामः—सखि वासन्ती, दुःखायैवेदानीं रामस्य दर्शनं सुहृदाम् । कियच्चिरं त्वां रोदयिष्यामि ? तदनुजानीहि मां गमनाय—

सीता (सोद्वेगमोहं तमसामवलम्ब्य)—भअवति तमसे कथं गच्छदि एव्व अज्जउत्तो [भगवति तमसे, कथं गच्छत्येव आर्य पुत्रः] ।

तमसा—वत्से समाश्वसिहि समाश्वसिहि । ननु आवामपि आयुष्मतोः कुशलवयोर्वर्षग्रन्थिमङ्गलं सम्पादयितुं भागीरथी—पादान्तिकमेव गच्छावः ।

सीता—भअवदि पसीद खणमेत्तं वि दाव दुल्लहं जणं पेक्खामि [भगवति, प्रसीद क्षणमात्रमपि तावत् दुर्लभं जनं प्रेक्षे ।]

Rama—Friend Vasanti, Rama's sight is now only for the sorrow of friends. How long shall I make you weep ? So permit me to return.

Sita—(*With alarm and bewilderment leaning on Tamasa*)—Worshipful Tamasa, how is this , My husband is indeed going away !.

Tamasa—Cheer up my child, cheer up Why, we too are really going to the neighbourhood of the feet of Bhagirarhi (Or—near honoured Bhagirathi) to perform the auspicious ceremony of tying the anniversary knot of long-lived Kusa and Lava.

Sita—Be pleased worshipful lady, even but for a moment let me see this person whose sight is hardly available (to me).

मित—। 'दुःखाय' इति तादर्थ्ये चतुर्थी ॥ असमाप्ते एव रामवाक्ये आक्षिप्यते तत् सीतया—भगवतीति॥ 'वर्षाणां ग्रन्थिबन्धनम्। तस्य 'मङ्गलं' मङ्गलकर्म। 'भागीरथ्याः पादयोः अन्तिकं' समीपम। यद्वा—पूज्या भागीरथी 'भागीरथीपादाः। तेषामन्तिकम् गच्छावः॥ (नित्यसमास See आर्य्यमिश्र in sak.)

Notes—1. रामस्य &c.—रामस्य has अनुक्ते कर्म्मणि and सुहृदाम् has अनुक्ते कर्त्तरि षष्ठी owing to the कृत् in दर्शनम्। Thus रामं पश्यन्ति सुहृदः (तिङ् योगे)=रामस्य दर्शनं सुहृदाम्। This is by the Varttika "शेषे विभाषा"। 2. कियत् &c.—कि परिमाणमस्य इति किम + वतुप्=कियत् now much, चिर is long time. कियत qualifies चिरम् and demands the measure of the length of time I have grieved you pretty long and do not want to grieve you longer. 3. गमनाय—"तुमर्थाच्च—"इतिचतुर्थी। गन्तुमनुजानीहि is the sense; Rama has not finished yet, सीता hastily interrupts on hearing him speak of going Speech ends with चक्षुर्विनोदयामि (next para). The interruption extends from सीता (सोद्वेगमोहम्) to दुर्लभ जनंप्रेक्ष्य।

(*LXVII*) रामः—अस्ति चेदानीमश्वमेधाय सहधर्मचारिणी मे—

सीता (सोत्कम्पम्) अज्जउत्त का सा [आर्य्यपुत्र का सा] ? रामः—हिरण्मयी सीताप्रतिकृतिः।—

सीता—(सोच्छ्वासं सास्रम्)—अज्जउत्तो दाणिं सि तुमं! अम्महे उक्खाणिदं परिच्चाअलज्जासल्लं अज्जउत्तेण [आर्य्यपुत्र इदानीमसि त्वम्! अहो उत्खातं मे इदानीं परित्यागलज्जाशल्यमार्य्यपुत्रेण]

रामः—तत्रापि तावद्बाष्पदिग्धं चक्षुर्विनोदयामि ।

सीता—धण्णा सा जा अज्जउत्तेण वहु मण्णाअदि, जा अ अज्जउत्तं विनोदअन्तो आसाणिवन्धणं जादा जीअलोअस्स [धन्या सा या आर्य्यपुत्रेण वहु मन्यते या च आर्य्यपुत्रं विनोदयन्ती आशानिवन्धनं जाता जीवलोकस्य] ।

Rama—And now for purposes of the Asvamedha, my co-worker in the rites is—

Sita—(*With trepidation*) —Who is she, my husband ?

Rama—A golden image of Sita.

Sita—(*With a sigh of relief and with tears*)—What a specimen of a husband you have now become ! Ha ! my shaft of shame from renunciation has now been extracted by my husband.

Rama—Even there I shall regale my tear soiled eyes.

Sita—Worthy is she who is highly prized by my husband, and who by diverting my husband, has become the peg of hope for the land of the living.

मित—'अस्ति' इत्यादि आर्त्तस्यराम वाक्यस्य अनुवन्धः। 'सहधर्म्मचारिणी मे' इत्यत्रापि असमासं वाक्यम् ॥ सीता—(सोत्कम्पम्) इति भूयोऽप्याक्षेपः ॥ 'हिरण्मयी' इति व्याख्यातंप्राक् । अयमपि तस्यैव वक्यस्य अनुवन्ध —सीता (सोच्छ्वासम्) इति पुनराक्षेप; । 'इदानीम्' एतत् कृत्वा 'आर्य्यपुत्र ' अर्य्यपुत्रनिर्शनम् 'असि त्वं जगताम् । परित्यागस्य' या 'लज्जा सा एव 'शल्यम्, तत् उत्खातम् ॥ यथा इह पञ्चवट्यां तथा 'तत्र' सीताप्रतिकृतौ 'अपि' प्राग् वृत्तस्मरणात् 'वाष्पदिग्धं जलपूर्णं 'चक्षुर्विनोदयामि । तत् माभूत सुहृदाम रोदनम् । मम तु यथाकथञ्चित् विनोदः भविष्यति, अनुजानीहि मां गमनाय इति वाक्यशेषः—इदन्तु पूर्णं वाक्यम्—रामः—''सखि वासन्ती, दुःखायैवेदानी' रामस्य दर्शनं सुहृदाम । कियच्चिरं त्वां रोदयिष्यामि । तदनुजानीहि मां गमनाय । अस्ति चेदानीमश्वमेधाय

सहधर्मचारिणी मे हिरण्मयी सीताप्रतिकृतिः। तत्रापि तावद्बाष्पदिग्धं चक्षुर्विनोदयामि।" आशाया निवन्धनं समाश्रयः अवलम्बनम् आशास्थकमित्यर्थः। यद्वा—'आशाया निवन्धनं' कारणम्। आशा—रामः स्वस्थो भवतु इत्याशा 'जीवलोकस्य' इयञ्च प्रतिकृतिर्विनोदहेतू रामस्य इत्याशास्थलं भुवनवासिनाम्, अनया जीवति रामे सनाथा वयमिति ॥

Notes.—1. अस्ति &c —This is a continuation of Rama's speech which is again interrupted at मे। As a beginning of a fresh speech it is extremely awkward, because there is no occassion to refer to the subject. 2. का सा—Here we have the jealousy of a co-wife which causes the interruption. 3. हिरण्मयी etc.—See Act II. The speech continues to be again interrupted at प्रतिकृति। This cannot be a fresh speech in reply to Sita's का सा for the simple reason that Rama cannot hear Sita 4. आर्य्यपुत्र इदानीन् etc.—You are a model of a husband now. 5. उत्खातम् etc.—This indicates complete reconciliation 6. तथापि etc.—This concludes Rama's speech. I seek solace in the sight of familiar object. But the memory is painful and my eyes water Thus causes you also to weep (रोदयिष्यामि) which is an additional source of pain to me. Let me suffer alone, retiring to my capital (अनुजानीहि etc.). There I have a golden image of Sita to keep me company at the अश्वमेध। In it I shall find what diversion is possible to my wretched self विनोदयामि इति भविष्यत् सामीप्ये वर्त्तमान। 7. धन्या—Blessed. The reasons follow—(1) आर्य्यपुत्रेण बहु मन्यते—My husband prizes it ; (2) आशानिवन्धनं जाता जीवलोकस्य—It raisehopes in the mind of the entire creation. निवध्यते अस्मिन् इति नि+बन्ध+ल्युट् अधिकरणे निवन्धनम् tying post, apeg. Hopes rest in it, because it comforts my husband.

(*LXVIII*) तमसा—(सस्मितस्नेहास्रं परिष्वज्य)—अयि वत्से एवमात्मा स्तूयते ।

सीता (सलज्जमधोमुखी स्वगतम्)—परिहसिदम्हि भअवदीए [परिहसितास्मि भगवत्या] ।

वासन्ती—महानयं व्यतिकरोऽस्माकं प्रसादः । गमनं प्रति पुनर्यथा कार्य्यहानिर्न भवति तथास्ताम् ।

सीता—पडिउला दाणिं मे वासन्ती संवुत्ता [प्रतिकूला इदानीं मे वासन्ती संवृत्ता] ।

तमसा—एहि वत्से गच्छावः ।

सीता—(सकष्टम्)—एव्वं करेह्म [एवं कुर्वः] ।

तमसा—कथं वा गम्यते यस्यास्तव—

प्रत्युप्तस्येव दयिते तृष्णादीर्घस्य चक्षुषः ।

मर्मच्छेदपरैर्यत्नैराकर्षो न समाप्यते ॥४६॥

Tamasa—(*Embracing with a smile and tears of affection*) —O child, thus is self being praised !

Sita—(*Becoming crest-fallen and bash-ful :—Aside*)— I have been laughed at by her worshipful self.

Vasanti—This meeting is a great favour unto me. But, as to your leaving, be it so that no neglect of duty may result.

Sita—Vasanti has how become adverse to me.

Tamasa—Come child, we go,

Sita—(*Woefully*)—So do we.

Tamasa—Or how could leave be taken by you, by whose—

Efforts that are bent upon rending the vitals, the drag is not being finished on eyes that have become wide (lit.—long) through longing and implanted as it were on the beloved (46).

मित— स्मितेन' ईषद्धासेन 'स्नेहास्रेण' वात्सल्यजनितेन वाष्पेण च 'सह'। एवम्' अनेन प्रकारेण प्रतिकृतेः स्तवेन 'आत्मा' स्वयं (त्वमेव) स्तूयसे। आत्मप्रशंसा क्रियते इति परिहास ॥ 'अयंव्यतिकरः' एष आवयोः समागमः अस्माकं मम सम्बन्धे महान् प्रसादः परमः अनुग्रहः। इति गमनं ते अनीप्सितं मम। 'पुनः' पक्षान्तरे 'गमनं प्रति' ब्रवीमि 'यथा कार्य्यहानिः न भवति तथा आस्तां तथैव भवतु। विलम्बे चेत कार्य्यातिपातः मा भूद्विलम्बः गमनमेव भवतु ॥ 'प्रतिकूला' गमनामोदनात् विरुद्धा ॥ कथं वा गम्यते त्वया। 'यस्यास्तव' इति श्लोकेन अन्वितम् प्रत्युप्तेति। अन्वयः यस्यास्तव मर्म्मच्छेदपरैः यत्नै तृष्णादीर्घस्य दयिते प्रत्युप्तस्येव चक्षुषः आकर्षेन समाप्यते। व्याख्या—यस्याः तव मर्म्मच्छेदपरैः मर्म्मच्छेदप्रवृत्तैरिव 'यत्नैः' चेष्टाभिः 'तृष्णया' प्रियदर्शनवाञ्छया 'दीर्घस्य' आयतस्य विस्तारितस्य इत्यर्थः अपि च 'दयिते' प्रिये रामे 'प्रत्युप्तस्य' 'इव' निखातस्येव अतएव झटिति प्रत्यानयनायोग्यस्य 'चक्षुषः' नेत्रस्य (कृद्योगा कर्म्मणि षष्ठी) 'आकर्षः' उद्धारकर्षणं न समाप्यते' न विरतिं नीयते। सतृष्णं ते चक्षुर्गाढं निखातं दयिते, तदुद्धारार्थं महानप्यस्ति ते प्रयासः किन्तु अनिच्छाकृतः सः, तेन हि मन्ये हृदयग्रन्थिस्ते छिद्यते इव तथापि चक्षुर्निवर्त्तयितुं न शक्नोषि, तत् कथं वा त्वया गम्यताम् ?

Notes ;—1. आत्मा—Your own self. 2. परिहसिता—परि+हस is सकर्म्मक owing to the उपसर्ग। 3. व्यतिकरः—Coming together, a chance meeting. 4. अस्माकम्= मम। 5. प्रसादः—A favour. Hence it is not to my interest to let you go. 6. यथा कार्य्यहानिः &c.—But I am not so selfish as to stand in the way of business. If a longer stay interferes with state affair then go by all means. Vasanti did not say this immediately after Rama's अनुजानीहि मां गमनाय (para lxvi) because राम had not then finished his speech. This is an additional proof that we have a single speech

from सखि वासन्ति (para lxvi) to वक्षविनोदयामि (para lxvii) 7. आकर्षः—आ+कृष+घञ् भावे=आकर्ष pull. The construction is यत्नैः चक्षुष आकर्षः where यत्न is the कर्त्ता and चक्षुस् the कर्म्म। यत्नाः चक्षूंषि आकर्षन्ति with तिङ्, becomes यत्नैः आकर्ष with कृत् by the rule "उभयप्राप्तौ कर्म्मणि"। 8. *Remark*—Tamasa means to say—Your eye has sunk deep (प्रत्युप्त from वप) in the body of your दयित। You must first pull it out and then go. But your efforts to extract the eye seem futile and only hurt you to the quick. You cannot go, you are tied here to your दयित through your eye. In plain words—The very thought of separation pains you.

(*LXIX*) सीता—णमो णमो अपुव्वपुराणजणिददंसणाणां अज्जउत्तचरणकमलाणं [नमो नमः अपूर्वपुण्यजनितदर्शनाना-मार्य्यपुत्रचरणकमलानाम्] (इति मूर्च्छति)।

तमसा—वत्से समाश्वसिहि समाश्वसिहि।

सीता (समाश्वस्य)—किअच्चिरं वा मेहन्तरेण पुण्णिमा-चन्दस्स दंसणं [कियच्चिरं वा मेघान्तरेण पूर्णिमाचन्द्रस्य दर्शनम्]।

तमसा—अहो संविधानकम्।

एको रसः करुण एव निमित्तभेदाद्-
भिन्नः पृथक् पृथगिवाश्रयते विवर्त्तान्।
आवर्त्तबुद्बुदतरङ्गमयान् विकारान्
अम्भो यथा सलिलमेव तु तत् समग्रम् ॥४७॥

Sita—I bow, I bow unto the lotus feet of my husband, a sight of which has been procured by merit recently accrued (*Faints away*).

of metres, also Vasishtha that sage whom Arundhati follows, shower blessings upon you for abundant bliss. (41) (*Exeunt all*).

This is the Third Act named Shadow.

मित—। अवनिरिति। अन्वय.—अवनिः, अस्मद्विधाभिः सार्द्धम् अमरसिन्धुः, यः छन्दसाम् आद्यः प्रयोक्ता स कुलपतिश्च, अनुयातारुन्धतीकः सः मुनिः वशिष्ठश्च, भूयसे मङ्गलाय त्वयि भद्रं वितरतु। व्याख्या—'अवनिः देवि पृथिवी 'अस्मिद्विधाभिः मादृशीभिः 'सार्द्धं' सह अमरसिन्धुः सुरसरित् गङ्गा, च तथा यः छन्दसां वेदवहिर्भूतानां छन्दसाम् 'आद्यः प्रयोक्ता' प्रथमं उदाहर्त्ता स कुलपतिश्च मुनिकुलपोषको वाल्मीकिश्च एवम् अनुयाता अनुगता अरुन्धती य' स मुनिः वशिष्ठश्च भूयसे मङ्गलाय' महते शुभाय (तादर्थ्ये कर्मणि वा चतुर्थी) 'त्वयि' विषये 'भद्र' वितरतु कल्याणं दिशतु ॥

Notes :—1. तमसा &c.—The stage direction creates an unnatural situation. It is inconceivable that तमसा and वासन्ती would utter the same words in the same order without collusion. 2 अवनि —The ङीप् is optional, hence अवनी also 3. सार्द्धम् etc.—This suits तमसा because she too is a सिन्धु (river—"सिन्धुर्ना सरिति स्त्रियाम्") though only a मरसिन्धु not अमरसिन्धु। But it seems misplaced with वासन्ती who has no right to class herself with गङ्गा। 4. कुलपति — This is the designation of a muni who lodges feeds and educates 10,000 disciples.—The reference is to वाल्मीकि। 5 अनुयाता etc.—See Tika for समास। 'नद्यृतश्च' इति अत्र समासान्तः कप –indicates constant companionship. In the constellation of the सप्तर्षि Arundhati is seen seated behind वशिष्ठ। Here the implication is that अरुन्धती also त्वयि वितरतु भद्रम्। 6. त्वयि—विषयाधिकरणविवक्षया सप्तमी।

उत्तरचरितम्

चतुर्थोऽङ्कः ।

(*I*) (ततः प्रविशतस्तापसौ)

एकः—सौधातके, दृश्यतामद्य भूयिष्ठसन्निधापितातिथिजनस्य समधिकारम्भरमणीयता भगवतो वाल्मीकेराश्रमपदस्य । तथाहि—

नीवारौदनमण्डमुष्णमधुरं सद्यःप्रसूताप्रिया-
पीतादभ्यधिकं तपोवनमृगः पर्य्याप्तमाचामति ।
गन्धेन स्फुरता मनागनुसृतो भक्तस्य सर्पिष्मतः
कर्कन्धूफलमिश्रशाकपचनामोदः परिस्तीर्य्यते ॥१॥

(*Then enter two hermits*)

First one—Saudhataki, observe the attractiveness to-day, due to elaborate preparations, of the site of the hermitage of worshipful Valmiki where guests have been brought together in large numbers. Thus—

This deer of the hermitage drinks to his fill, the warm and sweet water of the boiled wild-rice—the residue after his just-then-calved mate had her drink. The aroma of vegetables, cooked along with the fruit of the *Jujub* is being diffused all round attended slightly by the spreading fragrance of rice, boiled with *ghee*. (1).

मित—। सुधातुरपत्यं पुमान् सौधातकिः, तत्संबुद्धौ 'सौधातके'। अद्य भगवतो वाल्मीकेः आश्रमपदस्य आश्रमस्थानस्य 'समधिकैः विशिष्टैः आरम्भैः

अनुष्ठाने: या 'रमणीयता' रुचिरता जाता सा 'दृश्यतां' त्वया। कुतोऽयं समधिकारम्भ इत्याह—'भूयिष्ठ' अतिबहुल' यथा तथा 'सन्निधापिताः' समानीताः अतिथिजनाः अतिथयः यस्मिन् तथाविधस्य आश्रमपदस्य। अद्य बहव प्राप्ता अतिथयः तेषां परिचर्य्यार्थं विशिष्टा ओदनाः पच्यन्ते तेन च रमणीयतरमद्य आश्रमपदमिति भाव ॥ नीवारेति। अन्वयः—तपोवनमृगः सद्यःप्रसूताप्रियापीतात् अभ्यधिकम् उष्णमधुरं नीवारौदनमण्डं पर्य्याप्तम् आचामति। सर्पिष्मतः भक्तस्य स्फुरता गन्धेन मनाक् अनुसृतः कर्कन्धूफलमिश्रशाकपचनामोदः परिस्तीर्य्यते। व्याख्या—'तपोवनमृगः एष अश्रमम़ृगः 'सद्यःप्रसूता' तत्क्षणकृतगर्भविमोचना अतएव अतितृषिता या 'प्रिया' मृगी तया यत् 'पीतं तत अभ्यधिकं शेषम् उष्णं सद्योनिगालितं न पर्य्युषितम् अतो 'मधुरं' स्वादु नीवारौदनस्य नीवारसाधितभक्तस्य 'मण्ड' फेन 'पर्य्याप्तं' प्रचुरं यथा तथा 'आचामति' पिवति। प्रभूता नीवाराः साधिताः इति समधिकारम्भ.। किञ्च 'सर्पिष्मतः भक्तस्य' घृतसाधितस्य अन्नस्य 'स्फुरता' अविर्भवता गन्धेन मनाक ईषत् 'अनुसृतः अनुयात लेशेन तन्मिश्र इत्यर्थः: कर्कन्धफलैः बदरै: मिश्रः समेत यः 'शाकः' तस्य यत् 'पचनं पाकः तस्य 'आमोदः' गन्धः पक्वशाकगन्ध इत्यर्थः 'परिस्तीर्य्यते वायुना समन्ततो वाह्यते। एतदपि नूतनमिति समधिकारम्भ एव ॥

Notes :—1. सौधातके—सुधातुर्गोत्रापत्यं पुमान् इति सुधातृ + इञ्। The ऋ of सुधातृ now changes into अक and we get सुधातक + इञ् = सौधातकिः etc. 2. भूयिष्ठ etc — सम् + नि + धा + णिच् + क्त कर्म्मणि सन्निधापित made to assemble, invited, अतिथय एव जनाः अतिथिजनाः etc. See Tika. 3. समधिक etc.—रम + अनीयर कर्त्तरि बाहुलकात् रमणीयः that which pleases तस्य भावः etc. 4. आश्रम etc.—आश्रमस्य पदं स्थानम् etc, 5. नीवार etc.—नीवार is wild rice, ओदन food. नीवारसाधितः ओदनः etc. 6. उष्ण etc.—उष्ण warm, i.e., the rice water was fresh ; hence it was मधुर। 7.

सद्य: etc.—For समास see *Mitabh*—सद्य प्रसूता implies that the doe was very thirsty, hence she took in a big draught. The कर्मधा—in सद्य:प्रसूता प्रिया gives the form सद्य:प्रसूतप्रिया with पुंवद्भाव by the rule पुंवत् कर्मधारयजातीयदेशीयेषु" । The excepting अपूरणीप्रियादिषु does not affect कर्मधा compounds. Also सद्य:प्रसूतप्रिया preserves the metre. It is very likely the poet did write प्रसूत but the scribes have made it प्रसूता । 8. पर्य्याप्तम्—Enough. The hermits are poor eaters. Comp. "नीवारमुष्टिपचना गृहिणो गृहाणि" (Act I. sl. 25). Usually the daily collection of rice-water in a hermitage is small. To-day however not only was there enough of it for the thirsty doe, but there was something left after she had her fill, an ample supply for the buck to drink to his heart's content (पर्य्याप्त)। Really then there was समधिकारम्भ । 9. कर्कन्धू etc —शाकपचनामोद: is पक्वशाकामोद: by the maxim 'भावानयने द्रव्यानयनम्"। पचन is a क्रिया it can have no आमोद। 10. परिस्तीर्य्यते—परि+स्तृ +लट् ते कर्मणि। The nominative is वायुना understood. It is not possible for the flavour to scent the surroundings unless a large quantity is cooked. Hence also समधिकारम्भ ।

(*II*) सौधातकि:—साअदं अणीअपयारणं जिण्णकुच्चाणं अणाज्झाअकालणाणं [स्वागतम् अनेकप्रकाराणां जीर्णकूर्चानाम् अनध्यायकारणानाम्] ।

प्रथम: (विहस्य)—अपूर्व: कोऽपि ते बहुमानहेतुर्गुरुषु सौधातके ।

सौधातकि:—भो भण्डाअण कित्तामधेओ एसो मह्ल्लस्स

दूविरसत्थस्स धुरन्धरो अज्ज चीरधारओ अदिधि आअदो [भो भाण्डायन किंनामधेय एष महतःस्थविरसार्थस्य धुरन्धरः अद्य चीरधारकः अतिथिरागतः] ।

भाण्डायनः—धिक् प्रहसनम् । नन्वयमृष्यशृङ्गाश्रमादरुन्धती-पुरस्कृतान् महाराजदशरथस्य दारानधिष्ठाय भगवान् वशिष्ठः प्राप्तः । तत् किमेवं प्रलपसि ?

Saundhataki—Welcome to these grey beards of various types who have caused a break in our studies (i.e. have given us a holiday).

First—(*Laughing*)—The reason for your regard for the elders, Saudhataki, is novel and peculiar.

Saudhataki—Ho ! Bhandayana, of what name is this guest in rags that has come at the head of a big caravan of old people to day ?

Bhandayana--A curse on your joking ! (Or—Fie ! Joking ?) Why, this is worshipful Vasishtha come from the hermitage of Rishyasringa leading the queens of the great king Dasaratha with Arundhati at their head. Why then dost thou rave thus ?

मित —। भूयिष्टसन्निधापितातिथिजनेत्युच्यते तत् 'अनेकप्रकाराणां' नानाविधानां 'जीर्णकूर्चानां पक्वश्मश्रूणाम्' 'अनध्यायस्य अध्ययनविरामस्य 'कारणनां' हेतुभूतानां तेषाम् अतिथीनां सम्बन्धे यो वहुमानः तेन तेभ्यः 'स्वागतम्' उच्चारयामि ॥ 'गुरुषु वहुमानस्य अपूर्वः' नूतन, 'कोऽपि ते हेतु दृश्यते यत् त्वं तान् अनध्यायकारणरूपेण वर्णयसि ॥ भाण्डायानः । 'किन्ना-मधेयः किं नामधेयमस्य इति व्याख्यातं प्राक् । 'स्थविराणां वृद्धानां 'सार्थः समूहः तस्य । धुरं धारयति 'धुरन्धरः' नायक इत्यादि व्याख्यात प्राक । चीरं धरतीति चीरधारः । कुत्सितश्चीरधारः 'चीरधारकः' । 'प्रहसनं प्रहासः ।

ननु आक्षेपे। 'अरुन्धती पुरस्कृता अग्रे स्थापिता याभिः तान् दारान् (पत्नीम्)। (आहिताग्न्यादि इति क्तान्तस्य परनिपातः) 'अधिकाय' गुरुत्वेन सम्भाव्य ॥

Notes.—1. जीर्णकूर्चानाम्—जीर्णं कूर्चं श्मश्रुयेषां जीर्णकूर्चाः gray-beards. तेषाम्। There were only two gray-beards there viz, वशिष्ठ and जनक। But by transference of epithets it stands here for the *aged* general. This justifies the plural. This is the विशेष्य here सम्बन्धसामान्ये षष्ठी। 2. अनध्यायः &c.—अधि+इ+घञ भावे अध्याय study. न अध्यायः No study (no lecture). तस्य कारणानि। तेषाम्। सौधातकि appreciates this attributes of the guests, Hence his reverence for these guests. Our text here is from वीरराघव। Vidyasagara reads "आगतमनध्याय-कारणं सविशेषभूतम् अद्य जीर्णकूर्चानाम्"। Explain 'अद्य' जीर्णकूर्चानाम् आगतम् आगमनं 'सविशेषभूतं' विशिष्टप्रकारकम् 'अनध्यायकारणम्'। Translate "To-day the arrival of the grey-beards is a special reason for no-lecture. This does not declare बहुमान for the beards and the next speaker's remark becomes irrelevant (see note 5). Hence we prefer वीरराघव। 3 अपूर्वः—न पूर्वः अपूर्वः new, novel &c. See III. 4 कोऽपि ते—Three of Vidyasagara's manuscripts omit ते which is not desirable. 5. बहुमानहेतुः—बहुमान respect. The respect is expressed by स्वागतम् in Saudhataki's speech. Hence the reading स्वागतम् &c. is to be preferred. सौधातकि thinks highly of the guests because they have given him a holiday ! This appreciation of the guests is novel (अपूर्वं)। It is peculiar (कोऽपि) i.e. I condemn it. 6. चीरधारकः—चीर+धृ+अण कर्त्तरि चीरधारः one clad in rags. चीरधार+क चीरधारक a fellow in rags. "कुत्सिते" इति कः।

7. **अधिष्ठाय—दारान्** is **कर्म** । Comp "**वशिष्ठाधिष्टिता** &c —I, sl. 3. **प्रलपसि**—Such disrespectful talk regarding **वशिष्ठ** is indeed **प्रलाप** ।

(*III*) सोधातकिः—हुं वसिट्ठो [हुं वशिष्ठः] ?

भाण्डायनः—अथ किम् ?

सोधातकिः—मए उण जाणिदं वग्घो वा विओ वा एसोत्ति [मया पुनर्ज्ञातं व्याघ्रो वा वृको वा एष इति] ।

भाण्डायनः—आः किमुक्तं भवति ?

सोधातकिः—तेण परावडिदेण ऍव्व सा वराइआकल्लाणिआ मड़मड़ाइदा [तेन परापतितेन एव सा वराकिका कल्याणिका मड़मड़ायिता] ।

भाण्डायनः—समांसो मधुपर्क इत्याम्नायं बहुमन्यमानाः श्रोत्रियाभ्यागताय वत्सतरीं महोक्षं वा महाजं वा निर्वपन्ति गृहमेधिनः इति हि धर्मसूत्रकाराः समामनन्ति ।

Saud—Hey ! Vasistha ?

Bhand—Who else ?

Saud—But I thought he was a tiger or a wolf.

Bhand—Avaunt ! What is being insinuated ?

Saud—No sooner he came, the poor little heifer uttered the sound **मड़** (i.e, was killed).

Bhand—Authors of the law-codes, respecting the Vedictext that Madhuparka should go with meat, say that house holders have to offer a heifer or a big bull or a big goat to a Brahmana guest versed in the Vedas.

मित— । 'हुम्' इति अनिच्छायाम् ॥ 'पुनः' पक्षान्तरे । मया ज्ञातम्' अवधारितम् । ''वृकः ' तरक्षुरिति व्याघ्रभेदः ॥ 'परापतितेन' सम्प्राप्तेन,

'एव तेन। हेतौ तृतीया। 'कल्याणी' वत्सतरी। कन् स्वार्थे। 'वराकिका' दीना 'कल्याणिका' वत्सतरी मड्मड्ायिता' "मड्" इति "अव्यक्तशब्दं" कृतवती, प्रणान् अत्याक्षीत् इति यावत्। बलिदानार्थं पतिते स्वाङ्गे भिन्न स्कन्धसन्धि. "मड्" इति च शब्दो जातः। स च इह शब्द उपचारात् वत्सतर्या एव कृत इत्युच्यते॥ 'मधुपर्कः मधुमिश्रा 'दधिघृतादिसम्भारः' समांस मांसेन सह दातव्यः "इति आम्नायम्" एतत् श्रुतिवचनं 'बहुमन्यमानाः' आद्रियमाणाः 'धर्मसूत्रकाराः' मन्वादयः 'श्रोत्रियाभ्यगताय' गृहागताय श्रोत्रियाय 'वत्सतरीं' गोवत्सां 'महोक्षं वा' वृषम् वा महाजं वा' बृहन्तं छागं वा 'गृहमेधिनः गृहस्थाः निर्वपन्ति ददति' इति हि इत्येव 'समामनन्ति' संस्मरन्ति'! तत वशिष्ठस्यार्थे वत्सतरीविशसनं शास्त्रसम्मतमेव ततः किमेवं प्रलपसि ?

Notes.—1. हुम—An अव्यय here implying अनिच्छा unwilling ness to admit. 'हुम् इत्यानिच्छाभयस्मरणकोपेषु" इति वर्द्धमानः। 2. ज्ञातम्—ज्ञा+क्तकर्मणि अतीते। The क्त not being in the वर्त्तमानकाल the अनुक्तकर्त्ता does not take षष्ठी and we get मया not मम। 3. वराकिका—वराकी दीना। सा एव इति वराकी+कन् स्वार्थे वराकिका This expresses pity for poor thing. 4. कल्याणिका—कल्याणी heifer वत्सतरी। अल्पा ह्रस्वावा कल्याणी इति कल्याणी+कन् कल्याणिका the little heifer. Here we cannot have अनुकम्पायां कन् because अनुकम्पा is already expressed by वराकिका। 5. मड्मड्ायिता—मड् is an imitation of the sound with which something breaks. This imitative words have to take the affix डाच् by "अव्यक्तानुकरणात् द्व्यजवरार्द्धात् अनितौ डाच्" when इति is not attached to them. Again the word has to be doubled first and then डाच् added ("डाचिद्वे भवतः") । Thus in the sense मड् इति शब्दं कृतवती we have मड्मड्+डाच् क्यष् (नामधातु)

+क्त कर्त्तरि मड्मड्ायिता uttered the sound मड्, i e., the sound of neck-bone breaking. In other words, the sacrificial knife fell on her neck and severed her head. क्त is attached कर्त्तरि because the root मड्मड्ाय is अकर्मक—the कर्म (मड्मड्ा) being inclnded in the धात्वर्थ ('धात्वर्थेनोपसंग्रहात्') । Comp. 'धातोरर्थान्तरे वृत्तेर्धात्वर्थेनोपसंग्रहात्। प्रसिद्धेरविवक्षातः कर्मणोऽकर्मिकाक्रिया॥' मड्मडायिता is usually explained as भक्षिता। This requires the क्त to be in the कर्मवाच्य which is not available after अकर्मक roots. Besides भाण्डायन defends the killing and does not at all refer to eating. Comp "वत्सतरी निर्वपन्ति"। वत्सतरी विशसिता"। 6. मधुपर्क —मधुना पृच्यते इति मधु+पृच्+घञ् कर्मणि। A kind of *sharbet* made of curd, honey, ghi, sugar and water constituting the first offer of welcome to a guest. 7. श्रोत्रिय &c —छन्दः अधीते इति छन्दस्+घन् श्रोत्रियः a Brahmana versed in the vedas. छन्दस् becomes श्रोत्र optionally by निपातन in the rule "श्रोत्रियश्छन्दोऽधीते"। श्रोत्रियश्चासौ अभ्यागतश्च श्रोत्रियाभ्यागतः। तस्मै। सम्प्रदाने ४र्थी। छान्दस also. 8. महोक्षम्—महान् उक्षा इति इमा उक्षन्+अच् समासान्त= महोक्षः। तम्। आ+म्ना+अन्ति=आमनन्ति।

(*IV*) सोधातकिः—भो णिग्गहीदो सि [भोः निगृहीतोऽसि]।

भाण्डायनः—कथमिव?

सौधातकिः—जेण आअदेसु वसिट्ठमिस्सेसु वच्छदरी विससिदा तज्ज एव्व पच्चाअदस्स राएसिणो जणअस्स भअवदा वम्मीएण दहिमहुहि एव्व णिव्वत्तिदो महुवक्को वच्छदरी उण विसज्जिदा [येन आगतेषु वशिष्ठमिश्रेषु वत्सतरी विशसिता,

अद्यैव पर्य्यागतस्य राजर्षेर्जनकस्य भगवता वाल्मीकिना दधि-मधुभिरेव निर्वर्त्तितो मधुपर्कः, वत्सतरो पुनर्विसृष्टा]।

भाण्डायनः—अनिवृत्तमांसानामेवं कल्पमृषयो मन्यन्ते, निवृत्तमांसस्तु तत्रभवान् जनकः।

Saud,—Ha ! You are taken (or worsted, disgraced &c.)

Bhand —How so ?

Saud —For the very day, revered Vasishtha coming, the heifer was killed , but unto the Royal sage Janaka, who had returned, the Madhuparka was gone through by worshipful Valmiki with curd, honey &c. only, while the heifer was let loose.

Bhand —The sages approve of this practice for those (guests) only who have not renounced meat , but honoured Janaka has renounced meat.

मित—। 'निगृहीत-' पराजित ॥ मान्यो वशिष्ठः 'वशिष्ठमिश्राः' नित्यसमास। गौरवे बहुवचनम्। 'विसृष्टा' विमोचिता बन्धनात्। सम्मानार्थं समानीता एव वत्सतरी परं तां तस्मै प्रदर्श्य एव बन्धनात् मुमोच न तु जघान ॥ अनिवृत्तं मांसमेषाम् 'अनिवृत्तमांसाः अपरित्यक्तमांसभोजनाः। तेषाम्। 'कल्पं' शास्त्रविधिं विधानमित्यर्थः मन्यन्ते मुनयः ॥

Notes—1. निगृहीत—निग्रहः often means लाञ्छना disgrace. निगृहीतः disgaced, worsted. 2, विशसिता—वि+शस to kill+क्त कर्म्मणि। 3. दधि &c—The pluraf implies that the other ingredients were also there' 4 अनिवृत्त &c.—Bhandyana could have easily silenced Saudhataki saying that Janaka was rot a श्रोत्रिय। "जन्मना ब्राह्मणः प्रोक्तः संस्कारैर्द्विज उच्यते। विद्यया याति विप्रत्वं त्रिभिः श्रोत्रिय इष्यते ॥" Bhandayana had said—श्रोत्रियाभ्यागताय, so also Saudhataki's report is irre'evant.

(*V*) सौधा—किं णिमित्तं [किं निमित्तम्] ?

भाण्डा—स तदैव सीतादेव्यास्तादृशं दैवदुर्विपाकमुपश्रुत्य वैखानसः संवृत्तः। तथास्य कतिपये संवत्सराश्चन्द्रद्वीपतपोवने तपस्तप्यमानस्य।

सौधा—तदो किं त्ति आअद [ततः किमिति आगतः]।

भाण्डा—चिरन्तनप्रियसुहृदं प्राचेतसं द्रष्टुम्!

सौधा—अवि अज्ज सम्बन्धिणीभिः समं संवुत्तं से दंसणं ण वा त्ति [अपि अद्य सम्बन्धिनीभिः समं संवृत्तमस्य दर्शनं न वा इति] ?

भाण्डा—सम्प्रत्येव भगवता वशिष्ठेन देव्याः कौसल्यायाः सकाशं भगवत्यरुन्धती प्रहिता यत् स्वयम् उपेत्य वैदेहो द्रष्टव्य इति।

Saud.—For what reason ?

Bhand.—He having heard of such an evil turn of fate of queen Sita, that very moment became an anchorite. It is now some years since he has been as such practising penance in the penance-grove of Chandradvipa.

Saud.—Then why has he come (here) ?

Bhand.—To see his dear old friend Prachetasa.

Saud.—Has an interview taken place or not to-day between him and his female relatives by marriage ?

Bhand.—Just now worshipful Arundhati has been sent by mighty Vasishtha to queen Kausalya saying "The king of the Videhas has to be personally approached and seen by you."

मित—। 'किं निमित्तं निवृत्तमांसो जनकः इति पूरणीयम्॥ 'तदैव' सीतापरित्यागकाले एव। 'दैवस्य दुष्टं विपाकं विषमां परिणतिम्। श्रुत्वा।

तेन प्रकारेण वैखानसरूपेण इत्यर्थः। 'सब्रह्मचाः' अतोताः इति शेष। तपः तप्यमानस्य तपः अर्जयतः अस्य ॥ चिरं भवः 'चिरन्तनः' ॥

Notes—1. स तदैव &c—Till then he was all along an आहिताग्नि गृहस्थ। "सङ्कटा ह्याहिताग्नीनाम्" &c. I Sl. 8. वैखानसः He has left his home and became an anchorite. Hence meat has been renounced. 2. तप्यमानस्य—तप + शानच् कर्म-कर्त्तरि। 3. चिरन्तन &c.—चिरम् is an अव्यय meaning "a long time." चिरम्+ट्युल् चिरन्तनः। स चासौ प्रियसुहृच्च। तम्। तं द्रष्टुमागतः। 4. सम्बन्धिनीभिः—Refers to the queen.

(*vi*) सोधा—जधा एदे त्थविरा परप्परं मिलिदा तधा अम्हे वि वडुएहिं समं मिलिअ अणज्झाअमहूसवं खेलन्ता सम्भावेह्म [यथा एते सर्वे स्थविराः परस्परं मिलिताः तथा आवामपि वटुकैः समं मिलित्वा अनध्यायमहोत्सवं खेलन्तौ सम्भावयावः]। (इति परिक्रामतः)।

भाण्डा—तदयं ब्रह्मवादो पुराणराजर्षिर्जनकः प्राचेतसवशिष्ठावुपास्य सम्प्रति आश्रमवहिर्वृक्षमूलमधितिष्ठति। य एषः—

हृदि नित्यानुषक्तेन सीताशोकेन तप्यते।
अन्तः प्रसृतदहनो ज्वलन्निव वनस्पतिः ॥ २ ॥

(इति निष्क्रान्तौ)।

विष्कम्भकः—(Prelude).

Saud.—As all these old people have met one another, so we too meeting with the scholars will celebrate, by playing, the great festival of break in study. (*They go round the stage.*)

Bhand.—Here now the old royal sage Janaka, the discourser on Brahman, having paid his respects to Prachetasa

and Vasishtha, sits at the foot of a tree outside the hermitage. He it is who—

Like the tree (Sami) burning within with fire lurking therein is being tortured at heart by grief for Sita ever clinging here. (2). (*Exeunt*).

Here ends Vishkambhaka.

मित—। अनध्यायरूपं महोत्सवम् क्रीडाभि: 'सम्भावयावः' सम्मानयावः। क्रीडाभिरेव अस्य महोत्सवस्य अनुरूपा सम्भावना भवति॥ 'पुराणश्चासौ राजर्षिश्च'। इतीति। अन्वयः—य एषः अन्तः प्रसृप्तदहनः ज्वलन् वनस्पतिरिव हृदि नित्यानुषक्तेन सीताशोकेन तप्यते। व्याख्या—'यः एषः अन्तः' मध्ये 'प्रसृप्तः' लीनः 'दहनः' अग्निर्यस्य तादृश, अतएव 'ज्वलन्' दह्यमानः 'वनस्पतिः' शमीवृक्ष 'इव हृदि' अन्तः 'नित्यानुषक्तेन चिरलग्नेन 'सीताशोकेन तप्यते' दह्यते सन्तापं भजते वा॥

Notes. 1. आवाम्—भाण्डायन also was one of the pupils of Valmiki. 2. वटुकैः—वटु is a Brahman boy. स्वार्थे कः। 3 तत्—अव्यय implying हेतु। Because he has renounced the world through grief, *therefore* (तत्) he avoids company and is now sitting along at the root of yonder tree to brood over his misfortune. 4. नित्या &c.—अनु सञ्ज क्त कर्म्मणि कर्त्तरि वा=अनुषक्त। नित्यम् अनुषक्तः सप्सुपा। तेन। 5. अन्तः etc.—Usually the whole is treated as a compound. But as हृदि in the first line stands separate, it is better to take अन्तः as uncompounded. 6. विष्कम्भकः—Already explained. See ante.

(*vii*) (ततः प्रविशति जनकः)

जनकः—

अपत्ये यत् तादृग्दुरितमभवत्तेन महता
विषक्तस्तीव्रेण व्रणितहृदयेन व्यथयता।

पट, धारावाही नव इव चिरेणापि हि न मे
निकृन्तन् मर्माणि क्रकच इव मन्युर्विरमति ॥ ३ ॥

(*Then enters Janaka*)

Janaka—Impressed by that great and peculiar mishap which befell my child, and which, keen as it was had pierced my heart and is torturing me, my grief, continuing unceasingly deep like a fresh one, cutting my vitals like a saw, does not indeed cease even after this long time. (3)

(Jan—).

मित—। अपत्ये इति। अन्वयः—अपत्ये यत् तादृक दुरितम् अभवत् महता तीव्रेण व्रणितहृदयेन व्यथयता तेन विषक्तः धारावाही नव इव पटः क्रकच इव मर्माणि निकृन्तन् मे मन्युः चिरेणापि न हि विरमति। व्याख्या 'अपत्ये' सन्ततौ सीतायां 'यत् तादृक्' तथाविधं घोरमित्यर्थः 'दुरितं' 'दुर्व्यापारः सापवादपरित्यागरूपः 'अभवत् महता' विपुलेन 'तीव्रेण' दारुणेन तीक्ष्णेण इत्यर्थः अतएव 'व्रणित' भिन्नं 'हृदयं येन तथाविधेन अतश्च 'व्यथयता' क्लिश्नता तेन' दुरितेन विषक्तः हृदमारोपितः 'धारावाही' सततं प्रवर्त्तमानः नव इव पटः' अचिरजात इव तीव्रः 'क्रकच इव' करपत्रमिव 'मर्माणि निकृन्तन्' जीवस्थानानि दारयन् मे मन्युः शोकः 'चिरेणापि' कालात्ययेऽपि 'न हि विरमति' नैव शाम्यति॥

Notes. 1. दुरितम्—दुष्टम् इतं पातम् an ugly situation, hence a disaster or disservice 2. विषक्तः— विशेषेण सक्तः लग्नः। सन्ज+क्त कर्म्मणि सक्त attached, implanted, This supposes that तेन has अनुक्ते कर्त्तरि टेया। तेन refers to दुरित। 3 व्रणित &c.—व्रण to pound + णिच् स्वार्थे (चुरादि) + क्त कर्म्मणि व्रणितम् pounded ; hence *pierced*. The root is व्रण गात्रविचूर्णने। This is a bit awkward in the case of the heart, hence we change the meaning to भेदने। But विचूर्णित हृदयम् does not sound more harsh than

"दलति गाढोद्वेगम्" (III, sl. 13.) 4. चिरेण—चिर a long time. तेन । अपवर्गे ३या । We have taken this with विरमति । चिरेणापि—इव is also good and is supported by अनेकसंवत्सरातिक्रमेऽपि. . प्रत्यग्र इव of the next para. 5. विरमति—"व्याङ्परिभ्यो रमः" इति परस्मैपदम् । It has to be seen if नव इव and न विरमति are not tautologous.

(*viii*) कष्टम्! एवं नाम जरसा, दुःखेन च दुरासदेन, भूयः पराकसान्तपनप्रभृतिभिस्तपोभिरात्तरसधातु· अनुपयुज्यमानो नाद्यापि मे दग्धदेहः पतति। अन्धतामिस्रा ह्यसूर्या नाम ते लोकास्तेभ्यः प्रतिविधीयन्ते ये आत्मघातिनः इत्येवमृषयो मन्यन्ते। अनेकसंवत्सरातिक्रमेऽपि च प्रतिक्षणपरिभावना स्पष्टनिर्भासः प्रत्यग्र इव दारुणो न मे दुःखसंवेगः प्रशाम्यति। अयि मातर्देवयजनसम्भवे देवि सीते, ईदृशस्ते निर्माणभागः परिणतो येन लज्जया स्वच्छन्दमाक्रन्दितुमपि न शक्यते। (ज—)।

Jan.—O woe! My cursed frame, with sap and substance dried up to such extent indeed by age and unspeakable grief, then again by austerities such as Paraka Santapana etc., and partaking of no food, even now does not drop down dead. Those regions, sunless and of blinding gloom [Or—named Asurya with nights of blinding gloom] are indeed alloted to those who kill themselves—so say the Rishis, with a vivid perception through ceaseless brooding, the shock of my grief, unbearable like new, does not abate even after the expiry of many years. O mother, O divine Sita, sprung from the sacrificial ground of the Gods, thy lot at

creation has taken such a turn that, through shame it is not possible even to weep freely. (Jan—)

मित—। 'कष्टम्' अहो दुःखम्। 'अद्यापि' मे दग्धदेहः' हतशरीरं 'न पतति' विनिपातं न गच्छति न नश्यति इत्यर्थ। किमस्ति निपातकारणम् इत्याह—'जरसा' वार्द्धकेन 'एवं ईदृशम् अतिमात्रमिति यावत् 'आत्तः गृहीतः शोषित इत्यर्थ 'रस.' शोणितादिद्रवपदार्थः धातुः' मांसादिघनपदार्थश्च यस्य अतएव पतितु' योग्यः दग्धदेह.। जराजीर्णोऽपि क्वचित् चिरंजीवति—न केवलं जराजीर्णः 'दुरासदेन' दुःसहेन दुःखेन च आत्तरसधातुः तथापि 'न पतति'। चित्रमेतत् - 'भूयः' पुनः 'पराकसान्तपनप्रभृतिभि ' कष्टभोजनविधानैः 'तपोभि' यत्रे आत्तरसधातु शोषितशरीरोपादानः अद्यापि न पतति'। मन्ये भवान् मतादीनाम् अत्रकारोपु प्रचुरं भुङ्क्ते ततो न देह' पतति—'अनुपयुज्यमान' अभोजनमतत्यपि न पतति। यद्येवम् आत्मानं पातयतु भवा ‿ —ये जना 'आत्मघातिनः तेभ्यः' देहपातात परम् 'अन्धा' दृष्टिविघातिका 'तामिस्रा रात्रि येषु मध्यगताः असूर्य्याः सूर्य्यसञ्चारशून्या. 'नाम लोका प्रतिविधीयन्ते यावत्तेन निरुप्यन्ते 'इत्येवम् ऋषयो मन्यन्ते' अतो नात्मानं पातयामि'। अनेकसंवत्सरातिक्रमेऽपि च' विरेणापि 'प्रतिक्षणं' निरन्तरम् 'परिभावनया अनुध्यानेन स्पष्ट' स्फुटः निर्भासः' दीप्तिः यस्य तादृशः धारावही इति यावत् प्रत्यग्र इव दारुण' इव पटु : 'मे दुःखवेगः न प्रशाम्यति' न विरमति। 'निर्माणभागः' सृष्टिकाले विधात्रा विहितं भागम्। 'ईदृश परिणत' एवं जुगुप्सितेन परिणामेन योजितः अपवादकलङ्कित इत्यर्थः॥

Notes—1. दुरासदेन—दुःखेनआसद्यते इति दुर्+आ+सद्+खल कर्म्मणि=दुरासदम् unapproachable, unbearable. Co. 'दुरासदवनज्यायान् गम्यस्तुङ्गोपि भूधरः"—Kirat XI. 2. पराक &c.—पराक is a fast for 12 days. 'द्वादशाहोपवासेन पराकः परिकीर्त्तितः।" सान्तपन is thus defined "गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम्। एकरात्रोपवासश्च कृच्छ्रं सान्तपनं विदुः॥ 3. अन्ध &c.—अन्धयति इति

अन्ध + णिच् स्वार्थे + अच् कर्त्तरि = अन्धा blinding. तमः अस्ति अस्याम् इति तमस् + र मत्वर्थे = तमिस्त्रा night = रात्रिः। तमिस्रा एव इति तमिस्रा + अण् स्वार्थे प्रज्ञादि = तामिस्रा। अन्धा तामिस्रा येषु ते having one continuous night of a blinding gloom. 4. असूर्याः – This is perhaps better taken as the proper name of the regions. They are known as (नाम) असूर्य and are ever pervaded by a blinding gloom. Also Cp 'असुर्यानाम लोका.' in Isa. 3. 5 प्रतिविषीयन्ते—दीयन्ते (कर्म्मवाच्य)। अनेक &c.—This is a paraphrase of the second half of sl. 3. above. Thus अनेक &c. corresponds to चिरेणापि, प्रतिक्षण etc. to धारावाही, प्रत्यग्र etc. to नव इव पटु । 6. निर्माणभाग.—Explained in Tika. I am ashamed to weep because of the scandal attached to your banishment.

(ix) (ज—) हा हा पुत्रि,
अनियतरुदितस्मितं विराजत्—
कतिपयकोमलदन्तकुट्मलाग्रम् ।
वदनकमलकं शिशोः स्मरामि
स्खलदसमञ्जसमुग्धजल्पितं ते ॥ ४ ॥ (ज—) ।

Jan.—Alas ! Alas ! My daughter,

I constantly recall the little lotus-face of thine as a child, with causeless cry and laughter with the lips of a few soft bud-like teeth visible and with a lisping incoherent and charming prattle. (4).

मित — । अनियतेति । अन्वयः—शिशोः ते अनियतरुदितस्मितं विराजत्कतिपयकोमलदन्तकुट्मलाग्रं स्खलदसमञ्जसमुग्धजल्पितं वदनकमलकं स्मरामि । व्याख्या—'शिशोः ते' बालिकायाः तव 'अनियतं' नियमरहितम् अहेतुकमित्यर्थः 'रुदितं' रोदनं 'स्मितं' हासश्च यस्मिन् तथाविधम् किञ्च

विराजन्ति' शोभमानानि 'कतिपयानि' कियन्ति 'कोमलानि दन्तकुड्मलाग्राणि दशनमुकुलाग्राणि यस्मिन् तत् पुनश्च 'स्खलत्' अविस्पष्टम् 'असमञ्जसम्' असंलग्नं 'छरघ' मधुरं जल्पितं भाषितं यस्मिन् तथाविधं वदनकमलकं मुखपद्मं 'स्मरामि' ॥

Notes—1. अनियत &c.—नि + यम क्त कर्म्मणि = नियत restricted. न नियते unrestricted, fitful. Vidyasagara has *causeless*. रुदितञ्च स्मितञ्च रुदितस्मिते कर्मधा। अनियते रुदितस्मिते यस्मिन्। 2. विराजत् etc.—दन्ता कुड्मलाः इव दन्तकुड्मलाः। तेषाम् अग्राणि only the tips are visible. The laugh and the cry expose the tips. See Tika also. 3. स्मरामि—I remember. It constantly comes up before my vision and the memory pains me. 4. स्खलत् etc —One of Vidyasagara's manuscripts reads मञ्जु for मुग्ध। Remembering Bhavabhuti's preference for alliteration I am inclined to prefer मञ्जु।

(*x*) (ज—) भगवति वसुन्धरे, सत्यमतिदृढासि।
त्वं वह्निर्मुनयो वशिष्ठगृहिणी गङ्गा च यस्या विदु-
र्माहात्म्यं यदि वा रघोः कुलगुरुर्देवः स्वयं भास्करः।
विद्यां वागिव यामसूत भवती तद्वत् दैवतं
तस्यास्त्वं दुहितुस्तथा विशसनं किं दारुणेऽमृष्यथाः ॥५॥

Jan.—O mighty Earth, you are really very hard-hearted.

Why did you allow, O cruel one, the immolation, in that fashion of that daughter of yours whose greatness yourself, Fire, the sages, Vasishtha's wife, and Ganga too know though certainly god Bhaskara himself, the ancestor of Raghu's race, knows and whom you brought forth as the goddess of learning does knowledge, and who was indeed a divinity like the goddess herself? (5).

मित—। त्वमिति। अन्वयः—हे दारुणे, यस्या महात्म्यं यदि वा रघोः कुलगुरुः स्वयं देवः भास्करः (वेत्ति), त्वं वह्निः मुनयः वशिष्ठगृहिणी गङ्गा च विदुः, यां भवती विद्यां वागिव असूत , या तु तद्वत दैवतम् , तस्याः दुहितुः तथा विशसनं किं त्वम् अमृष्यथा । व्याख्या—हे 'दारुणे' कठिने 'यस्य ' सीतायाः 'महात्म्यं'महिमानं 'यदि च रघोः कुलगुरुः' वंशकर्त्ता 'स्वय देवो भास्करः' सूर्यः वेत्ति अघस्तनेन पुनः 'त्वं बह्निः सनय बशिष्ठगृहिणी' अरुन्धती 'गङ्गा च विदुः' जानन्ति [विन्थ इति न्याय्यम्] 'यां' सीतां भवती त्वं 'विद्यां' देवी 'वागिव' सरस्वतीव 'असूत' सूतवती 'या तु 'तद्वत्' सरस्व तीव 'दैवतं 'तस्या' दुहितुः सीतायाः 'तथा' तेन प्रकारेण घोरेण विधिना 'विशसनं मारणं 'कि त्वम् अमृष्यथाः सोढ़वती ॥

Notes —2. *Remark*—Here those who are aware of Sita's greatness are divided into two classes. In one class is Sun himself, the worshipped of all, who transcends all else. In the other class are lesser beings Earth त्वम्), Fire, the sages, Vasishtha's wife and गङ्गा। I विदुः—विद्+लट् अन्ति (उस्). This is irregular. This rule "युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः" requires the मध्यमपुरुष here because we have युष्मद् as उपपद , here वित्थ the correct form, does not preserve the metre, so it cannot be taken as a copyists' slip. Call it a poetical license. 3. रघोः &c.—it is curious—वशिष्ठ is omitted from the list though वशिष्ठगृहिणी is there. We therefore suggest that the list of higher personages contain two names viz. रघोः कुलगुरुः i.e. वशिष्ठः and भास्करः। Construe—'यदि रघोः कुलगुरुः' वशिष्ठः 'स्वयं देवो भास्करो वा' सविता च। वा is often used in the sense of च। 4. तद्वत्—तथा (वाग्देव्या) तुल्यं वर्त्तते इति तद्+वति। तद् here refers to वाच। तद्वत् वाग्देवता-

तुल्या । 5 दैवतम्—देवता एव इति देवता+अण् । क्वचित् स्वार्थिकाः प्रकृतितो लिङ्गवचनान्यतिवर्त्तन्ते" इति क्लीबत्वम् । मृषदिवादि+लङथास्—अमृष्यथाः ।

(xi) नेपथ्ये—इत इतो भगवतीमहादेव्यौ ।

जनकः (दृष्ट्वा)—अये ! गृष्टिनोपदिश्यमानमार्गा भगवत्यरुन्धती । (उत्थाय) कां पुनर्महादेवीत्याह ? (निरूप्य) हा कष्टं महाराजदशरथस्य धर्मदाराः प्रियसखी मे कौसल्या ! क एतत् प्रत्येति सैवेयमिति ?

आसीदियं दशरथस्य गृहे यथा श्रीः
श्रीरेव वा किमुपमानपदेन सैषा ।
कष्टं बतान्यदिव दैववशेन जाता
दुःखात्मकं किमपि भूतमहो विपाकः ॥ ६ ॥

(IN THE DRESSING ROOM)—This way, worshipful lady and great queen this way

Janaka (*Espying*)—Hey ! (She is) Worshipful Arundhati with the way being shown her by Gristi (*Rising*) Whom again does he address as Mahadevi ? (*Noticing*) Alas ! Strange ! She is my dear friend Kausalya the lawfully wedded wife of the great king Dasaratha ! Who can believe that this is she herself ?

In the house of Dasaratha this one was like the goddess of fortune ; or the goddess of fortune herself , why the epithet of comparsion ? O pity ! This one the same Kausalya, Alas ! has become some strange creature with grief for its body. Ho What a change ! (6). (Jan—).

मित—। 'गृष्टिः' इति कञ्चुकिनो नाम । 'उपदिश्यमानः' निर्दिश्यमानः 'मार्गः पन्थाः यस्याः सा । धर्मार्था दाराः धर्मदाराः पत्नी ॥ आसीदिति । अन्वयः—दशरथस्य गृहे यथा श्रीः इयम् आसीत् । श्रीः एव वा,

उपमानपदेन किम् ? कष्टं वत ! सा एषा दैववशेन अन्यत् किमपि दुःखात्मकं भूतं जाता इव। अहो विपाकः। व्याख्या—'दशरथस्य गृहे यथा श्री. लक्ष्मीः आसीत् तथाइयं कौशल्या 'आसीत्' द्वितीया श्रीरिव इयं तत्र अलक्ष्यत । 'श्रीः एव वा' अथवा इयं कौशल्या एव तत्र श्रीः आसीत् न हि श्रीरिव इयम्। 'उपमानम्' उपमा। तस्य 'पदेन' तद्बोधकेन यथाशब्देन 'किम्' ? निष्प्रयोजनो यथाशब्दः। "आसीदियं दशरथस्य गृहे श्रीः" इत्येवोच्यताम्। 'कष्टं वत'=अहो कष्टम्। 'सा एषा' कौशल्या 'दैववशेन दुरदृष्टप्रभावात् 'अन्यत् किमपि' अपरम् अविज्ञातं किञ्चित् 'दुःखात्मकं' दुःखस्वरूपं दुःखोपादानकल्पितं 'भूतं' सत्त्वं 'जाता इव' तद्रूपेण परिणता इव। 'अहो विपाकः' हा विपरिणतिः।

Notes.—1. अरुन्धती—He recognized अरुन्धती but not कौशल्या though दृष्ट्वा implies that both were seen. 2. कां पुनः &c.—He is now looking at कौशल्या alone, yet he cannot make her out. Hence the query—"Who is this other one addressed as महादेवी" ? 3. निरूप्य is careful scrutiny. Recognition has now come and he exclaims—हा कथम् &c. 4. धर्मदाराः—धर्म is धर्म्मं कर्म्म। These have to be performed in company with a lawfully wedded wife. Hence expound धर्मार्था, धर्म्मप्रयोजना दारा &c, शाकपार्थिवादिः। Malli expounds such compounds as धर्म्मस्य दाराः &c. like अश्वघासः। 4. उपमान &c.—उप+मा+ल्युट् भावे उपमानम् comparison उपमा। It is different from उपमान—the standard of comparison—which is got with ल्युट् करणे। 5. दुःखात्मकम्—आत्मन् here is स्वरूप। दुःखम् आत्मा स्वरूपम् अस्य whose essence is दुःख, i e., which is दुःखमय।

(*xii*) (जः—) अयमपरः पापो दशाविपर्यासः।
य एव मे जनः पूर्वमासीन्मूर्त्तो महोत्सवः।
क्षते क्षारमिवासह्यं तस्यैव दर्शनम्॥ ७॥

(Jan—) Here is another vile reversal of attitude (mental condition).

Of that very person who was formerly high festivity incarnate to me, the sight has now become unbearable like salt in an ulcer (7).

मित— । 'पापः' पापी लक्षणया अनभिप्रेतः । 'दशायाः' मनोगतस्य भावस्य विपर्य्यासः परिवर्त्तनम् ॥ य इति । अन्वयः—य एव जनः पूर्वं मे मूर्त्तो महोत्सव आसीत् तस्यैव दर्शनं क्षते क्षारमिव असह्यं जातम् । व्याख्या सुगमा । 'पूर्वं' सीताविवासनात् पूर्वम् । मूर्त्तः 'मूर्त्तिमान्' । 'क्षारं लवणम्' ।

Notes —1. दशा &c —दशा is अवस्था which may be mental also विपर्य्यास *reversal* as in 'विपर्य्यासं यातो घनविरलभावः क्षितिरुहाम्' [II. sl. 27]. 2 मूर्त्तः—मूर्च्छ्+क्त कर्त्तरि=मूर्त्तः embodied. 3. महोत् सवः—महान् उत्सवः इति महोत्सवः—"आन्महतः समानाधिकरणजातीययोः" इति महत्शब्दस्थाने महादेशः । Hence her sight was very much अभिप्रेत । 4. क्षारम्—क्षार salt. The neuter use of क्षार is against पाणिनि । The rule "रोपध" makes it masculine. 5. असह्यम्—सोढुं शक्यम इति सह+यत् कर्म्मणि सह्यम् bearable, न सह्यम् । Hence her sight has become अनभिप्रेत । The change from अभिप्रेत is a complete reversal (दशाविपर्य्यास) ।

(*xiii*) (ततः प्रविशति अरुन्धती कौशल्या कञ्चुकी च)

अरुन्धती—ननु ब्रवीमि "द्रष्टव्यः स्वयमुपेत्य वैदेहः" इत्येष वः कुलगुरोरादेशः अत एवाहं प्रेषिता । तत् कोऽयं पदे पदे महाननध्यवसायः ?

कञ्चुकी—देविसंस्तम्भयात्मानम्, अनुरुध्यस्व भगवती वशिष्ठस्यादेशम्, इति विज्ञापयामि ।

कौशल्या—एरिसे काले मिहिलाधि देवो दट्टव्वो त्ति समं एव्व सव्वदुक्खाइं समुब्भवन्ति, ण सक्कणोमि उद्घट्टमानमूलबन्धणं हिअअं अवत्थाविदुं [ईदृशे काले मिथिलाधिदेवो द्रष्टव्य इति सममेव सर्वदुःखानि समुद्भवन्ति, न शक्नोमि उद्घट्टमानमूलबन्धनं हृदयमवस्थापयितुम्]।

(*Then enter Arundhati, Kausalya and Kanchukin*)

Arundhati—well, I tell you. "The king of the Videhas has to be personally approached and seen by you" this is the command of your family preceptor, for that very reason I have been sent here. Then what towering irresolution is this at every step?

Kanchukin—Queen, I submit that you should steady yourself and respect the command of mighty Vasishtha

Kausalya—My sorrows, all of them indeed, reappear simultaneously at (the thought) that the lord of Mithila has to be seen at such a time. I cannot steady my heart the ligatures at the very bottom of which are being snapped.

मित—। 'ननु' आक्षेपे। 'उपेत्य' समीपे गत्वा। 'अध्यवसायः' आग्रहः। 'अनध्यवसायः' अनिच्छा। 'पदे पदे प्रतिपदक्षेपम्। 'कोऽयम्' अनध्यवसायः निन्द्योऽयमनध्यवसायः। एषगुरोरादेश तथापि नेच्छसि द्रष्टुमित्यनुचितम् ॥ संस्तम्भय स्थिरीकुरु 'अनुरुध्यस्व सम्मानय ॥ 'ईदृशे काले' सति सर्वनाशे यदा तस्य कन्या रन्तं विहापितं तदा इत्यर्थं मन्ये 'सर्वाणि दुःखानि सममेव' युगपदेव 'समुद्भवन्ति' पुनरुपजायन्ते। शोकक्षोभाच्च 'उद्घटमानम्' उन्मथ्यमानं मूलबन्धनम्' अन्तस्तलग्रन्थिः यस्य तादृशं 'हृदयं चित्तम् अवस्थापयितुं' स्थिरीकर्त्तुं 'न शक्नोमि' ॥

Notes.—1. ननु &c.—Evidently अरुन्धती has been remonstrating with कौशल्या all the way for her unwillingness to see जनक now।

2. तत् कोऽयम् &c —Since the कुलगुरु commands, it does not look well for you to hesitate. 3. संस्तम्भय—The Kanchukin has noticed her emotion. It is not perverseness that keeps her away from जनक, but as she explains, at the thought of seeing him, all the miseries of her life do as if come up simultaneously (समम्) to her.

(*iv*) अरुन्धती—अत्र कः संदेहः ?

सन्तानवाहीन्यपि मानुषाणां दुःखानि सद्बन्धुवियोगजानि ।
दृष्टे जने प्रेयसि दुःसहानि स्रोतःसहस्रैरिव संप्लवन्ते ॥८॥

Arun—What doubt can there be in it ?

Man's sorrow, arising from the loss of good friends, though flowing continuously become unbearable on some dear one being seen and gush forth as if in thousands of streams. (8)

मित— । 'अत्र' अस्मिन् विषये "सर्वदुःखानि समुद्भवन्ति" इत्येतत्प्रति सन्तानेति आह। अन्वय —मानुषाणां सद्बन्धु वियोगजानि दुःखानि सन्तानवाहीन्यपि प्रेयसि जने दृष्टे दुःसहानि (सन्ति) स्रोतःसहस्रैरिव संप्लवन्ते। व्याख्या—'मानुषाणां सद्बन्धूनां सहृद्रत्नानां 'वियोगात्' विनाशात् 'जातानि दुःखानि 'सन्तानेन' अविच्छेदेन 'वहन्ति' प्रवर्त्तमानानि अपि 'प्रेयसि' प्रियतरे 'जने दृष्टे अतिदुःसहानि' सोढुमशक्यानि स्रोतःसहस्रैरिव' संख्यातीतधाराभिरिव 'संप्लवन्ते' समुच्छलन्ति ॥

Notes 1. सन्तान &c—सम्+तन+घञ् भावे सन्तानः continuity. सन्तानेन वोढुं शीलमेषाम् इति सन्तान+वहणिनि कर्त्तरि ताच्छील्ये। Flowing continuously, i.e., they are being borne in silence. 2. सद्बन्धु &c —सन् बन्धुः सद्बन्धुः। वि+युज+घञ् भावे वियोगः loss. &c. 3. प्रेयसि—अतिशयेन प्रियः इति प्रिय+ईयसुन्प्रेयान्। तस्मिन्। Qual, जने which has भावे ७मी। No comparison is implied. दुःसहानि—दुर्+सह+खल कर्म्मणिदुःसह। They were

bearable so long, but the sight of some dear one makes them unbearable cp, "स्वजनस्य हि दु खमग्रतो विवृतद्वारमिवोपजायते" —Kalidasa. 5. स्रोतसहस्रै :—सहस्र is not actually a thousand but merely a large number स्रोतसां सहस्राणि। तैः। ३या करणे।

(१४) कौसल्या—कहं वच्छाए वहूए एव्वं गदे तस्स राएसिणो मुहं दंसेम्ह [कथं वत्साया वध्वा एवं गते तस्य राजर्षे मुखं दर्शयामः] ?

अरुन्धती—

एष वः श्लाघ्यसम्बन्धी जनकानां कुलोद्वहः ।
याज्ञवल्क्यो मुनिर्यस्मै ब्रह्मपारायणं जगौ ॥९॥

Kaus.—Such a fate having befallen our dear daughter-in-law how can I show my face to that royal sage ?

Arun.—Here is your worthy relation, mainstay of the house of Janaka, unto whom the sage Jajnyavalkya sang the Vedas in their totality (9)

मित — । 'एव गते' ईदृशे प्राप्ते, घोरे विशसने जाते इत्यर्थः । 'राजर्षेः' जनकस्य । सम्बन्धमात्रविवक्षया षष्ठी ॥ इति । अन्वयः—एष वः श्लाघ्यसम्बन्धी जनकानां कुलोद्वहः यस्मै मुनिः याज्ञवल्क्यो ब्रह्मपारायणं जगौ । व्याख्या—'एषः' दृश्यमान. 'वः श्लाघ्यः सम्बन्धी' स्तुत्यो वैवाहिकः जनकानां 'जनकवंशीयानां' कुलोद्वहः कुलधुरन्धरो राजर्षिर्जनकः 'यस्मै' यमभिप्रेत्य मुनि याज्ञवल्क्यः ब्रह्मणो' वेदस्य पारायणं पारगमनं साकल्येन पाठमित्यर्थः 'जगौ' गीतवान् । यंमुनिर्याज्ञवल्क्यो आदित आरभ्य अन्तंयावत् वेदानध्यापयामास इत्यर्थः ॥

Notes,—1. मुख &c—I am ashamed to show my face to him. 2. एष वः &c—They have now come up to Janaka. This an introduction—अरुन्धती introduces जनक to कौसल्या—not a

reply to Kausalya's remark above. 3. &c—श्लाघ्य &c,—श्लाघ+यत् कर्म्मणि श्लाघ्य: one to be proud of &c 4. जनकानाम्—जनक here stands for all the followers of जनक। 5. यस्मै—चतुर्थी सम्प्रदाने by the rule "कर्म्मणा यमभिप्रैति स सम्प्रदानम्"। 6. ब्रह्म-पारायणम्—पारस्य अयनं पारायणम् reaching of the other end. But it has a teachnical senge ; crossing a river, or a country is not पारायणम्। It is restricted to mean the reading of a book from first to last. Hence it is a संज्ञाशब्द। न becomes ण by the rule "पूर्वपदात संज्ञायामगः"। Now See Tika 7. जगौ He sang Reading is here singing. याज्ञवल्क्य read with him the entire Vedas. याज्ञवल्क्य got the Vedas from the sun himself and he communicated his knowledge to जनक। The fact is a point of no small honour to जनक। Hence श्लाघ्य-सम्बन्धी।

(*xvi*) कोशल्या—एसो स महाराअस्स हिअआनन्दो वच्छाए वहूए पिदा राएसी। हद्धी हद्धी सम्भाविदह्मि अणुवत्थिदमहूसवे दिअहे। हा देव्व सव्वं एव्व तं णत्थि (एष स महाराजस्य हृदयानन्दः वत्साया वध्वाः पिता राजर्षिः। हा धिक्, हा धिक् सम्भावितास्मि अनुपस्थितमहोत्सवे दिवसे। हा देव सर्वमेव तत् नास्ति !

जनकः (उपसृत्य)—भगवत्यरुन्धति वैदेहः सीरध्वजोऽभिवादयते।

यया पूतम्मन्यो निधिरपि पवित्रस्य महसः
पतिस्ते पूर्वेषामपि खलु गुरूणां गुरुतमः।

त्रिलोकीमङ्गल्यामवनितललोलेन शिरसा
जगद्वन्द्यां देवीमुषसमिव वन्दे भगवतीम् ॥१०॥

Kaus.—Here is he, the royal sage, the heart's delight of the great king, the father of our dear daughter-in-law. Alas ! Alas ! I am honoured on a day when no great joy has come up to me O fate, all that indeed exists no longer.

Jan (*Approaching*)—Worshipul Arundhati, Siradhwaja the king of Videha salutes you.

With my head going down to the earth's surface I salute your worshipful self, adorable of the worlds like divine Usas the benefactor of the three worlds, by whom your husband considers himself, sanctified though he is an abode of holy light and is the great preceptor of even the old preceptors. (10)

मित—। 'हृदयस्य आनन्दः' आनन्दकरः राजर्षिः। 'सम्भाविता' सम्भाविता दर्शनदानेन इति शेषः। अनुपस्थितः अनागतः 'महोत्सवः' परमानन्दः यस्मिन् तस्मिन् 'दिवसे' काले। दृष्टेऽस्मिन् आनन्दमनुभवति स्म महाराज., मया पुनरद्यायं दृष्टः आनन्दस्तु नागतो मे इत्यर्थः। 'सर्वमेव तत्' पूर्वानुभूतं नास्ति सर्वं विपरीतमधुना जातमित्यर्थः॥ वैदेहः' विदेहानां र जा 'सीरध्वजः' जनकः॥ यत्रेति। अन्वयः—अवनितललोलेन शिरसा त्रिलोकीमङ्गल्यां देवीम् उषसमिव जगद्वन्द्यां भगवतीं वन्दे, यया पवित्रस्य महसः निधिरपि पूर्वेषां गुरूणां गुरुतम. अपि ते पतिः पूतम्मन्यः खलु। व्याख्या— अवनितले भूपृष्ठे 'लोलेन चलितेन 'शिरसा त्रिलोक्याः त्रिभुवनस्य 'मङ्गल्यां प्रबोधविधानेन मङ्गलकरीं 'देवीम् उषसमिव प्रातः-सन्ध्यामिव 'जगद्वन्द्यां' सर्वलोकपूज्यां भगवतीं' समग्रमाहात्म्यमयीं' त्वां वन्दे अहं नमामि 'यया' भगवत्या स्वयं 'पवित्रस्य महसः पूतस्य तेजसः निधिः अपि' आस्पदमपि 'पूर्वेषां प्राचीनानां 'गुरूणां' याज्ञवल्क्यप्रभृतीनां 'गुरुतमः अपि पूज्यतमः अपि 'ते पतिः भर्ता वशिष्ठ 'पूतन्मन्यः खलु आत्मानं पवित्रमेव मन्यमानः ब्रह्मपुत्रः स्वयं वशिष्ठोऽपि भवत्या पूतः तद्भवतीं तादृशीं त्वां वन्देइत्यर्थः।

Notes—1. हृदयानन्दः—हृदयम् आनन्दयति इति हृदय+आ+नन्द+णिच्+अण् कर्त्तरि। 2. सम्भाविता &c.—I am honoured by his sight, but no joy greets me. The reason follows. 3. सर्वमेव etc.—This is because the old state of things (सर्वमेव तत्) has changed (नास्ति)। 4. पूतम्मन्यः—पूतमात्मानं मन्यते इति पूत+मन+खश कर्त्तरि। 5. त्रिलोकी etc.—मङ्गले साध्वी इति मङ्गल+यत् स्त्रियां मङ्गल्या, benefactress. त्रयाणां लोकानां समाहारः त्रिलोकी। त्रिलोक्याः मङ्गल्या, ताम्। Or त्रिलोकीमङ्गले साध्वी ताम्। This is taken with both उषसम् and भगवतीम्। It seems better to make it qualify उषसम् only. उषस् is त्रिलोकी मङ्गल्या because she rouses all people from the stupor of sleep and purifies all. 6. उषसम्—उषस् here is the presiding deity of the dawn called पितृप्रसू। It is then feminine. 'उषः प्रत्युषसि क्लीवं पितृप्रस्वाञ्च योषिति' इति मेदिनी।

(*XVII*) अरुन्धती—परं ज्योतिस्ते प्रकाशताम्, अथ त्वां पुनातु देवः परोरजाः य एष तपति।

जनकः—आर्य्ये गृष्टे अपि कुशलमस्याः प्रजापालमातुः ?

कञ्चुकी (स्वगतम्)—निरवशेषमतिनिष्ठुरमुपालब्धाः स्मः। (प्रकाशम्) राजर्षे अनेनैव मन्युना चिरपरित्यक्तरामभद्रमुखचन्द्रदर्शनां नार्हसि त्वं दुःखयितुमतिदुःखितां देवीम्। रामभद्रस्यापि दैवदुर्नियोगः कोऽपि यत् किल समन्तात् प्रवृत्तबीभत्सकिंवदन्तीकाः पौरजानपदा नाग्निशुद्धिम् अल्पकाः प्रतिपद्यन्ते इत्यतो दारुण-मनुष्ठितम्।

Arun.—May the Light Supreme appear unto you ; may the god that transcends Rajas—This one that shines—sanctify you.

Jan.—Noble Gristi, is it all well with this mother of the guardian of his subjects ?

Kanch (*To himself*)—We have been soundly and most cruelly rebuked. (*Aloud*) O royal sage it behoves you not to grieve the much-grieved queen by whom from this very grief, the sight of the moon-face of Ramabhadra has been long shunned. Of Ramabhadra again it was an inconceivable misdirection by destiny that this cruel deed was done because the mean townsmen and villagers, through whom disgusting slander spread all round, would not accept the purification by Fire.

मित—। 'परं' सर्वोत्तमं 'ज्योतिः' तेजः परब्रह्म इत्यर्थः। 'प्रकाशताम्' आविर्भवतु। ब्रह्मदर्शनं ते भवतु इत्यर्थः। 'रजसः' रजोगुणस्य 'परः' दूरवर्त्ती 'परोरजाः' रजोव्यतिरिक्तः' इत्यर्थः। 'य एष तपति इति परमात्मस्वरूपः देवः सविता लक्ष्यते॥ 'प्रजापालस्य' प्रजारञ्जनतत्परस्य रामस्य। प्रजारञ्जनार्थं साध्वीं पत्नीं त्यक्तवतः इत्याक्षेपः। कौसल्यां प्रति साक्षात् कुशलप्रश्नः परिहृतः इति कलुषता हृदयस्य॥ 'निरवशेषं' यथा तथा 'उपालब्धाः' तिरस्कृताः। "प्रजापाल" इत्यनेन तिरस्कारस्य विषयः समग्र एव उक्तः कोऽपि नावशिष्यते। 'अतिनिष्ठुरं यथा तथा उपालब्धाः। उक्तिप्रकारश्च कौशल्याया इति वक्तव्ये प्रजापालमातुरिति नितरां कर्कश इत्यर्थः 'अनेनैव सीताविवासनकृतेन 'मन्युना' शोकेन 'चिरं' दीर्घकालं 'परित्यक्त' रमभद्रस्य मुखचन्द्रदर्शनं यया ताद्दशीम्। 'समन्तात्' सर्वासु दिक्षु 'प्रवृत्ता प्रचारिता 'बीभत्सा' जुगुप्सिता 'किंवदन्ती' 'अपवादः येभ्य ते 'अल्पकाः क्षुद्राः 'पौरजानपदाः अग्निशुद्धिं' न प्रतिपद्यन्ते नाङ्गीकुर्वन्ति 'इत्यतः' एतस्मात् हेतोः 'दारुणं' सीतापरित्यागरूपं घोरं कार्य्यम् 'अनुष्ठितम्'। एष च 'रामभद्रस्य कोऽपि अचिन्तनीयः दैवकृतमहो दुर्नियोगः दुर्व्यापारः। दैवेन परतन्त्रो राम एवमकरोत् मृष्यतां तस्य तत्॥

Notes—1. परोरजाः—See परःसहस्रा, 1, sl. 15. and Kir xiii. 2. प्रजापाल मातु.—प्रजाः पालयतीति प्रजा+पा+णिच्+अण कर्त्तरि=

प्रजापाल. । Refers to राम । तस्यमाता । तस्य । He does not address कौसल्या directly which shows estrangement. This is a rebuke (see next). 3. निरवशेषम्—अवशिष्यते इति अव+शिष+घञ् कर्म्मणि अवशेष: remainder. निर्गत: अवशेष: अस्मात । तद् यथा तथा । All has been said that could be said against us, nothing is left unsaid. That single word प्रजापाल instead of रामभद्र included all manner of उपालम्भ । "He that cared for प्रजा alone" is a censure—That cannot be improved upon. 4. अतिनिष्ठुरम्—प्रजापालमात in place of कौसल्या is extremely cruel. The tree is known by its fruit. The considerateness of प्रजापाल's mother can be gauged from that of the प्रजापाल himself. Next look at the reference in the third person to one who at one time was amongst his dearest. What can be more cruel than this? 5. चिर &c.—For समास see मित—। Here चिर is a misrepresentation. It is true she has not been seeing Rama's face since her departure from अयोध्या 12 years ago. But that was because of Rishyasringa's याग not अनेनैव मन्युना । In Act II. we are told that the याग is finished and only 2 or 3 day's have elaped since then. So Kausalya's avoidance of Rama's sight on account of this मन्यु is only of 2 or 3 day's duration. The old man deliberately exaggerates to produce some impression on Janaka's mind. 6. समन्तात् &c—बीभत्स explained (Act I para lxvii). For किंवदन्ती see Act I. sl. 42. गौरादित्वात्ङीष । The कप् in बहुव्रीहि (see Mit.) is by "बहुतश्च" ।

(*XVII*) जनक.—आः कोऽयमग्निर्नाम अस्मत्प्रसूतिपरिशोधने ? कष्टम् ! एवंवादिना अनेन रामपरिभूता अपि वयं पुनः परिभूयामहे ।

अरुन्धती (निःश्वस्य)—एवमेतत् । अग्निरिति वत्सां प्रति परिलघून्यक्षराणि, सीता इत्येव पर्य्याप्तम् । हा वत्से,

शिशुर्वा शिष्या या यदसि मम तत् तिष्ठतु तथा
विशुद्धेरुत्कर्षस्त्वयि तु मम भक्तिं जनयति ।
शिशुत्वं स्त्रैणं वा भवतु ननु वन्द्यासि जगतां
गुणाः पूजास्थानं गुणिषु न च लिङ्गं न च वयः ॥११॥

Jan —Ah ! who, pray, is this fire in the purification of my child ? O woe ! insulted by Rama, I am again being insulted by one talking thus.

Arun. (Sighing)—*so it is.* The word 'fire' *sounds* small by the side of our child , (the word) 'sita' is indeed enough. Alas ! my child.

Whether child or pupil, whatever you are to me, let that stand as it is , but the climax of purity rouses in me a sense of reverence for you. Childhood or womanhood let there be, you are surely to be adored by all the worlds. Virtues are the objects of worship in the virtuous, neither sex nor age, (11).

मित— । 'आः' इति सकारान्तमव्ययम् इह कोपे । कश्च किना अग्नेः प्रसङ्गः कृत इति कोपः । 'नाम' इति इह कुत्सायामव्ययम् । सीतायाः परिशोधेन अग्निः प्रसरति, अहो अनात्मज्ञता । इत्यग्नेः कुत्सा । 'प्रसूतिः' सन्ततिः सीता । अनेन 'जनेन कश्च किना । रामेण परिभूताः' विमानिताः' प्राक् सीतामग्निप्रवेशं कारयित्वा विमानना मे कृता रामेण, अद्य पुनस्तदेव समर्थ्यमानेन गृहिना कश्चकिना इत्यर्थः ॥ 'एवमेतत् अग्निर्न कोऽपि इति सत्यमेव । 'वत्सां प्रति' वत्सापेक्षया । 'परिलघूनि' सर्वथा हीनानि ।

परस्परापेक्षया सीता इति महत्तरम् अग्निरिति लघुतरम् इत्यर्थः। पर्य्याप्तम्' परिपूर्णम् नहि किञ्चिदपि इह असम्पूर्णम्॥ शिशुरिति। अन्वयः—मम शिशुर्वा शिष्या वा यत् असि तत् तथा तिष्ठतु। विशुद्धेः उत्कर्षस्तु त्वयि मम भक्तिं जनयति। ननु शिशुत्वं स्त्रैणं वा भवतु जगतां वन्द्या असि। गुणिषु गुणाः पूजास्थानं न च लिङ्गं न च वय। व्याख्या—'मम' सम्बन्धे त्वं 'शिशुर्वा' बालिका वा 'शिष्या वा उपदेश्या वा यत् असि तत् तथा तिष्ठतु आस्ताम् त्वामपरिणतवयाः अपरिपक्वबुद्धिश्चेति। 'विशुद्धेः' पवित्रतायाः 'उत्कर्षस्तु' आतिशय्यं पुनः 'त्वयि मम भक्तिं जनयति मन्ये मम वन्द्या असि। अत्यल्पमिदं मच्यते मया 'ननु' असंशयं शिशुत्वं स्त्रैण वा ते भवतु' सत्यपि शिशुत्वे स्त्रीत्वे च जगतां त्रिभुवनस्य 'वन्द्या असि किं पुनर्मम। तत्र कारणमाह—गुणिषु विषये गुणाः पूजास्थानं" वन्दनपात्रं 'न च लिङ्गं' नैव पुंस्त्वादिकं 'न च वयः नैव वृद्धत्वादिकम्। गुणाः सन्ति त्वयि इति जगतां ततः अन्यैरपि वन्द्यासि त्वं, तत् नूनम् अग्निरित त्वां प्रति परिलघून्यक्षराणि।

Notes—1. अस्मत् etc.—विषयाधिकरणे ७मी। प्रसूयते इति प्र+सू+क्तिन् कर्म्मणि = प्रसूतिः offspring. 2. परिलघूनि—The न does not become ण because परि is not an उपसर्ग here. The exposition is परितो लघूनी परिलघूनि inferior in every way, प्रादितत्—। 3. शिशर्वा &c.—The first half of the verse speaks of सीता with reference to अरुन्धती। सीता was शिशु by the side of अरुन्धती and she was actually her शिष्या। From both these considerations it is अरुन्धती who should be वन्द्या of सीता। But no; mark the difference (तु—भेदे), अरुन्धती is prompted to adore सीता। 4. शिशुत्वम् &c.—This is not at all derogatory to अरुन्धती, for the whole universe has to bow down to सीता, though with respect to the universe सीता is शिशु and

only a स्त्री। स्त्रिया भाव इति स्त्री + नञ् = स्त्रैणम्। गुणा &c.— This is an adaptation of Kalidasa's "तामगौरवभेदेन मुनींश्चापश्यदीश्वरः। स्त्री पुमानित्यनास्थैषा वृत्तं हि महितं सताम्" ॥ Cp. "गुणाः पूजास्थानम्—" and 'वृत्तं हि महितं सताम्' ।" Both are familiar quotation. Also Cp—'गुणः सर्वत्र पदं निधीयते '—Raghu.

(*XIX*) कौशल्या—अम्मो उन्मीलन्ति वेअणाओ [अहो उन्मीलन्ति वेदनाः]। (इति मूर्च्छति)।

जनकः—हा कष्टम् किमेतत् ?

अरुन्धती—राजर्षे, किमन्यत् ?

स राजा तत् सौख्यं स च शिशुजनस्ते च दिवसाः
स्मृतावाविर्भूतं त्वयि सुहृदि दृष्टे तदखिलम्।
विपाके घोरेऽस्मिन्नथ खलु विमूढा तव सखी
पुरन्ध्रीणां चेतः कुसुमसुकुमारं हि भवति ॥१२॥

Kaus.—O my sores re-open ! (*faints away*).

Jan.—O woe ! what is this ?

Arun.—What else, O royal sage ?

That king, that happiness, those young people and those days, all this have reappeard to her memory on seeing you her friend , and then, at this terrible pass, your friend has indeed fainted away [or—at this terrible pass, on seeing you, her friend, that king.. fainted away]. Verily, the heart of matrons is tender as flower. (12).

मित—'उन्मीलन्ति' आविर्भवन्ति 'वेदनाः' व्यथाः। भूयोऽपि दुःखवेगमनुभवामि इत्यर्थः। स इति। अन्वयः—सुहृदि त्वयि दृष्टे स राजा, तत् सौख्यम, स च शिशुजनः ते च दिवसाः अखिलं तत् स्मृतौ आविर्भूतम्। अथ अस्मिन् घोरे विपाके तव सखी विमूढा खलु। (यद्वा—घोरे अस्मिन् विपाके सुहृदि त्वयि दृष्टे स राजा इत्यादि), पुरन्ध्रीणां चेतः

कुसुमसुकुमारं भवति हि। व्याख्या—सुहृदि' मित्रोत्तमे 'त्वयि दृष्टे सति स राजा दशरथः 'तत् सौख्यम्' राजचक्रवर्त्तिनो महिषीत्वेन अनुभूतानि सुखानि ततः कृतादरे तनये 'सच शिशुजनः' सीतारामादि 'ते च' नववधू-भिरुत्सवपूर्णा दिवसा इति 'अखिलं सर्वं 'तत् स्मृतौ आविर्भूतम्' उदितम्। 'अथ' अनन्तरम् आविर्भावात् परम् अस्मिन् घोरे विपाके' सर्वथा दुःखानां युगपदुदयरूपे दुःसहे व्यतिकरे 'तव सखी कौसल्या तु खभरम् असहमाना 'विमूढ़ा खलु मुर्च्छिता एव। (यद्वा—'घोरे अस्मिन् विपाके' दुःसहे एत-स्मिन् दशाविपर्य्यासे 'सुहृदि त्वयि दृष्टे स राजा इत्यादि प्राग्वत्) कथ-मेतन्न सोढ़म् अनया इत्याह—'पुरन्ध्रीणां पतिपुत्रवतीनां स्त्रीणां, चेतः कुसु-मम् इव 'सुकुमारं कोमलं' 'भवती हि' भवत्येव॥

Notes—1. अखिलम्—Here इति is understood referring to all those that are enumerated, इति अखिलं तत् &c.—Hence तत् is singular because a group is intended. 2. विपाके—वि+पच+घञ् भावे विपाकः=विषयः, परिणामः। We have suggested two ways of viewing the विपाक। (i) simultaneous recollection of all is a विपाक। (ii) The altered circumstances now prevailing are a विपाक। The second view seems more natural.

(*XX*) जनकः—हन्त हन्त सर्वथा नृशंसोऽस्मि संवृत्तः यः चिरस्य दृष्टान् प्रियसुहृदः प्रियान् दारान् न स्निग्धं पश्यामि।

स सम्बन्धो श्लाघ्यः प्रियसुहृदसौ तच्च हृदयं
स चानन्दः साक्षादपि च निखिलं जीवितफलम्।
शरीरं जीवो वा यदधिकमतो वा प्रियतरं
महाराजः श्रीमान् किमिव मम नासीद्दशरथः॥१३॥

(क—)

Jan.—Alas! Alas! I have turned altogether heartless as I do not look kindly upon the beloved wife of my dear friend (Dasaratha), seen after (such) a long time.

What was he not to me, the great and illustrious king Dasaratha? He was an estimable connection; he was a dear friend, he was my very heart, (to me) he was joy incarnate and indeed the entire object of life, he is the body or soul, or what is higher and dearer than either of these two (13) Jan—

मित—। सोऽहम् 'नृशंसः निष्ठुरः अस्मि। 'चिरस्य' इत्यव्ययम्। चिरेण कालेन इत्यर्थः। स्निग्धं सन्नेहम् यथा तथा न पश्यामि॥ स इति। अन्वयः—श्रीमान् महाराजो दशरथः मम किमिव न आसीत्? स श्लाघ्यः सम्बन्धी, असौ प्रियसुहृत्, तत् हृदयञ्च साक्षात् आनन्दश्च स· अपिच निखिलजीवितफलं शरीरंजीवो वा अतो वा अधिकं प्रियतरं यत्। व्याख्या— 'श्रीमान् श्रिया लीलाभूमि 'महाराजः राजचक्रवर्त्ती' 'दशरथ. मम किमिव न आसीत सर्वमेव मम स·। तथा च 'स श्लाघ्य·' स्तुत्य' 'सम्बन्धी वैवाहिको मे। 'असौ मम प्रियसुहृत प्रेयान् सखा। 'तत्' मम हृदयञ्च। विधेयप्राधान्यात् क्लीवत्वम्। 'साक्षात्' मूर्त्तिमान् 'आनन्दश्च सः' मे। 'अपि च' स मे निखिलः समग्रः 'जीवितस्य' जीवनधारणस्य फलं—तत् फलं 'शरीरं' देही वा भवतु देहव्यतिरिक्तः 'जीवो वा जीवात्मा वा भवतु 'अतो वा अथवा अस्मात् शरीरात् जोवात् वा अधिकं प्रशस्यम् अतएव प्रियतरं यत् परमात्मा इति तदपि मे दशरथ एव॥

Notes—1. नृशंसः—See I. sl. 45. 2. जीवितफलम्—जीव+क्त भावे जीवितम् living तस्य फलम्। But what is this फल of life? Those who hold that beyond the body nothing exists, will answer—it is शरीरम्। Others will say it is जीवः the occupier of the body. Yet a different class will deem ब्रह्म (ब्रह्मप्राप्ति) as the aim of life. These different views are taken up in शरीरं जीवो वा &c.

(*XXI*) (ज—) कष्टम् ! इयमेव सा कौशल्या ।
यदस्याः पत्युर्वा रहसि परमं दूषितमभू-
दभूवं दम्पत्योः पृथगहमुपालम्भविषयः ।
प्रसादे कोपे वा तदनु मदधीनो विधिरभू-
दलं वा तत् स्मृत्वा दहति यदवस्कन्द्य हृदयम् ॥१४॥

(Jan.—) O woe ! This very one is the same Kausalya, whatever serious annoyance occured unto this one or her husband in secret, I used to become the recipient of the complaint of the couple separately , and then regarding the pacification as well as (for the cause) for the irritation, the steps were under my control. Or away with recalling that which overwhelms and consumes the heart. (14).

मित—। 'इयमेव' विपाके प्रत्यभिज्ञातुमशक्या 'सा' मे प्रियसखी 'कौशल्या' कौसल्या वा । यदिति । अन्वय—अस्याः पत्युर्वा रहसि यत् परमं दूषितमभूत् (तत्र) अहं दम्पत्योः पृथक् उपालम्भविषयः अभूवम् । तदनु कोपे प्रसादे वा बिधिः मदधीनः अभूत् । (अथ) वा यत् हृदयम् अवस्कन्द्य दहति तत् स्मृत्वा अलम् । व्याख्या—'अस्याः' कौसल्यायाः 'पत्युर्वा भर्त्तुर्दशरथस्य वा 'रहसि' मिथः यत्' यदेव 'परमं गुरु दूषितं दोषः प्रणयापराधः 'अभूत' तत्र 'अह दम्पत्यो., जायापत्योः कोशल्यादशरथयोः 'पृथक्' बिभिन्ने काले 'उपालम्भस्य तिरस्कारस्य अन्योऽन्यगर्हायाः 'विषय'' आधारः अभुवम् मय्येव परस्परोपालम्भः निवेदितः । तदनु उपलम्भनिवेदनात् परं कोपे कोपकाले यावत् कोपो न प्रशान्तः तावत् प्रसादे वा यदा च प्रसन्नता पुनरागता तदा 'विधिः परस्परव्यवहारः 'मदधीनः' यथा मया उपदिष्टः तथैव 'अभूत' । 'वा अथवा 'यत्' वस्तु 'हृदयम् अवस्कन्द्य' आक्रम्य दहति. तापयति 'तत् स्मृत्वा अलम् निष्प्रयोजनं तत्स्मरणम् ॥

Notes—1. कष्टम्—He deplores the change. 2. यत्—The

correlative तद् is understood. Or take it an अव्यय implying हेतु। अहम् उपालम्भविषयः अभूवम् because (यत्) वृषितभूत् [भू+लुङ्=अभूत]। 3. परमम्—Grave. They did not approach at every slight ruffle. But only when greatly (परम्) annoyed, 4 दम्पत्यो—जायाच पतिश्च दम्पती जम्पती, जायापती। तयोः। 5. उपालम्भ &c—विषय is used here in a peculiar sense Usully one complained against is called the विषय of the complaint. Here it is one with whom the complaint is lodged. 6. प्रसादे &c—So long as the कोप lasted and also when reconciliation (प्रसाद) came. 7 मदधीनः—मयि अधि इति मदधि+ख (ईन) by the rule "—अध्युत्तरपदात् खः"। सप्तमी तत्—अधि being of the शौण्डादि class. 8. अलं वा &c.—No use calling back all this to mind ; it only pains.

(*XXII*) अरुन्धती—हा कष्टम्! चिरनिरुद्धनिःश्वासनिष्ठुरं हृदयमस्याः।

जनकः—हा प्रियसखि। (इति कमण्डलूदकेन सिञ्चति)।

कञ्चुकी—सुहृदिव प्रकटय्य सुखप्रदः
प्रथममेकरसामनुकूलताम्।
पुनरकाण्डविवर्तनदारुणो
विधिरहो विशिनष्टि मनोरुजम्॥१५॥

Arun.—O woe! Her heart has become still from breath held very long.

Jan.—Alas! My hear frind. (*Sprinkles with water from his jug*)

Kanch,—Alas! Fate at first having shown concord of uniform flavour, offers comforts like a friend; again,

becoming discordant with an unexpected turn, heightens the pang of the heart. (15).

मित — । 'चिरनिरुद्धः' य' निश्वासः तेन 'निष्ठुर' निश्चलम् ॥ सुहृदिति अन्वय' — अहो विधिः प्रथमम् एकरसाम् अनुकूलतां प्रकटय्य सुहृदिव सुखप्रद' पुन अकाण्डविवर्त्तनदारुणः (सन्) मनोरुजं विशिनष्टि । व्याख्या —'अहो खेद एष यत् विधि ' दैवं प्रथमं पूर्वम् 'एकरसाम्' अभिन्नप्रकृतिकाम् अविच्छिन्नामित्यर्थः अनुकूलतां सहायतां 'प्रकटय्य' दर्शयित्वा सततमनुकूलोभवन्नित्यर्थं सुहृदिव' मित्रवत् सुखप्रद ' आनन्दवर्द्धन आदौ प्रसन्ने विधौ राजचक्रवर्त्तिना भर्त्रा पुरुषसिंहेन पुत्रेण,रमणीरत्नेन च स्व पया सुखसन्तानवतो इयमासीत् कौसल्या इत्याशयः। पुनः पश्चात् अकाण्डे असमये यत विवर्त्तनं अन्थाभवनं तेन दारुणः निष्ठुरः सन् 'मनोरुजं हृदयवेदनां 'विशिनष्टि' विशेषयति वर्द्धयति । सम्प्रति तु विधुरे विधौ दुःखमयं सर्वमस्याः इति खेदः ॥

Notes 1. चिर &c.—निष्ठुर obdurate, hence motionless The heart has stopped throbbing 2. प्रकटय्य—प्र+कट+णिच +ल्यप् Having disclosed. 3. सुखप्रदः—सुखं प्रददाति इति सुख+प्र+दा+क कर्त्तरि । Usually this is taken to qualify सुहृत् । We predicate this of विधि। प्रथमम् and पुनः favour our interpretation. Two different stages are contemplated here with a separate assertion suiting each stage—प्रथमं सुखप्रदः पश्चात् दुःखदायी मनोरुजं विशिनष्टि' &c. see Tika 4. एकरसाम् — रसः स्वादः । एकः रस अस्मात् एकरसा of uniform flavour, ताम् । 5 अनुकूलताम् — अनुगतः कूलम् अनुकूलः favourable, प्रादितत्— । तस्य भावः, ताम् । एकरसा अनकूलता is अविमिश्रा अनुकूलता, i.e., not at times अनुकूल and again प्रतिकूल, but uniformly अनुकूल । 6. अकाण्ड &c.—काण्ड occasion. अकाण्ड =

an awakward moment. वि + वृत + ल्युट् भावे विवर्त्तन lit, turning back, hence change. Now see Tika. 7. *Remark*—The sense becomes more still clear if the first two lines change position.

(*XXIII*) कौशल्या (संज्ञांलब्धा)—हा वच्छे जाणइ कहिं सि। सुमरामि दे विआहलच्छीपरिग्गहेक्कमण्डणं पप्फुरन्तमुद्ध-विहसिदं मुहसुहपुण्डरीअं आप्फुरन्तचन्दिआसुन्दरेहिं अङ्गेहिं पुणो वि मे जादे उज्जोएहि उच्छङ्गं। सव्वदा महाराओ भणादि एसा रहुउलमहत्तराणं वहु, अह्माणं उण जणअसम्बन्धेण दुहिदिआ एव्व [हा वत्से जानकि, कस्मिन्नसि। स्मरामि ते विवाहलक्ष्मीपरिग्रहैकमण्डनं प्रस्फुरच्छविहसितं मुग्धमुखपुण्डरीकम्। आस्फुरच्चन्द्रचन्द्रिकासुन्दरैरङ्गैः पुनरपि मे जाते उद्द्योतय उत्सङ्गम्। सर्वदा महाराजो भणति—एषा रघुकुलमहत्तराणां वधूः अस्माकं पुनर्जनकसम्बन्धेन दुहिता एव]।

Kaus. (*Recovering consciousness*)—Alas! Child Janaki, where are you? I recall your charming lotus face (with an artless laugh sparkling on it) which had the assumption of the grace of wedding for its best decoration My child light up my lap once again with your limbs lovely like the beams of a brightly shining moon. The great king always used to say—This is the daughter-in-law of the mightier ones of the race of Raghu, but of us through our tie with Janaka, she is a daughter indeed.

मित—। 'विवाहजनिता' या लक्ष्मीः शोभा तस्याः 'परिग्रहः' धारणमेव 'एकं' मुख्यं 'मण्डनं' भूषणं यस्य तत्। 'प्रस्फुरत्' शोभमानं 'मुग्धं' सरलं 'विहसितं हासः यस्मिन् तत्। 'जाते' वत्से 'आ' सम्यक् 'स्फुरत् विभा-

जमानः यः 'चन्द्र. विमले गगने य पूर्णचन्द्रः तस्य या चन्द्रिका ज्योत्स्ना तथा इव सुन्दरैः अङ्गैः उत्सङ्गं क्रोडम् 'उद्योतय भूषय। रघुकुलस्य ये महत्तराः' प्रधानपुरुषाः पूर्वपुरुषा इत्यर्थः तेषाम् एषा वधूः। अस्माकं पुनः' आवयोस्तु 'जनकेन यः ,सम्बन्धः' परमः सखिभावः तेन दुहिता पुनः इयं जानकी ॥

Notes.—1. विवाहलक्ष्मी &c.—It is supposed that marriage adds fresh grace to a newly wedded couple. एक is herebest. 2. प्रस्फुरत&c—शुद्ध artless. 3. क्षमुख &c—मुग्ध charming. मुग्धं मुखपुण्डरीकम्। 4. आस्फुरत् &c,—आस्फुरच्चन्द्र excludes an ordinary चन्द्र। We want a चन्द्र which is shining at its best. *i. e.* the sky must be perfectly clear and the moon full. 5. भणति—She here transfers herself to that time and imagines the same as present to her. Hence वर्त्तमाने लट्।

(*XXIV*) कञ्चुकी—यथाह देवो !

पञ्चप्रसूतेरपि राज्ञ आसीत् प्रियो विशेषेण सुबाहुशत्रुः।
वधूचतुष्केऽपि यथाहि शान्ता प्रिया तनूजास्य तथैव सीता ॥१६॥

Kanch—It is as the queen says.

To the king, though with five children, the slayer of Subahu (i. e, Rama) was especially dear, Among the four daughters-in law again Sita was dear to him as was his daughter Santa. (16)

पञ्चेति। अन्वयः—पञ्चप्रसूतेः अपि राज्ञः सुबाहुशत्रुः विशेषेण प्रियः आसीत्। वधूचतुष्केऽपि सीता तथैव अस्य प्रिया यथाहि तनूजा शान्ता। व्याख्या—सुगमा। 'सुबाहुः' मारीच-सहचरः कश्चित् राक्षसः। तस्या 'शत्रुः निहन्ता रामः। "मारीच-शत्रुः' इति छन्दोभङ्गभयात् अप्रधानेनापि सुबाहुना निर्देशः। 'वधूनां चतुष्के' चतुःपरिमाणे सङ्घे ॥

Notes—1. पञ्च &c—The five were the four brothers and शान्ता। 2. सुबाहु &c—He speaks with reference to Dasaratha's knowledge. दशरथ knew राम as ताडकाशत्रु, सुबाहुशत्रु, मारीचशत्रु, भार्गवविजेता। Of these सुबाहुशत्रु suits the metre. 3. वधू &c.— चत्वारि परिमाणमस्य इति चतुर्+कन् चतुष्कः a group of four. The rule for कन् is—संख्यायाः संज्ञासंघसूत्राध्ययनेषु, वधूनां चतुष्कः। तस्मिन्। अधिकरणे ७मी। सीता was at dear as शान्ता, but राम, was dearer. For चतुष्क as संज्ञा, see kum V.

(*XXV*) जनकः—हा प्रियसख महाराज एवमसि सर्वप्रकारहृदयङ्गमः। कथं विस्मर्यसे?

कन्यायाः किल पूजयन्ति पितरो जामातुराप्तं जनं
सम्बन्धे विपरीतमेव तदभूदाराधनं ते मयि।
त्वं कालेन यथाविधोऽप्यपहृतः सम्बन्धबीजञ्च तद्
घोरेऽस्मिन् मम जीवलोकनरके पापस्य धिग्जीवितम् ॥१७॥

Jan.—Alas? Dear friend, great king Dasaratha, thus are you in every way heart-reaching. How can you be forgotten?

In a connection by marriage, surely, it is the parents of the bride that adore the bridegroom's own men. The attentions which you always bestowed on me were just the reverse. Such as you were, you have beee carried away by Death as also the source of our tie. Fie upon the life of me, a sinner in this horrible hell of the land of the living. (17).

मित— 'सर्वप्रकारेण हृदयङ्गम.' हृदयप्रिय। कन्यायाः इति। अन्वयः—सम्बन्धे कन्याया. पितरः किल जामातुः आप्तं जनं पूजयन्ति। मयि ते तत् आराधनं विपरीतमेव अभूत्। तथाविध. त्वं कालेन अपहृतः

असि, तत् सम्बन्धबीजञ्च (अपहृतम्)। घोरे अस्मिन् जीवलोकनरके पापस्य मम जीवितं धिक्। व्याख्या—'सम्बन्धे' वैवाहिके सम्बन्धे जाते कन्यायाः पितरः पित्रादयो गुरव 'किल' ते एव, जामातुः आप्त 'जनं पजयन्ति' अर्चयन्ति। कन्यावर्गीया एव विशिष्टामर्चनां कुर्वन्ति न तु वरवर्गीयाः। 'मयि' कन्यापितरि ते' वरपितुस्तव 'तत् आराधन' पजनं 'विपरीतमेव अभूत महत्तेभ्यः स्वहस्त एव विशिष्टा अभूवन्नुपहाराः। 'तथाविधः तादृशः प्रियसुहृत् 'त्वं' कालेन दैवेन् 'अपहृत. असि' चोरितः लोकादस्मान्नीतोऽसि। तथा 'तत्' कन्यारूपं 'सम्बन्धबीजञ्च सम्बन्धहेतुरपि अपहृतम्। तत् 'घोरे' भीमे अस्मिन् जीवलोकरूपे पापस्य' पापिन. 'मम जीवित' जीवनं 'धिक्' गर्ह्यम्॥

Notes.—1. सर्वप्रकार etc.—हृदयं गच्छतीति हृदय+गम+खच् कर्त्तरि हृदयङ्गम। "खच् प्रकरणे गमेः सुप्युपसंख्यानम्" इति खच्। 2. किल—अव्यय in the sense of अवधारण! कन्यायः पितर एव not the reverse. 3. पितरा—पितरौ seems better. Or पितरः पितृपर्य्याया such as father uncle etc:

(*XXVI*) कौसल्या—जादे जानइ किंकरेमि दिढ़वज्जले-वघडिअवन्धनिच्चलं हदजोविदं मं मन्दभाइणिं ण परिच्चअइ [जाते जानकि किं करोमि? दृढ़वज्रलेपघटितबन्धनिश्चलं हतजीवितं मां मन्दभागिनीं न परित्यजति]।

अरुन्धती—आश्वसिहि राजपुत्रि, वाष्पविश्रामोऽप्यन्तरे कर्त्तव्य एव। अन्यच्च किं न स्मरसि यदवोचदृष्यशृङ्गाश्रमे युस्माकं कुलगुरुः "तदुपजातमेव किन्तु कल्याणोदर्कं भविष्यति"?

कौसल्या—भअवदि अदिक्कन्तो मणोरहो [भगवति अतिक्रान्तो मनोरथः]

अरुन्धती—तत् किं मन्यसे राजपुत्रि मृषोद्यं तदिति? नहीदं सुक्षत्रिये अन्यथा मन्तव्यम्। भवितव्यमेव तेन।

आविर्भूतज्योतिषां ब्राह्मणानां ये
व्याहारास्तेषु मा संशयो भूद् ।
भद्राह्येषां वाचि लक्ष्मीर्निषक्ता
नैते वाचं विप्लुतां व्याहरन्ति ॥१८॥

Kuas.—Child Janaki. what shall I do ? This cursed life, firm (as if) with fastenings made of the tough Vajralepa. does not quit me, the ill-fated.

Arun.—cheer up, daughter of king. Cessation of tears too has indeed to be allowed at times. Besides. do you not remember what your family-preceptor said in the hermitage of Rishysringa— 'It is a misfortune indeed, but will have a happy end'' ?

Kaus.—Worshipful lady, the object of my desire has passed away [Or my desire has vanished].

Arun.—Do you think, O daughter of a king, that those were false words ? Good Kshattriva Lady, it should not be takenotherwise. It has to be (or—happen) indeed.

Let not doubt attach to those that are the declarations of Brahmanas unto whom the Light (divine) has appeared. A happy felicity attends upon their speech. They do not utter untrue words. (18)

मित—दृढः वज्रलेपः सौधविलेपनविशेषः तेन घटितः' रचितः यो 'वन्धः संश्लेषः तेन 'निश्चलं' स्थिरम् ॥ वाष्पमोचनमेव कुरुषे 'वाष्पविश्रामः अपि अन्तरे' अवकाशे कर्त्तव्य एव तत् सम्प्रति वाष्पविरामं कुरु। 'अन्यच्च वाष्पविरामे कारणमस्ति—'युष्माक कुलगुरुः वशिष्ठः ऋष्यश्रृङ्गाश्रमे' सीताविवासनवार्त्तां श्रुत्वा 'अवोचत्'—'उपजात दुर्जातम् 'एव तत् सीताविवासनम् 'किन्तु कल्याणोदक' परिणामशुभ 'भविष्यति'। तद्ब्रवीमि आशां पुषाण वाष्प संस्तम्भय ॥ किन्तु मनोरथः मनोरथविषयीभूतं वस्तु सीता इत्ययः 'अतिक्रान्त' इहलोकं परित्यज्य गतः। यद्वा—मनोरथः अभिलाषाः सीतायः पुनर्दर्शनरुपः 'अतिक्रान्तः' गतः। नाहं सीताया पुन-

दर्शनमाशंसे तत् किमुच्यते आर्या पुत्राण इति । 'तत्' वशिष्ठवचनं मृषोद्य' मिथ्यावचनं मन्यसे किम् ? 'इदं' वशिष्ठोक्तम् 'अन्यथा' अर्थातिक्रमेण इत्यर्थः 'न मन्तव्यम्' । 'तेन वचसा भवितव्यमेव' अवश्यम् अर्थानुक्रमेण एव भाव्यं न हि अर्थातिक्रमेण ॥ आविर्भूतेति । 'अन्वयः—आविर्भूतज्योतिषां ब्राह्मणानां ये व्याहाराः तेषु संशयो मा भूत । एषां वाचि भद्रा लक्ष्मीः निषक्ता हि, एते विप्लुतां वाचं न व्याहरन्ति । व्याख्या—'आविर्भूतं प्रकटीभूतं 'ज्योतिः' शब्दब्रह्मप्रकाशः येभ्यःतथाविधानां वशिष्ठवाल्मीकिप्रमुखानां ब्राह्मणानां ये व्याहाराः उक्तयः 'तेषु संशयो मा भूत' तेषु श्रद्धेहि । 'एषां वाचि भद्रा शोभना 'लक्ष्मीः' सुभगता 'निषक्ता हि संलग्ना एव, तत्प्रभावात् 'एते विप्लुताम्' अन्यथार्थां 'वाचं' न व्याहरन्ति न उच्चारयन्ति । तन्मा त्यजयतामाशा इति सप्तमाङ्कप्रतिविम्बनम् ॥

Notes—1, कर्त्तव्य एव—This points to the physical impossibility of weeping without a stop and doing nothing else 2 अन्यच्च—Here she offers a better reason to cease weeping The reason Vasishtha himself has declared by तदुपजातम् &c. 3. उपजातम्—उप here declares दोष । दुष्ठ जातम् इत्यर्थे उप + जन + क्त कर्त्तरि उपजातम् a bad turn, a misfortune. This must have been when the news of Sita's exile reached them then and there. 'उप सामर्थ्यदाक्षिण्यदोषाख्यानात्ययेषु च'' इत्यादि विश्वः । 4. कल्याणोदर्कम्—उदर्क is भाविफल । कल्याणं उदर्कः अस्य । Hence there are grounds for hope, weeping is undesirahle. So stop the flow of tears. 5. अतिक्रान्तः &c — I have given up all hopes. 12 years have passed and no signs of returning happiness. 6. मृषोद्यम्—मृषा + वद् + क्यप् कर्म्मणि भावे वा । With कर्म्मणि the meaning is *that which is falsely uttered* : भावे giving the sense *utterance to an untruth.*

Bhattoji prefers भावे। 7. क्षत्रिये—क्षत्रस्य अपत्यं जातिः इति क्षत्र+घ+स्त्रियम् टाप् क्षत्रिया a woman of the warrior class. शोभना क्षत्रिया सुक्षत्रिया, प्रादितद्—। Hence क्षत्रिया alternates with क्षत्रियाणी by the Varttika 'अर्य्यक्षत्रियाभ्यां वा"—। But when meaning "wife of some क्षत्रिय" the only form is क्षत्रियी by the rule "पुंयोगादाख्यायाम्"। 8. आविर्भूत &c.—This is the same as आविर्भूतशब्दब्रह्मप्रकाशम् of act II. with शब्दब्रह्मप्रकाश replaced by ज्योतिस्। 9 भद्रा &c—This line is in imitation of the Vedic line "भद्र षां लक्ष्मीर्निहिताधिवाचि" quoted in the महाभाष्य etc. The लक्ष्मी is explained by कैयट as "या लक्ष्मी-र्वेदान्तेषु परमार्थसंविल्लक्षणा उक्ता सा"—लक्ष्मी is the same as is described in the वेदान्त as परमार्थसंविद् (knowledge of the Supreme Truth). With the possession of such knowledge नैते वाचं विप्लुतां व्याहरन्ति (वि+आ+हृ+लट् अन्ति)—they can not utter an untruth. So do cherish hope, Refers to the denouement brought about byValmiki in Act. VII. अरुन्धती was aware of the facts regarding सीता and her childern (see भागीरथीनिवेदितरहस्यम्, para xxviii)

(*xxvii*) नेपथ्ये—(कलकलः—सर्वे आकर्णयन्ति)।

जनकः—अद्य शिष्टानध्याय इति उद्धतं खेलतां वटूनां कलकलः।

कौसल्या—सुलहसोक्खं दाए बालत्तणं होदि [सुलभसौख्यं तावद्बालत्वं भवति]। (निरूप्य) अम्महे एदाणं मज्झे को एसो रामभद्दलच्छीपरिसोहिदेहिं सावट्ठम्भमुद्धललिदेहिं अङ्गेहिं अम्हाणं लोअणाइं सीदलावेदि [अहो एतेषां मध्ये क एष रामभद्र-लक्ष्मीपरिशोभितः सावष्टम्भमुग्धललितैरङ्गैः अस्माकं लोचनानि शीतलयति]।

IN THE TIRING ROOM—(*A hum—All listen*).

JAN—The hum is of scholars sporting boisterously because to-day is holiday (No-study) in honour of distinguished visitors.

KAUS—Childhood indeed has pleasures easily accessible. (*Marking*) Ha! Who is this in their midst that soothes my eye with limbs firm, handsome and lovely and adorned with the grace of Ramabbadra ?

मित—। 'शिष्टा' वेदज्ञानेन विशिष्टा अतिशयं प्राप्ता महान्त इति। तदर्थः 'अनध्यायः', अध्ययनविरतिः ॥ अवष्टम्भेन, आलम्बनेन सह 'सावष्टम्भानि' दृढानि इत्यर्थः। तादृशैः 'मुग्धैः' मनोहरैः 'ललितैः लावण्यमयैः 'अङ्गैः' देहैः करणैः ॥

Notes—1. शिष्ट&c—अधि+इ or अय+घञ् भावे अध्यायः study, शास+क्त कर्म्मणि शिष्ट trained. i. e., a sage. शिष्टार्थः अनध्यायः, शाकपार्थिवादि कर्म्मधा—। 2. सुलभ &c.—सुलभमेव सौख्यम्। सुलभं सौख्यं यस्मिन्। Boys are always happy. Miserable are the old! 3. रामभद्र &c.—रामभद्रस्य लक्ष्मीः the grace of Rambhadra. तथा परिशोभितः &c. 5. सावष्टम्भम् &c.—मुग्ध charming. ललित lovely. मुग्धानि च तानि ललितानि मुग्धललितानि lovely and charming; lovely limbs do not always charm. In a body beauty going with strength is charming. The strength is supplied by the epithet सावष्टम्भ। अव+स्तम्भ+घञ् भावे अवष्टम्भ—the स becoming ष by the rule 'अवाच्च आलम्बनाविदुर्य्ययोः'। Here अवष्टम्भ means आलम्बन support. तेन सह सावष्टम्भानि supported, i. e, strong (because it is strength that supports). सावष्टम्भानि अतएव मुग्धललितानि। तैः। The first distant glimmer of आशा comes to कौशल्या with the very words of hope spoken by अरुन्धती।

(*xxviii*) अरुन्धती (अपवार्य्य सहर्षवाष्पम्)—इदं तत् भागीरथीनिवेदितरहस्यं कर्णामृतम्। नत्वेवं विद्मः कतरोऽयमायुष्मतोः कुशलवयोरिति।

जनकः—

कुवलयदलस्निग्धश्यामः शिखण्डकमण्डनो
वटुपरिषदं पुण्यश्रीकः श्रियेव सभाजयन्।
पुनरिव शिशुर्भूतो वत्सः स मे रघुनन्दनो
झटिति कुरुते दृष्टः कोऽयं दृशोरमृताञ्जनम् ॥१२॥

ARUN—*Aside*—(*With tears of joy*)—Surely this is that necter to the ears, the secret of which was divulged by Bhagirathi. But I cannot make out which one is this of Kusa and Lava, the long-lived

JAN.—Softblue like the petals of a blue-lotus adorned with youthful locks, of a holy grace, and adorning as it were with his grace the whole assembly of the seholars, looking as if he was that child of mine, the delighter of the race of Raghu turned boy again, who is this that on being seen forthwith applies as it were an unguent of nectar to my eyes ? (12).

मित। 'अपवार्य्य' आच्छाद्य। पारिभाषिकमेततत् अन्यैरश्रुतस्य अनुच्चमुक्तस्य। 'सहर्षवाष्पम्' हर्षाश्रुणा सह यथा तथा। 'भागीरथ्या निवेदितम् ऋष्यश्रृङ्गाश्रममागत्य विज्ञापितं 'रहस्यं' यस्य 'तत् कर्णामृतम् आप्तवृत्तान्तेन कर्णयोरमृततुल्यम्। 'कतरोऽयं कुशो वा लवो वा इति 'न विद्मः'। कुवलयेति। अन्वयः—कुवलयदलस्निग्धश्यामः शिखण्डकमण्डनः पुण्यश्रीकः श्रिया वटुपरिषदं सभाजयन्निव पुनः शिशुर्भूतः स मे

वत्सो रघुनन्दन इव क अयं दृष्टः झटिति दृशोः अमृताञ्जनं कुरुते । व्याख्या —'कुवलयदलमिव नीलोत्पलपत्रमिव 'स्निग्धश्यामः मनोहरश्यामलः शिखण्डकमण्डनः' काकपक्षभूषण· 'पुण्यश्लोकः' प्रशान्तकान्तिः 'श्रिया' देहशोभया 'वटुपरिषद्' छात्रसमाज' 'सभाजयन्निव अलङ्कुर्वन्निव 'पुनः शिशुःभूतः' भूयः शैशवमापन्नः 'स मे वत्सो रघुनन्दन इव' रामभद्र इव 'कः अयं बालः 'दृष्टः' सन् 'झटिति' तत्क्षणमेव दृशोः' नयनयोः 'अमृताञ्जनं सुधाविलेपनं कुरुते तापिते नेत्रे शीतलयति ॥

Notes—1. अपवार्य—अप + वृ + णिच् + ल्यप् । The definition of अपवारण is "तद्भवेदपवारितम् रहस्यं तु यदन्यस्य परावृत्य प्रकाश्यते ॥" 2 कर्णामृतम्—अमृत is *like* अमृत, i. e., gratifying कर्णयोः अमृतम् । But the boy cannot be called "gratifying to the ears" (कर्णामृत) । It is the narration of Bhagirathi that was gratifying The boy (इदम्) is indentified with the communication of his secret by लक्षणा । 3. पुण्यश्लोकः—श्रयति पुरुषम इति श्रि + क्विप = श्रीः । The ई is not ङीष । The समसान्त affix कप् is here optinal by "शेषाद्विभाषा" । In सुन्दरश्रीः (I. para xxvi) there is no कप् । 4. अमृताञ्जनम्—अञ्ज + ल्युट् भावे अञ्जन painting. अमृतेन अञ्जनम् । Here again no actual painting is done, the result of the painting—relief of weariness &c.—is there. Hence अमृताञ्जनं कुरुते is only a surmise from the likeness in result.

(*xxix*) कञ्चुकी—क्षत्रियब्रह्मचारी दारकोयमिति मन्ये ।

जनकः—एवमेतत् । तथाहि

चूडाचुम्बितकङ्कपत्रमभितस्तूणीद्वयं पृष्ठतो
भस्मस्तोमपवित्रलाञ्छनमुरो धत्ते त्वचं रौरवीम् ।

मौर्व्या मेखलया नियन्त्रितमधो वासश्च माञ्जिष्ठिकं
पाणौ कार्मुकमक्षसूत्रवलयं दण्डं तथा पैप्पलम् ॥२०॥
भगवत्यरुन्धति—किमुत्प्रेक्षसे कुतस्त्योऽयमिति ।

KANCH —I guess this boy is a Kshattriya, studying the Vedas.

JAN —So it is.

THUS—He carries at his back two quivers the heron feathers in which are kissed at the sides by the tuft of hair on his crest, a chest with the holy imprint of a little ash, the skin of a deer, in the lower half the madderdyed garment held fast with a girdle of the *Murva* grass, in the hand a bow (left), bracelet of a string of rosaries (right) and a stuff of the *Pippala* besides (right) (20).

Ho Arundhati, whence does he come ?

मित—। ब्रह्म वेदः लक्षणया 'वेदाध्ययनार्थं व्रतम् । तत् व्रत चरतीति ब्रह्मचारी। क्षत्रियश्चासौ ब्रह्मचारी च क्षत्रियब्रह्मचारी' जात्या क्षत्रियः असमापितविद्यः कश्चित् वाल्मीकिशिष्यः॥ चूडेति। अन्वयः—(अयम्) पृष्ठतः अभित चूडाचुम्बितकङ्कपत्रं तूणीद्वयम्, भस्मस्तोमपवित्रलाञ्छनम् उरः रौरवीं त्वचम् अधः मौर्व्या मेखलया नियन्त्रितं माञ्जिष्ठिकं वासः, पाणौ कार्मुकम् अक्षसूत्रवलयं तथा पैप्पलं दण्डं (च) धत्ते। व्याख्या—अयं बाल 'पृष्टतः' पृष्टे 'तूणीद्वयम्' इषुधियुगल 'धते इत्यन्वयः। किम्भूतम् तूणीद्वय-मित्याह—'अभितः' उभयतः पार्श्वयोरित्यर्थः चूडया' शिखया शिरःस्थया 'चुम्बितानि' गतिवशात् स्पृष्टानि 'कङ्कपत्राणि वाणपुङ्खस्थिताः गृध्रविशेषपक्षाः यस्य तथाविध तूणीद्वयम्। क्षत्रियलक्षणमेतत्। भस्मनां स्तोभ समूह एव 'पवित्रं लाञ्छनं चिह्नं तस्य तथाविधम् 'उरः वक्षः धत्ते इत्युत्तरेण सम्वन्धः। एतत्तब्रह्मचारिलक्षणम्। रौरवीं रुरुमृगादागतां [तत् आगत इति अण्] त्वचम् उत्तरीयरूपेण धत्ते। एतत् पूनर्ब्रह्मचारिलक्षण' तथा क्षत्रियलक्षणञ्च। त्वचं धत्ते इति ब्रह्मचर्य्यं रौरवीं त्वचमिति क्षत्रियत्वं कथ्यते। 'अधः'

नाभेरधः मौर्व्या गुणतृणनिर्मितया मेखलया कटिऽन्धेन 'नियन्त्रितं नियमितं 'माञ्जिष्ठिकं मञ्जिष्ठारञ्जितं 'वासः' वस्त्रं धत्ते एतदपि उभयलक्षणम्, वाससा ब्रह्मचारी मौर्व्या मेखलया च क्षत्रिय इति ज्ञायते। पाणौ' हस्ते 'कार्मुकं' धनुः 'अक्षसूत्रस्य' जपमालिकाया 'वलय' वलयाकारेण जपमालिकामित्यर्थः 'तथा पैप्पलम्' अश्वत्थशाखानिर्मितं 'दण्ड' लगुडं' 'धत्ते'। अत्र कार्मुकमिति क्षत्रियः—अक्षसूत्रमिति दण्ड इति च ब्रह्मचारी, पैप्पलं इति तु क्षत्रियः। किम् 'उत्प्रेक्षसे' तर्कयसि अनुमन्यसे। 'कुतस्त्यः' कस्माद्देशात् अयम् आगतः॥

Notes—1. **चूडा** &c —**कङ्क** is an aquatic bird looking like a very big heron ; it is commonly known as **कांक।** Its feathers are placed at the root of the arrow in the belief that this improves the flight of the arrow. The boy was playing, and the dangling tuft of hair onhis crest, thrown by the boy's movements now this side and again that side of the neck, each time touched the feather in the arrows in its oscillations See also Tika 3. **अभितः—अभि** here means **उभय। तस्मिन् इति अभि+ङि+तसि।** Construe **अभितः** **चूडाचुम्बित—।** 5 **पृष्ठत**—**पृष्ट+ङि+तसि स्वार्थे।** Construe **पृष्ठतो** (**तूणीद्वयं**) **धत्ते** on his back he carries &c. 4. **मौर्व्या—मूर्वा** is a kind of tough grass which supplies the bowstring. **मूर्वाया इयम् इति मूर्वा+अण् स्त्रियाम् मौर्वी। तया।** 5. **माञ्जिष्ठिकम्** —**मञ्जिष्ठा** is a grass used in dyeing. **मञ्जिष्ठया रक्तम् इति मञ्जिष्ठा +ठक् माञ्जिष्ठिकम्।** This is irregular, the correct affix being **अण्** giving **माञ्जिष्ठम्॥** For **समास** of **भस्मस्तोम** etc., see Tika.

(*xxx*) **अरुन्धती—अद्यै वागता वयम्।**

जनकः—आर्य्ये गृष्टे, अतीव मे कौतुकं वर्त्तते, तत् भगवन्तं वाल्मीकिमेव गत्वा पृच्छ। इमञ्च दारकं ब्रूहि—केऽप्येते प्रवय-समत्वां दिदृक्षव इति।

कञ्चुकी—यथाज्ञापयसि । (इति निष्क्रान्तः) ।

कौसल्या—किं भणाध एव्वं भणिदो आगमिस्सदित्ति [किं भणथ एवं भणित आगमिष्यतीति] ?

अरुन्धती—भिद्येत वा सद्वृत्तमीदृशस्य निर्माणस्य ?

कौसल्या—(निरूप्य)—कधं सविणयं णिसामिदगिट्टिवअणो विसज्जिदइसिदारओ इदो ज्जेव अहिमुहं पसरिदो एव्व सो वच्छो [कथम् ! सविनयं निशामितगृष्टिवचनो विसृष्टर्षिदारक इतोऽभिमुखं प्रसृत एव स वत्सः] ।

ARUN —We have come but to-day.

JAN,—Noble Grishti, great indeed is my curiosity, so go and ask worshipful Valmiki himself , also tell this boy "Certain old people here are desirous of seeing you,"

KANCH.—As you command, (*Exit.*)

KAUS.—Do you say he would come thus told ?

ARUN.—Would good manners fail in such a form ?

KAUS.—(*Marking*)—Ha ! That dear one is indeed coming this way having listened meekly to Grishti's words and (having) dismissed [Or—left] the ascetic boys.

मित—। 'अद्यैव' इत्यादिभिः परिहृतमुत्तरं जनकस्य ॥ 'प्रवयसः' वृद्धाः ॥ 'भिद्येत भिन्नं भवेत् ईदृशनिर्माणविरोधि भवेदित्यर्थः । 'सद्वृत्तं' साधुशीलम् । 'ईदृशस्य एवंविधस्य अलौकिकस्य 'निर्माणस्य' सृष्टेः सम्बन्धे । यथा हारिणीयं विधातुः सृष्टिः तथा वृत्तमपि अस्य हारि एव स्यात् नूनमय-मागच्छेत् इति भावः ॥ निशामितं श्रुतं गृष्टिवचनं येन तादृश । 'विसृष्टाः परित्यक्ता 'ऋषिदारकाः' येन सः ॥

Notes—अद्यैव etc.—This is a fact but it avoids a reply to Janak's query. Arundhati knows all perhaps even the arrangements made by Valmiki and prefers to maintain silence lest sage's plans are frustrated. 2 प्रवयसः—प्रकृष्ट

वयो येषां ते। The respect due to age will attract the boy thither. 3. भिद्येत etc,—भिद्+लिङ् ईत कर्म्मकर्त्तरि कर्म्मणि वा। Nom. सद्वृत्तम्। Comp 'न तादृशा आकृतिविशेषा गुणविरोधिनो भवन्ति'—*Sakuntala*. 4. निशामित etc.—नि+शम+णिच् स्वार्थे (चुरादि)+कर्म्मणि। The चुरादि root is not मित, hence वृद्धि with णिच्। 5. विसृष्ट etc—विसृष्ट is ambiguous, it may mean "dismissed" or "left' both. 'Left' seems better. He left the company of the other boys, and procceded (प्रसृतः) towards the old people.

(xxxi) जनकः (चिरं निर्वर्ण्य) भोः किमप्येतत्?

महिम्नामेतस्मिन् विनयशिशुतामौग्ध्यमसृणो
विदग्धैर्निर्ग्राह्यो न पुनरविदग्धैरतिशयः।
मनो मे सम्मोहस्थिरमपि हरत्येष बलवान्
अयोधातुं यद्वत् परिलघुरयस्कान्तशकलः ॥२१॥

JAN.—(*Noting for long*)—Ho! What is this again?

In this boy there is a preponderance of grandeur, softtened by childhood, modesty and simplicity, preceptible to the adept but not to the inept. He attracts my mind though firm against infatuation just as a very small bit of a magnet, possessing the power, does metallic iron.

मित—। 'एतदपि' इदञ्च किम्' अनुभवामि? माहिम्नामिति। अन्वयः एतस्मिन् विनयशिशुतामौग्ध्यमसृणः (अत एव) विदग्धैः न पुनरविदग्धैः निर्ग्राह्यः महिम्नाम् अतिशयः (वर्त्तते)। एष सम्मोहस्थिरमपि मे मनः हरति यद्वत् परिलघुः बलवान् अयस्कान्तशकलः अयोधातुम्। व्याख्या—'एतस्मिन्' शिशौ 'विनयेन' नम्रतया बालत्वेन मौग्ध्येन' सरलतया च मसृणः' अनुमतः अतएव 'विदग्धैः निपुणैः 'न पुनः अविदग्धैः अनिपुणैस्तु

न 'नियार्ह्यः' अनुमेयः 'महिम्नां' प्रभावानां तेजसामित्यर्थः 'अतिशयः' आधिक्यं लक्ष्यते । ह्यदुःसह्यमस्मिन् तेजो वर्त्तते, तच्च बालत्वात् सहजेन विनयेन च मन्दीभूतमिति दुर्लक्ष्यम, मया पुननिपुणमीक्षमाणेन ज्ञातं तत्। किं क्रियते महिमातिशयेन इत्याह—'एषः' बालः 'सम्मोहे रूपादिकृतमोह-विषये स्थिरमपि अविचलितमपि 'मे मनः हरति' आकृष्य आत्मान प्रति नयति 'यद्वत्' यथा 'परिलघुः' क्षुद्रः [इदं बाल प्रत्यपि नेयं विशेषणम्] 'वलवान्' महिम्नामतिशयवान् शक्तिमान् इत्यर्थः अइस्कान्तशकलः' चुम्बक-मणिखण्डः 'अयोधातु' लोहं हरति तथा। पृच्छामि "भोः किमप्येतत्" ॥

Nots—1. चिरं निर्वर्ण्य—Having watched the boy for some time. 2. भोः &c —He notices something going on within him and is surprised. 3 महिम्नाम्—महतो भाव इति महत्+इमणिच् महिमा greatness. तेषाम्। Related to अतिशयः। 4. विनय &c.—मसृण is smooth, hence subdued. If there is an excess of greatness it must be apparent to all But no, the excess is subdued (मसृण) by his meekness (विनय) &c. For समास see Tika 5. विदग्धः &c —विदग्ध clever, derivation uncertain Only the clever can detect it, beacause it is subdued 6. सम्मोह &c — मोह is विषयमोह the longing felt for external objects सम्मोहे स्थिरम्, सप्तमी। This is the reading in Vidyasagara's manuscript No. 3. My mind is indifferent to external impressions, yet this boy interests me, what is this ("भोः किमप्येतत") ? Vidyasagara himself rejects the readings of all his four manuscripts and proposes to read सम्मोदः। सम्मोदो हरति joy overpowers. This seems to disconnect the two halves of the verse and to render the simile in the 4th line less

attractive (see below). 7. इत्येवः—Vidyasagara's manuscripts I. and 2 read इत्येव। But if सम्मोहस्थिरम् is preferred इत्येव has to go being without a nominative. Manuscript No. 3. has इत्येषः। 8. बलवान्—Qual. अयस्कान्तशकलः। Contrast with महिम्नामतिशयः in the boy. One is महिम्नामतिशयवान् the other is बलवान्। This strengthens the simile. 2 यद्वत् —No तच्छब्द is necessary because the यच्छब्द is in a subsequent clause (उत्तरवाक्यगत)। 10. परिलघुः—Both the boy and the अयस्कान्त are *small* in size

(*xxxiii*) (प्रविश्य) लवः (स्वगतम्) —अज्ञातनामक्रमाभिजनान् पूज्यानपि नः स्वतः कथमभिवादयिष्ये। (विचिन्त्य) अयं पुनरविरुद्धः प्रकार इति वृद्धेभ्यः श्रूयते। (सविनयमुपसृत्य) एष वो लवस्य मूर्द्ध्ना प्रणामपर्य्यायः।

अरुन्धतीजनकौ—कल्याणिन्नायुष्मान् भूयाः।

कौसल्या—जाद चिरं जीव।

अरुन्धती—एहि वत्स। (लवमुत्सङ्गे कृत्वा अपवार्य्य) दिष्ट्या न केवलमुत्सङ्गः चिरान्मनोरथोऽपि मे सम्पूर्णः।

(*Entering*) LAVA (*To himself*)—Though worthy of respect how shall I guided by my own wit only, salute these people whose name, precedence and lineage are unknown to me. (*Reflecting*) This, however is being heard from our superiors as not an inconsistent form. (*Approaching with humility*). Here is unto you Lava's suceession of bows with his head.

ARUN. and JAN.—O blessed one, may you have long life !

KAUS.—Child, may you live long !

ARUN.—Come my child. (*Having Lava on her lap Aside*) O joy! Not only the lap, but after long, my desire also has been filled.

मित—। 'अज्ञातं नाम आख्या 'क्रमः' पौर्वापर्य्यमानव्यवस्था इत्यर्थः अभिजनः कुलञ्च येषां तान् स्वतः स्वबुद्धया। कः एतेषां पूर्वमभिवाद्यः कश्च पश्चात् इति न जानामि तत् कथमभिवादनं स्यादित्यर्थः। 'अविरुद्धः' शास्त्रेण आचारेण च सङ्गतः। 'प्रणामानां पर्य्यायः परम्परा पूज्यानुक्रमेण प्रणामाः॥ 'उत्सङ्गः' अङ्गः 'सम्पूर्ण' सङ्गठितेन अनेन बालेन परिव्याप्तः'। मनोरथः' अभिलाषः कुशलवौ क्रोडे कुर्य्याम् इत्येवंरूपः 'सम्पूर्णः संसिद्धः॥

Notes. 1 लवः—The boy is not yet introduced by name. Hence it seems better to say प्रविश्य दारकः। Next after the दारक himself has announced his name saying एष वो लवस्य &c. the name लव may be used in the stage direction 2. अविरुद्धः—वि+रुध+कर्त्तरिक्त विरुद्ध inconsistent, न विरुद्ध consistent, i. e., consistent with law (शास्त्र) and practice (आचार) 3. प्रकारः—Style. 4. मूर्द्धा—This is connected with प्रणाम in प्रणामपर्य्यायः। सापेक्षत्वेऽपि गमकत्वात् समासः। 5. सम्पूर्णः—सम्+पूर+णिच्+क्त कर्मणि सम्पूर्ण, सम्पूरित। This has a double meaning. Taken with उत्सङ्ग it means filled up" The well-developed boy has taken up all the room in my lap. If connected with मनोरथ the sense is "fulfilled" i e—at last I have got what I have been longing for—I have placed Rama's progeny on my lap.!

(*xxxiii*) कौसल्या—जाद इदो वि दाव एहि [जात इतोऽपि तावदेहि] (क्रोड़े कृत्वा) अम्महे ण केअलं दरविअसन्तणो-

लप्पलुदामसामलुज्जलेण देहवन्धेण कवलिदारविन्दकेसरकसाअकण्ठकलहंसणिणादटीहरदीहरेण सरेण अ रामभद्दं अणुहरदि। णं कठोरकमलगब्भपक्खलो सरीरप्फसो वि तारिसो एव्ववच्छस्स। जाद पेक्खामि दे मुहचन्द्र [अहो न केवलं दरविकसन्नीलोत्पलदामश्यामलोज्ज्वलेन देहबन्धेन, कवलितारविन्दकेशरकषायकण्ठकलहंसनिनाददीर्घदीर्घेण स्वरेण च रामभद्रमनुहरति, ननु कठोरकमलगर्भपक्ष्मलः शरीरस्पर्शोऽपि तादृश एव वत्सस्य। जात, प्रेक्षे ते मुखचन्द्रम्]। (चिबुकमुन्नमय्य निरूप्य च सबाष्पाकूतम्) राएसि किं ण पेक्खसि णिउणं णिरुविज्जमाणं से मुहं वच्छाए वहुए मुहचन्द्रेण संवददि एव्व [राजर्षे, किं न प्रेक्षसे निपुणं निरूप्यमाणमस्य मुखं वत्साया वध्वामुखचन्द्रेण संवदति एव]।

Kaus.—Child come this way too. (*Placing* him on lap) Ha ! he takes after Ramabhadra not only in the build of his body which is blue and glossy like a string (?) of slightly opening blue-louse, and in his voice which is rather long-drawn like the note of a swan whose throat has become sweet from eating lotus filaments, but even the touch of body of the dear one is like that of his (*Rama's*) velvty as of the core of a full grown lotus. Child, let me (I will) see your moon like face. (*Raising his chin and With tears and meaningly*) O royal sage, do you not notice that his face, closely observed, tallies indeed with lotus face of our daughter-in-law ?

मित। रामभद्रम् अनुहरति' अनुकरोति। कथमित्याह— 'देहवन्धेन' बद्धेन देहेन अनुहरतिइत्यर्थः ['भावानयने द्रव्यानयम्'] ॥ कीदृशेन देहेन? 'दरविकसन्ति ईषदुन्मीलन्ति यानि 'नीलोत्पलानि' कुवलयानि तेषां यत् 'दाम' माला तदिव श्यामलः उज्ज्वलश्च' देहः! तेन

अनुहरति । पुनश्च केन अनुहरति ? 'स्वरेण' । कथम् ? 'कवलिताः' भक्षिता ये 'अरविन्दकेशराः कमलकिञ्जल्काः तैः 'कषायकण्ठः मधुरकण्ठः यः 'कलहंसः तस्य 'निनादः' ध्वनिमि 'दीर्घदीर्घः' दीर्घ इव प्रतीयमानः स्वरः । तेन च अनुहरति—द्वयमप्येतत् ज्ञातं भवद्भि मया तु तृतीयमपि साद्दश्यमनुभूतम् किमित्याह—'शरीरस्पर्शः अपि तादृशशरीरस्पर्श इव । किम्भूतः संस्पर्शः ?—'कठोरं' परिणतं यत् 'कमल' 'पद्म' तस्य 'गर्भ.' अन्तःकीलक इव 'पद्मलः' मनोरमः (?) स्पर्शः शरीरस्य । वाष्पेण' नेत्रजलेन 'आकूतेन' अभिप्रायेण मनोगते ज्ञायतां जनकेन इत्यभिप्रायेण सह' आह । सवदति तुल्यमारोहति ॥

Notes :—1. दर &c.—दर is अव्यय when meaning ईषत् । ' ईषदर्थे दरमव्ययम" इति विश्वः । दामन् in the compound serves no purpose and is confusing. It is better omitted. 2. देह &c,—देहस्य बन्धः, तेन । But बन्ध is a भाव or action It cannot be called श्यामल or उज्वल which are द्रव्यधर्म । Hence देहबन्धः = बद्धो देहः । The देहबन्ध is before the eye of all present there and forms no part of Kausalya's special experience. 3. कवलित &c—कषायकण्ठ sweet throated. Compare—'चूताङ्कुरास्वादकषायकण्ठ पुंस्कोकिलो यन्मधुरं चुकूज'—*Kumara* दीर्घप्रकारः इति दीर्घदीर्घः । प्रकारे द्विर्वचनम् । The doubled form is treated as a कर्मधारय compound by "कर्मधारयवदुत्तरेषु" । The voice is sweet and does not stop abrubtly i. e, it has a reasonance (दीर्घदीर्घ) । This also has been noticed by all present when लव announced himself saying 'एष वो etc." कठोर etc.—This is her own experience. पद्मल is a troublesome word here. From the comparison with the core of the lotus, the idea appears to be that of a *soft yet*

firm substance. The derivation is पक्ष्माणि नेत्रलोमानि लक्षणया तत्तुल्यस्पर्शं लातीति पक्ष्मल (क प्रत्ययः) or तत्तुल्यस्पर्शः अस्ति अस्य पक्ष्मलः (लच्प्रत्ययः) । Hence I have rendered it 'velvety'. Vidyasagara reads कोमलः । उन्नमय्य—उत्+नम+णिच् ल्यप् । 5. सवाष्प etc,—आकूत is अभिप्राय—meaning. Kausalya meaningly says i. e., she wants Janaka to understand that she suspects the boy to be her पौत्र and Janaka's दौहित्र—Sita's boy.

(*xxxiv*) जनकः—पश्यामि सखि पश्यामि ।

कौसल्या—श्रम्मो उम्मत्तीभूदं विश्र मे हिश्रश्रं किं वि चिन्तश्रन्श्रो वहु विप्पलवदि [अहो उन्मत्तीभूतमिव मे हृदयं किमपि चिन्तयत् वहु विप्रलपति] ।

जनकः—

वत्सायाश्च रघूद्वहस्य च शिशावस्मिन्नभिव्यज्यते
सम्पूर्णप्रतिबिम्बतेव निखिला सैवाकृतिः सा द्युतिः ।
सा वाणी विनयः स एव सहजः पुण्यानुभावोऽप्यसौ
हा हा देव किमुत्पथैर्मम मनः पारिप्लवं धावति ॥२२॥

JAN.—I see it friend, I see it.

KAUS—Ha ! mind, gone mad as it were, raves much with something absurd in view.

JAN.—In this boy appear, as it were, the characteristics of a perfect image of my child and of the upholder of the race of Raghu—the features are all the very same, the same complexion, the voice the same, just the same natural humility, even the same pleasing majesty. Alas ! Alas ! O destiny, why does my restless mind run along wrong tracks ?

मित—। 'किमपि असम्भाव्यं चिन्तयत्' सीतासुतोऽयमिति मन्यमानमित्यर्थः। 'वहु विप्रलपति' असम्बद्धं प्रस्तौति ॥ वत्साया इति। अन्वयः —अस्मिन् शिशौ वत्सायाश्च रघूद्वहस्य च सम्पूर्णप्रतिबिम्बता अभिव्यज्यते इव। सा एव निखिला आकृति., सा द्युतिः, सा वाणी, स एव सहजो विनयः, असौ पुण्यानुभावः अपि। हा हा दैव मम पारिप्लवं मनः किम् उत्पथैः धावति। व्याख्या—'अस्मिन् शिशौ' वालके लवे 'वत्सायाश्च' सीताया अपि रघूद्वहस्य च' रघुधुर्य्यस्य रामस्य च सम्पूर्णप्रतिबिम्बता' छाया समग्रता 'अभिव्यज्यते इव अभिव्यक्ता भवतीव इव। कीदृशी सम्पूर्णता इत्याह—'सा एव सीतारामगता एव 'निखिला आकृतिः' सर्वावयवविन्यासः 'सा द्युतिः रामस्यैव कान्तिः' 'सा वाणी' रामस्यव कण्ठः स एव रामनिष्ठ 'सहजो विनयः नैसर्गिकी नम्रता 'असौ पुण्यानुभावः अपि रामस्यैव च पावनं तेजः। तत् कथमयं सीताया एव तनुजः ? न हि नहि असम्भव तत्। हा हा अहो खेदः 'दैव भो नियते, मम पारिप्लवं' चञ्चलं मनः कि कथम् 'उत्पथैः विमार्गैः धावति प्रसरति। यद्वा—मन पारिप्लवं सत् इत्यादि।

Notes :—1 उन्मत्तीभूतम्—अनुन्मत्तं उन्मतं भूतम् इति उन्मत्त+च्वि+भू+क्त कर्त्तरि। I have been suffering it is true, my mind however, has been clear so long. But now it is inclined to take this boy as Sita's son. This is so absurd that I well might doubt my sanity 2. सम्पूर्ण etc.—प्रतिगत बिम्बं प्रतिबिम्बम् reflection. सम्पूर्णं प्रतिबिम्बम् perfect reflection. तस्य भावः। 3. निखिला etc.—He places the premises before him without drawing the conclusion. The inference however is irresistible, viz, this is Sita's boy No sooner the inference is seen than he also sees the absurdity of it. Sita must have died the very day she was banished. The wild beasts (क्रव्याद्) that ate her up had certainly not spared the progeny in her womb. The

thought is then a delusion with which his mind has run away. So he exclaims pathetically हा हा &c. 4. उत्पथैः—उत्क्रान्ता पथः उत्पथाः with the समासान्त affix अ। उत्पथ is विमार्ग wrong track. 5. पारिप्लवम्—परितः प्लवते इति परि+प्लु+अच् कर्त्तरि परिप्लवम् restless, परिप्लवमेव पारिप्लवम्। प्रज्ञाद्यण् स्वार्थे। This takes away the force of his appeal to दैव। He himself has answered the question किमुत्पथैर्मनो धावति। Thus उत्पथैर्धावति because मनः is पारिप्लव। Hence the appeal to दैव for an answer is needless. So better construe मनः पारिप्लवं सत् &c.

(*XXXV*) कौसल्या—जाद अत्थि दे मादा सुमरसि वा तादं [जात, अस्ति ते माता, स्मरसि वा तातम्]।

लवः—न हि।

कौसल्या—तदो कस्स तुमं [ततः कस्य त्वम्] ?

लवः—भगवतो वाल्मीकेः।

कौसल्या—अइ जाद कधिदव्वं कधेहि [अयि जात, कथयितव्यं कथय]।

लवः—एतदेव जानामि।

Kaus. – Child, is your mother alive and do you remember your father ?
Lava. – No.
Kaus.—Whose are you then ?
Lava, – Of worshipful Valmiki.
Kaus. – Child, say what ought to be said.
Lava. – This is just what I know,

मित—। व्याख्या सुगमा।

Notes.—1. जात—It means 'boy', an address of endearment. 2. स्मरसि तातम्—there being no शेषविवक्षा, we get कर्म in 'तातम्'।

(*XXXVI*) नेपथ्ये--भोः भोः सैनिकाः एष खलु कुमार-चन्द्रकेतुराज्ञापयति न केनचिदाश्रमाभ्यर्णभूमिराक्रमितव्येति ।

अरुन्धतीजनकौ—अये मेध्याश्वरक्षाप्रसङ्गादुपागतो वत्सचन्द्र-केतुरद्य द्रष्टव्यः—अहो सुदिवसः ।

कौसल्या—वच्छलक्खणस्स पुत्तओ आणवेदि त्ति अमिअबिन्दु-सुन्दराइ अक्खराइ सुणीअन्ति [वत्सलक्ष्मणस्यपुत्रक आज्ञापयति इत्यमृतविन्दुसुन्दराणि अक्षराणि श्रूयन्ते] ।

लवः—आर्य क एष चन्द्रकेतुर्नाम ?

जनकः—जानासि रामलक्ष्मणौ दाशरथी ?

लवः—तावेव रामायणकथापुरुषौ ।

जनकः—तत् कथं न जानासि तस्य लक्ष्मणस्यायमात्मज-श्चन्द्रकेतुः ?

लवः—ऊर्मिलापुत्रस्तर्हि मैथिलस्य राजर्षेर्दौहित्रः ।

(*In the Tiring Room*) I Ho ! Ho ! Soldiers, Prince Chandraketu hereby commands that the outskirts of the hermitage must not be trespassed into by any one.

Arun and Jan. - Ha ! Child Chandraketu who has approached in course of guarding the sacrificial horse is to be seen to-day. What a lucky day !

Kaus.—The son of child Lakshmana commands—these words heard are as agreeable as drops of nectar.

Lava —Noble Sir, who indeed is this Chandraketu ?

Jan.—Do you know of Rama and Lakshmana the sons of Dasaratha ?

Lava.—The very same are the heroes of the story of the Ramayana.

Jan.—Then how is it you do not know that this Chandraketu is the son of that Lakshmana ?

Lava.—He is then Urmila's son and daughter's son to the royal sage, the king of Mithila.

मित—। 'आश्रमस्त अभ्यर्णा' अदूरवर्त्तिनी 'भूमिः न आक्रमितव्या' न पीडनीया ॥ 'मेध्याश्वस्य' यज्ञियाश्वस्य 'रक्षाप्रसङ्गात्।' रक्षाणानुरोधात् 'उपागतः' इह प्राप्तः। सुदिवसः शुभदिनम्। अद्य व प्रथमदर्शनम् इति सुदिवस एवायम् ॥ कर्णयोः सम्बन्धे 'अमृतविन्दुः' इव 'सुन्दराणि सुभगानी। एतत्तु स्वगतमिव प्रतिभाति। अन्यथा लवस्य 'क एषः' इत्यादि न सङ्गच्छते ॥ 'रामायणम्' इत्यादि। यस्याः 'कथायाः' तस्याः 'पुरुषौ' नायकौ। रामायणपाठात् जानाम्येव तौ नायकौ इत्यर्थ. ॥

Notes—1. आश्रम &c —अभि+अर्द+क्त कर्त्तरि अभ्यर्ण close by. अभ्यर्णा भूमिः अभ्यर्णभूमिः। आश्रमस्य अभ्यर्ण भूमिः ॥ 2. अद्य द्रष्टव्यः —this is to be the first sight. 3. अमृत &c.—The words pour nectar into my ears. 4. तत् कथम् &c.—Janaka has not seen the Ramayana hence the query ; the Ramayana does not refer to the children. 5. *Remark*—Lava's question is uncalled for. Kausalya has already said "वत्सलक्ष्मणस्य पुत्रकः" &c. Janaka's answer is not fuller than this : I suspect Kausalyas "वत्सलक्ष्मणस्य etc." is स्वगत।

(*XXVII*) अरुन्धती—(विहस्य)—आविष्कृतं कथाप्रावीण्यं कुमारेण।

जनकः—यदि त्वमीदृशः कथायामभिज्ञः तत् ब्रूहि तावत् पृच्छामः तेषां दशरथात्मजानां किन्नामधेयान्यपत्यानि केषु दारेषु प्रसूता च।

लवः—नायं कथाप्रविभागः अस्माभिरन्येन वा श्रुतपूर्वः।

जनकः—किं न प्रणीतः कविना ?

लवः—प्रणीतो न प्रकाशितः। तस्यैव कोऽप्येकदेशः सन्दर्भान्तरेण रसवानभिनेयार्थः कृतः। तच्च स्वहस्तलिखितं मुनिर्भगवान् व्यसृजत् भरतस्य मुनेस्तौर्य्यत्रिकसूत्रकारस्य।

जनकः—किमर्थम् ?

लवः—स किल भगवान् तमप्सरोभिः प्रयोजयिष्यतीति।

जनकः—सर्वमिदमस्माकमाकूतकरम्।

Arun.—(*Laughing*)—Mastery of the story has been shown by the boy

Jan.—If you are so well-informed in the story, then tell me, I say. of the sons of Dasaratha, how named are the children and unto which of the wives.

Lava.—This part of the story has not been heard yet by me or any one else.

Jan.--Has it not been composed by the poet ?

Lava.—Composed but not published. A certain highly emotional portion of the very same has been rendered capable of stage representation by a different composition , and that written out with his own hand, the mighty sage has sent over to sage Bharata, the author of the rules of dramaturgy.

Jan.—What for ?

Lava.—So that the worshipful (Bharata) might have it staged by celestial nymphs.

Jan. – All this rouses our curiosity.

मित—। 'कथायां' अर्थात् रामायणे 'प्रावीण्यं' निपुणता अभिज्ञता॥ 'प्रसूतानि' जातानि॥ कथायाः प्रविभागः' अंशविशेषः। 'पूर्वं' श्रुतः श्रुतपूर्वं. ॥ प्रकाशित. प्रचारितो लोके। यच्च कथाप्रविभागे दाशरथीनामपत्योत्पत्तिर्वर्णिता 'तस्यैव रसवान्' भावप्रधानः करुणादिरसाढ्यः 'कोऽपि

एकदेशः सन्दर्भान्तरेण अन्येन सन्दर्भेण प्रबन्धेन 'अभिनेयः' अभिनययोग्यः 'अर्थः' वस्तु यस्य तादृशः 'कृतः', नाटकरूपेण रचितः। अनवसरे अन्येन एतदर्थो मा विज्ञायि इति 'स्वहस्तेन लिखितम्'। 'तौर्य्यत्रिकसूत्रकारस्य भरतस्य (शेषे षष्ठी)। 'आकूतकरम्—अभिप्रायजनन' कौतूहलोद्दीपकम् ॥

Notes—1. कथाप्रावीण्यम्—प्रकृष्टा वीणा अस्य प्रवीणः an expert in the lyre ; hence expert in general. तस्य भाव एति प्रवीण—ष्यञ्=प्रावीण्यम् etc. 2 कुमारेण—कुमार a boy, तेन। 3. किन्नाम etc —नाम एव इति नामन+धेय=नामधेयम् name. किं नामधेयमेषाम् etc 4. कथाप्रविभाग—प्रविभाग section etc. 5. तौर्य्यत्रिक etc —तुर्य्य is पटह ॥ तुर्य्यस्य इदम् इति तुर्य्य+अण् तौर्य्यम् related to the drum. i. e., any thing to the accompaniment of the drum. त्रीणिएव इति त्रि+कन् स्वार्थेत्रिकम्। Singular because the स्वार्थ of a संख्या is संख्या in the abstract. तौर्य्याणां त्रिकम् the triad related to the drum. This is नृत्यगीतवाद्य or नाठ्य। 'तौर्य्यत्रिकं नृत्यगीतवाद्यं नाट्यमितित्रयम्'' इत्यमर । सूत्र the principles, the canons, सूत्रं कृतवान् इति सूत्र+कृ+अण् कर्त्तरि सूत्रकारः। तौर्य्यत्रिकस्य सूत्रकारः the author of the principles of dramaturgy. 6. अप्सरोभिः etc.—प्र+युज means here 'to stage' अभिनयनम्। अप्सरसः प्रयोक्ष्यन्ति=भगवान् अप्सरोभिः प्रयोजयिष्यति with णिच। This refers to Act. VII. 7. आकूत etc —The secrecy observed by the sage rouses our curiosity or आकूत।

(*XXXIII*) लवः—महती पुनस्तस्मिन् भगवतो वाल्मीकेरास्था। केषाञ्चिदन्तेवासिनां हस्तेन तत पुस्तकं भरताश्रमं प्रेषितम्। तेषामानुयात्रिकश्चापपाणिः प्रमादापनोदनार्थम् अस्मद्भ्राता प्रेषितः।

कौसल्या—जाद भादा वि दे अत्थि [जात, भ्रातापि ते अस्ति]।

लवः—अस्त्यार्य्यः कुशो नाम।

कौसल्या—जेट्ठो त्ति भणिदं होदि [ज्येष्ठ इति भणितं भवति]।

लवः—एवमेतत्! प्रसवक्रमेण स किल ज्यायान्।

जनकः—यमजावायुष्मन्तौ?

लवः—अथ किम्।

Lave—Great however, is mighty Valmiki's concern for it: the book has been sent to the hermitage of Bharata through the hand of certain pupil, my brother has been sent, bow in hand, as their attendant to avert accidents.

Kaus —Is there a brother to you too, dear boy?

Lava—There is?—Noble Kusa by name.

Kaus.—It is implied that he is the elder.

Lava—So it is. He is my senior in order of delivery

Jdn – Are your long-lived selves twins?

Laua—What else? (Yes).

मित—।'आस्था' आग्रहः। अन्तेवासिनां शिष्यानाम। प्रेषितः गमितः। 'आनुयात्रिकः' अनुचरः। प्रमादापनोदनार्थं विपन्नवारणार्थम्॥ 'प्रसवस्य' यः क्रमः 'परिपाटी आनुपुर्वी' इत्यर्थः, तेन हेतुना। 'ज्यायान्, वृद्धतरः। अग्रज सः अनुजोऽहम् इति भावः॥ 'यमौ युग्मजातौ॥

Notes—1. हस्तेन &c.—प्रेषित has प्र—इष गतौ दिवादि—क्त। Thus पुस्तकं भरताश्रमं गतवत् = वाल्मीकिः पुस्तकं (अणिकर्त्तृकम —प्रयोजककर्म) भरताश्रमं प्रेषितवान् (णिच्) गमितवान्। Changing voice—वाल्मीकिना पुस्तकम (उक्त प्रयोज्यकर्म) भरताश्रमं प्रेषितम्

2. आनुयात्रिकः—अनु पश्चात् यात्रा अनुयात्रा following. अनुयात्रा प्रयोजनमस्य इति अनुयात्रा + ठञ् अनुयात्रिकः a follower. 3. चाप etc.—चापः पाणौ अस्य। The परनिपात of सप्तमी is by "प्रहरणार्थेभ्यश्च"। The bow shows that valmiki apprehended an attack from some hostile party. This seems absurd. 4. प्रमाद etc,—प्रमाद is अनवधानता carelessness ; hence, accident arising from carelessness is a disaster. The disaster is such as can be removed by an armed guard (चापपाणि)। 5. जात etc.—कौसल्या asks this question in despair. A mother with *two* children must be some one another than सीता। 6 प्रसवक्रमेण etc.—हेतौ तृया। This again revives hope. If, these are twins, it is not unlikely that सीता gave birth to them before she was perished.

(*xxxix*) जनकः—कथय कथाप्रबन्धस्य कीदृशः पर्यन्तः।

लवः—अलोकपौरप्रवादोद्विग्नेन राज्ञा निर्वासितां देवयजनसम्भवां सीतादेवीम् आसन्नप्रसववेदनाम् एकाकिनीमरण्ये परित्यज्य लक्ष्मणः प्रतिनिवृत्त इति।

कौसल्या—हा वच्छे मुद्धचन्दमुहि को दाणीं दे सरीरकुसुमस्स देव्वदुव्विलासपरिणामो एआइणीए णिवडिदो [हा वत्से मुग्धचन्द्रमुखि, क इदानीं ते शरीरकुसुमस्य दैवदुर्विलासपरिणाम एकाकिन्या निपतितः]।

जनकः—हा वत्से,

नूनं त्वया परिभवञ्च नवञ्च घोरं
ताञ्च व्यथां प्रसवकालकृतामवाप्य।
क्रव्यादगणेषु परितः परिवारयत्सु
सन्त्रस्तया शरणमित्यसकृत् स्मृतोऽस्मि॥२३॥

Jan,—Tell me, of what kind the last stage of the composition of the story is.

Lava—This (is what it is) – Lakshmsna returned, having left alone, in the foresst, queen sita with labour pains imminent – Sita, sprung from the sacrificial ground of gods, who was banished by the king, annoyed by the unfounded slander of the citizens.

Kaus.—Ah ! my artless child with a moon-like face, what kind of an end, by the evil turn of a fate, befell your flower-like frame when alone ?

Jan—Alas ! Child –

I was surely more than onee invoked by you as a protector when you felt that fresh and deep insult and that pain brought on by the hour of delivery and got frightened, groups of beasts of prey crowding all round, (24),

मित—। 'कथायाः' प्रबन्धः ग्रन्थनम् । तस्य पर्य्यन्तः प्रान्तभागः अवसानमित्यर्थः कीदृशः ॥ 'अलीकः' असत्यः य 'पौरप्रवादः' लोकनिन्दा तेन 'उद्विग्नेन' बिचलितेन राज्ञा ॥ 'मुग्धा' सरला चन्द्रमुखी विधुवदना, तत्संबुद्धौ। 'दैवस्य' भाग्यस्य 'दुर्विलासात्' दुर्व्यापारात् परिणामः' दशाविकारकः ? ॥ नूनमिति । अन्वयः—नूनं नवञ्च घोरञ्च परिभवम् प्रसव-कालकृतां तां व्यथाञ्च अवाप्य परितः क्रव्याद्गणेषु परिवारयत्सु सन्त्रस्तया त्वया असकृत् शरणमिति स्मृतोऽस्मि। व्याख्या—'नूनं निश्चितं 'नवञ्च' अपूर्वञ्च 'घोरञ्च' दारुणञ्च 'पराभवम्' अपमानम् 'प्रसवकालेन कृतां' जनितां 'तां व्यथाञ्च' भुवनविदितां' वेदनामपि अवाप्य प्राप्तः 'परित' समन्तात् 'क्रव्याद्गणेषु' आममांसाशनेषु हिंस्रेषु इत्यर्थः परिवारयत्सु वेष्टमानेषु सन्त्रस्तया भीतया त्वया असकृत् बहुशः 'शरणम् इति' त्रायस्व तात शरणं गतास्मि इत्येवंरूपेण 'स्मृतोऽस्मि आक्रन्दितोऽस्मि ॥

Notes—1. अलीक &c.—The narration incities their grief, and कौसल्या is the first to give expression to it. 2. मुग्ध &c.—मुग्ध is here सरल। मुग्धा चासौ चन्द्रमुखी च। 3. इदानीम्—This is an expletive here (वाक्यालङ्कारे)। 4. शरीर &c.—शरीरं कुसुममिव &c. The comparison is in सौकुमार्य्य = tenderness. 5. एकाकिन्याः—Expresses helplessness. Hence जनक says सन्त्रस्तया शरणमित्यसकृत् स्मृतोऽस्मि। 6. नवम्—A new and unheard of insult. 7. घोरम्—A deep insult,

(*XL*) लवः (अरुन्धतीं प्रति)—आर्य्ये का वेतौ ?

अरुन्धती—इयं कौसल्या अयं जनकः।

लवः—(सबहुमानखेदकौतुकं पश्यति)।

जनकः—अहो दुर्मर्य्यादता पौराणाम्, अहो रामस्य राज्ञः क्षिप्रकारिता।

एतद्वैशसघोरवज्रपतनं शश्वन्ममोत्पश्यतः

क्रोधस्य ज्वलितुं धगित्यवसरश्चापेन शापेन वा॥ (२४)

कौसल्या—भअवदि परित्ताहि परित्ताहि। पसादेहि कुविदं राएसिं [भगवति परित्रायस्व परित्रायस्व। प्रसादय कुपितं राजर्षिम्]।

अरुन्धती—

एतद्धि परिभूतानां प्रायश्चित्तं मनस्विनाम्।

राजन्नपत्यं रामस्ते पाल्याश्च कृपणाः प्रजाः॥२५॥

जनकः—

शान्तं—वा रघुनन्दने तदुभयं तत् पुत्रभाण्डं हि मे।

भूयिष्ठद्विजबालवृद्धविकलस्त्रैणश्च पौरो जनः॥२६॥

Lava—(*To Arundhati*)—Noble lady, who are these two ?

Arun,—This is Kausalya, this is Janaka.

Lava—(*Eyes them with reepect sympathy and curiosity*)

Jan.—O the impudence of the citizens ! O the rashness of king Rama.

Of myself ever brooding over this terrible thunderstroke of a butchery, this is the time for wrath to blaze forth, sounding धक् with the bow or with a curse. (24)

Kaus—Save us, O Worshipful Arundhati, save us. Pacify the enraged royal sage.

Arun—This is indeed usually the resolve of the spirited when insulted. Rama is your child O king, and the poor subjects have to be spared. (25)

Jan —O, let both these desist (lit—both have been quieted), in the case of Raghunandan, he is my treasure of a son. The crowd of citizens again is mostly one of Brahmanas, the aged, the deformed and women. (26)

मित— 'बहुमान' गौरवं, 'खेदः' समवेदना 'कौतुकं' कौतूहलम्। सैः सह। कथमिहागतौ इति कौतूहलम्॥ "मर्य्यादा' सीमा करणीयस्य अवधिः। दुःखिता मर्य्यादा एषां दुर्मर्य्यदाः। तेषां भावः। क्षिप्रं व्रतं करोति इति क्षिप्रकारी। तस्य भावः, अविमृश्यकारिता इत्यर्थः॥ एतदिति। अन्वयः—एतत् वैशसघोरवज्रपतनं शश्वत उत्पश्यतः मम क्रोधस्य चापेन शापेन वा 'धग्' इति ज्वलितुम् अवसरः (अद्य प्राप्तः)। व्याख्या —'एतत्' इदं 'वैशसरूपं दीनायाः सीतायाः विहननरूपं 'घोरं' दारुण यत् 'वज्रपतनम्' अशनिसम्पातः तत 'शश्वत्' सदा 'उत्पश्यतः' ध्यायतः 'मम क्रोधस्य' 'क्रोधाग्रेः' 'चापेन' धनुषा शापेन वा' करणेन 'धक् इति' शब्देन सह 'ज्वलितुम् अवसरः' समयः अद्य प्राप्तः इति वाक्यशेषः॥ एतद्धीति। अन्वयः—परिभूतानां मनस्विनां चित्तं प्रायः एतत् हि। राजन्, रामः ते अपत्यं कृपणाः प्रजाश्च पाल्याः। व्याख्या—'परिभूतानां विमानितानां मनस्विनां दृढचित्तानां तेजस्विनामित्यर्थः 'चित्तं' चेतः सङ्कल्पः इत्यर्थः

'प्रायः' बाहुल्येन 'एतत् हि' ईदृशमेव चापेन शापेन वा प्रतिकर्त्तुं मानसा एव ते भवन्ति। किन्तु हे राजन्' मिथिलेश उभयमेव परिहर्त्तव्य ते, यतः 'रामः ते अपत्य'' सन्ततिसदृशः तत् क्षिप्रकारित्वेऽपि तं प्रति कुलश्चापस्य शापस्य वा प्रयोगः। 'कृपणाः' दीनाः 'प्रजाश्च पौरा अपि 'पाल्याः' पालनमेव अर्हन्ति दुर्म्मर्य्यादत्वेऽपि ते चापस्य शापस्य वा विषयो भवितुं नार्हन्ति। शान्तमिति। अन्वयः—(अथ) वा रघुनन्दने तत् उभयं शान्तम्, तत् मे पुत्रभाण्डं हि। जनश्च भूयिष्ठद्विजवालवृद्धविकलस्त्रैणः। व्याख्या—अथ 'वा' पक्षान्तरे रघुनन्दने रामे तत् चापरूपम् शापरूपम् 'उभय' शान्त' निष्क्रयं तिष्ठतु 'तत्' रघुनन्दनरूपं वस्तु 'मे पुत्रभाण्डं हि' पुत्ररूपं धनमेव न हि चापो वा शापो तस्मिन् युज्यते। 'पौरो जनश्च' पुरवासिनः अपि 'भूयिष्ठाः' बहवो 'द्विजाः' ब्राह्मणाः 'बालाः' शिशवः 'वृद्धाः' विकला भग्नाङ्गाः 'स्त्रैणं स्त्रीसमूहश्च यस्मिन् तादृश पौरजन', तत् दुर्मर्य्यादत्वेऽपि तस्मिन्नयोग्यो दण्डः। तदेष प्रशान्तोऽस्मि॥

Notes—1. दुर्मर्य्यादता—मर्य्यादा here is limit, limit of the liberty that may be allowed. दुःखिता मर्य्यादा is *misplaced* limit, i.e., transgression of the limit. तेषांभाव। 2. वैशसम् &c. —विशसति हिनस्ति इति वि+शस+अच् कर्त्तरि विशसः a murderer. तस्य कर्म्म इति विशस+अण् वैशसम् murder. &c. 3. ज्वलितुम्—To become manifest. We do not say 'to burn', for then क्रोध become idnentified with fire and शापेन ज्वलितुम् is then incongruous. 4. घगिति—A man in anger often shouts, The noise made is here referred to by the familiar sound घक् which a fire makes when kindled. Hence there is an implied comparison of क्रोध with fire. 5. चापेन &c.—देया करणे। 6. हृषितम्—हृष+क्त कर्त्तरि हृषित or हृष्ट। This exhibition is inconsistent with Janaka's character as a sage.

7. शान्तम्—शम् + णिच् + क्त कर्मणि शान्त or शमित quelled. 8. पुत्रभाण्डम्—भाण्ड fund, treasure, तत् here is in the neuter because भाण्ड is neuter and भाण्ड is the विधेय here "भाण्डं मूलवणिग्धने" इति विश्वः। 9 भूयिष्ठ &c—अतिशयेन बहव इति बहु + इष्ठन् भूयिष्ठाः numerous. स्त्रीणां समूहः इति स्त्री + नञ् स्त्रैणम् a group of women, &c. Now See Tika.

(*XLI*) (प्रविश्य) सम्भ्रान्ता बटवः—कुमार, अश्वः अश्वः इति कोऽपि भूतविशेषो जनपदेषु श्रूयते। सोऽयमधुना अस्माभिः प्रत्यक्षीकृतः।

लवः—अश्व इति पशुसमाम्नाये सांग्रामिके च पठ्यते। तत् ब्रूत कीदृशः !

बटवः—श्रूयताम्।

पश्चात् पुच्छं वहति विपुलं तच्च धूनोत्यजस्रं
दीर्घग्रीवः स भवति खुरास्तस्य चत्वार एव।
शष्पाण्यत्ति प्रकिरति शकृत्पिण्डकानाम्रमात्रान्
किं व्याख्यातैर्व्रजति स पुनर्दूरमेह्येहि यामः ॥२६॥

(इत्युपसृत्य अजिने हस्तयोश्चाकर्षन्ति)।

(*Entering*) Excited Scholars—O youth, we hear there is a certain kind of animal in the provinces, called 'Horse. Here is that one just now seen by us.

Lava—'Horse' is mentioned in the enumeration (list) of animals also in works on warfare. So tell me how it looks.

Scholars—Listen.

Behind, it carries a big tail and waves it ceaselessly ? It is long-necked ; its hoofs are but four ; it eats grass and

drops lumps of dung of the size of a mango. Or, away with descriptions, come, come, we go ; it will move far away. (27)

(*Advancing they drag him by the deer-skin and the hands*).

मित—। 'सम्भ्रान्ताः' जातसम्भ्रमाः ॥ पशूनां समाम्नायः नामसंग्रहः तस्मिन्। 'संग्रामं युद्धम् अर्हति इति 'सांग्रामिकः' युद्धोपयोगी पदार्थः। लक्षणया तत्पदार्थः—नामसंग्रहः। तस्मिन्॥ पश्चादिति। अन्वयः— पश्चात् विपुलं पुच्छं वहति तच्च अजस्रं धूनोति। स दीर्घग्रीवो भवति। तस्य चत्वार एव खुराः। शष्पाणि अत्ति, आम्रमात्रान् शकृत्पिण्डकान् प्रकिरति। आख्यानैः किं वा स पुनर्दूरं व्रजति, एहि एहि यामः। व्याख्या 'पश्चात्' कटिप्रान्ते 'विपुलं' पुच्छं' बृहल्लाङ्गुलं 'वहति' धत्ते। 'तस्य' पुच्छं पुनः अजस्रं धूनोति' सततं चालयति। 'सः' पशुः 'दीर्घा ग्रीवा यस्य तादृशो 'भवति'। 'तस्य चत्वार एव खुराः। अभिन्नास्तस्य सफाः। स शष्पाणि अत्ति तृणभोजी किल सः। 'आम्रमात्रान् आम्रमाणान् 'शकृत्पिण्डकान् पुरीषपिण्डान् 'प्रकिरति' त्यजति। 'आख्यानैः आख्यानैः वर्णनाभिः 'किंवा' स्यात् 'स पुनर्दूरं व्रजति यावद्वर्णयामः तावत् स दृष्टिविषयमत्येति तत् 'एहि यामः' यत्र स आस्ते तत्रैव स्वयं दृष्ट्वा ज्ञास्यसि कीदृशः सः इति॥

Notes.—1. भूत &c.—भूतानां विशेषः भेदः a kind of animal. 2, जनपदेषु &c.—Construe भूतविशेषो जनपदेषु (अस्ति इति) श्रूयते। 3, प्रत्यक्षीकृतः—अक्ष्णः प्रति इति प्रति+अक्षि+टच् समासान्त प्रत्यक्षम cognition of the eye. An अव्ययी—। तत् अक्षि अस्य इति प्रत्यक्ष+अच् मत्वर्थे प्रत्यक्षः visible, अप्रत्यक्ष प्रत्यक्ष सम्पद्यमानः कृतः इति प्रत्यक्ष+च्वि+कृ+क्त कर्म्मणि प्रत्यक्षीकृतः rendered visible, पशुसमाम्नाय—समयक् आम्नायते अस्मिन् इति सम्+आ+म्ना+घञ् अधिकरणे समाम्नायः a list. पशूनां समाम्नायः। 5. सांग्रामिके— संग्राम् war. संग्रामम् अर्हति इति संग्राम+ठञ् सांग्रामिकः anything having a place in war. By transference of epithets it

means here the list containing enumeration of war materials 6. अजस्रम्—न जस्यति मुञ्चति इयि नञ्+जस+र कर्त्तरि अजस्रम् ceaselessness. तत् यथा तथा। Qual. धूनोति। 7. आम्रमात्रान्—आम्रं मात्रा परिमाणमेषाम् आम्रमात्राः। तान्। 8. आख्यातैः—आ+ख्या+क्त भावे आख्यातम् description, तैः। करणे ३या। करण of साधन क्रिया understood. Thus आख्यातैः किम्= आख्यातैः किं साध्यते। 7. अजिने &c—They catah hold of लव. some by the garment, some by his hands &c

($XLII$) लवः (सकौतुकोपरोधविनयम्)—आर्य्याः पश्यत पश्यत एभिर्नीतोऽस्मि। (इति त्वरितं परिक्रामति)।

अरुन्धतीजानकौ—पूरयतु कौतुकं वत्सः।

कौसल्या—भअवदि जानामि एदं अणालोअन्ती ण जीआमि विअ। अदो अण्णदो भविअ पेक्खम्ह दाव गच्छमाणं दीहाउं (भगवति जानामि एतम् अनालोकयन्ती न जीवामि इव! अतः अन्यतो भूत्वा प्रेक्षे तावद्गच्छन्तं दीर्घायुषम्)।

अरुन्धती—दूरमतिक्रान्तः स चपलः कथं दृश्यते!

(प्रविश्य) कञ्चुकी—भगवान् वाल्मीकिराह ज्ञातव्यमेतदवसरे भवद्भिरिति।

जनकः—अतिगम्भीरमेतत् किमपि भविष्यति। भगवत्यरुन्धति, सखि कौसल्ये, आर्य्य गृष्टे, स्वयमेव गत्वा भगवन्तं प्राचेतसं पश्यामः। (इति निष्क्रान्तो वृद्धवर्गः)।

Lava—(*With humility and pressure of cursosity*)—Behold, Noble Sirs, behold, I am being led away by these (boys)—(*Goes round the stage quick*),

Arun and Jan,—Let the dear child satisfy their curiosity.

Kaus.—Worshipful lady, I feel as if I shall not live on

not seeing this boy. So shifting elsewhere, let us see the long-lived one going.

Arun.—Far has the nimble boy gone, how can be seen.

(*Entering*) Kaunch.—Mighty Valmiki says that you will know it at its time.

Jan.—This must be something very deep. Worshipful Arundhati, friend Kausalya, noble Grishti we shall go ourselves and see the mighty Prachetasa, (*Exeunt the group of elders.*)

मित—। 'कौतुकस्य अश्वदर्शनकुतूहलस्य यः 'उपरोधः' नियन्त्रणं तेन सह, 'विनयेन' नम्रतया च सह ॥ 'अवसरे' यथासमये ॥ अतिशयेन' गम्भीरं गुह्यम् ॥

Notes—1. **सकौतुक** &c.—**उपरोध** importunity here, urging, &c. **कौतुकोपरोध**=the urging of curiosty. He was unable to resist it but he thought it would be rude to leave the elders abruptly and he meekly blurts out something like an apology —what can I do sirs, these people are dragging me away.

(*XLIII*) वटवः—पश्यतु कुमारस्तदाश्चर्यम्।

लवः—दृष्टम् अवगतञ्च। नूनमाश्वमेधिकोऽयमश्व इति।

वटवः—कथं ज्ञायते ?

लवः—ननु मूर्खाः पठितमेव युष्माभिस्तत्काण्डे किं न पश्यथ। प्रत्येकं शतसंख्याः कवचिनो दण्डिनो निषङ्गिणश्च रक्षितारः। तत्प्रायमेव बलमिदं दृश्यते! यदीह न प्रत्ययः तत् गत्वा पृच्छत।

वटवः—भोः भोः किम्प्रयोजनोऽयमश्वः परिवृतः पर्य्यटति ?

लवः—(सस्पृहमात्मगतम्)—अये अश्वमेध इति विश्व-विजयिनां क्षत्रियाणाम् ऊर्ज्जस्वलः सर्वक्षत्रियपरिभावी महानुत्-कर्षनिष कर्षः।

नेपथ्ये—अयमश्वः पताकेयमथवा वीरघोषणा ।
सप्तलोकैकवीरस्य दशकण्ठकुलद्विषः ॥ २७ ॥

Scholars—Let our young friend see that wonder.

Lava—It is seen and known. Surely it is a horse for the "Asvamedha sacrifice."

Scholars—How is that known ?

Lava—Why idiots ! why do you not see what has been acually read by you in that section ? The guards have to be armourbearers, mace-holders, quiver-carriers each a hundred in number. This force indeed seems to be about that much. If you do not believe in it, then go and ask.

Scholars—Ho ! Ho ! For what purpose does this horse roam guarded ?

Lava (*Longingly to himself*)—Ha ! of Kashattriyas that have conquered the world, this Asvamedha is the mighty and pre-eminent emblem (Lit, essence) of ascendancy disgracing all other Kshattriyas.

In the tiring room—This horse is—or rather this valuorproclaiming banner is one of the matchless Lero of the seven world, the slayer of the race of the ten-necked monster. (28)

मित – । 'आश्चर्यम्' अद्भुतं वस्तु अश्वमित्यर्थः ॥ 'आश्वमेधिकः' अश्वमेधप्रयोजनः ॥ 'तत्काण्डे अश्वमेधप्रकरणे । 'कवचिनः' वर्म्मधारिणः 'दण्डिनः' लगुडहस्तः निषङ्गिणः' तूणीरवन्तः । 'प्रायेण' वाहुल्येन 'तत्' तथाविध तत्प्रायम् ['एकविभक्ति आपूर्वनिपाते' इति प्रायशब्दस्य परनिपातः 'कष्ठप्रायम्' इत्यादि प्राक् द्रष्टव्यम्] । 'इह' मदुक्तौ ॥ 'किं प्रयोजनम्' अस्य ॥ स्पृहया' आत्मनस्तदस्तु इति वाञ्छया सह । उर्जो' वलम् अस्ति अस्मिन् 'उर्जस्वलः तेजोमय. । 'सर्वषां क्षत्रियाणां परिभावो अपमानकरः । 'उत्कर्षस्य' प्राधान्यस्य 'निष्कर्षः' सारोद्धारः ॥ अयमिति । अन्वयः—अयम् अश्वः— । अथवा सप्तलोकैकवीरस्य दशकण्ठकुलद्विषः इयं वीरघोषणा पताका व्याख्या—अयम् अश्वः—'। 'रामाश्वमेधप्रयोजनः' इत्युत्तरमिष्टं वटनां प्रश्नस्य

असमाप्ते वाक्ये स्वयमेवाच्छिद्य प्राह—'अथवा' नायमश्वः किन्तु 'सप्तसु लोकेषु' य 'एकवीर' वीराग्रणीः तस्य 'दशकण्ठकुलस्य' रावणवंशस्य 'द्विषः निहन्तुः रामस्य राज्ञः 'इयं वीरघोषणा',वीर्यविज्ञापनी 'पताका' वैजयन्ती। पताकेयं न अश्वः, तत् किं पृच्छसि 'किम्प्रयोजनोऽयमश्वः' इति ॥

Notes—1. वटवः—But the scholars have left the stage. Comp. "दूरमतिक्रान्ताः &c." above, Better say "(ततः प्रविशति लवः बटवश्च)। वटवः'। 2 आश्चर्य—आ+चर+यत् कर्मणि=आचर्य practicable, but आश्चर्य with सुट् is by the rule 'आश्चर्यमनित्ये' when meaning something very rare, 'i. e.' not of every-day occurrence (अनित्य)! 3. आश्वमेधिकः—अश्वमेधः प्रयोजनमस्य इति अश्वमेध+ठञ्। 4. मूर्खाः—'पठितमेव न पश्यथ' hence मूर्खाः। 5. तत्प्रायम्—For परनिपात of प्राय, comp.—प्रबलतमसामेवम्प्रायाः शुभेषु हि वृत्तयः'—*Sakuntala*. 6. सस्पृहम्—स्पृहा longing. May I become such a क्षत्रिय some day, this is the longing, 7. विश्व &c.—विश्व साधु विजितवन्तः इति विश्व वि+जि+इनि कर्त्तरि साधुकारिणि। तेषाम्। 7. ऊर्जस्वलः—ऊर्जस्+वलच् मत्वर्थे by निपातन in the rule "ज्योत्स्नातमिस्रा—'। निपातन does not bar regular विनि hence ऊर्जस्वी is also available. 8. सर्व &c.—सर्वक्षत्रिय+परि+भू+णिनि कर्त्तरि ताच्छील्ये। 9. उत्कर्ष &c—निष्कर्ष is सार extract. उत्कर्ष excellence, ascendancy. महान् उत्कर्षनिष्कर्षः the quintessence of excellence or ascendancy. 10. अयमश्व &c.—This is in reply to the scholars' 'किम्प्रयोजनोऽयमश्व.'' । The reply means to say—This horse is meant for Rama's Asvamedha ; अयमश्वः is only the beginning of the reply. The speaker, however, does not complete the reply. When only half-uttered, he changes his mind and treats the horse not as a horse but as an ensign. Accordingly the wording of the answer is altered into पताकेयम् &c. It is usual to treat the अश्व and the पताका as two dis-

tinct things here. But then why does the answer speak the **पताका** at all ? The question does not refer to it Besides **लव** himself treats the horse as **पताका**। To the guards he says below "**पताकां वो हराम्यहम्**" and forthwith asks the scholars to lead the horse to the hermitage—"**लोष्टैः घ्नन्तः परावर्त्तयतैनमश्वम्**,। The scholars again in reply say "**कृतमनेन अश्वेन**" not "**कृतमनया पताकया**"। 11. **वीरघोषणा—वीराणां घोषणा** proclamation which heroes usually make Or **वीर** stands for **वीर्य्य। वीरस्य घोषणा।** 12. **सप्त** &c — **सप्तावयवोलोकः सप्तलोकः** the seven-limbed universe. **एकेषु मुख्येषु वीरयते इति एक+वीर (अदन्त चुरादि आत्मनेपदी)+णिच्+अच् कर्त्तरि।** Or—**एकः वीरः इति एकवीर.। वीरैकः** was expected by '**पूर्वापरप्रथम—**"। This is irregularly formed (**बाहुलकात्**) : cp. "**कथमेकवीर इति ? पूर्वकालैक—" इति बाधित्वा परत्वादनेन (पूर्वापर" इति सूत्रेण) समासे वीरैक इति हि स्यात्, बहुलग्रहणात् भविष्यति।**"—*Bhattoji*, Also comp. "**शरवर्षमनेकमेकवीरः**—*Sisu*, **सप्तलोकस्य** or **सप्तलोके एकवीरः। तस्य।** 15. **दशकण्ठ** &c.—**दशकण्ठकुलं द्वेष्टि इति दशकण्ठकुल+द्विष+क्विप् कर्त्तरि। तस्य।**

(*xliv*) लवः (सव्यथमिव)—अहो सन्दीपनान्यक्षराणि।

बटवः—किमुच्यते, प्राज्ञः खलु कुमारः।

लवः—भोः भोः तत् किमक्षत्रिया पृथ्वी यदेवमुद्‌घोष्यते।

नेपथ्ये—अरे, महाराजं प्रतिकुतः क्षत्रियाः ?

लवः—धिग् जाल्मान्।

यदि ते सन्ति सन्त्वेव केयमन्या बिभीषिका।

किमुक्तैः क्षत्रपत्यैवं पताकां वो हराम्यहम्॥२८॥

भो बटवः, लोष्टैर्घ्नन्तः परावर्त्तयतैनमश्वम्। एष रोहितानां मध्ये वराकश्चरतु।

Lava (*Showing as if pained*)—Ah ! what provoking words !

Scholars—What do you say ? our young friend is indeed well informed.

Lava—Ho ! Ho ! Is then the world devoid of Kshattriya that you speak thus.

In the tiring room—Sirrah (Or—Aha) ! where are Kshattriyas to vie with our great king ?

Lava—Fie, idiots !

If they are so, let them be so , what again is this terrorising. Away with words , I will even fall upon you and carry away your banner. (29).

Ho ! scholars, turn this horse back hitting him with clods. Let this poor thing graze among the deer.

मित — । एतदुक्तानि 'अक्षराणि' अयमश्वः इत्यादीनि सन्दीपनानि' तेजः सन्धुक्षणानि । श्रुत्वा दीप्यते मदीयं तेजः ॥ किमुच्यते' भवद्भिः, मम तु मत 'प्राज्ञः खलु' सम्यक् ज्ञाता एव कुमारः यतः सत्यमभिहितं तेन । अक्षत्रिया अविद्यमाना.' क्षत्त्रियाः वीरा इत्यर्थः यस्यां तथाविधा । अस्ति चेत वीरः कश्चित न स नून मृष्यति । 'उद्दीप्यंते, उच्चै रूच्यते ॥ 'महाराजं प्रति' रामं 'प्रत्यर्थ्यं स्थिताः' रामस्य प्रतिभटा कुत इत्यर्थः ॥ जल्मान्' मूर्खान् । यदीति । अन्वयः—यदि ते सन्ति सन्तु एव । इयम् अन्या विभीषिका का ? उच्चैः किम् ? सन्निपत्य एव अहं वः पताकां हरामि । व्याख्या— 'यदि ते' क्षत्त्रिया राजान. [गौरवे बहुवचनम्] राम इत्यर्थः सन्ति सर्वातिशायित्वेन सन्निवर्त्तन्ते सन्तु एव तत्र कः कस्य मत्सरः ? 'इयं युष्मदुक्ता 'अन्या' अपरा, तेषां सत्ताया इतरा अयमश्व इत्यादिना उक्ता विभोषिका भयप्रदर्शनं 'का' अयुक्ता किल सा । राजा प्रवीरः इत्येव पर्य्याप्तप्रजानां सत्यम, तस्य वीरत्वमुद्घोष्य भयप्रदर्शनमयुक्तमित्यर्थः । यद्वा—'इयम अन्या अभिनवा 'का बिभीषिका' भयहेतुः न कापि, वीराः सन्ति इति नाहं बिभेमि इत्यर्थः । अथवा उच्चैः वाक्यव्ययेन किम् अलम् । कर्मणा वः प्रत्याययामि—'सन्नि-

पत्य एव' युष्मन्मध्ये पतित्वा अहं वः पताकां इममश्वं च. पताका इति युष्माभिर्वर्ण्यते हरामि अपनयामि रक्षतैनं यदि शक्ताः। परावर्त्तयत विद्रुतमुख वाहयत। 'रोहितानां—मृगाणाम् मध्ये। 'वराकः दीनः अश्वः विचरतु।

Notes—1. सन्दीपनानि—सम+दीप+णिच्+ल्युट् करणे। 2. वटवः—Evidently the sholars did not speak out all together, one of them is the speaker, and he addresses the rest. 3. प्राज्ञः—प्रजानाति इति प्र+ज्ञा+क कर्त्तरि=प्रज्ञः well informed. स एव इति प्रज्ञ+अण्स्वार्थे प्राज्ञः। 4. महाराजं प्रति—कर्म्मप्रवचनीययोगे २या। 5. विभीषिका—वि+भी+णिच्+ण्वुल भावे धात्वर्थनिर्देशे विभीषिका frightening. केयम् &c—implies that it is bad policy to frighten people in the name of the king, be he ever so powerful. That he is king is enough to extort loyalty. Intimidation only stifens the back of the people, and if any of them has any spirit in him (क्षत्रिय) he will resist, not because he thinks he can overcome the king, but because it is the nature of a क्षत्रिय not to tolerate intimidation, and he will gladly come out to get crushed. 6. सन्निपत्य—Comp "उद्दामेन द्विरदपतिना सन्निपत्याभियुक्तः" ante।

((*elv*) (प्रविश्य) सक्रोधदर्पः पुरुषः—धिक् चापलम्! किमुक्तवानसि? तीक्ष्णनीरसा ह्यायुधीयश्रेणयः शिशोरपि दृप्तां वाचं न सहन्ते। राजपुत्रश्चन्द्रकेतुररिविमर्दनः सौम्यपूर्वारण्यदर्शन—कुतूहलाक्षिप्तहृदयो न यावदायाति तावत् त्वरितमनेन तरुगहनेन अपसर्पत।

बटवः—कुमार, कृतमनेनाश्वेन। तर्जयन्ति विस्फुरितशस्त्राः कुमारम् आयुधीयश्रेणयः दूरे चाश्रमपदमितः तदेहि हरिणप्लुतैः पलायामहे।

(*Entering*) A man in anger and hauteur—A curse on your rashness : What did you say ? Ranks of warriors are rough and ruthless indeed and do not tolerate insolent speech even in a child. Slink away quickly by this thicket of trees by the time Prince Chandraketu, the slayer of enemies who now has his mind allured by the pleasures of seeing the charming eastern woods—does not return.

Scholars—Young friend no use of this horse. The ranks of warriors whose weapons have flared up are threatening you our young friend, and the site of the hermitage is far from here ; so come, we scamper off with the bounds of the deer.

मित—। 'चापलं' चपलता। तत्—(धिक शब्दयोगे २या)। 'तीक्ष्णा, सुलभकोपाः नीरसा अकरुणाश्च। 'आयुधीया' शस्त्रजीविनः, तेषां श्रेणयः' राजयः। शिशोः 'दृप्तां' दर्पस्पृष्टाम वाचम्। 'अरीणां विमर्दनः रिपुदलनः। 'सौम्यस्य' सुदर्शनस्य 'पूर्वारण्यस्य दर्शनकुतूहलेन आक्षिप्तं' व्यासक्तं हृदयं' यस्य स। तरुभिः' गहनः' दुर्गमः। तादृशेन पथा इत्यर्थः [विशेषणमात्र-प्रयोगो विशेष्यप्रतिपत्तौ]॥ 'कृतम्' अलम् (अश्वेन कृतम् इति करणे ३या, अश्वेन साध्यं नास्ति भावः)। मुच्चताम अश्व इत्यर्थः। 'विस्फुरितानि' प्रदीप्तानि शस्त्राणि' यासां ताः श्रेणयः। 'हरिणानां प्लुतानि' उत्प्लुतानि तै (करणे ३या)॥

Notes.—1. धिक् etc.—We may take धिक् by itself as an exclamation of reproach to वत्। In that case चापलम् also has to be taken by itself with an intonation—चापलम् ? चापलं क्रियते किम् ? 2. अरि etc.—That shows prowess, you have sinned against no ordinary fighter. 3. सौम्य etc.—You are lucky that he is not here now. 4. तरु etc.—The road being a rough one you will easily escape. 5. कृतम्—मान्त अव्यय implying prohibition (निषेध)। Cp 'अथवा कृतं सन्देहेन'—*Sak.*

(*xlvi*) लवः (विहस्य)—किं नाम विस्फुरन्ति शस्त्राणि ?

(धनुरारोप्य)

ज्याजिह्वया वलयितोत्कटकोटिदंष्ट्र-

मुद्गारि घोरघनघर्घरघोषमेतत् ।

ग्रासप्रसक्तहसदन्तकवक्त्र यन्त्र—

जृम्भाविडम्ब विकटोदरमस्तु चापम् ॥३०॥

(इति यथोचितं परिक्रम्य निष्क्रान्ताः सर्वे)

कौसल्याजनकयोगो नाम चतुर्थोऽङ्कः ।

Lava (*Laughing loudly*)—What ! Do weapon flare up ? (*Stringing the bow*)—

Let this bow that has encircled its sharp teeth-like tips with its tongue-like string—(the bow) that will be uttering an awful growling roar like that of a cloud, become with its deep concavity a copy of the chasm of the machine of the mouth of Death when intent upon swallowing (Universe), hence grinning (with delight) (30) (*Exeunt all suitably going round the stage*).

This is the Fourth Act called the meeting of Kausalya and Janaka.

मित—। 'आरोपयन् आरोहयन्—ज्यां धनुषि योजयन् इत्यर्थः। जेयति। अन्वय—ज्याजिह्वया वलयितोत्कटकोटिदंष्ट्रं विकटोदरम् एतत् चापं घोरघनघर्घरघोषम् उद्गारि '(सत्) ग्रासप्रसक्तहसदन्तकवक्त्रयन्त्रजृम्भा· विडम्बिव अस्तु। व्याख्या—ज्याजिह्वया जिह्वातुल्यया ज्यया गुणेन 'वलयिता वेष्ठिता 'उत्कटा' तीक्ष्णा 'कोटिदंष्ट्रा' दंष्ट्रातुल्यो कोटिः अग्रभागाः यस्य अतएव 'विकट' महत् 'उदरं' गह्वरं यस्य तादृशम् 'एतत चापम्' इदं धनुः आसन्ने अस्मिन् रणव्यापारे 'घोरं' भीमं 'घनस्य इव घर्घरघोषं' घर्घरशब्दम्

उद्घोषयत् सन् 'ग्रासे' जगद्ग्रासे 'प्रसक्तः, व्यापृतः अतएव समुचितभोज्य-लाभेन आनन्दात् 'हसन्' यः अन्तकः यमः तस्य वक्रयन्त्ररूपस्य' यन्त्ररूपस्य वक्त्रस्य मुखस्य या जृम्भा, व्यादानं 'तद्विडम्बि' तदनुकारि 'अस्तु' भवतु, स्वयं यमेन गिलितमिव धनुषा विलयं यातु बलमिदम् इत्यर्थः ॥

Notes—1. किं नाम &c —नाम implies क्रोध—rising anger. 2. धनुः &c.—आ + रुह् + णिच् + शतृ = आरोपयन् or आरोहयन् causing to mount. The sentence is elliptical ज्यां धनुः आरोपयन् is the complete form. The string usually lies relaxed on the bow and does not reach the tip. When Strung the string rises (आरोहति) to the tip, Hence ज्या धनुः आरोहति—the string climbs up the bow. In णिच्,—धन्वी ज्यां धनुः आरोहयति or आरोपयति the अणिकर्त्ता becoming कर्म because the root is गत्यर्थक । 3. ज्याजिह्वा—ज्या जिह्वा इव ज्याजिह्वा &c, अनुक्ते कर्त्तरि टैया । 4, वलयित &c —वलय bracelet. वलयेन योजिता इति वलय + णिच् (नाम धातु) + क्त कर्म्मणि वलयिता provided with a bracelet, कोटिः दंष्ट्रा इव कोटिदंष्ट्रा । Now see टीका । 6. उद्‌गारि —साधु उद्‌गिरति इति उद् + गॄ + णिनि साधुकारिणि कर्त्तरि । 7. घोर &c.—'घर्घर is an अनुकरणशब्द । घर्घरः घोषः gurgling sound. घनस्य घर्घरघोषः घनघर्घरघोषः gurgling sound of a cloud. By transference of epithets this means *like* the gurgling sound of a cloud. घोरघनघर्घरघोषम् &c. obj. of उद्‌गारि । 7. ग्रास etc.—For समास see टीका । This alludes to the प्रलय when everything perishes—अन्तक swallows up all. हसन् laughing ; the laugh is one of glee. Ha ! Ha ! I can fill my maw to-day !! 8. विकट etc.—When strung the bow is bent. This

creates a cavity bounded by the curve of the bow and the straight string. 9. यथोचितम्—उचितस्य अनतिक्रमः यथोचितम् as suited. The परिक्रमण was different with लव and the बटवः। In the case of लव, say त्वरितोद्धतक्रमं निष्क्रान्तः ; the scholars were of course हरिणप्लुतैर्निष्क्रान्ताः।

उत्तरचरितम्

पञ्चमोऽङ्कः

(1) नेपथ्ये—भोः भोः सैनिकाः, जातं जातमवलम्बनमस्माकम्—नन्वेष त्वरितसुमन्त्रनुद्यमानव्यावल्गत्प्रजवनवाजिना रथेन ।
उद्घातप्रचलितकोविदारकेतुः श्रुत्वा नः प्रधनमुपैति चन्द्रकेतुः ॥१॥
(ततः प्रविशति सुमन्त्रसारथिना रथेन धनुष्पाणिः साङ्गतहर्षसम्भ्रमश्चन्द्रकेतुः)

In the tiring room—Ho ! Ho ! Soldiers, help has come help has come unto us.

Having heard of our fight, here indeed comes Chandraketu, in his car of which the fleet steeds, urged on by hurrying Sumantra, are galloping and his flagstaff of Kovidara wood shaking through impacts (against the uneven ground).

(*Then enters Chandraketu bow in hand, in wonder haste and joy in a car with sumantra as the charioteer*).

मित—। 'अवलम्बनं' शरणम् । लवेन प्रपीडितानाम् 'अस्माकं' शरणं समागतम् ॥ नन्विति । अन्वय'—ननु एष चन्द्रकेतुः नः प्रधनं श्रुत्वा त्वरितसुमन्त्रनुद्यमानव्यावल्गत्प्रजवनवाजिना रथेन उद्घातप्रचलितकोविदारकेतु (सन्) उपैति । व्याख्या—'ननु' निश्चितम् एष चन्द्रकेतुः नः प्रधनं' युद्धं श्रुत्वा त्वरित'' त्वरावान् य' 'सुमन्त्रः' रघुकुलसारथि तेन नुद्यमानाः प्रयुज्यमानाः अतएव 'व्यावल्गन्तः' धावन्तः 'प्रजवनाः' वेगवन्तः 'वाजिनः' अश्वा यस्मिन् तादृशेन रथेन' रथवेगाच्च विषमासु भूमिषु ये 'उद्घाताः' गतिप्रतिबन्धाः तैः 'प्रचलितः' कम्पमानः 'कोविदारकेतु' कोविदारकाष्ठ-

निर्मितौ रथध्वजः यस्य तथाविधः सन् 'उपैति' आगच्छति ॥ 'सुमन्त्रः सारथिः' यस्मिम् तथाविधेन रथेन। 'अद्भुतेन' आश्चर्येण हर्षेण आनन्देन सम्भ्रमेण त्वरया च 'सह' वर्त्तमानश्चन्द्रकेतुः।

Notes.—1. जातम् etc —सम्भ्रमे द्विरुक्तिः। 2. अवलम्बनम्—अवलम्बते अस्मिन इति अवलम्ब+ल्युट अधिकरणे अवलम्बनम् support. 3. ननु—अवधारणे अव्ययम। 4 त्वरित etc.—त्वरा सञ्जाता अस्य इति त्वरा+इतच् त्वरित.. प्रजवति इति प्र+जु वेगगमने+युच् कर्त्तरि ताच्छील्ये=प्रजवनाः speedy. The steeds were naturally speedy, yet sumantra was in such a hurry that he thought it was necessary to urge them to faster motion. See now Tika, 5. उद्घात etc.—उद्+हन+घञ् भावे उद्घात an upward shock, प्र+चल+णिच्+क्त कर्मणि or प्र+चल+क्त कर्त्तरि प्रचलित the क्त being वर्त्तमाने (आदिकर्मणि)। See Tika, 6. साद्भुत etc.—अद्भुत because of the magnitude of Lava's feat, हर्ष at the sight of a real hero, सम्भ्रम for the safety of his own men.

(*ii*) चन्द्रकेतुः—आर्य्य सुमन्त्र पश्य पश्य,

किरति कलितकिञ्चित्कोपरज्यन्मुखश्री-
रनवरतनिगुञ्जत्कोटिना कार्मुकेण।
समरशिरसि चञ्चत्पंचचूडश्चमूना-
मुपरि शरतुषारं कोऽप्ययं वीरपोतः ॥२॥ (चन्द्र)

Chandraketu—Look noble Sumantra, look !

This hero of a boy, whoever he is, with his five tufts of hair dangling about in front of battle, with the beauty of his face tinged from some anger displayed, spreads over the troop a mist of arrows with his bow the horns of which are twanging ceaselessly. (2) (Chan—).

मित—। किरतीति। अन्वयः—कलितकिञ्चितकोपरज्यन्मुखश्रीः समरशिरसि चञ्चत्पञ्चचूडः अयं कोऽपि वीरपोतः अनवरतनिगुञ्जत्कोटिना कार्मुकेण चमूनाम् उपरि शरतुषारं किरति। व्याख्या—'कलितेन' दर्शितेन 'किञ्चितकोपेन' ईषत्कोपेन 'रज्यन्ती' लोहितायमाना मुखश्रीः' वदनप्रभा यस्य तादृक्षः किञ्च समरशिरसि रणमुखे चञ्चन्त्य.' दोदुल्यमानाः 'पञ्चचूडाः शिखा यस्य तादृशः अयंकोऽपि अज्ञातः 'वीरपोतः' शूरो बालकः अनवरतम्' अजस्त्रं यथा तथा निगुञ्जन्तो' नदन्ती 'कोटी श्रृङ्ग' यस्य तथाविधेन कार्मुकेण' धनुषा करणेन 'चमूनां' वलानाम् 'उपरि शरतुषारं तुषारपातकल्पं शरपातं 'किरति' तनोति। यथा पौषे मासि प्रातस्तुषारपातेन समन्तात् सर्वमदृश्यं भवति तथा अस्य शरपातेन अद्य मदीया सेना इत्यर्थः।

Notes—1. किरति—कॄ ordinarily means विक्षेप। Here we have it in a slightly altered sense—to spread. He spreads mist of arrows &c. 2. कलित etc.—See टीका। कल+णिच् स्वार्थ (चुरादि)+क्त कर्मणि कलित worked up. रञ्ज (दिवादि)+ +शतृ रज्यत्, स्त्रियां ङीप् रज्यन्ती becoming tinged. In the final बहु—the कप is not obligatory because the ई in श्री is not ङी। However, we may have कप् *optionally* as in षुद्धश्रीकः IV. sl. 19. 3. चञ्चत etc.—He was constantly on the move, hence the tufts of hair oscillated. See Tika also. 4. शरतुषारम्—तुषार mist. शरः तुषारः इव शरतुषार: mistlike arrow, i.e. osm any arrows were shot that the army appeared as if in a mist. 5 वीरपोतः—पोत boy. वीरश्चासौ पोतश्च the पूर्वनिपात of वीर being compulsory by 'प्रथमचरम—'।

(*iii*) चन्द्र—आश्चर्यम्!

मुनिजनशिशुरेकः सर्वतः सैन्यकाये
नव इव रघुवंशस्याप्रसिद्धः प्ररोहः।

दलितकरिकपोलग्रन्थिटङ्कारघोर-
ज्वलितशरसहस्रः कौतुकं मे करोति ॥३॥

(Chan—) Wonderful !

This ascetic boy, (who appears) like new unseen shoot of the race of Raghu, rouses my curiosity having all alone set, on the body of the army all round, thousands of arrows ablaze in a manner that is frightful from the cracking of the smashed joints of elephants' jaws. (3).

मित—मुनीति । अन्वयः—रघुवंशस्य नवःअप्रसिद्ध प्ररोह इव मुनिजनशिशुः सर्वतः सैन्यकाये दलितकरिकपोलग्रन्थिटङ्करघोरं (यथा तथा) ज्वलितशरसहस्त्रः (सन्) मे कौतुकं करोति । व्याख्या—'रघोः वंशस्य नवः नूतनः लक्ष्मणादीनामपत्येभ्यो भिन्नः 'अप्रसिद्धः' रघुवंशत्वेन लोके अविदितः प्ररोह इव' अङ्कुर इव एष 'मुनिजनशिशुः' तापसवेषः कुमारः एकः' असहाय एव 'सर्वतः' सर्वत्र सैन्यकाये सैन्यशरीरे सेनाङ्गे पादातेन अश्वेषु हस्तिषु च इत्यर्थः दलितः विमर्दितः यः करिकपोलग्रन्थि.' गजगण्डसन्धिः तस्य 'टङ्कारेण' भङ्गजनितेन टम् इति शब्देन 'घोरं भीषणं यथा तथा ज्वलितं प्रदीप्तं शरसहस्त्रं' असंख्या बाणा यस्य तादृशः सन् 'मे कौतुकं करोति' कुतूहलं जनयति ॥ कुतोऽयं कस्यायमद्भुतकर्मा कुमारः इत्यादि ज्ञातुम् उत्कण्ठा इत्यर्थः ॥

Notes—1. मुनिजनशिशुः—मुनिश्चासौ जनश्च मुनिजन hermit folk, तस्य शिशुः । This is how the compound is usually dissolved. Against this we observe that there is no reason to suppose that the boy's father is an ascetic. On the contrary with evident signs of a क्षत्रियब्रह्मचारी it is natural to take him otherwise. Hence say मुनिजनश्चासौ शिशुश्च कर्मधा—। 2. एकः—Alone. This is a ground for curiosity. 3. सर्वस्मिन् इति सर्व+ङि (७मी)+तसि स्वार्थे । This is another

reason for being curious. Also he is everywhere. 4. सैन्यकाये—सेनां समवेता इति सेना+यय सैन्या. forces. सैन्यानां काय अङ्गम् तस्मिम्। 'हस्त्यश्वरथपादातं सेनाङ्गं स्याच्चतुष्टयम्'। 5. नव इव &c. —This is the strongest factor to rouse curiosity. 6. दलित etc —Qualifies ज्वलनक्रिया in ज्वलितशरसहस्त्रः। Not only is he everywhere but his presence is unbearably felt everywhere—another reason for curiosity.

(*iv*) सुमन्त्रः—आयुष्मन्,

अतिशयितसुरासुरप्रभावं शिशुमवलोक्य तवैव तुल्यरूपम्।
कुशिकसुतमखद्विषां प्रमाथे धृतधनुषं रघुनन्दनं स्मरामि ॥५॥

Sumantra—O long-lived one!

On seeing this child that has excelled the might of gods and demons and is of similar features with thy own self, I recall to mind the delight of the race of Raghu (Rama) with his bow taken up at the extirpation of the obstructors of the sacrifice of the son of Kusika i.e., Viswamitra.

मित—। अतीति। अन्वयः—अतिशयितसुरासुरप्रभावं तवैव तुल्यरूपं शिशुम् अवलोक्य कुशिकसुतमखद्विषां प्रमाथे धृतधनुषं रघूनन्दनं स्मरामि। व्याख्या—अतिशयितः अतिक्रान्तः 'सुरासुराणां' 'प्रभाव' वीर्यं येन तादृशं 'तवैव तुल्यरूपं' सदृशं 'शिशुम्' इमं बालम् अवलोक्य कुशिकसुतस्य विश्वामित्रस्य 'मखद्विषां यागविघ्नकारिणां राक्षसानां 'प्रमाथे' विनाशे अन्तकर्मणि 'धृतधनुषं' [समासान्तविधेः अनित्यत्वात् अनङभावः] आत्तशरासनं 'रघुनन्दनं' रामभद्रं 'स्मरामि'। कार्मुकेण सव्यापारमेनं दृष्ट्वा रूपसादृश्यात् कर्मसादृश्याच्च प्राक् मारीचादीन् प्रति धनुर्व्यापारयन्तं राममेव स्मरामि॥

Notes—1. अतिशयित etc.—अति+शी means to transcend. सुराश्च असुराश्च सुरासुराः। No एकवद्भाव because the विरोध is not usually deemed शाश्वतिक but कारणकृत। Comp. 'देवासुरैरमृतमम्बु-

निधिर्मन्धें । See also Sak. VII. 9. 2. प्रमाथे—प्र + मथ + घञ् भावे प्रमाथ destruction. अधि ७मी। मन्थ is a different root. 3 धृत etc. —धृतं धनुर्येन स धृतधनुः । तम। The समासान्त affix अनङ् is absent because these affixes are sometimes treated as optional. Compare 'श्लाघ्याशंसा धृतधनषमह्नाय तृणवत्' । 4. स्मरामि—The boy reminds me of राम dispersing the obstructors of Visvamitra's sacrifice. Now स्मृति is always of a past experience No स्मृति if there is no actual experience. सुमन्त्र did not accompany राम when the latter went to guard the sacrifice. He did not see Rakhasas dispersed. Hence it is incongruous for him to say "कुशिक .. स्मरामि"।

(v) चन्द्रकेतुः—इममेकमुद्दिश्य भूयसामारम्भ इति हृदयमपत्रपते ।

अयं हि शिशुरेककः समरभारभूरिस्फुरत्-
करालकरकन्दलीकलितशस्त्रजालैर्बलैः ।
क्वणत्कनककिङ्किणीझणझणायितस्यन्दनै-
रमन्दमददुर्दिनद्विरदवारिदैरावृतः ॥५॥

Chandra—My heart shames that preparation of so many are directed against this single one.

Alone indeed is this boy surrounded by troops with weapons of sorts displayed in sprout-like hands that are uplifted and excessively busy [Or—troops whose grim weapons of sorts wielded with sprout-like hands are incessantly flashing] in the thick of fight,—troops among which chariots rattle and golden bells in them tinkle—troops in which are cloud-like elephants whose profuse flow of ichor resembles a heavy down-pour. (5).

मित—। 'उद्दिश्य' लक्ष्यीकृत्य। 'भूयसां' बहूनामसेनानाम्। 'आरम्भ:' व्यापार। अपत्रपते' लज्जते॥ अयमिति। अन्वय —समरभारभ रिस्फुरत-करालकरकन्दलीकलितशस्त्रजालै: क्वणत्कनककिङ्किणीझनझनायितस्यन्दनै: अमन्द मददुर्दिनद्विरदवारिदैः वलैः एकाकी हि अयं शिशु. आवृतः। व्याख्या —समरभारे' रणमूर्द्धनि महाहवकेन्द्रे इत्यर्थः 'भूरिस्फुरन्ति सातिशयदीप्य-मानानि 'करालकरकन्दलीकलितानि' उच्छ्रितबाहुशाखाप्रयुक्तानि 'शस्त्र-जालानि' अश्वारोहिणाम् आयुधसमूहाः येषु तादृशैः किञ्च समरकेन्द्रमभि-लक्ष्य त्वरमाणेषु रथेषु क्वणन्तः' मधुर रुवन्त्यः 'कनककिङ्किणयः रथस्थाः क्षुद्रघण्टिका येषु तादृशाः, झनझनायिता झनत् इत्यव्यक्तं शब्दं कुर्वन्तः स्यन्दनाः रथा येषु तथाविधे, अपि च 'अमन्दमददुर्दिनं अमन्द मददुर्दिना-ग्रभूतं मदवर्षनं येषां तादृशा 'द्विरदावारिदाः' मेघतुल्या गजा येषु तादृशैः वलैः एकको हि' असत्साह एव अयं शिशु आवृतः वेष्टितः इति महती मे हृदये लज्जा अनुकम्पाच शिशौ इत्यर्थः।

Notes—1 एककः—अनुकम्पित एकः इति एक+कन् अनुकम्पायाम्। He pities the boy at his plight, also censures his opponents for this cowardly attack. 2. समर etc.—भार weight, brunt. समरभार brunt of the battle, thick of the fight etc. कराल is तुङ्ग high, hence *up-lifted*. "करलो दन्तुरे तुङ्गे" इति विश्वमेदिन्यौ। कन्दली is द्रुम a tree, hence a branch of a tree. "कन्दली द्रुमे' इति हैमः। करा कन्दल्य इव। Now see टीका। Or dissolve thus—समरभारे भूरिस्फुरन्तीषु (excessively busy) करालासु (uplifted) करकन्दलीष कलितानि (displayed) शस्त्रजालानि येषु। Or —thus समभारे भूरिस्फुरन्तीभिः करालाभिः करकन्दलीभिः कलितानि (wielded) etc.—Or again thus—समरभारे भूरिस्फुरन्ति (incessantly flashing) करालानि (grim) करकन्दलीकलितानि शस्त्रजालानि etc.—This epithet seems to refer to the cavalry. These were the first to draw weapon. The entire cavalry force

became engaged simultaneously. The chariots and elephants were but coming up and were not yet in the midst of the fight. 3. क्वणत् etc.—The chariots are hastening to the sense. झनझनायित etc. refers to the rattle of the wheels, क्वणत् etc. to the jingle of the bells. If we intend to express झनत् इति अव्यक्तः शब्दः कृतो यैः by means of affixes etc., we shall have to (i) attach डाच् to झनत with the consequent doubling of झनत् (ii) and क्यष to obtain a root (नामधातु), (iii) attach क्त to this root, Hence झनत् झनत + डाच् + क्यष् + क्त कर्त्तरि (झनत झनत becomes झनझन by पररूप) झनझनायिताः, गतितत्—। The क्त is वर्त्तमाने । The final compound is a त्रिपदवहु —(see टीका) । 4. अमन्द etc —दुर्दिन shower. Comp. "द्विषां विषमस्थ काकुत्स्थस्तत्र नाराचदुर्दिनम्"—*Raghu* मदस्य दुर्दिनं मददुर्दिनम् । अमन्दं मददुर्दिनं येषाम । द्विरदा वारिदा इव द्विरदवारिदा । Now see टीका ।

(*iv*) सुमन्त्रः—वत्स: एभिः समस्तैरपि किमस्य किं पुनर्व्यस्तैः ?

चन्द्रकेतुः—आर्य्य त्वर्य्यतां त्वर्य्यताम् । अनेन हि महान् आश्रितजनप्रमाथः अस्माकमारब्धः । तथाहि—

आगुञ्जद्गिरिकुञ्जरघटाविस्तीर्णकर्णज्वरं
ज्यानिर्घोषममन्ददुन्दुभिरवैराध्मातमुज्जृम्भयन् ।
वेल्लद्भैरवरुण्डमुण्डनिकरैर्वीरो विधत्ते भुव-
स्तृप्यत्कालकरालवक्त्रविघसव्याकीर्य्यमाणा इव ॥६॥

Sum.—Child, what matters to him even with all these jointly ? Much less again severally.

Chand.—Hasten, noble Sir, hasten. By this one is in-

deed commenced a great slaughter of our dependent people. Thus—

The hero, sending forth the twang of his bow string which is swelled by the loud notes of drums and spreads earache among [Or—and gives an ache to the big ears of] the rows of our shrieking hill-roving-tuskers [Lit.—shrieking tuskers born in mountain caves] renders the grounds, with the heads of the hideous headless trunks tottering about, as if being strewn with the leavings of the frightful mouth of Death that is getting cloyed (6)

मित—। 'समस्तैः' मिलितैः युगपत्कृतव्यापारैः अपि अश्वै रथैः गजैश्च 'अस्य किं' क्रियताम्। 'व्यस्तैः' पृथग्व्यापृतैः एकदा अश्वैः अन्यदा रथैर्गजैर्वा पुनः किम् न किमपि स्यात्। एक एवायं सर्वेभ्योऽपि पर्य्याप्तः इत्यर्थः तदलमनुकम्पया॥ 'अनेन हि' वीरेण अस्माकम् आश्रितजनानां प्रमाथः' वधः 'आरब्धः' तत् 'त्वर्यतां' योद्धव्यं मयैव॥ आगुञ्जदिति। अन्वयः—अमन्ददुन्दुभिरवैः आध्मातम् आगुञ्जद्गिरिकुञ्जकुञ्जरघटाविस्तीर्णकर्णज्वरं ज्यानिर्घोषम् उज्जृम्भयन् वीर वेल्लत्कैरवरुण्डमुण्डनिकरैः भुवः तृप्यत्कालकरालवक्त्रविघसव्याकीर्य्यमाणा इव विधत्ते। व्याख्या—'अमन्दैः' गुरुभिः 'दुन्दुभिरवैः' सैनिककृतैः पटहध्वनिभि 'आध्मातं' बर्द्धितम् 'आगुञ्जन्तीषु' चीत्कारवतीषु ' गिरिकुञ्जकुञ्जरघटासु' सन्यस्थासु गिरिगुहाजातानां निर्भीकाणामपि गजानां श्रेणिषु 'विस्तीर्णः प्रसारितः 'कर्णज्वर' श्रोत्रपीडा येन तादृशं 'ज्यानिर्घोषं' धनुर्गुञ्जनम् 'उज्जृम्भयन्' उच्चारयन् 'वीरः' शूर एष बालः 'वेल्लतां रणाङ्गने धावतां भैरवरुण्डानां भीमकबन्धानां 'मुण्डनिकरैः' शिरः समूहै. [करणे तृया] 'भुवः रणभूमीः 'तृप्यतः तृप्तिं भजमानस्य कालस्य यमस्य करालवक्त्रस्य भीषणमुखस्य विघसैः भुक्तशेषैः 'व्याकीर्य्यमाणा इव आस्तीर्यमाणा (कर्मणि शानच्) इव 'विधत्ते' करोति॥

Notes—1. एभि. &c,—This is said to allay Chandraketu's apprehensions, Do you think the boy will be crushed by

your cavalry, or chariots or elephants ? Not at all. Separately, none of the three classes are a match for him ; this is evident. Even united they will go down before him. 2. आगुञ्जत् &c.—Usually this is taken to refer to some hill in the neighbourhood which is a resort of elephants, which elephants are annoyed by noise. But there is no mention of such a hill near the hermitage of Vilmiki. Besides, no कुञ्ज—a den or thicket—can possibly accommodate a whole घटा of elephants. It seems better to refer to the elephants in the army itself. गिरिकुञ्जकुञ्जर then means "elephants, born in caves of hills" which are expected to be a hardy lot not to be frightened easily. For समास see Tika. 3. ज्यानिर्घोषम्—Refers to Lava's bow. Obj. of उज्जृम्भयन्। 4. अमन्द &c.—दुन्दुभि drum, refers to the drums in the army. 5. वेल्लत् &c —वेल्लत् (वेल्ल+वत्) swinging towards a fall. रुण्ड a headless trunk कवन्ध। मुण्ड head "मुण्डौ मुण्डितशीर्षयोः" इति हैमः। The head is cut down and brought to the ground while the trunk is tottering (वेल्लत्)। 6. तृप्यत् &c.—कराल dreadful भीषण। 'करालो भीषणेऽन्यवत्' इति विश्वः। वि+अद्+अप् कर्मणि=विघस leaving of the table, भुक्तावशेष। The अप is by "उपसर्गे अदः" and घस substituted by 'घसॢोश्च'। Now see Tika, 7. *Remark*—The idea is taken from—
"शिलीमुखोत्कृत्तशिरः फलाढ्या च्युतैः शिरस्त्रैश्चषकोत्तरेव। रणक्षितिः शोणितमद्यकुल्या रराज मृत्योरिव पानभूमिः॥ —*Raghu*

(*vii*) सुमन्त्रः (स्वगतम्)—कथमेष्टप्रेन सह वत्सस्य चन्द्रकेतोर्द्वन्द्वसम्प्रहारमनुजानीयाम् ? (विचिन्त्य) अथवा इक्ष्वाकुवृद्धाः खलु वयम्, प्रत्युपस्थिते च का गतिः ?

चन्द्रकेतुः (सविस्मयलज्जासम्भ्रमम्)—धिक्, प्रतिनिवृत्तानि सर्वतः सैन्यानि मम ।

सुमन्त्रः (रथवेगमभिनीय)—आयुष्मन् एष वाग्विषयीभूतः स वीरः ।

चन्द्रकेतुः—(विस्मृतिमभिनीय)—आर्य्य, किमस्य नामधेयमाख्यातमाख्यायकैः ?

सुमन्त्र—लव इति ।

चन्द्रकेतुः—

> भो भो लव महाबाहो किमेभिस्तव सैनिकैः ।
> एषोऽहमेहि मामेव तेजस्तेजसि शाम्यतु ॥७॥

Sum. (*To himself*)—How can I permit the single combat of child Chandraketu with such a one ? (*Reflecting*) Or indeed I have grown grey in the house of Ikshvaku ; and what is the (alternative) way out in what has turned up ?

Chand. (*With wonder, shame and agitation*)—Fie ! My troops have fallen back on all sides !

Sum. (*Acting the speed of the car*)—O long-lived one, the hero is now within talking distance.

Chand. (*Acting forgetfulness*)—Noble Sir, what was his name given by the messengers ?

Sum.—Lava it was.

Chand.—Ho ! Ho ! mighty-armed Lava, what have you got to do with those soldiers ? Here I am, go at (Or—face) myself ? Let might (Or—spirit) subside in might (spirit). (7).

मित—। 'ईदृशेन' एवंविधेन वीरेणसह । 'द्वन्द्वसम्प्रहार'' द्वयोर्द्वयोर्युद्धम्, सति युद्ध चन्द्रकेतोः पराजयमुत्पश्यामि इत्यर्थः । 'इक्ष्वाकोः गृहेवृद्धाः खलु वयम्' वीरव्रतं जानीमः । 'प्रत्युपस्थिते च' सम्प्राप्ते विषये पुनः 'का

गतिः' अन्यः कः पन्था वर्त्तते ? न कोऽपि, तत् अगतिके द्वन्द्वसम्प्रहार एव भवतु ॥ बालेन प्रौढ़ानां पराजय इति 'विस्मयः'। ईदृशानामसाराणां नेता अहमिति लज्जा' झटिति उपायः कर्त्तव्य इति 'सम्भ्रमः॥ वाचां विषयः गोचरः वाग्विषय.'। अवाग्विषयः वाग्विषय. सम्पद्यमानोः' भूत [इति च्वि]। सम्प्रति समीपे एव वर्त्तते स तत् कथां कुरु इत्यर्थः॥ 'आख्यायकै. वार्त्ताहरैः। स्थानादस्मात् मदन्तिकं गत्वा ये प्रधनं निवेदयमाहः तैः॥ भो इति। अन्वयः—भोः भोः महवाहो लव, एभिः सैनिकैस्तव किम् ? एषः अहम्। मामेव एहि। तेजः तेजसि शामयतु। व्याख्या—'भो. भो महावाहो' विशालभुज लव एभिः सैनिकैः [करणे देया] तव किं प्रयोजनम् ? किमपि प्रयोजनम् नास्ति। 'एषः अहम्' स्थितः, मामेव एहि' अभिगच्छ। 'तेजः पराक्रमः तेजसि' पराक्रमान्तरे 'शामयतु' विलयं यातु। आवयोर्द्वन्द्वयुद्धमस्तु यावदेको न जीयते इत्यर्थः॥

Notes—1. द्वद्व &c.- द्वयोः द्वयो. इति द्वन्द्वम् निपातनात। The double is treated as कर्मधा—द्वि becomes द्व and the विभक्ति in the second becomes अम्। सम्प्रहरन्ते अस्मिन् इति सम्+प्र+हृ+घञ अधिकरणे = सम्प्रहार, fight. द्वन्द्व सम्प्रहारः द्वन्द्वसम्प्रहारः सुप्सुपा। तम्। dual. 2. भो भोः &c.—This is a graceful challenge, तेजस्तेजसि शाम्यतु is purposely vague. It does not mean I will humble thy pride or you mine. The plain meaning is—let one spirit (तेजस्) subside (शाम्यतु) in another (तेजसि) i.e. let there be a fight until one is conquered.

(*viii*) सुमन्त्रः—कुमार, पश्य पश्य—

व्यपवर्त्तत एष बालवीरः पृतनानिर्मथनात् त्वयोपहूतः।
स्तनयित्नुरवादिभावलीनामवमर्दादिव दृप्तसिंहशावः॥८॥

(ततः प्रविशति त्वरितोद्धतक्रमो लवः)

लवः—भाः, राजपुत्र, साधु ! सत्यमैक्ष्वाकः खल्वसि । तदयं परागत एवास्मि ।

(नेपथ्ये महान् कलकलः) ।

Sum.—Behold, Prince behold !

This boy-hero turns round giving up the slaughter of troops on being challenged by you, like an enraged lioncub leaving the killing of crowds of elephants from the roar of cloud. (8).

(Then Lava enters in quick and haughty steps),

Lava – Bravo ! Prince bravo ! Verily you are a true descendant of Ikshaku, So here I am come indeed,

(A great hubbub in the Tiring room).

मित—। व्यपवर्त्तत इति । अन्वयः—दृप्तसिंहशावः स्तनयित्नुरवात् इभावलीनाम् अवमर्दादिव एष बालवीरः त्वया उपहूतः पृतनानिर्मथनात् व्यपवर्त्तते । व्याख्या – 'दृप्तः' बलगर्वितः 'सिंहशावः हरितोतक. स्तनयित्नु-रवात् मेघगर्जनात् 'इभावलीनां' गजघटानाम् 'अवमर्दात् इव' हननात् इव 'एष बालवीरः' शूरः कुमारः लवः 'त्वया उपहूतः द्वन्द्वयुद्धाय आहूतः सन् 'पृतनानिर्मथनात्' सैन्यविनाशात 'व्यपवर्त्तते' निवृत्य परावर्त्तते ॥ त्वरित'' 'द्रुतः गर्वितः क्रमः पादक्षेपो यस्य तथाविधः । ऐक्ष्वाकः' इक्ष्वाकुकुलनन्दनः 'परागत'' प्राप्तः उपस्थित इत्यर्थः ॥

Notes—1, व्यपवर्त्तते – विवर्त्तन is turning round, desisting. अपवर्त्तन is receding. Hence the sense is—He desists from the carnage and moves away from the scene. He stops because you say किमेभिस्तव सैनिकैः । He comes owing to your call—एहि मामेव । 2. पृतना &c.—पृतना army, पृतनाया निर्मथनम् तस्मात् । अपादाने ५मी । अपाय is implied by व्यपवर्त्तते । 3. उपहूतः—उप + ह्वे + क्त कर्मणि । Challenged , आहूत is more

common is this sense. 4. स्तनयित्नु &c.—हेतौ ५मी। स्तनयित्नु is clouds. This is something like a challenge to the lioncub 5. इभ &c.—इभ elephant, इभानाम् आवलय इभावलयः rows of elephants. तासाम्। अवमर्दात् इति अपादाने ५मी। 6. ऐक्ष्वाक:—इक्ष्वाकोर्गोत्रापत्यं पुमान् इति इक्ष्वाकु+अञ् =ऐक्ष्वाक with the elision of उ by निपातन in the rule "दाण्डिनायन—"।

(*ix*) लव (सावेगं परावृत्य)—आः कथमिदानीं भग्ना अपि प्रतिनिवृत्य युद्धाभिसारिणः पर्यवष्टभ्य निघ्नन्ति मां चमूपतयः। धिग्जाल्मान्।

अयं शैलाघातक्षुभितबडवावक्त्र हुतभुक्-
प्रचण्डक्रोधार्चिर्निचयकवलत्वं व्रजतु मे।
समन्तादुत्सर्पन् घनतुमुलसेनाकलकलः
पयोराशेरोघः प्रलयपवनास्फालित इव ॥९॥

(इति परिक्रामति)।

Lava—(*Turning round excitedly*)—How is it that the leaders of the army, though repulsed, have returned seeking battle and are hitting me, having come up quite close? Fie on the idiots.

Let this deep and tumultuous hubbub of the army, swelling on every side like the tide of the ocean lashed up by the wind on the day of destruction, attain the state of food (i e, become food) to the army of flames of my fury which is as frightful as the fire from the mouth of the mare provoked by blows of rocks (9).

(*Goes round the stage*).

मित—। 'आवेगेन' सम्भ्रमेण सह 'परावृत्य' विवृत्तवदनो भूत्वा। 'भग्नाः' पलायिताः। युद्धाभिसारिणः' रणकामाः। 'पर्यवष्टभ्य' विशेषेण

समन्ताद्वा अदूरे स्थित्वा। 'विघ्नन्ति' ताडयन्ति अयुधः। 'चमूपतयः सेनानायका,॥ अयमिति। अन्वयः—प्रलयपवनास्फालितः पयोराशेः ओघ इव समन्तात् उत्सर्पन् अयं घनतुमुलसेनाकलकलः मे शैलाघातक्षुभित-वड्वावक्त्र हुतभुक्प्रचण्डक्रोधार्चिनिचयकवलत्वं व्रजतु। व्याख्या—'प्रलय-पवनेन' युगान्तवातेन 'आस्फालितः' विताडितः पयोराशेः' सागरस्य ओघ इव' प्रवाह इव समन्तात् सर्वतः 'उत्सर्पन् विवर्द्धमानः अयं 'घनः, गभीरः तुमुलः' सङ्कुलः बिमिश्र इत्यर्थः 'सेनाकलकल' सैन्यकोलाहल 'मे' मम 'शैलानां गिरीणां सागरगर्भस्थानामिति शेषः यः 'आघातः' तेन क्षुभितः समुद्दीपितः यः 'वड़वावक्त्रहुतभुक्' अश्विनीवदनानलः वाड़वानल'इत्यर्थः स इव 'प्रचण्डः' करालः यः 'क्रोधः तस्य 'अर्चिर्निचयस्य' शिखासमूहस्य "कवलत्वं 'व्रजतु' गच्छतु। मदीयः क्रोधः कोलाहलमिमं शमयतु इत्यर्थः॥

Notes—1. युद्ध &c,—युद्धम् अभिसरन्ति अभिलक्ष्य धावन्ति इति युद्ध+अभि+सृ+णिनि साधुकारिणि कर्त्तरि seeking battle. 2. पर्यवष्टभ्य—परि+अव+स्तम्भ+ल्यप। Having come up close. स becomes ष by "अवाच्चालम्बनाविदूर्ययो"। Here आविदूर्य्य (nearness) is implied. 3. निघ्नन्ति—नि+हन+लट अन्ति hitting me, Hence there is कर्म्मविवक्षा ; 'जासिनिप्रहण—" does not apply, and we have माम् not मम। 4. शैलाघात &c.—वड़वावक्त्र हुतभुक refers to the fire of Aurva's wrath which that sage discharged into the sea. It assumed the shape of a horse's head and continued there consuming sea-water. Comp. "ततस्तं क्रोधजं तात और्वोऽग्निं वरुणालये। उत्ससर्ज स चाचाप उपयुङ्क्ते महोदधौ। महद्धयशिरो भूत्वा यत्तद्वेदविदो विदुः॥ For समास see Tika, 5. समन्तात्—All round. An अव्यय। This is an exaggeration ; लव was facing चन्द्रकेतु at the time ; the army was behind

छव, so the noise could not actually proceed from *all sides.* That the army was behind him is openly stated in sl. 11 below—'पश्चाद्बलैरनुसृतोऽप्युदीर्णधन्वा'। 6. घन &c.—तुमुल refers to a state in which everything has got mixed up. A state of confusion. The idea is well expressed by the English word *tumult*. The cry of the soldier, the horse, the elephant &c., could not be caught separately, only a confused hubbub reached the ear. 7. प्रलय—&c—आ + स्फल सञ्चलने + णिच् + क्त कर्मणि = आस्फालित। It is supposed that at the time of universal destruction there are high winds which drive the sea out of its bed and cause a deluge. (See now Tika also for समास).

(*x*) चन्द्रकेतुः—भो भोः कुमार,

अत्यद्भुतादसि गुणातिशयात् प्रियो मे
तस्मात् सखा त्वमसि यन्मम तत् तवैव !
तत् किं निजे परिजने कदनं करोषि
नन्वेष दर्पनिकषस्तव चन्द्रकेतुः ॥१०॥

लवः—(सहर्षसम्भ्रमं परावृत्य)—अहो महानुभावस्य प्रसन्नकर्कशा वीरवचनप्रयुक्तिर्विकर्त्तनकुलकुमारस्य। तत् किमेभिः—एनमेव तावत् सम्भावयामि।

Chandra.—Ho! Ho! Youth.

You are dear to me from the highly wonderful profuson of your merits, so you are my friend; what is mine is yours indeed. Why then play havoc with your own attendants? Well, here is Chandraketu, the touch-stone of your valour. (10).

Lava (*Turning back with joy and regard*)—O, the gracious and yet grim application of heroic words by the magnanimous prince of the solar race! Then what is the use of these? Him I will honour,

मित—। अत्यद्भुतादिति। अन्वयः—अत्यद्भुतात् गुणातिशयात् मे प्रियः असि तस्मात् त्वं सखा असि। यत् मम तत् तव एव। तत् निजे परिजने किं कदनं करोषि? ननु एष चन्द्रकेतुः तव दर्पनिकषः। व्याख्या— 'अत्यद्भुतात्' परमविस्मयकरात् 'गुणातिशयात् मे प्रियः' असि' मां प्रीणयसि। एवंविधस्य तव दर्शनात् मे प्रीतिर्जाता तस्मात् प्रीतिजननात् त्वं सखा असि मे। यत्' वस्तु मम, तत् वस्तु 'तव। तत्' तस्मात् निजे परिजने मत्सम्पर्कात आत्मपरिजने कि कदनं करोषि कथं घातं विद्-धासि। न हि युक्तं तत्। 'ननु एष चन्द्रकेतुः तव दर्पनिकषः बलपरीक्षा-पाषाणो वर्त्तते तस्मिन्नेव विक्रमस्व॥ 'परावृत्य मुखं व्यावर्त्य 'प्रसन्ना' कोमला 'कर्कशा' कठोरा च। 'वीरस्य वचनं तस्य प्रयुक्तिः प्रयोगः उच्चा-रणम्॥ 'विकर्त्तन' सूर्य्यः॥ 'एभि सैन्यैः किं साध्यते न किमपि। एनम् 'सम्भावयामि सम्मानयामि द्वन्द्वयुद्धदानेन॥

Note,—1. गुण &c,—अति+शी+अच भावे अतिशय excess गुणनाम अतिशयः। तस्मात्। हेतौ ५मी। 2. प्रिय—प्रीणाति इति प्री+क कर्त्तरि प्रिय.। You please me, I feel attracted towards you, 3 तस्मात् &c.—Hence you are my friend. 4, परिजने —परिगतो जनः परिजनः attendant. Refers to the army.

(*37*) (पुनर्नेपथ्ये कलकलः)

लवः (सक्रोधनिर्वेदम्)—आः कदर्थितोऽहमेभिर्वीरसंवाद-विघ्नकारिभिः पापैः। (इति तदभिमुखं परिक्रामति)।

चन्द्रकेतुः—आर्य्य दृश्यताम् द्रष्टव्यमेतत्।

दर्पेण कौतुकवता मयि बद्धलक्ष्यः
पश्चाद्बलैरनुसृतोऽयमुदीर्णधन्वा॥

द्वेधासमुद्धतमरुत्तरलस्य धत्ते
मेघस्य माघवतचापधरस्य लक्ष्मीम् ॥११॥

(*A hubbub again in the dressing-room*)

Lava—(*With anger and disgust*)—O, I am insulted by these wretches who are causing interruption to my conversation with this hero. (*Steps towards them.*)

Chand.—Noble Sir, behold, it is worth beholding.

This one, with his bow up-lifted, having his attention fixed upon me with hauteur and curiosity, followed behind by the troops, exhibits the beauty of a cloud that wear Indra's bow and wavers on account of wind blowing in two ways. (11).

मित—निर्वेदः' वैराग्यम् घृणा। कुत्सितः अर्थः 'कदर्थः' निन्द्यो विषय विमानना इत्यर्थः। स सञ्जातः अस्य 'कदर्थितः' विमानितः। वीरेण संवादः सम्भाषणम् मेलनं वा। तत्र 'विघ्नम्' बाधां 'कुर्वन्ति' जनयन्ति' ये तैः 'पापैः' पापिभिः सैन्यैः [मत्वर्थीयः अच्]। तदभिमुखं बलाभिमुखम् ॥ दर्पणेति। अन्वयः—कौतुकवता दर्पेण मयि बद्धलक्ष्यः पश्चात् बलैः अनुसृत उदीर्णधन्वा अयं द्वेधासमुद्धतमरुत्तरलस्य माघवतचापधरस्य मेघस्य लक्ष्मीं धत्ते। व्याख्या—'कौतुकवता' सकौतुकेन दर्पेण' कौतुकमिश्रेण गर्वेण सह इत्यर्थः। युद्धाय आह्वानम् इति दर्पः भग्नेषु प्रवीरेषु मम तुल्यरूपेण बाले-नैवाह्वानम् इति कौतुकम्। 'मयि बद्धलक्ष्य,' दत्तदृष्टिः 'पश्चात् बलैः' अनु-सृतः' सैन्यैः अभिद्रुतः इति तत्रापि कृतलक्ष्य. उदीर्णधन्वा' उच्छ्रितकार्मुकः 'अयम्' एष वीर द्वेधा' द्विप्रकारेण 'समुद्धतः' समुच्चलितः यो मरुत वायुः तेन 'तरलस्य' अस्थिरस्य क्षणमित' क्षणं ततश्च प्रगतस्य 'माघवतचापधरस्य इन्द्रधनुर्द्धरस्य 'मेघस्य लक्ष्मीं' धत्ते शोभां बिभर्त्ति ॥

Notes—1. कदर्थित—अर्थ is विषय matter. कुत्सितः अर्थः कदर्थः disgraceful matter. स सञ्जातः अस्येति कदर्थ + इतच् कदर्थितः disgraced, insulted—तारकादि इतच्। 2. वी &c.—सम् + वद् + घञ भावे संवाद' interview. Comp. 'यदृच्छासंवादः किमु किमु गुणा-

नामतिशयः—sl. 16. अत्र साधुकारिणि कर्त्तरि णिनि (see टीका) । 3. तदभिमुखम्—He was coming towards चन्द्रकेतु and is now towards the army. Hence the comparison below. 4. उदीर्ण-धन्वा—उद् + ॠ (गतौ)+क्त कर्त्तरि उदीर्ण gone up i e, uplifted. उदीर्णं धनुर्यस्य इति उदीर्ण धनुस्+अनङ् समासान्त उदीर्णधन्वा । Now and then the समासान्त is not added as in "भ्रतधनुषं रघुनन्दनं स्मरामि" sl. 4. 5 द्वेधा &c.—द्विप्रकारेण इति द्वि+एधाच्=द्वेधा in two ways. सम्+उद्+हन (गतौ)+क्त कर्त्तरि समुद्धत arisen, तरल in opposed to स्थिर steady. For समास see टीका। 6. माधावत &c.—मघवन is इन्द्र। मघोन इदम् इति मघवन्+अण माघवनम् or माघवतम्' the stem irregularly changing into मघवत् by 'मघवा बहुलम्' । For absence of change compare "न वनी माधवनी बिनोदहेत," and "विजानात्वबनीं वनीं माघवनीम्—*Rasagangadhara* 7. *Remark*—It is not possible for wind to blow *simultaneously* in two directions. We have to suppose that the wind is unsteady and makes the cloud also unsteady.

(*xii*) सुमन्त्रः—कमार एवैनं द्रष्टुमपि जानाति, वयन्तु केवलं परवन्तो विस्मयेन ।

चन्द्रकेतुः—भो भो राजानः,

संख्यातीतैर्द्विरदतुरगस्यन्दनस्थैः पदाता-
वेकस्मिन् कवचनिचितैर्मेध्यचर्मास्तरोये ।
कालज्येष्ठैरभिनववयःकामकाये भवद्भिः
योऽयं बद्धो युधि परिकरस्तेन वो धिग् धिगस्मान् ॥१२॥

Sum —Even to mark him the Prince alone is able ; we are simply overpowered by wonder.

Chandra—Ho ! Ho ! Kings.

Shame to you and shame to me for this attempt that is being made by you on this one at fight—attempt by you, senior in age, on this one with a body tender by young age ; by you mail-coated, on this one with a wrap of holy skin , by you beyond number, on this one alone , by you on elephants, horses and cars, on this one on foot. (12)

मित—। 'द्रष्टुमपि इत्यत्र—अनेन योद्धुं कोऽपि इह बले न जानाति आस्तां युद्धम् एनं द्रष्टुमपि न जानाति।—इत्यपेरर्थः। 'परवन्तः पराधीनाः अभिभूता इत्यर्थः॥ संख्येति। अन्वय.—संख्यातीतैः द्विरदतुरगस्यन्दनस्थैः कवचनिचितैः कालज्येष्ठैः भवद्भिः एकस्मिन् पदातौ मेध्यचर्मोत्तरीये अभिनववयः काम्यकाये अत्र यः अयंयुधि परिकर बद्धः तेन व धिक् अस्मान् धिक्। व्याख्या—'संख्यातीतै असंख्यैः द्विरदस्थैः गजारूढैः 'तुरगस्थैः अश्वारूढैः स्यन्दनस्थैः' रथारूढैश्च कवचनिचितैः वर्मावृतैः 'कालज्येष्ठै वर्मावृतैः 'कालज्येष्ठैः' वयोधिकैः 'भवद्भिः एकस्मिन् एकाकिनि 'पदातौ' पादचारिणि 'मेध्यचर्मोत्तरीये मृगाजिनोत्तरासङ्गे 'अभिनववयसा' शैशवेन 'कम्यकाये' कमनीयगात्रे कोमलाङ्गे 'अत्र' अस्मिन् बाले विषये य अयं यूधि युद्धे परिकर' सज्जा 'वद्धः' कृतः 'तेन अधर्मयुद्धपरिकरेण वः धिक् 'युष्मान् गर्हे, अस्मान अपि धिक्' ईदृशबलनायकस्य ममापि गर्हा॥

Notes—1. **संख्यातीतै**—Constrast with **एकस्मिन्।** You are so many and he alone. It is an unequal fight. **संख्याम तीता** (२तत्—), **तै।** 2. **द्विरद** &c—**द्विरदाश्च तुरगाश्च स्यन्दनाश्च द्विरदतरगस्यन्दनम्।** Neuter singular by—**'द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम्'। तत्र तिष्ठन्ति इति कप्रत्ययः कर्त्तरि।** This contrasts with **पदातौ।** No fair fight between mounted and unmounted. 6 **कवच** &c.—**नि+चि+क्त कर्मणि निचित** covered. **कवचेन निचिताः।** Contrast with **मेध्यचर्मोत्तरीये।** You are well guarded, while the boy has but a wrap of deer skin on his upper half, the

lower being almost altogether uncovered. 4. कालज्येष्ठैः:— अतिशयेन वृद्धा इति वृद्ध + इष्ठन् = ज्येष्ठाः। कालेन ज्येष्ठाः। Hence your muscles are firm and you can bear hard knocks. Contrast with अभिनवय. कामयकाये। The pity of it—you do not see the unfairness. Fie on you! On me too because such a lot I am leading.

(*xiii*) लवः (सोन्माथम्)—कथम्, अनुकम्पते नाम? (विचिन्त्य) भवतु कालहरणप्रतिषेधाय जृम्भकास्त्रेण तावत् सैन्यानि संस्तम्भयामि। (इति ध्यानं नाटयति)।

सुमन्त्रः—तत् किमकस्मादस्मत्सैन्यघोषः प्रशाम्यति?

लवः—पश्याम्येनमधुना सप्रगल्भम्।

सुमन्त्रः—वत्स मन्ये कुमारकेणानेन जृम्भकास्त्रमामन्त्रितम्।

चन्द्रकेतुः—अत्र कः सन्देहः?

व्यतिकर इव भीमस्तामसो वैद्युतश्च
प्रणिहितमपि चक्षुर्ग्रस्तमुक्तं हिनस्ति।
अथ लिखितमिवैतत्सैन्यमस्पन्दमास्ते
नियतममितवीर्यं जृम्भते जृम्भकास्त्रम् ॥१३॥ (चन्द्र—)

Lava (*With annoyance*)—What! Does he pity me? (*Reflecting*) well, I will paralyse the troops with the Jrimbhaka weapon to prevent the loss of time. (*Acts meditation*).

Sum.—Well, why does the din of our army stop suddenly?

Lava—I will now see this spirited one.

Sum—Child, I think the Jrimbhaka weapon has been invoked by this boy.

Chand.—What doubt can there be in it?

Surely the Jrimbhaka weapon of matchless might has appeared on the scene. An intermixture terrible, like that of gloom and lightning hurts even the eye that is directed with care but which is shrouded and then freed [Lit — swallowed up and then disgorged.]. Besides, this army stands motionless like one, painted. (15). (Chandra—)

मित—। उन्माथः' पीड़ा। तेन सह यथा तथा। 'अनुकम्पते' इति पीड़ा। 'नाम' इति कुत्सा। समर्थोऽहम् एक एव एषां प्रमाथाय, नाहं विपन्नः तत् कुत्सिता इयमनुकम्पा। 'तावत्' इत्यवधारणे। 'सस्तम्भयामि तावत्' इत्यन्वयः॥ सप्रगल्भम्, स्वच्छन्दवाग्व्यवहारः प्रगल्भः। तेन सह। 'सप्रगल्भमहमेनं पश्यामि' इति 'एन सप्रगल्भं यथा तथा पश्यामि' इति वा अन्वयः। वीरसंवादविघ्नाभावात् 'अधुना' स्वच्छन्दवाग्व्यवहार कुर्वन् 'पश्यामि'॥ 'आमन्त्रितः आबाहित: व्यापारित इत्यर्थः'॥ व्यतिकर इति। अन्वयः—तामसः वैद्युतश्च व्यतिकरः इव भीमः (व्यतिकरः)। प्रणिहितमपि ग्रस्तमुक्तं चक्षु हिनस्ति। अथ एतत सैन्यं लिखितमिव अस्पन्दमास्ते। नियतम् अमितवीर्य्यं जृम्भकास्त्रं जृम्भते। व्याख्या—'तामसः' तमसा' वैद्युतश्च' विद्युताञ्च यः 'व्यतिकरः' समागमः युगपत्प्राप्तिः स 'इव भीमः' भयानकः व्यतिकरः 'प्रणिहितमपि' प्रणिधानपरमपि पूर्वं 'ग्रस्तम्' आवृतं पश्चात् मुक्तम् अनावृतं चक्षः हिनस्ति क्लिश्नाति, रूपग्रहो न जायते। 'अथ किञ्च एतत् सैन्यं लिखितमिव चित्रार्पितमिव 'अस्पन्दं' निश्चलं यथा तथा आस्ते अवतिष्ठते। तस्मात् 'नियतं' नूनम्, 'अमितवीर्य्यम्' अतुलप्रभाव 'जृम्भकास्त्रं जृम्भते आविर्भवति॥

Notes—1. नाम—अव्यय implying कुत्सा (see टीका)। नाम प्राकाश्यकुत्सयो." इत्यादि हैम.। संस्तम्भयामि—सम्+स्तम्भ+णिच्+लट्+मि I will paralyse जड़ीकरोमि]। 3. व्यतिकरः—वि+अति+कृ+अप् भावे or कृष etc. । Meeting, coming together &c. as in 'महानयंव्यतिकरोऽस्माकं प्रसादः''—Act III. 4 ग्रस्त etc—ग्रस्तञ्च-मुक्तञ्च। The समास is by 'पूर्वकालैकसर्व'—which restricts the

lead to the word that refers to पूर्वकाल (Prior time). The obstruction comes first, hence ग्रस्त leads. This sort of व्यतिकर is not seen with any weapon except the जृम्भक। 6. अथ—अव्यय implying समुच्चय, i.e. it introduces an additional reason why it must be the जृम्भक weapon and no other. अथोऽथ स्यातां समुच्चये इत्यादि हैमः। अमित &c,—मा+क्त भावे मित measure मान। न मितम अमितम् measureless, matchless. अमितं वीर्यमस्य। अमित is the reading of वीरराघव and Vidyasagara's manuscripts 1 and 2,

(*xiv*) (च—)आश्चर्य माश्चर्यम्।

पातालोदरकुञ्जपुञ्जिततमःश्यामैर्नभो जृम्भकै-
रुत्तप्तस्फुरदारकूटकपिलज्योतिर्ज्वलद्दीप्तिभिः।
कल्पाक्षेपकठोरभैरवमरुद्व्यस्तैरवस्तीर्यते
मीलन्मेघतडित्कडारकुहरैर्विन्ध्याद्रिकूटैरिव ॥१४॥

Chandra—) Wonder! Wonder!

The sky is being overcast by the Jrimbhaka weapons that are dark like the gloom, massed in the pit of the nether regions and have flashing like the purple glow of molten and running brass as if by the peaks of the Vindhya hill driven by high and terrific gales at the end of a *Kalpa* with their caverns made purple by the lightning of colliding clouds. (14).

मित—। पातालेति। अन्वयः—कल्पाक्षेपकठोरभैरवमरुद्व्यस्तैः मीलन्मेघतडित्कडारकुहरैः विन्ध्याद्रिकूटैः इव पातालोदरकुञ्जपुञ्जिततमःश्यामैः उत्तप्तस्फुरदारकूटकपिलज्योतिर्ज्वलद्दीप्तिभिः जृम्भकैः नभः अवस्तीर्यते। व्याख्या—'कल्पस्य' ब्रह्मणो दिनस्य 'आक्षेपे' अवसाने युगान्ते इत्यर्थः ये 'कठोराः' प्रवृद्धाः 'भैरवाः' भीमाश्च 'मरुतः' वायवः प्रकम्पपवना इत्यर्थः तैः

'व्यस्तैः विक्षिप्तैः किञ्च 'मीलन्तः' गतिवशात् समापतन्तः ये 'मेघाः तेषां या. तडितः विद्युतः ताभिः 'कडाराणि पिङ्गलानि. 'कुहराणि' गह्वराणि येषां तादृशेः 'विन्ध्याद्रिकूटैः. विन्ध्यगिरिशृङ्गैः. इव पातालस्य उदरकुक्षे कुक्षिगह्वरे 'पुञ्जितं' पिण्डीभूतं यत् 'तमः' तदिव श्यामैः किञ्च उत्तप्त.' अतएव स्फुरन् चञ्चल यः आरकूटः' पित्तलराशिः तस्य यत् 'कपिल' पिङ्गलं ज्योतिः प्रभा तदिव ज्वलन्तो दोप्यमाना 'दीप्तिः प्रभा येषां तथाविधैः. जृम्भकैः नभ.' आकाशम् 'अवस्तीर्यते' व्याप्यते [अवस्तृणातेः कर्मणि लट्] ।

Notes—1. पाताल &c.—पुञ्ज a heap. पुञ्ज सञ्जातः अस्य इति पुञ्ज+इतच् पुञ्जितम् heaped. Now see टीका। This epithet secures resemblance in colour with the Vindhya peaks, also justifies तामसो व्यतिकरः of sl. 13. 2. उत्तप्त &c.—आरकूट is explained as रीति। रीतिः स्त्रियामारकूट' इत्यमरः। रीति again is a synonym for पित्तल brass. ''रीतिस्तु पित्तले' इत्यादि हैम । This furnishes another point of resemblance with the कडार कुहर of विन्ध्यादिकूट and explains how वैद्युतश्च व्यतिकरः। 3. कल्पाक्षेप &c—Kalpa is a day of Brahman. At the end of it everything perishes. High gale prevails and masses of ominous clouds appear. The peaks of the Vindhya are supposed by the poet to have been uprooted by the wind and sent hurtling to collide with some of the numerous masses of clouds that are floating about. Thus this epithet justifies मीलन्मेघ in the next. 4. मीलन्मेघ &c—The previous epithet has explained how the peaks and the clouds meet. Then the lightning in the clouds flashes and empurples the the crevices in the peaks. It is not clear why the peaks of the Vindhya are singled out. Like those of the Vindhya it is natural to suppose that the peaks of the other

the other mountains are also in motion. Why then विन्ध्याद्रिकूटैः ? Possibly the poet lived close by the Vindhya; That hill was always before his eyes and when thinking of a mountain his thOught inevitably turned to the Vindhya.

(*xv*) सुमन्त्रः—कुतः पुनरस्य जृम्भकाणामागमः स्यात् ?

चन्द्रकेतुः—भगवतः प्राचेतसादिति मन्यामहे ।

सुमन्त्रः—वत्स नास्य व्यवहारोऽस्त्रेषु विशेषतो जृम्भकेषु । यतः,—

कृशाश्वतनया ह्येते कृशाश्वात् कौशिकं गताः ।

अथ तत्सम्प्रदायेन रामभद्रे व्यवस्थिताः ॥१५॥

चन्द्रकेतुः—अपरेऽपि परमोपचीयमानसत्वप्रकाशाः स्वयं हि मन्त्रदृशः पश्यन्ति ।

Sum.—But whence could a knowledge of the Jrimbhakas come to him (Lava) ?

Chandra.—I think, from the worshipful Prachestas.

Sum.—Child, he has no experience of weapons specially of the Jrimbhaka weapons. For—

Verily these are Krisasva's children. From Krisasva they passed on to Kausika ; then through initiation by him they rest now with Ramabhadra. (15)

Chandra.—Other seers of mantras too themselves see (such secrets) with the light of the *Satta guna* greatly strengthening or gaining ground (within them).

मित—। 'आगमः' आगमनं लाभ इत्यर्थः॥ 'अस्त्रेषु विषये 'अस्य' भगवतः, प्राचेतसस्य व्यवहारः चर्चा 'न नास्ति। सामान्यतः अयमस्त्राणि जानाति सत्यं किन्तु न व्यवहरति, जृम्भकास्त्राणि तु नैव जानाति ॥ अज्ञानकारणमाह—'यतः' इति। कृशाश्वेति। अन्वयः—एते कृशाश्वतनया हि। कृशाश्वात् कौशिक गताः। अथ तत्सम्प्रदायेन रामभद्रे व्यवस्थिताः।

व्याख्या—एते कृशाश्वस्य तनया हि' तनया एते ननु अस्त्रमात्रम् । 'कृशाश्वात् कौशिकं' कुशिकतनयं विश्वामित्रं 'गता संक्रान्ताः । 'अथ अनन्तर तस्य' विश्वामित्रस्य यः सम्प्रदायः' नियमपूर्वकप्रदानं तेन हेतुना सम्प्रति 'रामभद्रे' व्यवस्थिताः नियताः । नान्यगामिन एते, तत् कुतोऽस्य आगमः स्यात् ॥ 'परमं प्रभूतं यथा तथा उपचीयमानः' वर्द्धमान· सत्त्वगुणस्य प्रकाशः' आविर्भावः येषु तादृशाः अतएव सत्त्वगुणस्य उद्भासकत्वात् गुहायां निहित-मपि द्रष्टुं समर्थाः 'मन्त्रदृश' [इति क्विप] मन्त्रद्रष्टारः अपरे अपि' कृशाश्वव्यतिरिक्ता अन्येपिऋषयो च गुरूपदेशं विनैव 'स्वयं हि' मन्त्रान् 'पश्यन्ति' । तादृशां वा भगवतो वाल्मीकेर्ज्ञानं जृम्भकेषुस्यात् ।

Notes—1. व्यवहारः-वि+अव+हृ+घञ् भावे practice, experience. 2. एते—The तनयत्व is emphasised, hence masculine. 3. तत्सम्प्रदायेन—सम्+प्र+दा+घञ् भावे=सम्प्रदाय a gift by formal intiation, हेतौ ३या । 5. रामभद्रे &c.—The Viracharita imparts the knowledge to लक्ष्मण also, 5. परम &c —The सत्त्वगुण is described as प्रकाशक, i.e , it lights up dark corners. "सत्त्व लघु प्रकाशकम्"—*Tattva-kaumadi*. Hence it reveals secrets. Consequently when सत्त्वगुण has sufficiently developed in a person he can see the प्रयोग and संहार mantras of any weapon and therefore of the Jrimbhakas also. So even if कृशाश्व has seen before, it is not unlikely that वाल्मीकि *also saw them independently through the development of* सत्त्वगुण within him. उप+चि+शानच् कर्मकर्त्तरि, as 'चीयते बालिशस्यापि" in Mudra I. 3, etc.

(*XVI*) सुमन्त्रः—वत्स, सावधानो भव परागतः प्रवीरः ।

कुमारौ (अन्योऽन्यं प्रति)—अहो प्रियदर्शनः कुमारः।

(सख्यं सानुरागं निर्वर्ण्य)—

यदृच्छासंवादः किमु किमु गुणानामतिशयः
पुराणो वा जन्मान्तरनिविड़बन्धः परिचयः।
निजो वा सम्बन्धः किमु विधिवशात् कोऽप्यविदितो
ममैतस्मिन् दृष्टे हृदयमवधानं रचयति ॥ १६ ॥

Sum.—Be careful, child, the great hero has come.

The youths (*With reference to each other*)—Ha! Pleasing is the sight of this youth! (*Marking with love and affection*).

Is it this chance meeting, (or) is it the profusion of merit, (is it) again old acquaintance with a firm attachment in a prior birth, or close relationship unknown through the influence of fate, that this one being seen, forces the heart to close attention. (16).

मित—। 'अवधानम्' एकाग्रता ! तेन सह 'सावधानः'। प्रकृष्टो वीरः प्रवीरः समागतः॥ 'अन्योऽन्यं प्रति अन्योऽन्यमुद्दिश्य। लवस्य स्वगतम् चन्द्रकेतोस्तु छमन्त्रं प्रति जनान्तिके। यदृच्छेति। अन्वयः—एतस्मिन् दृष्टे किमु यदृच्छासंवादः किमु गुणानाम् अतिशयः, किमु जन्मान्तरनिविड़-बन्धः पुराणः परिचयो वा, बिधिवशात् अविदितः कोऽपि निजः सम्बन्धी वा मम हृदयम् अवधानं रचयति। व्याख्या—'एतस्मिन्' अस्मिन् कुमारे 'दृष्टे सति 'किमु' किंस्वित् यदृच्छासंवादः' एव आकस्मिकः समागमः, 'किमु' किंस्वित् एतस्य 'गुणानाम् अतिशयः' गुणप्रकर्षः 'किमु' किंस्वित् 'जन्मान्तरे पूर्वस्मिन् कस्मिंश्चित जन्मनि निविड़ः' दृढ़ः 'बन्ध' बन्धनं यस्य तादृशः 'पुराणः' प्राक्तनः 'परिचयो वा' सम्बन्धो वा विधिवशात् दैव-गत्या 'अविदितः' परस्परस्य अविज्ञातः 'कोऽपि निजः 'सम्बन्धो वा' आत्मोया वान्धवता वा 'मम हृदयं चेतः (कर्म) 'अवधानम्' एकाग्रतां 'रचयति' गमयति ॥

Notes.—1. प्रियदर्शनः—प्रीणातीति प्री+क कर्त्तरि=प्रियम् pleasing. प्रियं दर्शनमस्य। 2. यदृच्छा &c.—यदृच्छा is गति course of

events. या श्रृच्छा यदृच्छा। तथा संवाद: casual meeting. 3. किमु—An अव्यय implying वितर्क deliberation. Each notices his heart being attached towards the other ; and he then deliberates as to its cause. Three explanations occur—(a) It is pure chance (यदृच्छासंवाद:), (b) It is the endowment of the other (गुणानामतिशय:); (c) It is the existence of some sort of relationship. The last again falls under two heads —(i) Relationship in prior life (जन्मान्तरनिरूढबन्ध: परिचय:), (ii) Present relationship accidentally remaining unknown (निजो वा सम्बन्ध: &c.) 4. हृदयम्—अणिकर्तृकर्म of रचयति। Thus हृदयम् अवधानं रचयति (चुरादि)—the heart adopts attention. Attaching णिच् again (this time हेतुमन्णिच्) यदृच्छासंवाद: (प्रयोजक) हृदयम् (प्रयोज्यकर्म) अवधानं रचयति by the rule "गतिबुद्धि—" because रच has become here गत्यर्थक। 5. रचयति —We have singular because the nominative यदृच्छासंवाद &c. exclude one another. If any one of them is adopted, the rest must be dropped. Hence with only one nominative we have the singular. 6. *Remark*—As already remarked this sort of अन्योऽन्यभाषण is extremely unnatural. Again it seems the correct reading of the verse has escaped us. We have explained अवधानं रचयति as अवधानं गमयति। In that case it is difficult to see why the poet rejects the plain गमयति and prefers the awkward रचयति। Both suit the metre. Comp.—"चेतसा...स्मरति जननान्तरसौहृदानि"—Sak.

(*XVII*) सुमन्त्र:—भूयसा जीविधर्म एष यत् रसमयी कस्यचित् क्वचित् प्रीति: यत्र लौकिकानां व्यापार: तारामैत्रकं चक्षूराग इति। तमप्रतिसंख्येयम् अनिबन्धनं प्रेमाणमामनन्ति।

अहेतुः पक्षपातो यस्तस्य नास्ति प्रतिक्रिया।
स हि स्नेहात्मकस्तन्तुरन्तर्मर्माणि सीव्यति ॥ १७ ॥

Sum.—It is mostly the way of the living that some one's friendliness for some one else, is full of affection, for which the designation of the worldly people is 'pupil-friendship', 'eye-delight' &c. That inconceivable and causeless something they call 'love.'(प्रेम) I

There is no counter-action to the leaning that is causeless. That thread in the shape of affection stitches up indeed the vital of the heart, (17).

मित—। 'भूयसा' प्रायेण 'जिविधर्मः' प्रणिस्वभाव 'एष यत् 'कस्यचित् प्रीतिः' आनन्दः क्वचित् क्वापि जने 'रसमयी' प्रेमपूर्णा भवति 'यत्र' यस्यां रसमय्यां प्रोतौ 'लौकिकानां' लोकानां 'तारामैत्रकं' कणीनिकासख्य चक्षूरागः' नयनरञ्जनम् 'इति च व्यवहारः' उक्तिः भवति। तामेव प्रोतिं लोकाः केचित् तारामैत्रकमाहुः केचित् पुनश्चक्षूरागम् इति। 'अप्रतिसंख्येयम् 'अनिर्व्वचनीयम्' 'अनिवन्धनम्' अहेतुकं 'तं प्रेमाणम् आमनन्ति' प्रेमशब्देन निर्दिशन्ति लोका इति शेषः। यत् वस्तु तारमैत्रकमिति चक्षूराग इति च कथ्यतेतत् किमात्माकं कुत उत्पद्यते इति ज्ञातुमशक्यम, परं तस्य प्रेम इति संज्ञा लोके। अहेतुरिति। अन्वयः—यः पक्षपातः अहेतुः तस्य प्रतिक्रिया नास्ति। स हि स्नेहात्मक. तन्तुः अन्तर्मर्माणि सीव्यति। व्याख्या —'यः पक्षपातः अभिसमाश्रयः पक्षावलम्वनमित्यर्थः। स्नेहकृतः पक्षपातः इति उपचारात पक्षपातः स्नेहः। यः स्नेहः 'अहेतु,' निष्कारणः 'तस्य प्रतिक्रिया प्रतिविधानं नास्ति। 'स हिः' नस्नेहः किन्तु स्नेहरूपः 'तन्तुः' सूत्रम् एव। क्रियते तेन सूत्रेण इत्याह—'अन्तर्ममाणि' आभ्यन्तराणि मर्मस्थानानि स 'सीव्यति' योजयति [सिवधातोः दैवादिकस्य लट्] तस्याशे हृदयमेव भिद्यते इत्यर्थः। एतादृशः प्रेमा ते अस्मिन् लवे जातः, ततः अनुवर्त्तस्व तमहेतुकं प्रेमाणम् इत्याशयः ॥

Notes.—1. भूयसा—प्रकृत्यादि रेथा। 2. जीविधर्मः—जीवः जीवनम्। स अस्ति एषाम् जीव+इनि जीविन. the animate world. तेषां धर्मः। 3. तारा &c.—तारा pupil of the eye. मैत्र friendship तदेव मैत्रकम्। ताराणां मैत्रकम्। 4. चक्षूरागः—रागः affection, चक्षूषां रागः। 5. अप्रति &c.—प्रतिसंख्या is enumeration after the manner of the सांख्य system of philosophy, i e., enumeration as प्रकृति or as महत्, अहङ्कार &c. प्रतिसंख्यातुमशक्यम् अप्रतिसंख्येयम् incapable of being classed as प्रकृति महत् &c. Hence inconceivable. 6. अनिवन्धनम्—निवध्यते अनेन इति नि+ +वन्ध+लुयट् करणे निवन्धतम् that with which restrained, cause अविद्यमानं निवन्धनमस्य। 7. प्रेमाणम्—प्रियस्य भाव इति प्रिय+ इमनिच=प्रेमन (प्रातिपादिक)। This is often used in the neuter, here it is masculine. 8. अहेतु &c —पक्षपात preference, Here इमन्त्र declares for यदृच्छासंवाद: in Chandraketu's speech above. गुणानामतिशयः etc. are evidently cited as हेतु for the preference यदृच्छासवादः furnishes the only instance where the preference is अहेतु।

(*XVIII*) कुमारौ (अन्योऽन्यं प्रति) —

एतस्मिन् मसृणितराजपट्टकाङ्के
मोक्तव्याः कथमिव सायकाः शरीरे।
यत्प्राप्तौ मम परिरम्भणाभिलाषा-
दुन्मीलतपुलककदम्बमङ्गमास्ते ॥ १८ ॥ (क्र—)

The youths (With reference to each other)—How indeed are arrows to be shot at this body that is lovely like a polished Rajapatta gem and at the arrival of which (Or—sight of which) my body stands with hairs on and this through a desire to embrance. (18) (The youths—)

मित—। एतस्मिन्निति। अन्वयः—मसृणितराजपट्टकान्ते एतस्मिन् शरीरे कथमिव सायकाः मोक्तव्याः यत्प्राप्तौ परिरम्भणाभिलाषात् मम अङ्गम् उन्मीलत्पुलककदम्बम् आस्ते। व्याख्या—मसृणः कृतः' यः 'राजपट्टः' (इन्द्रनीलो ?) मणिः तस्मिन्निव 'कान्ते कमनीये सुन्दरे इत्यर्थः' एतस्मिन् शरीरे कथमिव केन वा प्रकारेण 'सायकाः मोक्तव्याः बाणाः पातयितव्याः, न कथमपि इत्यर्थः। अस्य शरीरस्य सौष्ठवहानिर्बाणपातेन न कर्त्तव्या इति भावः। न केवलमनौचित्यम्, अप्रसङ्गश्च बाणपातस्य इत्याह—यत्प्राप्तौ यस्य शरीरस्य 'प्राप्तौ' समागमे सति यद्दर्शने जाते इत्यर्थः' परिरम्भणस्य' आलिङ्गनस्य अभिलाषात् इच्छया 'मम अङ्गम् उन्मीलत् आविर्भवत् पुलक-कदम्बं रोमाञ्चसमूहः यस्मिन् तथाविधं सत् 'आस्ते वर्त्तते। अङ्गे रोमाञ्चः, उद्गतो रोमाञ्चः कुतो नु करे बाणस्य प्रपञ्चः प्रसङ्गश्च इति भावः॥

Notes—1 अन्योऽन्यम् etc.—Unnaturalness is already noted. 2 मसृणित etc.—मसृण smooth, मसृणः कृतः इति मसृण+णिच् (नामधातु) + क्त कर्मणि मसृणितः polished. राजपट्ट is some gem, which gem it is not clear. But the boys were कुवलयदलस्निग्धश्यामौ (IV, sl. 19), इन्द्रनीलमणिमेचकच्छवि (VI, sl. 17). etc So possibly राजपट्ट is an emerald or like it. 3. कथमिव &c.—The first half of the verse shows the undesirability of shooting. It is sheer vandalism to spoil the beauty of it with arrow marks. 4. यत्प्राप्तौ &b.—The second half states the fighter's inability to shoot. Love rules supreme. How can there be a fight ?

(*xix*) (कु—)

किन्त्वाक्रान्तकठोरतेजसि गतिः का नाम शस्त्रं विना
शस्त्रेणापि हि तेन किं न विषयो जायेत यस्येदृशः।
किं वक्ष्यत्ययमेव युद्धविमुखं मामुद्यतेऽप्यायुधे
वीराणां समयो हि दारुणरसः स्नेहक्रमं बाधते ॥८॥

(The youths)—But in the matter of one who has resorted to stern mettle, what other source of help exists but weapons ? What again is really the use of the weapon of which such a one may not become the mark ? What will this very one think of (lit—say to) me if I turn back from the fray even when the bow is raised ? Verily the horridflavoured ways of warriors (Or—the ways of warriors are horrid-flavoured and) check the course of affection (16),

मित—। किन्त्विति। अन्वयः—किन्तु आक्रान्तकठोरतेजसि शस्त्रं विना का नाम गतिः। यस्य ईदृश विषयो न जायेत तेन शस्त्रेण अपि किम्। आयुधे उद्यते अपि युद्धविमुखं माम अयमेव किं वक्ष्यति। दारुणरसः वीराणां समयः स्नेहक्रमं वाधते हि। व्याख्या — किन्तु' अनुचितेऽपि बाणपाते 'आक्रान्तम्' अधिकृतं 'कठोरं 'तेज ' शौर्य्यं येन तथाविधे जने विषये 'शस्त्रं विना का नाम गतिः' उपायः स्यात। उद्यतायुधे अस्मिन् ममापि आयुधमेव शरणं न किञ्चिदन्यत् इत्यर्थः। 'यस्य शस्त्रस्य 'ईदृशः' एवविधः वीर' 'विषयो न जायेत' पात्रं न स्यात् 'तेन' अपात्रे प्रयुक्तेन शस्त्रेण अपि किं प्रयोजनं न किमपि। अतः पातनीयो वाणः। अन्यथा 'आयुधे' धनुषि 'उद्यते अपि' मयि प्रहर्त्तुम् उत्तोलिते अपि युद्धविमुखं रणपराङमुखं माम्‌अयमेव किं बक्ष्यति' स्नेहपात्रम् एष एव मतसम्बन्धे कि मंस्यते। कापुरुषं मां मंस्यते इत्यर्थः। ततः प्रवर्त्ततां रणः। 'दारुणरसः' क्रूरास्वादः 'वीराणां समयः' आचार: 'स्नेहस्य क्रमं' प्रसरं बाधते हि बारयत्येव ॥

Notes—1. आक्रान्त &c.—आक्रान्त is आरूढ। कठोर is प्रवृद्ध। Now see टीका। Lit.—He has mounted on fully developed mettle i.e, He has adopted stern course in the matter of myself We have to suppose that each of the youths assumes the other to be in a stern mood while he himself is affectionate. 2. जायेत—"हेतु हेतुमतोर्लिङ" इति लिङ्। The sense is

शस्त्रेण किमपि न स्यात् यदि ईदृशः विषयो न जायेत। The कार्य्यकारण-भाव is obvious. 3. आ+युध+क करणे घञर्थे आयुधम् the bow. In this sense, compare 'तन्मदीयमिदमायुधं ज्यया संगमय्य सशरं विकृष्यताम्'—*Raghu.* 4. दारुणरसः—दारुण bitter. रस taste स्वाद। दारुण रसो यस्य of a bitter taste वीररस is बोद्दविरुद्ध।

(*xx*) सुमन्त्रः (लवं निर्वर्ण्य सास्रमात्मगतम्)—हृदय, किमन्यथा परिकल्पसे ?

मनोरथस्य यद्बीजं तद्दैवेनादितो हृतम्।
लतायां पूर्वलूनायां प्रसूनस्यागमः कुतः॥ २०॥

चन्द्रकेतुः—अवतराम्यार्य स्यन्दनात्।

सुमन्त्रः—तत कस्य हेतोः ?

चन्द्रकेतुः—यतस्तावदयं वीरपुरुषः पूजितो भवति, अपि खलु आर्य्य क्षात्रधर्मश्चानुष्ठितो भवति। न रथिनः पादचारमायोधयन्ति इति शास्त्रविदः परिभाषन्ते।

Sum. (*Having marked Lava—To himself with tears*)—O heart, why do you build perversely ?

What was the source of my desire had long before been demolished by fate. The twig being first clipped off whence is the show of flower ?

Chandra —Noble Sumantra, I alight from the car.

Sum.—And that for what reason ?

Chandra —For then this mighty soul becomes honoured, besides, noble Sir, the duty of the military caste will be observed too : "Charioteers do not fight those that are on foot" so do say those that are versed in the Sastras,

मित—। 'त्वं निवंशयं' निपुणं दृष्ट्वा 'सीताप्रतीऽयं वा स्यात्' इति सन्दिह्यमानः तत्क्षणमेव मृता सीता असम्भवमेतत्' इति समादधानः 'सास्रं रुदन् स्वगतमाह—हृदय अन्यथा' अन्यप्रकारेण मिथ्या इत्यर्थः किं परिकल्पसे' परिकल्पयसि । अन्तर्भावितणयर्थः कल्पतिरत्र ॥ मनोरथस्तेति । अन्वयः—मनोरथस्य यत् बीजं तत् आदित. दैवेन हृतम् । लतायां पूर्वलूनायां कुतः प्रसूनस्य आगमः । व्याख्या—,मनोरथस्य सीतासूतोऽयं भवेत् इत्येवंरूपस्य अभिलाषस्य 'यत् बीजं' मूलकारणं सीतारूपं 'लता आदितः' पूर्वमेव दैवेन हृतम् तत् असङ्गतो मे मनोरथः। 'लतायां पूर्वलूनायां प्रसूनागमकालात् प्रागेव छिन्नायां 'कुतः प्रसूनस्य आगमः' पुष्पोद्गमो भवेत् ॥ पूजितः' आदृतः । 'क्षात्त्रधर्मः क्षत्रियाचारः । 'अनुगृहीतः अनुसृतः । प्रकृते तमेव आचारं वर्णयति—न रथिनः इति । 'पादचारं' पदातिम् । 'परिभाषन्ते' वदन्ति ॥

Notes 1 —**परिकल्पसे**—For similar use with the sense of णिच् compare "श्रेयसे शाश्वतो देवो वराहः परिकल्पताम्'—sl, 37 below, Some read **परिप्लवसे** for **परिकल्पसे** । With this translate—why do you rush perversely ? Also compare 'अयञ्च संप्लवमानमात्मानम् &c. VI, xxe , again "परिप्लवमानहृदयः संप्रमुग्धोऽस्मि -VIII, xv 2 क्षात्र &c —क्षत्त्रस्य अयम् इति क्षत्त्र+अण् क्षात्त्रः। क्षात्त्र' धर्म.। पादचारम्—पादेन चारः गतिः अस्य, तम्। आयोधयन्ति —आ+युध+णिच्+लट् अन्ति cause to fight

(*xxi*) सुमन्त्रः (स्वगतम्)—कष्टं वतानुप्रपन्नोऽस्मि ।
कथं न्याय्यमनुष्ठानं माद्दृशः प्रतिषेधतु ।
कथं वाभ्यनुजानातु साहसैकरसां क्रियाम् ॥ २१ ॥

चन्द्रकेतुः—यदा तातमिश्रा अपि पितुः प्रियसखाय धर्मसंशयेषु आर्यमेव पृच्छन्ति तत् किमार्यो विमृशति ?

सुमन्त्रः—आयुष्मन् एवं यथाधर्ममभिमन्यसे ।

एष सांग्रामिको न्याय एष धर्मः सनातनः ।
इयं हि रघुसिंहानां वीरचारित्रपद्धतिः ॥ २२ ॥

Sum, (*To himself*)—Alas ! I am in a fix.

How can one like me either disapprove a just course of action or approve a step that savours solely of rashness ? (21).

Chandra—As our revered elders too refer to your noble self their father's dear friend, in conflicts of duty, then why does the noble one hesitate now ?

Sum.—O long lived one, the law is as you take it (lit—you take it in accordance with the law).

This is the rule of battle ; this is the ancient usage ; this indeed is the course of heroic conduct of the lines of Raghu's race (23).

मित—। 'कष्ट' सङ्कटम् 'अनुप्रपन्नः' प्राप्तः अस्मि। 'बत' (अव्ययम्) अहो खेद ॥ कथमिति। अन्वय—मादृशः कथं न्याय्यमनुष्ठानं प्रतिषेधतु कथं वा साहसैकरसां क्रियाम् अभ्यनुजानातु। व्याख्या—'मादृशः' घोराचाराभिज्ञः 'कथं' न्याय्यम्' समुचितं युक्तम् 'अनुष्ठानम्' आचरणं 'प्रतिषेधतु' निषेधतु। रथादवतरणम् अनुमोदनीय मे इत्यर्थः। 'कथं वा' पक्षान्तरे केन प्रकारेण 'साहसम्' अविमृश्यकारिता एव 'एकः रसः' स्वाद यस्यां तादृशीं 'क्रियाम्' अनुष्ठानम् 'अभ्यनुजानातु' अनुमोदताम्। इह रथादवतरणे अविमृश्यकारितामात्रं' पश्यामि तदेतदपि नानुमन्तुमुत्सहे। एवं कार्यनिर्णयकष्टे पतितोऽस्मि ॥ 'तातमिश्रा' पूज्यास्ताता रामादयः। 'पितुः तेषां जनकस्य दशरथस्य सखायम्। 'धर्मेषु' कर्त्तव्येषु कर्मसु 'संशयाः इदं वा कर्त्तव्यमिदं वा इत्येवंरूपाः 'सन्देहाः तेषु विषयेत्वां पृच्छन्ति। 'विमृशति' विचारयति ॥ एवम् अनेन प्रकारेण 'यथाधर्मं' धर्ममनतिक्रमय एव 'अभिमन्यसे कर्त्तव्यमवगच्छसि। रथादवतरणं युक्तमेव ते इत्यर्थः ॥ एष इति। अन्वयः—एष सांग्रामिक. न्यायः, एषः सनातनो धर्मः, इयं हि रघुसिंहानां वरीचारित्रपद्धतिः। व्याख्या—एष सांग्रामिकः' संग्रामप्रयोजनः

'न्यायः' धर्मः। अनेनैव धर्मेण संग्रामः प्रयोक्तव्य इत्यर्थः। नायमिदानी-नूतनो धर्मः किन्तु 'एष सनातनः' चिरन्तनो धर्मः। सनातनतामेव दर्शयति —इयं हि 'रघुसिंहानां' मनुप्रभृतिनां रघुकुलतिलकानां 'वीरचारित्रस्य' वीरोचिताचारस्य 'पद्धतिः' मार्गः। अनेनैव पथा रघुवृद्धा वीरपदवीमारूढाः। यं धर्मं कुलपुरुषा अन्ववर्त्तन्त तमेवानुवर्त्तस्व इति भावः। एतदेवयुक्तम्।

Notes —1. कष्टम्—कष्ट here is a dilemma. 2. कथम् &c — This presents the two horns of the dilemma. I can neither approve nor disapprove Sumantra's hesitating 3 विमृशति —deliberates, i e., hesitates 'वितर्क स्यात् उत्प्रयनं परामर्शो विमर्शनम्''—हेमचन्द्रः। In this sense' cp "रामप्रवासे व्यमृशन् न दोषम्'' —Bhatti III 4. सांग्रामिकः– संग्रामः war, battle संग्रामः प्रयोजनस्य इति संग्राम + ठञ् सांग्रामिकः the object of which is a fight, see next. 5. न्यायः—नितराम् अयते अनेन इति नि + अय or इ घञ् करणे = न्यायः guide, code, rule &c 6. सनातनः—सना is सदा always. It is an अव्यय। सना सव इति सना + ट्युल् सनातनः eternal. 7. इयं हि &c —This shows that the code or rule has long been observed in the family चारित्र is the same as चरित्र। अण् स्वार्थे प्रज्ञादि or चर + उणादि इत्रण्। पादाभ्यां हन्यते इति पाद + हन + क्तिन् कर्मणि पद्धतिः track . पाद becomes पद् by 'हिमकाषिहतिषु च '।

(*xxii*) चन्द्रकेतुः—प्रतिरूपं वचनमार्य्यस्य।
इतिहासं पुराणञ्च धर्मप्रवचनानि च।
भवन्त एव जानन्ति रघूणाञ्च कुलस्थितिम्॥ २३॥
सुमन्त्रः (सस्नेहास्रं परिष्वज्य)—
जातस्य ते पितुरपीन्द्रजितो विजेतुं-
र्वत्सस्य वत्स कति नाम दिनान्यमूनि।

तस्याप्यपत्यमनुगच्छति वीरवृत्तं

दिष्ट्या गतं दशरथस्य कुलं प्रतिष्ठाम् ॥ २४ ॥

Chand.—A declaration worthy of noble one !

You alone know history, mythology, the teachings of law and the observances of the race of the Raghus. (23).

Sum. (*Embracing with tears of affection*)—

Well, how many, O child are the days passed since even that dear boy, your father, the slayer of Indrajit, was born. Even his child follows the course of the heroes. Luckily (Or O joy !) the house of Dasaratha has attained stability. (24).

मित—। "एष सांग्रामिको न्यायः" इत्यादि 'वचनम् आर्य्यस्य प्रतिरूपम् अनुरूपम्। कोऽन्य एवं ब्रवीतु ॥ इतिहासमित्यादि। अन्वय—इतिहासं पुराणञ्च धर्मप्रवचनानि च रघूणां कुलस्थितिञ्च भवन्त एव जानन्ति। व्याख्या—इतिहासं' पुरावृत्तं 'पुराणञ्च सृष्टिस्थितिप्रलयादिविवरणग्रन्थाश्च 'धर्मस्य' कर्त्तव्याकर्त्तव्यस्य 'प्रवचनानिच' अनुशासनानि च रघूणनां कुलस्य स्थितिञ्च कुलप्रतिष्ठापकमाचारञ्च भवन्त एव जानन्ति'। इतिहासज्ञा पुराणज्ञा धर्मज्ञा स्थितिज्ञा सन्त्येव, परं चत्वारि इतिहासादीनि समुदितानि आर्य्ये एव भवति सन्ति नान्यस्मिन् इत्यर्थः ॥ जातस्ये'ति। अन्वयः—वत्स वत्सस्य इन्द्रजितो विजेतुः पितुरपि ते—जातस्य अमूनि कति नाम दिनानि, तस्य अपत्यमपि वीरवृत्तम् अनुगच्छति। दिष्ट्या दशरथस्य कुलं प्रतिष्ठां गतम्। व्याख्या—हे 'वत्स' तात 'इन्द्रजितो विजेतुः' दमयितुः पितुरपि ते' लक्ष्मणस्यापि 'जातस्य अमूनि कति नाम दिनानि स्वल्पान्येव दिनानि गतानि। 'तस्य' अनतिचिरजातस्य 'अपत्यमपि' तनयोऽपि' वीरवृत्तं वीराणां चरितम् 'अनुगच्छति' अनुकरोति। दिष्ट्या' अहो हर्षः 'दशरथस्यकुल प्रतिष्ठां गतं' कुलस्थितिं प्राप्तम् ॥

Notes—1. इतिहासम्—इतिह is an अव्यय meaning traditional knowledge. इतिह आस्ते अस्मिन् इति इतिह+आस+अच

अधिकरणे इतिहासः history. 2. पुराणम्—पुरा is an अव्यय meaning *prior time*. पुरा भवम् इति पुरा+ट्युलपुरातनम् or पुराणम्। The latter form is by निपातन। But has a technical meaning, viz, works describing creation &c, सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च। भूम्यादेश्चैव संस्थानं (वंशानुचरितञ्चैव) पुराणं पञ्चलक्षणम्॥ This is a sort of mythology. A knowledge of इतिहास and पुराण entitles one to say 'एष सांग्रामिको न्यायः'। 3 धर्म्म &c. —प्रोच्यते एभिः इति प्र+वच+ल्यट् करणे प्रवचनानि, discourses. धर्मस्य प्रवचनानि। Knowing these one can say 'एष धर्म्मः सनातनः'। 4. भवन्त एव—You alone know all the four so it befits you alone to say "एष साग्रामिको न्यायः" &c. 5. कुलस्थितिम् —तिष्ठत्यनया इति स्था+क्तिन करणेस्थितिः measures which secure stability. कुलस्य स्थिति &c. Whithout knowing this you could not have said 'इयं हि रघसिंहानाम् &c. 2 पितुरपि etc —You are a boy ! even your father is a boy to me. This is the force of अपि। 7. इन्द्रजितो विजेतुः—पितु alone leaves it in doubt whether राम लक्ष्मण, भरत or शत्रुघ्न is meant. ईन्द्रजितो विजेतः specifies लक्ष्मण। The epithet is for identification. दिष्ट्या—An अव्यय implying joy or luck 8 प्रतिष्ठाम् -प्रतितिष्ठति अनया इति प्रति+स्था+अङ् भावे प्रतिष्ठा preservation, stability. Unless the young generation knows how to stay and behave, the race is as good as extinct. Fortunately Chandraketu's chivalry shows that Dasaratha's race has escaped that danger

(*xxiii*) चन्द्रकेतुः—(सकष्टम्)—

अप्रतिष्ठे रघुज्येष्ठे का प्रतिष्ठा कुलस्य नः।

इति दुःखेन तप्यन्ते त्रयो नः पितरोपरे॥ २५॥

सुमन्त्रः—अहह हृदयमर्मदारणानि एतानि चन्द्रकतोर्वचनानि।

लवः—हन्त मिश्रीकृतो रसो वर्त्तते ।

यथेन्दावानन्दं व्रजति समुपोढ़े कुमुदिनी
तथैवास्मिन् दृष्टिर्मम कलहकामः पुनरयम् ।
झनत्कारक्रूरक्वणितगुणगुञ्जद्गुरुधनु-
र्धृतप्रेमा बाहुर्विकचविकरालोल्वणरसः ॥ २६ ॥

Chandra. (*In anguish*)—"What is the stability of our race when the eldest of the descendants of Raghu is going un-represented"—With this grief our other three elders too are being consumed. (25).

Sum—Ah ! These words of Chandraketu rend the vitals of the heart,

Lava—Alas ! The feelings have become mingled.

On this one coming to view, my sight feels joy like the lily when the moon has come in sight , while my arm has the grim heroic sentiment clearly betrayed and courts fight with its love fixed upon the mighty bow that hums in its string and the tinkle (of whose bells) are sharp like a rattle, (26).

मित— अप्रतिष्ठे इति । अन्वयः—'रघुज्येष्ठे अप्रतिष्ठे नः कुलस्य का प्रतिष्ठा इति दुःखेन नः अपरे पितरः तप्यन्ते । व्याख्या—'रघूषुज्येष्ठे रामे अप्रतिष्ठे प्रतिष्ठाविरहिते अपत्यलोपात् वंशस्थितिशून्ये सति नः कुलस्य' रघुवंशस्य 'का प्रतिष्ठा' प्रतिष्ठा नास्ति एव । 'इति' अनेन 'दुःखेन नः अपरे त्रयः पितरः लक्ष्मणभरतशत्रुघ्नाः 'तप्यन्ते' तापमनुभवन्ति ॥ हृदयस्य' यत् 'मर्म जीवस्थानं तस्य दारणानि' भेदनानि । हृदयमर्म एभिश्छिद्यते इव इत्यर्थः ॥ 'रसः एकाधिको रसः 'मिश्रीकृतः' परस्परं मिश्रितः 'वर्त्तते' जातः ॥ तदेव दर्शयति—यथेति । अन्वयः—यथा इन्दौ समुपोढे कुमुदिनी आनन्द व्रजति तथा अस्मिन् (समुपोढे) मम दृष्टिः । अयं पुनः विकच-विकरालोल्वणरसो बाहुः झनत्कारक्रूरक्वणितगुणगुञ्जद्गुरुधनुर्धृतप्रेमा (सन्) कलहकामः (एव) । व्याख्या—'यथा इन्दौ' चन्द्रे 'समुपोढे' उपस्थिते

'कुमुदिनी आनन्दं व्रजति प्रीतिं लभते 'तथा अस्मिन्' कुमारे समुपोढ़े 'मम दृष्टिः आनन्दं व्रजति। अयं पुनः पक्षान्तरे एषः 'विकचः' परित्यक्तः 'विकरालः' अतिभीषण 'उल्वणरसः' वीरो रस, यस्य तथाविध मम बाहू.' भुजः 'झनत्कारः' इव 'क्रूरं' क्वणित किङ्किणीध्वनिः यस्य तादृशं, गुणेन' मौर्व्या 'गुञ्जत्' ध्वनत् यत् गुरु' महत् 'धनुः' तस्मिन् 'धृतं' वद्धं' प्रेम प्रीतिः यस्य तादृशः सन् 'कलहकामः' युद्धार्थी संवृत्तः। दृष्टौ शान्तरसः बाहौ वीररसः इति मिश्रीकृतो रसो रसक्रमो वर्त्तते इत्यर्थः॥

Notes—1. दुःखेन etc —अनुक्ते कर्त्तरि तृतीया and वध्यनते has कर्मणि लट्। 2. समुपोढ़े—सम्+उप+वह+क्त कर्मणि=समुपोढ़ brought close 3. कलहकामः—कलहं कामयते इति कलह + कामि+ण कर्त्तरि। . झनत्कार etc.—झनत् here has to be taken as an original शब्द not a mere अनुकरणशब्द। If treated as an अनुकरणशब्द then डाच् becomes compulsory giving द्वित्व etc., as in झनझनायितस्यन्दनैः sl. 6. झनत्+कृ+घञ् भावे=झनत्कार a rattle, उपपदतत्—अनुकरणशब्द gives झनझनाकार, a गतितत्—। क्वण्+क्त भावे=क्वणित a tinkle. These are from small bells (किङ्किणी) attached to the horns of the bow. Comp. 'झनज् झनितकङ्कणक्वणितकिङ्किणीकं धनुः'. VI, 1. Now see टीका।

(*xxv*) चन्द्रकेतुः (अवतरन्)—आर्य्य सावित्रश्चन्द्रकेतुरभिवादयते।

सुमन्त्रः—

अजितं पुण्यमूर्जस्वि ककुत्स्थस्येव ते महः।
श्रेयसे शाश्वतो देवो वराहः परिकल्पताम्॥ २७॥

अपिच—

देवस्त्वां सविता धिनोतु समरे गोत्रस्य यस्ते पिता
त्वां मैत्रावरुणोऽभिनन्दतु गुरुर्यस्ते गुरूणामपि।

ऐन्द्रं वैष्णवमाग्निमारुतमथो सौपर्णमोजोऽस्तु ते
देयादेव च रामलक्ष्मणधनुर्ज्याघोषमन्त्रो जयम् ॥२८॥

Chandra —(*Alighting*) Noble Sir, Chandraketu of the solar race salutes you.

Sum.—May the enternal god Varaha grant you, for safety, holy, mighty, unbeaten majesty as of Kakutstha. (27).

Moreover —

In the fight may the sun, the god that is the father of your race, cheer you on, may the son of Mitra and Varuna (i.e. sage Vasistha) who is the preceptor of even your seniors, bless you, may you have the valour of Indra, Vishnu, Fire and Wind as well as of Garuda, may the charm of the twang of the string of the bows of Rama and Lakshmana unfailingly grant you success. (28).

मित—। अजितमिति। अन्वयः—शाश्वतो देवो वराहः ते श्रेयसे ककुत्स्थस्येव पुण्यम् ऊर्जस्वि अजितं महः परिकल्पताम्। व्याख्या—'शाश्वत.' सनातनः 'देवो वराहः', आदिवराहरूपो नारायणः 'ते' तव 'श्रेयसे' मङ्गलाय (तादर्थ्ये कर्मणि वा ४र्थी) 'ककुत्स्थस्येव' राज्ञः पुरञ्जयस्य इव 'पुण्यं पवित्रम् ऊर्जस्वि वीर्य्यवत् 'अजितम्' अपराहतं 'महः' तेजः 'परिकल्पताम्' परिकल्पयतु। अन्तर्भावितण्यर्थः॥ देव इति। अन्वयः—देवः सविता यः ते गोत्रस्य पिता, त्वां समरे धिनोतु। मैत्रावरुणः, यःते गुरूणामपि गुरुः त्वाम् अभिनन्दतु। वैष्णवम् आग्निमारुतम् अथो सौपर्णम् ओजः ते अस्तु। रामलक्ष्मणधनुर्ज्याघोषमन्त्रश्च जयं देयादेव। व्याख्या—देवः सविता' सूर्य्यः 'यः ते गोत्रस्य पिता' वंशस्य प्रवर्त्तकः 'त्वां समरे अस्मिन् युद्धे 'धिनोतु' प्रीणयतु, शङ्कां निरस्य मनसः प्रसादमादधातु। मित्रावरुणयो अयं मैत्रावरुणः' वशिष्ठः 'यः ते गुरूणां' रामादीनाम् 'अपि गुरुः' आचार्य्यः सः त्वाम् अभिनन्दतु' युद्धाय सन्नद्धं प्रशंसतु। 'ऐन्द्रम्' इन्द्रसम्बन्धि (अण्) 'वैष्णवं' विष्णुसम्बन्धि 'आग्निमारुतम्' अग्निसहकृतपवनसम्बन्धि 'अथो सौपर्णम्' गुरुडसम्बन्धि च 'ओजः'

तेजः 'ते अस्तु' । रामलक्ष्मणयोः 'धनुषी' याभ्यां त्वं युध्यसे तयोः 'ज्याघोषः' गुणगुञ्जनमेव यो मन्त्रः' स 'च' ते 'जयं देयात् एव—अन्यथाभावेन अवश्यमेव ददातु ॥

Notes —1. ककुत्स्थस्य—ककुदि तिष्ठति इति ककुद्+स्था+क कर्त्तरि=ककुत्स्थः one mounted on the hump of a bull तस्य। ककुत्स्थ is the name given to पुरञ्जय, the grandson of इक्ष्वाकु, because thus mounted he fought demons on behalf of Indra who had assumed the form of a bull Comp "पुरञ्जयस्तस्य सुत इन्द्रवाह इतीरितः। वाहनत्ववृतस्तस्य बभूवेन्द्रो महावृषः। स्तूयमानस्तमारुह्य युयुत्सुः ककुदि स्थितः। तेजसाप्यायितो विष्णोः पुरुषस्य परात्मनः"। Al-o "महेन्द्रमास्थाय महोक्षरूपं यः संयति प्राप्तपिणाकिलीलः। चकार बाणैरसुराङ्गनानां गण्डस्थलीः प्रोषितपत्रलेखाः" ॥ &c. परिकल्पताम्। For a similar use of क्लृप see 'किमन्यथा परिकल्पसे'', para xx. 2-a. धिनोतु—धिन्वि+लोट्तु। Cp "धिनोति हव्येन हिरण्यरेतसम्"—kirat 1 13 मैत्रावरुणः See Act 1, para xx To avoid इन् derive मित्रावरुणयोः अयम् इति मित्रावरुण+अण्। 4. आग्निमारुतम्—अग्निश्च मरुच्च अग्नामरुतौ। The इ of अग्नि becoming आ by "देवताद्वन्द्वे च"। अग्नामरुतोः इदम् इति अग्नामरुत्+अण् आग्निमारुतम्। Here the आ of अग्ना is ousted by इ by the rule "इद्वृद्धौ"—when the उत्तरपद has वृद्धि the आ and ई of अग्नि make way for इ। The उत्तरपद also takes वृद्धि by the rule "देवताद्वन्द्वे च" which occurs again in connection with उभयपदवृद्धि। आग्निमारुतम् ओजः does not mean the ओजः of अग्नि and मरुत् separately, but of the two working together. Fire is irresistable when it is urged on by wind. दा+लिङ् (आशिषि)+यात्=देयात्। 5. रामलक्ष्मण &c.—चन्द्रकेतु had both the bows with him. See Tika.

(*xxvi*) लवः—कुमार: अति हि नाम शोभसे रथस्थ एव ; ज्ञातं ज्ञातमत्यादरेण।

चन्द्रकेतुः—तर्हि महाभागोऽप्यन्यं रथमलङ्करोतु ।

लवः—आर्य प्रत्यारोपय रथोपरि राजपुत्रम् ।

सुमन्त्रः—त्वमप्यनुरुध्यस्व चन्द्रकेतोर्वचनम् ।

लवः—को विचारः स्वेषूपकरणेषु ? किन्तु अरण्यसदो वयमनभ्यस्तरथचर्य्याः ।

Lava—Prince, staying on the car you are really showing off to great advantage. Away, away with over-attention.

Chandra.—Then let your highly talented self also grace a chariot.

Lava—Noble Sir, take the prince back on the car.

Sum—Do you too respect Chandraketu's request ?

Lava—What is the hesitation about one's own things ? But we, the denizens of the wood, are unpractised in the movement of cars.

मित । 'नाम इत्यव्ययम् अभ्युपगमे । 'कृतम्' इति मान्तमव्ययं निषेधे।। अलङ्करोतु' आरोहणेन इति शेषः ।। प्रत्यारोपय' प्रत्यवस्थापय ।। 'अनुरुध्यस्व' सम्मानय ।। 'विचारः' पर्य्यालोचना—गृह्णामि न वा इत्याकारा । 'स्वेषु' निजेषु 'उपकरणेषु' सामग्रीषु । निजं द्रव्यम् अविचार्यैव ग्राह्यं तत् भवदुपस्थापितं रथम् आरोहामि इत्यत्र कः सन्देहः । 'किन्तु अरण्यसदः' (सद क्विप्) वनवासिनो 'वयम् अनभ्यस्ता' अननुशीलिता 'रथचर्य्या' रथेन योधनं यैः तादृशाः । रथे स्थित्वा युद्धं गत्वमहो मे 'इत्यापाततः' वस्तुतस्तु पदातिरपि रथिनं त्वां जेष्याम्येव इति हृदयम् ॥

Notes.—1. कृतम्—सम्भ्रमे द्विर्वचनम् । See sak कृतं सन्देहेन । 2. प्रत्यारोपय—प्रत्यारोहय is the alternative form. This is to सुमन्त्र । 3. स्वेषु—This is in accordance with Chandraketu's offer "यन्मम तत् तवैव", sl. 9 Hence your chariot is my chariot, so there can be no hesitation (विचार) in using it. 4. उपकरणेषु—उपक्रियते एभिः इति उप+कृ+ल्युट् करणे=उपकरणानि-

things that minister to one's comfort. तेषु । विषयाधिकरणे क्मी । 5. अनभ्यस्त &c.—चरणम् इति चर+यत् भावे स्त्रियां = चर्य्या movement. रथस्य चर्य्या रथचर्य्या movements of or in the chariot. Now see Tika. This does not mean that Lava pleads his inability to drive a car. The offer of a chariot includes that of a qualified driver also. But accurate shooting from a moving chariot comes from practice alone. Hence the car would be at this stage a handicap to Lava, this is what Lava apparently means to say. But really he feels that though on foot he is more than a match for Chandraketu on a chariot. अनुरुध कामे अर्थे दिवादि-आत्मनेपद ।

(*xxvii*) सुमन्त्रः—जानासि वत्स दर्पसौजन्ययोर्यथोचितमाचरितुम् । यदि पुनस्त्वामीदृशमैक्ष्वाको राजा रामभद्रः पश्येत् तदास्य स्नेहेन हृदयमभिस्यन्देत ।

लवः—आर्य्य सुजनः स राजर्षिः श्रूयते । (सलज्जमिव)—

वयमपि न खल्वेवंप्रायाः क्रतुप्रतिघातिनः
क इह च गुणैस्तं राजानं न वा बहुमन्यते ।
तदपि खलु मे स व्याहारस्तुरङ्गमरक्षिणां
विकृतिमखिलक्षत्राक्षेपप्रचण्डतयाकरोत् ॥२८॥

Sum.—My child, you know how to behave befitting pride and courtesy. As you are, if Ramabhadra, the king of the race of Ikshvaku, sees you, then his heart will melt with affection.

Lava—Noble Sir that royal sage is said to be a good man. (*As if with shame*)—

We too are not indeed usually like this, the obstructors of sacrifices. Who ever again does not in the world think highly of that king for his virtues ? Even thus, that proclamation of the guards of the horse really caused me annoyance by its bitterness as an insult to the whole Kshattriya race. (29.)

मित —। 'दर्पस्य सौजन्यस्य' च 'यथा उचितं' भवति तथा उचितमनतिक्रम्य 'आचरितु' जानासि। अस्मिन् रथप्रत्याख्याने परमा त्वया विदग्धता प्रकटीकृता, दर्पश्च दर्शितः सौजन्यञ्च अव्याहतमेव। 'ईदृशम्' एवंविधम्, वाचिकर्म्मणि च प्रवीण मित्यर्थ। अभिस्यन्देत द्रवीभवेत्॥ वयमिति। अन्वयः—वयमपि न खलु एवंप्रायाः क्रतुप्रतिघातिनः। कः वा इह तं राजानं गुणैः न च वहुमन्यते। तदपि तुरङ्गमरक्षिणां स व्याहारः अखिलक्षत्राक्षेपप्रचण्डतया मे विकृतिम् अकरोत् खलु। व्याख्या—'वयमपि न खलु' नैव 'एवंप्रायाः प्रायेण ईदृशाः क्रतुप्रतिघातिनः' यज्ञविघातकाः। सुजनः स राजर्षिः, वयमपि न दुर्जनाः इत्यर्थः। कः वा' पक्षान्तरे कः 'इह' जगति 'तं राजानं गुणः न च' नैव 'वहुमन्यते पूजयति। सर्व एव वहुमन्यते वयञ्च इति भावः। यदपि' एवं सत्यपि 'तुरङ्गमरक्षिणाम् अश्वरक्षकाणाम् 'स व्याहारः' अयमश्वः पताकेयम् इत्यादिघोषणा अखिलक्षत्रियजातेः 'आक्षेपात् अवमाननात् या 'प्रचण्डता' दुःसहता तथा 'मे विकृतिं' मनोविकारम् अकरोत् 'खलु' अकरोदेव॥

Notes—1. ऐक्ष्वाकः—Explained (See para viii). 2. अभिस्यन्देत—Also अभिष्यन्देत with cerebral 3. तदपि—तद् is an अव्यय implying निर्देश—pointing at. The निर्देश is of two facts—(i) We are not disposed to obstruct, (ii) We respect the king. In spite of these facts I was annoyed, because of प्रचण्डता—दुःसहता etc.

(*xxviii*) चन्द्रकेतुः (सस्मितम्)—किंनु भवतस्तातप्रतापोत्कर्षेऽप्यमर्षः ?

लवः—अस्त्विच्छामर्षो मा भूद्वा। एतत्तु पृच्छामि—दान्तं

हि राजानं राघवं शृणुमः, स किल नात्मना दृप्यति नाप्यस्य प्रजासु दृप्तत्वं जायते। तत् किं मनुष्यास्तस्य राक्षसीं वाचमुदीरयन्ति ?

(ल—)

Chandra (*With a smile*)—Do you forsooth cherish intolerance at the excess of even our father's majesty ?

Lava—Be there intolerance or be not ; this, however, I ask—We hear that king Raghava is self restrained , himself does not surely show pride nor again can pride find footing among his subjects Why then do his men-utter fiendish language ? (L—)

स्मित—। 'तातस्य प्रतापः'। तस्य उत्कर्षः' अतिशयः। तस्मिन् विषये 'अमर्षः' असहनम्॥ 'दान्त दमसम्पन्न' क्रोधादिदमनशीलम्। राक्षसीं राक्षसोचितां दृप्तामितार्थः।

Notes—1. दान्तम्—दम+णिच्+क्त कर्म्मणि दान्त or दमित। तम्। 2. राक्षसीम्—रक्षस इयम् इति रक्षस्+अण् स्त्रियाम् राक्षसी suiting a demon, ताम्। 3 उद्+ईर+णिच (चुरादि)+लट अन्ति उदीरयन्ति।

(*xxix*) (ल—)—

ऋषयो राक्षसीमाहुर्वाचमुन्मत्तदृप्तयोः।
सा योनिः सर्ववैराणां सा हि लोकस्य निर्ऋतिः ॥२०॥

इति ह स्म तां निन्दन्ति, अथ इतरामभिष्टुवन्ति।

कामान् दुग्धे विप्रकर्षत्यलक्ष्मीं
कीर्त्तिं सूते दुष्कृतं या हिनस्ति।
तांचाप्येतां मातरं मङ्गलानां
धेनुं धीरा सूनृतां वाचमाहुः ॥२१॥

(L—) The language of the wild and the haughty the sage's call fiendish [Or—a demoness]. That is the root of all enmities ; it is indeed the bane of the world. (36).

For this very reason they condemn it while they extol its opposite.

And a true and agreeable speech, the mother of blessings, the wise call a cow—the speech that milks desires keeps ill luck at a distance, yields fame, kills demerit. (31).

मित—। ऋषय इति। अन्वयः–ऋषयः उन्मत्तदृप्तयोः वाचम् राक्षसीमाहु·। सा सर्ववैराणां योनिः। सा लोकस्य निर्ऋतिः हि। व्याख्या—ऋषयः उन्मत्तस्य सुराविह्वलस्य अप्रकृतिस्थस्य 'दृप्तस्य' बलगर्वितस्य च 'वाचं राक्षसीम् आहुः' 'सा' राक्षसी वाक् सर्ववैराणां जगति वैरपुञ्जानां 'योनिः' कारणम्। 'सा लोकस्य' जगतः निर्ऋतिर्हि अलक्ष्मीरेव॥ 'ह' इति स्म'—इति—च वाक्यपूरणे अव्ययम्॥ कामानिति। अन्वयः—या कामान् दुग्धे, अलक्ष्मीं विप्रकर्षति, कीर्त्तिं सूते दुष्कृतं हिनस्ति, ताम् एतां मङ्गलानां मातरं सूनृतां वाचं धीराः धेनुम् आहुरपि च। व्याख्या—'या' इतरा वाक् 'कामान्' मनीषितान् 'दुग्धे' सम्पादयति 'अलक्ष्मीं' दुर्भाग्यं विप्रकर्षति' दूरीकरोति 'कीर्त्तिं' सूते यशः आवहति 'दुष्कृतं हिनस्ति' पापं नाशयति 'ताम् एतां मङ्गलानां मातरम्' इत्थं कल्याणानां निदानं तां सूनृतां वाचं सत्यप्रियभाषणं धीराः' ऋषयः 'धेनुम् आहुरपि च'। एकां राक्षसीमाहु· अपराञ्च धेनुम्॥ मङ्गलदानात् धेनुम् आहुः।

Notes—1 **राक्षसीम्—रक्षः एव इति रक्षस्+अण् स्वार्थे स्त्रियाम् राक्षसी** (demoness) is the name given to it by sages. In contradistinction from the other kind of speech which receives from them the name **धेनु** (*milch-cow*). 2. **ह स्म**—Both **ह** and **स्म** are **अव्यय** used as expletives (**वाक्यपूरणे**)। 3. **अभिष्टुवन्ति—अभि+स्तु लट् अन्ति। ष** comes by "**उपसर्गात् सुनोति**"। 4. **च अपि**—Both imply **समुच्चय**। The context is

राक्षसीम् आहुः धेनुम् आहुरपि च। Or we may take च as implying पक्षान्तर—the other side "च पादपूरणे पक्षान्तरे हेतौ विनिश्चये" इति विकाण्डशेष.। *Cp.* "गौ गौः कामदुघा ब्रह्मदुघागौः"।

(*xxxx*, सुमन्त्रः—परिपूतस्वभावोऽयं कुमारः प्राचेतसान्तेवासी। वदत्ययमभिसम्पन्नमार्षेण संस्कारेण।

लवः—यत् पुनश्चन्द्रकेतो वदसि 'किं नु भवतस्तातप्रतापोत्कर्षेऽप्यमर्षः" इति तत् पृच्छामि किं व्यवस्थितविषयाः क्षात्त्रधर्मा इति।

सुमन्त्रः—नैव खलु जानासि देवमैक्ष्वाकम्। तद्विरम विरमातिप्रसङ्गात्।

सैनिकानां प्रमाथेन सत्यमोजायितं त्वया।
जामदग्न्यस्य दमने नैवं निर्वक्तुमर्हसि ॥३२॥

Sum.—This boy the pupil of Prachetasa, is of a thoroughly pure character. What he says is replete with Vedic conceptions (or conceptions befitting a sage) [Or—is endowed with Vedic refinement (or—refinement befitting a sage.)]

Lava—Again, O Chandraketu, as you say "Do you forsooth cherish intolerance at the excess of even father's majesty." so I ask "Are the virtues of the Kshattriya caste of a restricted sphere ?'

Sum.—Surely you know not Sire of Ikshvaku's race, so Cease, O cease from over-reaching.

True, heroism has been shown by you by the slaughter of troops It behoves you not to talk thus of the vanquisher of Jamadagnya. (32.)

मित—। 'अन्ते समीपे 'वसति इति अन्तेवासी' शिष्यः। 'अयम् आर्षेण संस्कारेण' श्रौतेन शोधनेन करणेन। यद्वा ऋषिजनोचितेन ज्ञानेन

'अभिसम्पन्नं' युक्तं वचः 'वदति' युक्तं यथातथं वदति वा ॥ 'व्यवस्थितः' नियतः विषयः' येषां तादृशाः। 'क्षात्रधर्माः' शौर्यादयः' इहैव सन्ति नान्यत्र इत्यस्ति काचित् व्यवस्था किम् ? अतिशयितः प्रसङ्गः 'अतिप्रसङ्गः' अनधिकारचर्चा। तस्मात् विरम॥ सैनिकानीमिति। अन्वय—सैनिकानां प्रमाथेन त्वया ओजायितं सत्यम्। जामदग्न्यस्य दमने रामे एवं निवर्क्तं न अर्हसि। व्याख्या—सैनिकानाम्' अस्मत्पक्षीयाणां वलानां 'प्रमाथेन' हननेन करणेन 'त्वया ओजस्विना वलवता इव आचरितं 'सत्यम्'। तथापि 'जामदग्न्यस्य' जमदग्निसुतस्यभृगुपतेः 'दमने (कर्त्तरि ल्यु) विजेतरि विषये, रामे इत्यर्थः 'एवम्' अनेन प्रकारेण अनादरेण इत्यर्थः 'निर्वक्तुं' निर्देष्टुं न युज्यसे। मन्ये जामदग्न्यदमने रामे क्षात्त्रधर्मा व्यवस्थितविषया एव इति भावः॥

Notes—1. आर्षेण &c—ऋषि sage or Veda. "ऋषिर्वेदे वशिष्ठादौ" इत्यादि विश्वमेदिन्यौ। तस्य अयम् इतिऋषि+अण् आर्षः belonging to a sage or Vedic. सम्+कृ+घञ् करणे संस्कार purification, or घञ कर्मणि=संस्कार conception करणे तथा। 2. यत् &c—यत् तत् imply हेतु। Because (यत्) you ask me a question, so (तत्) I reply with another question, viz. किं व्यवस्थित &c 3. व्यवस्थित &c.—वि+अव+स्था+क्त कर्त्तरि व्यवस्थित restricted. विषय is the subject to which क्षात्रधर्म attaches Lava asks—Are we to understand that क्षात्रधर्म adheres to a certain particular object (राम) and is to be found nowhere else ? Of coursethe drift is, that is possible that there are other Kshatiyas quite as valorous as राम। Who knows that I myself am not a match for him ? 4. अतिप्रसङ्गात्—प्र+सञ्ज+घञ् भावे प्रसङ्ग context, अतिप्रसृतः प्रसङ्गः अतिप्रसङ्गः carrying of point beyond its limit, rushing in where angels fear to tread ! 5. ओजायितम्—ओजस् here means ओजस्वि powerful. ओजसा, i e, ओजस्विना इव आचरितम् इति ओजस्+क्यङ (नाम धातु)+क्त भावे ओजायितम् played the

hero. The स of कोकस् disappears by 'कर्त्तः क्यङ् सलोपश्च'। 6. जामदग्न्यस्य—जमदग्नेर्गोत्रापत्यं पुमान् इति जमदग्नि+यञ् जामदग्न्यः descendant of जमदग्नि। Here the *son* is related as a mere descendant. If the son is taken as a son, the affix is अण् giving जामदग्नः। 7. &c.—If you dospeak thus, it becomes अतिप्रसङ्ग on your part and I say विरम विरमातिप्रसङ्गात्। see the rule 'व्याङ्परिभ्योरमः।'

(*xxxi*) लव (सहासम्)—आर्य, जामदग्न्यस्य दमनः स राजा इति कोऽयमुच्चैर्वादः ?

> सिद्धं ह्येतद्वाचि वीर्यं द्विजानां
> बाह्वोर्वीर्यं यत्तु तत् क्षत्रियाणाम्।
> शस्त्रग्राही ब्राह्मणो जामदग्न्यस्तस्मिन्
> दान्ते का स्तुतिस्तस्य राज्ञः ॥३३॥

Lava (*With a laugh*)—Noble Sir, what high praise is this that the king is the subduer of Jamadagnya ?

It is surely an established fact that the strength of Brahmanas is in speech while the strength that is in the arms lies with the Kshattriyas. Jamadagnya, a Brahmana took to arms He being subdued, what credit goes to that king ? (33)

सित—। 'उच्चैः' ऊर्जितः 'वादः' उक्तिः इति कर्म्मधारयः। महती कथा इति विद्यासागरः॥ सिद्धमिति। अन्वय – द्विजानां वीर्यं वाचि, यत्तु वीर्यं बाह्वोः तत् क्षत्रियाणाम्—एतत् सिद्धं हि। जामदग्न्यः शस्त्रग्राही ब्राह्मणः। तस्मिन् दान्ते तस्य राज्ञः का स्तुति। व्याख्या— 'द्विजानां ब्राह्मणानां 'वीर्यं' प्रतापः 'वाचि तिष्ठति यत् तु' यत् पुनः 'वीर्यं बाह्वोः' भुजयोः 'तत् क्षत्रियाणाम्' अस्ति न तु ब्राह्मणानाम्। 'एतत् सिद्धं हि सर्वजनविदितमेव। 'जामदग्न्यः शस्त्रग्राही अस्त्रधारी 'ब्राह्मणः' शस्त्रग्रहणे अनधिकारी इत्यर्थः। स कथं क्षत्रियवत् निपुणमस्त्राणि प्रयुञ्जीत। तत् 'तस्मिन्' कुत्सितास्त्रधारिणि 'दान्ते' विजिते सति 'तस्य राज्ञः' रामस्य 'का स्तुतिः' कोऽयमुच्चैर्वादः॥

Notes :—1. सिद्धम्—Well-known. Comp. "नैसर्गिकी सुरभिणः कुसुमस्य सिद्धा &c"—I, sl. 14. 2. द्विजानाम्—द्वि here means not *two* but *twice*. द्विः जाता इति द्वि+जन ड कर्त्तरि द्विजाः Brahmanas. तेषाम्। strictly speaking ब्राह्मण, क्षत्रिय, वैश्य are all द्विज but the poet restricts the word here to Brahmanas only Comp. "क्षात्रं द्विजत्वञ्च परस्परार्थम्"—*Bhatti* I. शस्त्रग्राही— शस्त्रं गृह्णाति इति शस्त्र+ग्रह+णिनि कर्त्तरि साधुकारिणि। But wielding of weapons requires strength of arms which Brahmanas do not possess. Hence Jamadagnya must have been a feeble fighter. 4. दान्ते—दम+ +णिच क्त कर्म्मणि दान्त or दमित। Qual. तस्मिन् which has भावे ७मी।

(*xxxi*) चन्द्रकेतुः (साभ्राथमिव)—आर्य्य आर्य्य ! कृतं कृतमुत्तरोत्तरेण।

> कोऽप्येष सम्प्रति नवः पुरुषावतारो
> वीरो न यस्य भगवान् भृगुनन्दनोऽपि।
> पर्य्याप्तसप्तभुवनाभयदक्षिणानि
> पुण्यानि तातचरितानि च यो न वेद ॥३४॥

Chand (*As if with great pain*)—Noble Sir, away with more discussions.

This now is some fresh incarnation of the Soul Supreme to whom even mighty deligther of the race of Bhrigu is no hero and who does not know of the holy deeds of father through which was obtained the grant of safety to the seven worlds (34)

मित—। 'उन्माथ पीडा। तेन सह यथा तथा। आर्य्य' इत्यत्र सम्भ्रमे द्विरुक्तिः। 'कृतम्' निषेधे अव्ययम्। सम्भ्रमे द्विरुक्तिः। 'उत्तरम्' प्रत्युक्तिः। 'उत्तरञ्च' प्रतिवादिकृतम् 'उत्तरञ्च' वादिकृतम 'उत्तरोत्तरम'। "सर्वो द्वन्द्वो विभाषा एकवद्भवतीति वक्तव्यम्" इति द्वन्द्व कत्वम्। यद्वा 'उत्तरस्य' प्रतिवादिकृतस्य 'उत्तरं' वादिकृता प्रत्युक्तिः उत्तरोत्तरम्' उक्ति-

प्रत्युक्तिपरम्परा। तेन अलम् इत्यर्थः॥ कोऽपीति। अन्वयः—एषः सम्प्रति नवः कोऽपि पुरुषावतारः यस्य भगवान् भृगुनन्दनः अपि न वीरः, यश्च पर्य्याप्तसप्तभुवनाभयदक्षिणानि पुण्यानि तातचरितानि न वेद। व्याख्या—'एष सम्प्रति इदानीन्तने' काले नवः कोऽपि' अचिन्त्यस्वरूपः 'पुरुषावतारः पुरुषस्य भगवतो नारायणस्य अवतारविशेष 'यस्य' समक्षं 'भगवान् भृगुनन्दनः' एकविंशतिवारक्षत्त्रियान्तकरणेन भृगुवंशीयानां नन्दयिता जामदग्न्योऽपि न वीरः'। यश्च' यः पुनः 'पर्याप्ता साकल्येन प्राप्ता 'सप्तभुवनस्य अभयदक्षिणा' अभयदानं येभ्यः अतएव 'पुण्यानि' पावनानि तादृशानि 'तातस्य' रामस्य' रामस्य 'चरितानि' कर्माणि 'न वेद' न जानाति। इदनीन्तनतया एष भृगुपतिचरितं तातचरितञ्च न जानाति, ईदृशेन अज्ञेन सह का उक्तिप्रत्युक्ति। तत् विरमतु भवान् इति सुमन्त्रं प्रति चन्द्रकेतोरुक्तिः॥

Notes —1 सोन्माथम्—उद् मथ+घञ् भावे उन्माथः pain पीडा। तेन सह यथा तथा। See para xiii 2 पुरुष &c—पुरुष is नारायण। अवतरत्यनेन इति अव+तॄ घञ करणे अवतार incarnation पुरुषस्य अवतारः। 3. यस्य—सम्बन्धसामान्ये षष्ठी। यस्य—सम्बन्धे न वीर। 4. पर्य्याप्त etc—परि+आप क्त कर्म्मणि पर्याप्त fully attained परि implies सर्वतोभाव। दक्षिणा gift दान। "दक्षिणंदिशि दाने च" इति त्रिकाण्डशेषः। Now see टीका।

(*xxxiii*) लवः—को हि रघुपतेश्चरितं महिमानञ्च न जानाति? यदि नाम किञ्चिद्वक्तव्यमस्ति—अथवा शान्तम्।

वृद्धास्ते न विचारणीयचरितास्तिष्ठन्तु किं वर्ण्यते
सुन्दस्त्रीदमनेऽप्यखण्डयशसो लोके महान्तो हि ते।
यानि त्रीण्यपराङ्मुखान्यपि पदान्यासन् खरायोधने
यद्वा कौशलमिन्द्रसूनुनिधने तत्राप्यभिज्ञो जनः॥३५॥

Lava—Who ever does not know of the deeds and great-

ness of the lord of the Raghus ? (But) If there is something to becriticised—Or peace !

Why discussed ? He is our senior, his deeds are not for scrutiny. Leave him alone. He is indeed great in the world with fame unimpaired even in the killing of the wife of Sunda. Also the three steps, with face not turned back that were taken in the fight with Khara , or again the skill (strategy ?) displayed in killing the son of Indra—in all these the people are well informed ! (35.)

मित—। 'चरितं' तत्तदद्भुतं कार्य्यजातम्। 'महिमानम्' महत्वम्। यदि नाम इति सम्भावनायाम् , 'वक्तव्यं' विचार्य्यं—सत् वा असत् वा इति चिन्तनीयम्। 'अथवा शान्तम्' इति परवर्त्तिना श्लोकेन अन्वितम्॥ वृद्धा इति—अन्वयः—अथवा शान्तम्, किं वर्ण्यते। वृद्धाः ते विचारणीय-चरिताः न, तिष्ठन्तु। सुन्दस्त्रीदमने अपि अखण्डयशसः ते लोके महान्तो हि। यानि खरायोधने अपराङ्मुखानि त्रीणि पदानि आसन् अपि, यत् इन्द्रसुनुनिधने कौशलं वा, तत्रापि जनः अभिज्ञः। व्याख्या—'अथवा' पक्षान्तरे 'शान्तम्' मास्तु वक्तव्यम्, किं वर्ण्यते, चरितस्य महिम्नश्च, वर्णनया अलम्। कारणमाह—'वृद्धाः' वयोज्येष्ठाः 'ते' स रामः (गौरवे वहुवचनमिह सोत्प्रासम्)। 'विचारणीयं' समालोचनार्हं 'चरितं' कार्यं येषां तथाविधा 'न' भवन्ति, तत् तिष्ठन्तु ते। एतत्तु चरितं प्रति। महिमानं प्रत्याह—'सुन्दस्त्री' 'ताड़का तस्या 'दमने' निधने 'अपि' स्त्रीवधे कृतेऽपि 'अखण्डम् अविकलं 'यशो' येषां तथाविधाः 'ते' स रामः 'लोके' जगति 'महान्तो हि' लोकोत्तरा एव। यदि महान्तो नह्यः स्त्रीवधात् अयशो जायते लोकोत्तरत्वादेव न जातम्। 'यानि खरेण' सह यत् 'आयोधनं युद्धमभूत तस्मिन् अपराङ्मुखानि अपरावृत्तवदनं यथा तथा पश्चात् निहितानि इत्यर्थः 'त्रीणि पदानि पदक्षेपाः आसन् अपि अमवंश्च यत इन्द्रसूनोः इन्द्रपुत्रस्य वाणरपतेः वालिनः प्रमाथे कौशलं वा निपुणता च (वा इति समुच्चये) 'तत्र अपि तेषु सर्वेषु च 'जनः अभिज्ञः कोम विज्ञानवान्। सर्वं विदितं लोकस्य ॥

Notes .—1. **यदि नाम** &c —**यदि** and **नाम** are **अव्यय**, both implying **सम्भावना।** Com. "**न त्रस्तं यदि नाम भूतकरुणासन्तानशान्तात्मनः**" &c. *Viracharita*. He was going to criticise but he checks himself with '**अथवा शान्तम्**'। 2 **शान्तम् अव्यय** (**मकारान्त**) here implying prohibition. Away with criticism. See our Sak. also. 3 **महान्तः** This—is said tauntingly **महत्** great, superhuman. **स्त्रीवध** ruins the fame of ordinary men, it did not effect Rama because Rama is superhuman!! 4. **यानि** &c.—Rama had to fall back three steps though all the while facing (**अपराङ्मुखानि**)। Here **विद्यासागर** quotes from the **रामायण**—" **विकलः स कृतो बाण खरो रामेण संयुगे। मत्ती रुधिरगन्धेन तमेवाभ्यद्रवद् द्रुतम्॥ तमापतनस्तं संक्रुद्धं कृतास्त्रो रुधिराप्लुतम्। अपासर्पद् द्वित्रिपदं किञ्चित्त्वरितविक्रमः॥**" 6. **अपराङ्मुखानि—पराक् विवृत्तं मुखं येषु पराङ्मुखानि।** with face turned back. **न पराङ्मुखानि।** No **ण** because a **पद** intervenes. Thus (**परा + अच् मुख**) The prohibition is by "**पदव्यवायेऽपि**"। **अपि** here and the **वा** in **यद्वा** imply **समुच्चय** of **पदानि** and **कौशलम्।** See **टीका।** 6 **तव**—This is the correlative of **यानि** and **यत्।** 8. **अभिज्ञो जनः**—This is in support of **को हि...न जानाति।**

(*xxxiv*) चन्द्रकेतुः—आः! तातापवादभिन्नमर्याद, अति हि नाम प्रगल्भसे।

लवः—अये! मय्येव भ्रुकुटीधरः संवृत्तः।

सुमन्त्रः—स्फुरितमनयोः क्रोधेन। तथाहि—

चूडामण्डलबन्धनं तरलयत्याकूतजो वेपथुः
किञ्चित् कोकनदच्छदस्य सदृशे नेत्रे स्वयं रज्यतः।
धत्ते कान्तिमकाण्डताण्डवितयोर्भङ्गेन वक्त्रं भ्रुवो-
श्चन्द्रस्योत्कटलाञ्छनस्य कमलस्योद्भ्रान्तभृङ्गस्य च ॥३६॥

कुमारौ—तदितो विमर्दक्षमां भूमिमवतरावः। (इति निष्क्रान्ताः सर्वे)।

इति कुमारविक्रमो नाम पञ्चमोऽङ्कः।

CHANDRA—Ah! You, that have broken the bounds of decorum by denouncing father, are prattling on a bit too much.

LAVA—Ha! He has worked up a frown at myself.

SUM.—Their ire is up. Thus—

The nodding resulting from emotion shakes the knot of the tufts of hair, the eyes, that by nature slighty resemble the petals of the red lotus, are becoming deep red, the face, by the knitting of the eye-brows that are giving sudden jumps shows the beauty of the moon when the stain is prominent and of the lotus when black bees hover above (36).

The Youths—Then let us repair hence to a ground, suitable for fighting (*Exeunt all*).

This is the Fifth Act named "The Valour of the Youths"

मित—। 'आ' इत्यव्ययं कोपे। 'तातस्य' रामस्य 'अपवादेन' निन्दया 'भिन्ना भग्ना 'मर्य्यादा' सत्कारक्रमः येन—ततसम्बुद्धिः। 'प्रगल्भसे' वाक्चापलं कुरुषे॥ 'कुटी' भङ्गः वक्रता। 'भ्रुवो. कुटी' = भ्रूभङ्गः। ('इको ह्रस्वः—' इति ह्रस्वविकल्पः)। भ्रुकुट्या धरः॥ 'स्फुरितं' प्रकटीभूतम्। भावे क्तः॥ चूडेति। अन्वय—आकूतजो वेपथुः चूडामण्डलबन्धनं तरलयति। स्वयं कोकनदच्छदस्य किञ्चित् सदृशे नेत्रे रज्यतः। अकाण्डताण्डवितयोः भ्रुवोः भङ्गेन वक्त्रं उत्कटलाञ्छनस्य चन्द्रस्य उद्भ्रान्तभृङ्गस्य कमलस्य च कान्तिं धत्ते। व्याख्या—'आकूतात् अभिप्रायात आवेगात् इत्यर्थः 'जातः यः 'वेपथुः कम्पः शिर.कम्प इति यावत् 'स चूडामण्डलस्य 'बन्धनं ग्रन्थिं तरलयति दोलयति। 'स्वयम् आत्मना स्वभावादित्यर्थः कोकनदच्छदस्य रक्तोत्पलपत्रस्य 'किञ्चित् सदृशे ईषत्तुल्ये 'नेत्रे नयने 'रज्यतः लोहिते भवतः। 'अकाण्डे अनवसरे 'ताण्डवितयोः कृतोद्धतनृत्ययोः 'भ्रुवोः भङ्गेन कोटिल्येन हेतुना 'वक्त्रं मुखम् उत्कट-लाञ्छनस्य परिस्फुटकलङ्कस्य, 'चन्द्रस्य—एवम् 'उद्भ्रान्तः परिपतन्तः 'भृङ्गाः भ्रमराः यस्मिन् तादृशस्य 'कमलस्य च प्रफुल्लपद्मस्यापि कान्तिं

धत्ते शोभां बिभर्ति ॥ 'तत् तस्मात् विमर्दः कर्त्तव्य इति हेतोः इतः अस्मात् रणकर्म्मणः अयोग्यात् स्थानात 'विमर्दक्षमां युद्धयोग्यां 'भूमिम् अवतरावः यावः ॥

Notes.—1. तात &c.—For समास see टीका। मर्य्यादा here is *the respect due* to स्थिति। Observance of स्थिति is a high virtue always. Hence "न मर्य्यादाभङ्गः क्षणमपि न नीचेष्व-भिरुचिः", "स्थितेरभेत्ता स्थितिमन्तमन्वयम्' &c. 2 भ्रुकुटी &c—भ्रु becomes optionally भ्रु or भ्र। Hence three forms—भ्रूकुटी भ्रुकुटी भ्रकुटी। Some add yet a fourth form भृकुटी। Cp. the rule 'इको ह्रस्वोऽङ्यो गालवस्य" and the Varttika "अभ्रकुं सादीनामिति वक्तव्यम्। Some also wish अ to come in place of the vowel of भ्रु। "अकारोऽनेन विधीयते इति व्याख्यानान्तरम्"—Bhattoji—thus 3 forms. 3 तरलयति—तरल is चञ्चल। तरलं करोतीति तरल+णिच (नामधातु)+लट् ति। 4 आकूतजः—आकूत is usually अभिप्राय hence आवेग eagerness. 5 अकाण्ड &c.—काण्ड is अवसर occasion अकाण्ड—no occasion off season ताण्डव is उद्धतनृत्य, here quick movement ताण्डवः सञ्जातः अनयोः इति ताण्डव+इतच्। Now see टीका। 6 चन्द्रस्य &c—It seems difficult to realise comparison with चन्द्र and कमल separately or with the two combined? Either way the idea seems hazy चन्द्र is *white*, कमल is *purple*, while the face of the boys are *blue*!! Separate comparison, so far as *appearance* (धत्ते कान्तिम्) is concerned, is a hazardous matter. If चन्द्र and कमल be taken combined the concept well nigh escapes comprehension. 7. विमर्द etc —विमर्दं क्षमते इति विमर्द+क्षम+ण कर्त्तरिस्त्रियाम्=विमर्दक्षमा allowing a combat, ताम्। The place where they were was not unsuitable, as is obviovs from the fact that लव was fighting the soldiery (बल) there. The object is to remove them from the stage, because actual fighting must not be staged—this is against the rule of dramaturgy. 8. निष्क्रान्ताः सर्वे—Remember चन्द्रकेतु is on foot, and has not yet remounted his chariot.

उत्तरचरितम्

षष्ठोऽङ्कः ।

(*I*) (ततः प्रविशति विमानेनोज्ज्वलेन विद्याधरमिथुनम्)
विद्याधरः—अहो खलु अनयोर्विकर्त्तनकुलकुमारयोराखण्ड-प्रचण्डकलहयोः उद्द्योतितक्षात्त्रधर्मौकयोरद्भुतोद्भ्रान्तदेवासुराणि विक्रान्तचरितानि । तथाहि प्रिये पश्य पश्य—

झनज्झनितकङ्कणक्वणितकिङ्किणीकं धनु-
र्ध्वनद्गुरु गुणाटनीकृतकरालकोलाहलम् ।
वितत्य किरतोः शरानविरतस्फुरच्चूडयो-
र्विचित्रमभिवर्धते भुवनभीममायोधनम् ॥१॥ (वि-)

(*Then enter a pair of* Vidyadharas *in a bright balloon*)—
Male Vidyadhara—O the deeds of valour—deeds with gods and demons bewildered at the marvels—of the two youths of the race of the Sun who are suddenly engaged in a fierce fight and by whom lustre has been added to the virtues of the Kshattriya tribe. Thus behold, darling behold—

A wonderous fight, awful to the universe, waxes between these two who with tufts of hair dangling incessantly, are showering arrows, having drawn the bow that is twanging deeply with a fierce tumult raised by the string and the horns and with the bells sounding like jingling bracelets (I). (Male—)

मित— "विद्याधरयोः मिथुनम्' कश्चित् विद्याधरः' तत्पत्नी च इत्यर्थः । 'अहो खलु अनयोः विक्रान्तचरितानि' । विक्रान्तं विक्रमः । भावे क्तः । तस्य 'चरितानि' कर्माणि, विक्रमकृतानि कर्माणि इत्यर्थः । अनयो. कयोः ?

—'अकाण्डे' अप्रसङ्गे अकस्मात् इत्यर्थः 'प्रचण्डः कलहो' ययोः तादृशयोः विकर्त्तनकुलकुमारयोः' सूर्य्यवंशप्रभवयोः बालयोः। पुनः किम्भूतयोः ?—'उद्द्योतिता'-उद्भासिता निजकर्मभिः इति शेषः 'क्षात्रलक्ष्मीः' क्षत्तकुलश्रीः याभ्यां तयो.। ययोरेभिः चरितैः क्षात्त्रलक्ष्मीः अलङ्कृता भवति तयो इत्यर्थः। किम्भूतानि चरितानि ?—'अद्भुतेन' आश्चर्य्येण 'उद्भ्रान्ताः' विचलिताः 'देवासुराः सुरदानवा' येषु तथाविधानि चरितानि॥ झनझनितेति। अन्वयः—झनज्झनितकङ्कणक्वणितकिङ्किणीक गुणाटनीकृतकरालकोलाहलम् (अतएव) गुरुध्वनत् धनु वितत्य शरान् किरतोः अविरतस्फुरच्चूडयोः भुवनभीमं विचित्रम् आयोधनम् अभिवर्द्धते। व्याख्या—झनज्झनित' झनज्झनशब्द कुर्वत यत कङ्कणं करभूषणं तस्य क्वणितं' शब्द इव 'क्वणितं' यासां तादृश्यः किङ्किण्यः क्षुद्रघण्टिकाः यस्मिन् तथाविधं किञ्च गुणेन अटनोभ्याञ्च 'कृतः करालः भीमः 'कोलाहलः' शब्दः यस्मिन् तथाविधम् एतएव गुरु गभीर यथा तथा ध्वनत् गर्जत् 'धनुः वितत्य' आकृष्य शरान् किरतोः वषतोः 'अविरतम्' अविश्रान्त यथा तथा स्फुरन्ती दोलायमाना 'चूडा' केशबन्धः चूडामण्डले ययोः तादृशयोः 'भुवनानां' सम्बन्धे 'भीमं भयावहं विचित्रम् अत्यद्भुतम् आयोधनं युद्धम् अभिवर्द्धते' भृशायते अतिभूमिं च गच्छति॥

Notes—1. विद्याधर &c —विद्याधर is a kind of demi-gods. मिथुन a couple. विद्याधरयोः मिथुनम्। 1. उद्योतित &c —उद् + द्युत + णिच् + क्त कर्मणि उद्द्योतित illumined. क्षत्त the warrior class. क्षत्त्रस्य इयम् इति क्षत्त्र + अण् + ङीप् क्षात्त्री belonging to the warrior class. लक्ष्मी wealth, virtues etc. क्षात्त्री लक्ष्मीः क्षात्रलक्ष्मीः the natural endowments of the military class, i.e., strength, courage, martial training etc. Next बहु—with कप् added as समासान्त See I. 22. 4. विक्रान्त etc.—see टीका। Vidyasagara takes विक्रान्त as विक्रमपरिचायक the क्त being कर्त्तरि। 5.

झनज्झनित etc.—**झनज्झन** is a **व्यक्त** word, not an **अव्यक्तानुकरण** as in **झनझनायिता** (V, sl 5). In **झनझनायित** the word is **झनत** which is doubled ; here the whole of **झनज्झन** is the word and no doubling. **झनज्झनः सञ्जातः अस्य इति झनज्झन + इतच् झनज्झनितम् । क्वण + क्त भावे क्वणितम्** sound. Now see **टीका । समासन्त कप् ।** For a similar scene, see **अभिषेकनाटक** VI.

(*II*) (वि—) विजृम्भितश्च दिव्यस्य मङ्गलाय द्वयोरपि ।
स्तनयित्नोरिवामन्द्रं दुन्दुभेर्दुन्दुमायितम् ॥२॥

तत्प्रवर्त्त्यतामनयोः प्रवीरयोरनवरतम् अविरलललितविकचकनककमलकमनीयसन्ततिः अमरतरुतरुणमणिमुकुलनिकरमकरन्दसुन्दरः पुष्पनिपातः ।

विद्याधरी—ता किंत्ति उण अआलडविण्पुरिदतड़िच्छड़ाकड़ारं विअ अम्बरं झत्ति संवुत्तं [तत् किमिति पुनः अकाण्डविस्फुरिततडिच्छटाकडारमिव अम्बरं झटिति संवृत्तम्] ।

(Male) And the dum-dumm-ing of the divine drum deep like that of cloud has begun for the safety of both, (2).

So let there be commenced unto these mighty heroes an incessant shower of flowers that is pleasant from the honey of a mass of gem-like fresh buds of the celestial tree —shower, the flow of which is made charming by lovely fullblown golden lotuses strewn thick.

Female Vid.—Well then why again has the sky suddenly become yellow as if with an unseasonably flashed array of lightning ?

मित—। विजृम्भितेति । अन्वयः—द्वयोरपि मङ्गलाय दिव्यस्य दुन्दुभेः स्तनयित्नोरिव आमन्द्रं दुन्दुमायितं विजृम्भितञ्च । व्याख्या—'द्वयोरपि' कुमारयोः 'मङ्गलाय' अक्षतदेहरक्षणाय 'दिव्यस्य दुन्दुभेः' स्वर्गीयपटहस्य 'स्तनयित्नोरिव' मेघस्येव 'आमन्द्रं' अतिगम्भीरं 'दुन्दुमायितं' दुम इति शब्दः

'विजृम्भितञ्च' आविर्भूतमपि ॥ 'तत् तस्मात्। यतो देवा मङ्गलमाचरन्ति अतो वयमपि पुष्पवर्षणेन मङ्गलं कुर्मः। 'अविरलैः' अनल्पैः ललितैः' सुन्दर' 'विकचैः' प्रफुल्लैः 'कनककमलैः सुवर्णैः पद्मैः 'कमनीया' हृद्या सन्ततिः प्ररोहो यस्य तादृशः, किञ्च 'अमरतरूणां' सुरपादपानां पारिजातादीनां यः 'तरुणः' अपर्युषितः मणितुल्यानां मुकुलानां निकरः समूहः तस्य मकरन्देन' मधुना 'सुन्दरः' सुभगः पुष्पनिपातः' कुसुमवर्षः 'प्रवर्त्यताम्' आरभ्यताम ॥ 'अकाण्डे' अनवसरे अकस्मादित्यर्थः 'विस्फुरिता' विजृम्भिता या तडिच्छटा विद्युच्छिखा तया 'कडारं' पिङ्गलम् अम्बरं सञ्जातम् ॥

Notes—1. स्तनयित्नो.—स्तन to rumble+इत्नुच कर्त्तरि (उणादि) cloud तस्य। 2. दुन्दुमायितम्—दुम् is an imitation of the sound of a drum (अव्यक्तानुकरण)। दुम् इति शब्दकरणम् इत्यर्थः दुम्+डाच +क्यष्+क्त भावे (see झनझनायित, Act. V. sl. 5). 3. प्रवीरयोः— सम्बन्धसामान्ये षष्ठी। प्रवर्त्यताम्—from वर्त्ति। Nom. आवाभ्याम् understood. Flowers are showered when some noble deed is done. Sometimes the gods sometime the demi-gods shower them. Comp. "अवाङ् मुखस्योपरि पुष्पवृष्टिः पपात विद्याधरहस्तमुक्तं also 'सुरभि सुरविमुक्तं पुष्पवर्षं पपात"।

(*III*) विद्याधरः—तत् किनु खल्वद्य—

हयाष्ट्र यन्त्रभूमिभ्राम्लमारतं पडज्योतिरुज्ज्वलः !

पुटभेदो ललाटस्थनीललोहितचक्षुषः ॥ ३ ॥

(विचिन्त्य) आः ज्ञातम्। वत्से चन्द्रकेतुना प्रयुक्तम-स्त्रमाग्नेयम्। तस्यायमग्निच्छटासम्पातः। सम्प्रति हि—

अवदग्धकर्बुरितकेतुचामरैरपयातमेव हि विमानमण्डलैः।

दधति च्वजाङ्कुशपटाञ्चलेग्विमाः क्षणकुङ्कुमच्छुरणविभ्रमं शिखाः ॥ ४ ॥

(वि—)

Male V.—Can it then be that just now—

Has happened the parting of the lids of the eye of Nilalohita that is on his forehead—the parting which is dazzling like the brilliance of the sun turned in the whirl of Tvastri's lathe ? (3).

(*Reflecting*) Ah ! I see ! The fire-weapon has been invoked by dear Chandraketu , of that is this concentration of the glow of fire. Verily now—

The hosts of balloons, the flag and chowries of which have become scorched and spotted have indeed retreated to a distance , and these flames dispay at the edges of the warps of the flagstaffs the appearance of a momentary paint of saffron (Male—)

मित—। 'तत् इत्यादि परवर्त्तिना श्लोकेन अन्वितम् । 'तत् किं नु खल्वद्य —नीललोहितचक्षुषः पुटभेदो' जातः इत्यन्वयः ॥ त्वष्ट्रेति । अन्वयः —तत् कि नु खलु ललाटस्थनीललोहितचक्षुष. त्वाष्ट्रयन्त्रभ्रमिभ्रान्तमार्त्तण्डज्योतिरुज्ज्वलः पुटभेदः अद्य [जातः]। व्याख्या — तत' तस्मात् यत कदारमम्बरं तत् इत्यर्थः । 'किं प्रश्ने 'नु' वितर्के, खलु' जिज्ञासायाम् । तत्त्वपरिज्ञानार्थं वितर्कगर्भ' प्रश्न इति भावः । 'ललाटस्थ' यत् 'नीललोहितस्य' रुद्रस्य 'चक्षुः हरस्य तृतीयं नयनं तस्य, त्वाष्ट्र' विश्वकर्मस्वामिकं तत् 'यन्त्र' शाणयन्त्रं तस्य 'भ्रमिभिः' आवर्त्तनैः 'भ्रान्तस्य आवर्त्तितस्य 'मार्त्तण्डस्य' सूर्य्यस्य ज्योतिरिव उज्ज्वलः पुटभेदः आवरणमोचनम् 'अद्य जातः किम् इति पृच्छामि ॥ 'आम इत्यवधारणे । संशयो मे अपयातः इत्यर्थः । 'अग्निच्छटानाम्' अग्नि शिखानां सम्पातः राशीभवनम् ॥ अवदग्धेति । अन्वयः—अवदग्धकर्वुरितकेतुचामरैः विमानमण्डलैः अपयातमेव हि । इमाः शिखाः ध्वजाङ्क शपटाञ्चलेषु क्षणकुङ्कुमच्छुरणविभ्रमं दधति । व्याख्या—अवदग्धाः ईषत् प्लुष्टाः अतएव कर्वुरिता शवलीकृताः केतवः' पताका 'चामराणि' चयेषां ये षु वा तादृशैः 'विमानमण्डलैः व्योमयानसमूहैः अपयातम् एव हि' दाहविषयात् दूरे

एव गतम्। दूरगमनाच्च इमाः शिखा.' आग्नेयास्त्रस्य ज्वालाः 'ध्वजानां' विमानगतपताकानां ये 'अङ्कुशा अङ्कुशाकारदण्डाः तेषां ये आवरकाः 'पटा' वसनानि तेषाम् अञ्चलेषु प्रान्तेषु क्षणं मुहूर्तं व्याप्य यत् कुङ्कुमच्छुरणं 'कङ्क मानुलेप तस्य 'विभ्रमं' शोभां 'दधति धारयति। पटाञ्चलेषु पतिताः शिखाभासः कुङ्कमानुलेप इव प्रतीयन्ते इत्यर्थ. ॥

Notes—1. तत् किं &c.—नु implies deliberation, doubt &c. वितर्क। "नु वितर्कावमानयोः" इत्यादि मेदिनी। खलु implies जिज्ञासा here, desire to know facts. "खलु स्याद्वाक्यभूषायां जिज्ञासायाञ्च सान्त्वने" इत्यादि मेदिनी। 2 त्वाष्ट्र &c—त्वष्टृ is विश्वकर्मन्। तस्य इदम् इति त्वष्टृ+अण् त्वाष्ट्रम्। The allusion is to the story that संज्ञा, the wife of the Sun and daughter of त्वष्टृ was unable to approach her husband on account of his heat. Visvakarman with the Sun's permission, sliced down the solar sphere with his lathe. This reduced the heat though briliancy was enhanced (उज्ज्वल) and made him approachable मार्त्तण्ड sun. मृतस्य अनुडम् इति मृत+अण्ड+अण्=मृतण्ड+अण्=मार्त्तण्डः। Here मृत+अण्ड gives मृतण्ड just as शक+अन्धु yeilds शकन्धु by पररूप। The पररूप is allowed only when अण् has to be attached, Otherwise मृत+अण्ड=मृताण्ड। 3. पुटभेदः—पुट is a closed holder. The third eye of Siva, usually remains closed. The lids are opened to destroy, for fire issues from it forthwith. Here the Vidyadara surmises if Siva has opened his third eye. This is at this stage a mere suspicion on his part. Now पुटभेद is a क्रिया (a भाव)—the act of opening, As such it cannot be called उज्ज्वल। Hence चक्षुषः पुटभेदः means भिन्नपुट

चक्षु: by the maaim "भाबानयने द्रव्यानयम्"। The उज्ज्वलता is of the चक्षु:। 4. ललाट &c —नीलश्चासौ लोहितश्च नीललोहितः a name of Siva. He was नील in the throat and लोहित in his matted locks. This is also explained differently by Rayamukuta, thus—"नीलंयेन समाङ्गं तु रसाक्तं लोहितं त्विषा। नीललोहित इत्येव ततोऽहं परिकीर्त्तितः। इति वा। This is from the स्कन्दपुराण। The god paints his body blue while his lustre is red. See Tika. 5 आम्—This implies अवधारण। The suspicion is removed and is replaced by certainty. No पुटभेद but आम्रेयास्त्रप्रयोग। 5. अवदग्ध &c.—अव here is ईषदर्थ as in व्रीहीन् अवहन्ति। Thus अवदग्ध means *slightly burnt*, केतु is ध्वज banner कर्वुर spotted, कर्वुराणि कृतानि इति कर्वूर+णिच् (नामधातु) +क्त कर्मणि कर्वुरितानि। केतवश्च चामराणि च केतुचामराणि। अवदग्धानि कर्वुरितानि केतुचामराणि येषाम्। तैः। 5. ध्वजाङ्कुश &c.—ध्वजाङ्कुश is the flag-staff. It is wrapped in fancy cloth (पट) for the sake of appearance,

(*IV*) (वि—) आश्चर्यम्! प्रवृत्त एवायम् उच्चण्डवज्रखण्डास्त्रस्फोटपटुतरस्फुलिङ्गविकृतिः उत्तालेलिहानज्वालासम्भारभैरवो भगवान् उषर्बुधः। प्रचण्डश्चास्य सर्वतः सन्तापः। तत् प्रियामंगेनाच्छाद्य दूरमपसरामि। (इति तथा करोति)।

विद्याधरी—दिट्ठिआ एदेण विमलमोत्तिअसीदलमसिणमंसलेन णाहदेहप्पसेन आनन्दमन्दमउलिदघुम्मन्तलोचणाए अन्तरिदो एव्व सन्दावो [दिष्टया एतेन विमलमौक्तिकसरशीतलमसृणमांसलेन नाथदेहस्पर्शेन आनन्दमुकुलितघूर्णल्लोचनाया अन्तरित एव सन्तापः]।

Male—Wonderful ! The mighty fire is indeed spreading —fire, the outburst of whose sparks is mighter than the terrific bursting of fragments of the thounderbolt—fire, awful in its towering and tumultuous mass of flickering flames, and intense is its heat all round. So I will move away screening my darling with my own body. (*Does so*).

Fem,—Luckily the heat is indeed at a distance from me (Or—my heat is indeed relieved)—whose eyes are rolling and slightly closed through joy from the cool, smooth and solid touch of my lord's person as that of a string of spotless pearls.

मित—। 'प्रवृत्त एवाय' भगवान् उपर्बुध' अग्निः। किम्भूत उपर्बुधः ? उच्चराडस्य—'वज्रखराडस्य' वज्रांशस्य 'अवस्फोटः स्फोटनं ततोऽपि 'पटुतरः' प्रबलतरः स्फुलिङ्गानाम' 'अग्निकणानां विकृतिः विकारः (अवस्फोट इति यावत्) (यस्य तथाविधः। पुनः कोदृशः ? 'उत्ताला' अत्युच्चा' 'तुमुलाः सङ्कुलाः' लेलिहानाः प्रसरणशीला; या ज्वालाः' शिखाः तासां सम्भारेण राशिना भैरवः' भीमः॥ दिष्ट्या अहो हर्षः सन्तापः अग्निकृतो गात्रदाहः अन्तरित एव अपयात एव। कस्य सन्तापः ?—आनन्देन मन्दम् ईषत् 'मकुलिते' निमीलिते 'घूर्णती' आवर्त्तमाने च 'लोचने यस्याः तथाविधाया मम। कुत आनन्द, ? विमलः' अनवद्यः यः मौक्तिकसर' मुक्ताहारः तस्य इव 'शीतलः मसृणः' अपरुपः 'मांसलः' घनः स्टष्टानुभूत इति यावत् यः 'नाथदेहस्य स्पर्शः तेन हेतुना करणेन वा आनन्दः॥

Notes—1. **उच्चराड** &c —**वज्रखराड** is rather awkward. The idea of the breaking up of a single piece thunder into parts, each part being a **वज्रखराड** seems outrageous The **तद्धित** affix **खराडच्** in the sense **तस्य समूहः** is perhaps equally bad. **अवस्फोट** is bursting. **विकृति** is transformation, which is here *bursting*. Now see **टीका**। 2. **उत्ताल** &c,—**उद्गता तालेभ्यः इति उत्तालाः** taller than a Tala tree. By transference of epithets

उच्चाक is *very high*. पुनः पुन· लिहन्ति इति लिह्+यङ्+शानच् = लेलिहाना: making constant attempt to lick, i.e., flickering. Now see Tika. 4. उषर्बुधः—उषसि सन्ध्यायां बुध्यते प्रकाशते इति उषस्+बुध+क कर्त्तरि = उषर्बुध· fire. 4. अन्तरितः—अन्तरं सञ्जात-मस्य इति अन्तर+इतच् अन्तरितः। Now अन्तः means *distance* also *screen*. Hence the sense is *relieved* here.

(*V*) विद्याधरः—अयि किमत्र मया कृतम्? अथवा—

अकिञ्चिदपि कुर्वाणः सौख्यैर्दुःखान्यपोहति।

तत्तस्य किमपि द्रव्यं यो हि यस्य प्रियो जनः॥ ५॥

विद्याधरी—कहं अविरलविलोलघणतविज्जुलदाविलासमण्डिदेहिं मत्तमोरकण्ठसामलेहिं ओत्थरीअदि णहत्थलं जलहरेहिं [कथम्, अविरलविलोलघनद्विद्युल्लताविलासमण्डितैः मत्तमयूरकण्ठश्यामलैः अवस्तीर्यते नभस्तलं जलधरैः]

विद्याधरः—अयि कुमारलवप्रयुक्तवरुणास्त्रप्रभावः खल्वेषः। कथम् अविरलप्रवृत्तवारिधारासहस्रसम्पातैः प्रशान्तमेव पावकास्त्रम्!

विद्याधरी—पिअं मे [प्रियं मे]।

Male—What is done by me in this matter. oh! Or—

Without doing anything he banishes sorrow through joy. What a treasure to him is he who is his beloved! (5)

Fem.—Why is the bottom of the sky being overcast with clouds that are dark like the throat of a giddy peacock and adorned with the frequent play of transient wondering streaks of lightning?

Male—Well this is surely the majesty of Varunaweapon invoked by prince Lava. Hullo! The fire-weapon is

is indeed quenched by the showering of thousands of streams of water flowing incessantly !

Fem —Joy to me !

मित—। 'अत्र' अस्मिन् तव तापप्रशमे 'मया किं कृतं' किमपि । दूरगमनात् अन्तरितः सन्ताप ' न हि मत्कृतात् कस्मादपि कर्म्मणः ॥ अकिञ्चिदिति । व्यख्यातं द्वितीयाङ्के (sl 19)॥ 'अविरलः निरन्तरः यः विलोलानां' चपलानां' घूर्णन्तीनां' मेघात् मेघान्तर गच्छन्तीनां 'विद्युल्लतानां तडिल्लेखानां.' बिलासः' स्फुरण तेन 'मण्डितैः' भूषितैः । 'मत्तः'सञ्जातमदः यः मयूरः, तस्य 'कण्ठः' इव 'श्यामलैः' जलधरैः । 'अवस्तीर्य्यते 'व्याप्यते (see V 14) । 'नभसः' आकाशस्य 'तलम्' निम्नपृष्ठम् ॥ 'कथम्' इत्याश्चर्य्ये । 'अविरल'' निरन्तर यथा तथा प्रवृत्तानि' प्रसृतानि यानि 'वारिधारासहस्राणि' असंख्या जलधाराः तेषां 'सम्पातैः 'प्रशान्त लब्धप्रमम् अस्त्रम् ॥

Notes —1 अत्र—In this matter, i e., in the matter of allaying your heat. 2. अविरल &c.—न विरलः not rare, i.e., ceaseless. This qualifies बिलास । विलोल implies that the flashes were transitory घूर्णत् implies that the streak passed from cloud to cloud, Now see Tika for समास ।

(*VI*) बिद्याधरः—हन्त हन्त सर्वमतिमात्रं दोषाय । यत्प्रबलबातावलिक्षोभगम्भीरगुनगुनायमानमेदुरान्धकारनीरन्ध्रनिरुद्धम् एकवारविश्वग्रसनविकचविकरालकालकण्ठकण्ठकन्दरविबर्त्तमानमिव युगान्तयोगनिद्रानिरुद्धसर्वद्वारनारायणोदरनिविष्टमिव भूतजातं प्रवेपते ।

साधु ! वत्स चन्द्रकेतो साधु ! स्थाने वायव्यास्त्रमीरितम् *यतः*—

बिद्याकल्पेन मरुता मेघानां भूयसामपि ।
ब्रह्मणीव विवर्त्तानां क्वापि विप्रलयः कृतः ॥ ६ ॥

Male—Alas! Alas! Everything beyond measure is for evil. For, the entire creation, enclosed, without a loophole, in darkness made denser by clouds that are booming deep from shocks of terrefic typhoons, is trembling as when sprawling in the awful abyss of Nilkantha's throat opened to swallow up the universe at one gulp, or when placed in the maw of Narayana with all his outlets closed by the sleep of trance at the end of a *Yuga*. Bravo! Child Chandraketu, bravo? Just in time has the Wind-weapon been invoked. For—

By a gale resembling knowledge has been achieved the regression of all the numerous clouds into something inscrutable as of manifestations into Brahman. (6)

मित—। मात्राम् उचित परिमाणम् 'अतिक्रान्तम्' व्यतीत्य स्थितम् 'अतिमात्रम्'। असह्यो जातो वारुणास्त्रस्य प्रभाव इति भावः। 'यत्' यस्मात् 'भूतजातं प्रवेपते' निखिल जगत् कम्पते। किम्भूत सत् प्रवेपते?—'प्रवलाभि वातावलिभिः' कृतो यः 'क्षोभः प्रतिघातः तेन गम्भीर'' तथा तसा 'गुनगुनायमानैः' गुन इत्यव्यक्त गर्जद्भिः मेघैः मेदुर सान्द्रीकृत यत् अन्धकारं तेन नीरन्ध्रं निरवकाश यथा तथा 'निरुद्ध' परिव्यास भूतजातम्। किमिव प्रवेपते? 'एकेन वारेण' सकृतकृतेनैव प्रयत्नेन 'विश्वस्य' भूतजातस्य यत् 'ग्रसनं' ग्रासः तत्र 'विकच.' व्यात्तः अतएव 'विकरालः' अति भीषणः यः 'कालकण्ठस्य' नीलकण्ठस्य प्रलये संहारमूर्त्तेः हरस्य कण्ठकन्दर.'' वदनविवरं तत्र विवर्त्तमान विचेष्टमानमिव भूतजातं प्रवेपते। पुन: किमिव? 'युगान्ते' कल्पक्षये प्रलये या 'मोहरूपा निद्रा तथा निरुद्धानि सर्वाणि द्वाराणि रन्ध्राणि चक्षरादीनि तस्य तादृशस्य 'नारायणस्य उदरे' कुक्षौ निविष्टम् अवस्थितमिव भूतजातम्॥ विद्येति। अन्वय:—विद्याकल्पेन मरुता भूयसामपि मेघानां, विवर्त्तानां ब्रह्मणि इव क्वापि विप्रलयः कृतः। व्याख्या:—'विद्या' तत्त्वज्ञा-

नम् तत्सदृशेन 'महता' बायव्यास्त्रप्रयुक्तेन वायुना 'भूयसामपि अप्रमेयाणा-मपि 'मेघानां,'विवर्त्तानां' भेदबुद्धिकल्पितानां पदार्थानां 'ब्रह्मणि' अभेदबुद्धि-दर्शिते एकस्मिन् सति 'इव 'क्वापि' अविज्ञाते देशे विप्रलयः कृतः अदर्शनं नीत: ॥

Notes—1 प्रवल &c – गुन इत्यव्यक्तं शब्दं कुर्वन्त इत्यर्थगुन + डाच् + क्यष (नामधातु) + शानच कर्त्तरि गुनगुनायमाना as in झन-झनायित (V. sl. 5), See Tika also. 2 एकवार &c —This is in accordance with the theory that final dissolution comes through Siva who destroys the entire creation 3 युगान्त &c.—This follows the belief that at dissolution नारायण with-draws the creation within himself and then lies in a trance (योगनिद्रा), floating in water Comp. अमुं युगान्तोचित-योगनिद्रः संहृत्य लोकान् पुरुषोऽधिशेते'—*Raghu* 4 ब्रह्मणि &c. —ब्रह्मन् alone is all *Existance*, the rest are like apparitions, As all manifestation merge in ब्रह्मन् when ज्ञान arises so all clouds dispersed as wind blew. वि + वृत घञ कर्मणि विवर्त्त, the root being अन्तर्भावितणयर्थः this stands for the creation. Comp. "एकस्य सतो विवर्त्त कार्य्यजातम्" । And III, 47 ante

(*VII)* विद्याधरी—णाट को दाणिं एसो ससम्भुक्खित्तकर भमितपट्टकञ्चलो दूरदो एव्व महुरवअणपडिसिद्धजुज्झवावरो एदाणं कुमाराणं मज्झे विमाणं ओदारेदि (नाथ क इदानीमेष ससम्भ्रमोत्क्षिप्तकरभ्रमित—पट्टकाञ्चलोदूरत एव मधुरवचन-प्रतिषिद्धयुद्धव्यापार एतयो: कुमारयोर्मध्ये विमानमवतारयति) ?

विद्याधरः (दृष्ट्वा)—एष शम्बूकवधात् प्रतिनिवृत्तो रघुपतिः

शब्दं महापुरुषसंविहितं निशम्य

तद्गौरवात् समुपसंहृतसम्प्रहारः ।

शान्तो लवः प्रणत एव च चन्द्रकेतुः
कल्याणमस्तु सुतसङ्गमनेन राज्ञः ॥७॥

तदितस्तावन्निर्गच्छावः। (इति निष्क्रान्तौ)!

विष्कम्भकः!

Fem.—My husbond, who now is this who waving the skirt of his upper garment in his hand up-lifted in haste, has even from afar, prohibited the battle-struggle in sweet words and is causing his balloon to descend between the princes ?

Male.--(*Observing*)—This is the head of the house of Raghu returning after the killing of Sambuka.

Having heard the shout uttered by this great personage and with fight stopped in deference to it, Lava has calmed down and Chandraketu has indeed prostrated himself. May good ccme unto the king through union with his sons. (7)

So we retire hence. (*Exeunt*),

(*Here ends the Vishkambhaka*),

मित—। सम्भ्रमेण' त्वरया सह 'उत्क्षिप्त उत्तोलितः यः 'करः' दक्षिणो हस्तः तेन 'भ्रमित ' आवर्त्तित. पटकाञ्चलः उत्तरीयप्रान्त येन तादृश. ॥ शब्द-मिति । अन्वय —महापुरुषस.बिहितं शब्द निशम्य तत्गौरवात् समुपसंहृ' तसम्प्रहारः लवः शान्तः, चन्द्रकेतुः प्रणत एव च। सुतसङ्गमनेन राज्ञः कल्याणम् अस्तु। व्याख्या—'महापुरुषेण' पुरुषकाण्डेन रामेण 'संविहितं ससम्भ्रममुच्चारितं 'शब्दं' निशम्य श्रुत्वा 'तद्गौरवात' तस्मिन् निषेध-वाक्ये आदरात् हेतो समुपसंहृतः' परित्यक्तः 'सम्प्रहारः युद्धं' येन तादृशः सन् 'लवः शान्तः' शमं यातः 'चन्द्रकेतुः प्रणत 'एव' कृततातभिनन्दन एव। 'सुताभ्यां' 'सङ्गमनेन' सह मेलनेन 'राज्ञ. 'कल्याणं' मङ्गम् 'अस्तु' इति सप्तमाङ्कच्छाया ॥

Notes—1. ससम्भ्र &c.—He noticed the fight from above on his way back to Ayodhya. Of course he could not recognise लव but could know that his own army was engaged. It was in the neighbourhood of Valmiki's hermitage—almost in the hermitage itself ; and evidently it was not an ordinary fight , Hence Rama's anxiety to stop the fight—आश्रमबाधा मा भूत् इति। The hand was uplifted and the skirts waved to draw attention. 2 शम्भूकवधात्—शम्बकवधं विधाय इति ल्यब्लोपे कर्मणि ५मी। 3. महापुरुष &c,—लव did not know that it was राम himself. But as he was descending from above in a विमान he knew for certain that he was some महापुरुष। 4. निशम्य—शम of the दिवादि class with नि means 'to hear'. नि+शम + ल्यप्। 5 तद्गौरवात्—The तत् here refers to the शब्द। Or we may refer to the महापुरुष in महापुरुष-संविहित—। लव obeyed because he saw that the speaker was some महापुरुष। 6. हत &c.—हत refers to both लव and चन्द्रकेतु। Or better to लव and कुश। The विद्याधर being a demigod was aware of the fact relating to लव and कुश।

(*XIII*) (ततः प्रविशति रामो लवः प्रणतश्चन्द्रकेतुश्च)।

रामः (पुष्पकादवतरन्)—

दिनकरकुलचन्द्रचन्द्रकेतो सरभसमेहि दृढं परिष्वजस्व।
तुहिनशकलशीतलैस्तवाङ्गैः शममुपयातु ममापि चित्तदाहः ॥८॥

(उत्थाप्य सस्नेहास्रं परिष्वज्य) अपि नाम कुशलं तव दिव्यास्त्रधरदेहस्य ?

(*Then enter Ram, Lava and Chandraketu prostrate*)
Rama (*Alighting from the Pushpaka*)—

Come quick and embrace me close. O Chandraketu, the gladdener of the race of Raghu. May the burning of the heart of even me undergo abatement from your limbs that are cool like lumps of snow. (8).

(*Raising and embracing with tears of affection*) Is it all well with your person carrying the divine weapons ?

मित—। दिनकरेति। अन्वयः—दिनकरकुलचन्द्र चन्द्रकेतो सरभसम् एहि, दृढं परिष्वजस्व। तव तुहिनशकलशीतलैः अङ्गैः, मम अपि चित्तदाहः शमम् उपयातु। व्याख्या—हे 'दिनकरकुलस्य सूर्य्यवंशस्य चन्द्र' आनन्दन 'चन्द्रकेतो, सरभसं' द्रुतम् 'एहि' मत्समीपमागच्छ 'दृढं' परिष्वजस्व' गाढ़म् आलिङ्ग माम्। 'तव तुहिनशकलैः' हिमखण्डैः इव 'शीतलैः अङ्गैः' हेतुभिः करणैर्वा 'मम अपि' निरन्तर' दाहमनुभवती रामस्य चित्तदाहः' मनःसन्तापः 'शमं' लाघवम् 'उपयातु' लभताम्॥ 'दिव्यास्त्राणां धरः' यो 'देहः' तस्य। अक्षतः किं ते देहः इति प्रश्नः॥

Notes—1. प्रविशति—प्रवेश is not possible for one lying prostrate (प्रणत)। Hence प्रविशति is here discovering. 2. दिनकर &c.—चन्दति अाह्लादयति चन्द्+रक कर्त्तरि = चन्द्रः gladdener, This is used here as an ordinary attributive. Rama being childless, the hopes of the race neturally centered in चन्द्रकेतु। 3. सरभसम्—रभस is वेग। "रभसौ हर्षवेगयोः" इति मेदती। Adv. 4. दिव्यास्त्र &c,—दिव्यास्त्राणां धरः दिव्यास्त्रधरः। तादृशो देहः। तस्य। Rama noticed from above that fight was going on with divine weapons. The opponent was thus a hero hence the query.

(*xi*) चन्द्रकेतुः—कुशलमत्यद्भुतक्रियस्य प्रियदर्शनस्य भवस्य लाभाभ्युदयेन। तद्विज्ञापयामि मामिव विशेषेण वा मत्तः स्निग्धेन चक्षुषा पश्यत्वमुं महावीरप्रकाण्डं तातः।

रामः (लवं निरूप्य)—दिष्ट्या अतिगम्भीरमधुरकल्याणाकृतिरयं वयस्यो वत्सस्य ।

त्रातुं लोकानिव परिणतः कायवानस्त्रवेदः
क्षात्रो धर्मः श्रित इव तनुं ब्रह्मकोषस्य गुप्त्यै ।
सामर्थ्यानामिव समुदयः सञ्चयो वा गुणाना-
माविर्भूय स्थित इव जगत्पुण्यनिर्माणराशिः ॥९॥

Chandra—All well through the fortunate acquisition of Lava of pleasing looks and highly wonderful deeds. So I pray may Sire eye this best of mighty heroes with as gracious a look as when eyeing me or surpassing that.

Rama (*Marking Lava*)—Luckily this friend of my child is of a highly serene, charming and auspicious mien.

Methinks the science of Arms has become incarnate to save the worlds, (or) Military Virtue has taken form for guarding the treasure of the Vedas, (or there has been) a concurrence of all powers or an assemblage of all virtues, (or again) the heap of materials for the making of all that is holy in the universe is standing manifest. (9)

मित—। अत्यद्भुता' अत्याश्चर्या 'क्रिया' कर्म्म यस्य तस्य लवस्य । लाभः मित्रत्वेन प्राप्तिरेव 'अभ्युदय' मङ्गलं तेन हेतुना 'कुशलम्' । मामिव अमुं प्रशस्तं महावीरं 'महावीरप्रकाण्ड' शिवेन चक्षुषा' प्रसन्नेन नयनेन [करणे ऽया] न तु युद्धव्यापारात् सकोपेन 'पश्यतु तात.' । अथ वा मत्तः विशेषेण आधिक्येन पश्यत । अधिकार्थविशेषशब्दयोगे मत्त इति पञ्चमो ॥ अति-गम्भीरा' अक्षोभ्या 'मधुरा कल्याणी' शुभा आकृतिः' यस्य सः ॥ त्रात-मिति । अन्वयः—लोकान् त्रातुम अस्त्रवेदः कायवान् परिणत इव । ब्रह्मकोषस्य गुप्त्यै क्षात्रो धर्म्मः तनुं श्रित इव । सामर्थ्यानां समुदयः गुणानां सञ्चय इव वा । जगत्पुण्यनिर्माणराशिः आविर्भूय स्थित इव । व्याख्या—

लोकान् त्रातुं'' विश्वस्य रक्षायै 'अस्त्रवेद' धनुर्वेदः 'कायवान्' मूर्तिमान् 'परिणतः 'इव संवृत्तः इति मन्ये अथवा 'ब्रह्मकोषस्य' वेदरूपस्य रत्नभाण्डस्य 'गुप्त्यै' ['तुमर्थाच्च—'' इति ४र्थी] रक्षार्थं क्षात्रो धर्मः क्षत्रियगुण-राशिः तनुं'' श्रित 'इव धृतदेह. संवृत्त इति मन्ये। अथवा सामर्थ्यानां साफल्यानां जगति भिन्नाधारे स्थितायाः कृतकृत्यतायाः 'समुदयः' एकाधारे आविर्भावः 'गुणानाम्' भिन्नाधारस्थानाम् उत्कर्षाणां 'सञ्चय इव वा' एकाधारे धृतो राशिर्वा इति मन्ये। 'जगति' यानि पुण्यानि पावनानि वस्तूनि सन्ति तेषां यत् 'निर्माणम्' उपादानम् ['ल्युट्' करणे] तस्य 'राशिः' पुञ्जः 'आविर्भूय' मूर्तिमाश्रित्य 'स्थित इव'—बालरूपेण अवस्थित इति मन्ये॥

Notes—1. विशेषेण &c.—वि + शिष + घञ् भावे = विशेषःआधिक्यम् excess. In this sense compare "आसीद्विशेषा फलपुष्पवृद्धिः"—*Raghu* सहार्थ ३या। मत्तः has पञ्चमी because विशेष has अधिकार्थ included in it. Comp. "यस्मादधिकम्" (*Panini*) 2. महावीर &c—प्रकाण्ड is प्रशंसावचन and नित्यक्लीव। But प्रशस्तो महावीरः महावीर-प्रकाण्डः नित्यसमास by "प्रशंसावचनैश्च"। 3. अतिगम्भीर &c.—गम्भीरा चासौ मधुरा च गम्भीरमधुरा। सा च कल्याणी च गम्भीरमधुरकल्याणी। तादृशी आकृतिर्यस्य गम्भीरकल्याणाकृति। अतिशयेन तादृशः। The कर्मधारय in stages as above is a necessity because otherwise पुंवद्भाव is not availadle and the बहु—yields the form गम्भीरामधुराकल्याणाकृतिः with पुंवद्भाव of कल्याणी only. 4. सामर्थ्यानाम्—सङ्गतः अर्थेन समर्थ. one with the end (अर्थ) achieved, *i. e.*, successful. तस्य भावः इति समर्थ + ष्यञ् सामर्थ्यं success, &c, It is usual to take सामर्थ्य here as *Power* such as शौर्य्य etc. But then these are गुण and सामर्थ्यानामिव समुदयः becomes included in सञ्चयो वा गुणानाम् thus leading to tautology, We have therefore explained differetly as above.

(x) लवः—अहो पुण्यानुभावदर्शनोऽयं महापुरुषः—

आश्वासस्नेहभक्तीनामेकमालम्बनं महत् ।
प्रकृष्टस्येव धर्मस्य प्रसादो मूर्त्तिसञ्चरः ॥१०॥

आश्चर्यम् !

विरोधो विश्रान्तः प्रसरति रसो निर्वृतिघन-
स्तदौद्धत्यं क्वापि व्रजति विनयः प्रह्वयति माम् ।
झटित्यस्मिन् दृष्टे किमिव परवानस्मि यदि वा
महार्घस्तीर्थानामिव हि महतां कोऽप्यतिशयः ॥११॥

Lava—O this soul of saintly majesty and presence is—

A mighty common resort of consolation, affection and devotion, the favour as it were of supreme virtue moving embodied. (10)

O marvel !

Discord has ended ; a sentiment, rich in pleasure is developing , that haughtiness departs who knows where , modesty bends me down. This one being seen I have some how become forthwith enslaved , or of the great, like that of holy places, there is an inexplicable and highly adorable ascendancy (that extorts homage). (11)

मित—। 'अहो' इत्यादि परवर्त्तिना श्लोकेन अन्वितम् । आश्वास इति । अन्वयः—अहो पुण्यानुभावदर्शनः अयं महापुरुषः आश्वासस्नेहभक्तीनां महत् एकम् आलम्बनम्—प्रकृष्टस्य धर्मस्य मूर्त्तिसञ्चर. प्रसाद इव । यद्वा अहो आश्वासस्नेहभक्तीनां महत् एकम् आलम्बनम् अयं पुण्यानुभावदर्शनो महापुरुषः प्रकृष्टस्य धर्मस्य मूर्त्तिसञ्चरः प्रसाद इव । व्याख्या='अहो' आश्चर्यम् ? 'पुण्यः' पवित्रः 'अनुभावः' प्रभावः 'दर्शनम्' आकृतिश्च यस्य तादृशः 'अयं महापुरुषः आश्वासस्य' सान्त्वनायाः 'स्नेहस्य' वात्सल्यस्य

'भक्तेः पूजकगतस्य च 'महत्' विपुलम् एकं' साधारणम् 'आलम्बनं' समाश्रयः, किं बहुना मन्ये अयं 'प्रवृद्धस्य धर्मस्य पुण्यराशेः 'मूर्त्तिसञ्चरः' देहेन विहरन् 'प्रसाद इव प्रसन्नता इव। धर्मस्य प्रसादः=प्रसन्नो धर्मः, इत्यर्थः। मावानयने द्रव्यानयनम्। मन्ये व पुण्यराशि' प्रसन्नो भूत्वा अग्रतो मे अनया महापुरुषमूर्त्या वर्त्तते इव इत्यर्थः॥ विरोध इति। अन्वयः—विरोधो विश्रान्तः। निर्वृतिघनः रसः प्रसरति। तत् औद्धत्य क्वापि व्रजति। विनय मां प्रह्वयति। अस्मिन् दृष्टे किमिव झटिति परवान् अस्मि। यदि वा तीर्थानामिव महतां कोऽपि महार्घः अतिशयो हि। व्याख्या - विरोधः' वैरं विश्रान्तः' निवृत्तः। 'निवृत्त्या आनन्देन घनः' सान्द्रः रसः 'प्रसरति' भावो विवर्द्धते। अपगतं रौद्रं शान्तिः उज्जृम्भते इत्यर्थः। तत् औद्धत्य ' दृप्तता क्वापि व्रजति विलीयते 'विनयः' नम्रता 'मां प्रह्वयति' आनतशिरसं करोति। अस्मिन् महापुरुषे 'दृष्टे किमिव' न जाने कुतो हेतो· परवान् अस्मि' आत्मनः अनीशोऽहं जातः। 'यदिवा' अथवा अस्त्येवात्र हेतुः—'तीर्थानामिव' पुण्यक्षेत्राणामिव महतां महापुरुषाणां 'कोऽपि अनिर्वचनीयः, 'महार्घ· महामूल्यः परमपूज्यो वा अतिशयो हि माहात्म्यं वर्त्तते इव तेनैवास्मि परवान्॥

Notes 1. आश्वास—&c—आश्वास consolation. This gentleman's sight seems to console me. स्नेह affection. This gemtleman seems to be aflectionately disposed towards me. भक्ति devotion. My devotion seems spontaneonsly to go towards this gentleman, 2. एकम्—Common. All the three are centered in this person so far as I amconnected. 3. मूर्त्ति &c.—मूर्त्या सञ्चरते इति मूर्त्ति + सम + चरकर्त्तरि अच्। My merits have taken shape and come up to me in the person of this gentleman. 4. निर्वृति &c—हन + अप भावे घनः solidity. By transference of epithets this means here 'solid'. निर्वृत्या घनः।

रस, the sentiment, is a solid one, solid with joy. In other words a deep sense of joy prevails. 6. प्रह्वयति – प्रह्व is नम्र। प्रह्वं करोति इति प्रह्व + णिच् (नामधातु) + लट्, ति। 7. यदि वा— This may be taken as a compound अव्यय meaning अथवा। For a different sense compare "यदि वारघोः कुलगुरुः" Act IV. sl. 5 There too the sense अथवा is not unsuitable. 8. महार्घः = अर्घ is मूल्य, also पूजा or पूजाविधि। महान् अर्घः अस्य। 9. अतिशयः—अति + शी + अच् भावे करणे वा Grandeur. 10. *Remark* —In the second half लव is at first surprised that he is so much overcome that he does not know why (किमिव) । But presently he sees the reason – It is the natural majesty of the great that extorts homage.

(*xi*) रामः—तत् किमयमेकपदे एव मे दुःखविश्रामं ददाति उपस्नेहयति च कुतोऽपि निमित्तादन्तरात्मानम्। अथवा स्नेहस्य निमित्तसव्यपेक्ष इति विप्रतिषिद्धमेतत्। तथाहि—

व्यतिषजति पदार्थानान्तरः कोऽपि हेतु-
र्न खलु बहिरुपाधीन् प्रीतयः संश्रयन्ते।
विकसति हि पतङ्गस्योदये पुण्डरीकं
द्रवति च हिमरश्मावुद्गते चन्द्रकान्तः॥१२॥

Rama—Well, Why does he forthwith procure cessation of my misery and for some reason or other melts my inner self with affection ? Or "Affection is yet dependent upon external reason" is self-contradictory. For—

Affection certainly does not cling to external circumstances, some inexplicable internal reason connects things

together. The lotus invariably opens at the rise of the sun, the moon, having risen, the moon-gem runs (melts) undoubtedly. (12).

मित—। एकं पदं पदोच्चारणकालः ,एकपदं' मुहूर्त्तमात्रमित्यर्थः। तस्मिन्। क्षणेन इति यावत्। 'उपस्नेहयति स्नेहेन संयोजयति कुतोऽपि' अविज्ञानात 'निमित्तात्' 'अथवा' नाम्यत्र निमित्तस्य च प्रसङ्गः। 'निमित्तेन' वाह्येन हेतुना 'सव्यपेक्षः' व्यपेक्षायुक्तः हेत्वधीनमिति च स्नेहश्च' एतत् द्वयं 'विप्रतिषिद्धं' परस्परविरुद्धम्। यदि स्नेहं, वाह्यं निमित्तं नापेक्षते। अथ बाह्यनिमित्तापेक्षः, चेत् नासौ स्नेहः—इति भावः। कुतस्तर्हि स्नेह इति चेत् तत्राह व्यतिषजतीति। अन्वयः—आन्तरः कोऽपि हेतुः पदार्थान् व्यतिषजति, प्रीतयः खलु वहिरुपाधीन् न हि संश्रयन्ते। पतङ्गस्य उदये पुण्डरीकं विकसति हि, हिमरश्मौ उद्गते चन्द्रकान्त द्रवति च। व्याख्या—'आन्तरः' आभ्यन्तरः पदार्थस्य स्वभावप्रतिवद्ध इत्यर्थः 'कोऽपि' अनिर्वचनीयः हेतुः निमित्तं पदार्थान वस्तूनि 'व्यतिषजति' व्यतिषञ्जयति मिथो मेलयति, 'प्रीतयः खलु स्नेहादयः किल 'वहिरुपाधीन्' वाह्यानि निमित्तानि न हि 'संश्रयन्ते' नैव आलम्बन्ते। 'पतङ्गस्य' सूर्य्यस्य [उदये पुन्डरीक' पद्मं 'विकसति हि उन्मीलत्येव, हिमरश्मौ' शीतांशौ चन्द्रे 'उद्गते' उदिते सति 'चन्द्रकान्तः' मणिभेदः द्रवति च' आर्द्रीभवत्येव—तत्रतु निमित्तं प्रकृतिः न हि वाह्यं किञ्चित्॥ स्नेहविषयोपि तादृशः।

Notes,—1. एकपदे—For समास see टीका। Instantly. Comp. "निहन्त्यरीन् एकपदे"—*Sisupala*, "कथमेकपदे निरागसम्"—*Raghu*—&c. 2. स्नेहश्च &c.—The two epithets स्नेह and निमित्तसव्यपेक्ष are contradictory (विप्रतिषिद्ध), hence my search for external reason (कुतोऽपि निमित्तात्) must be futile. व्यतिषजति—सञ्ज is usually अकर्मक। The present seems to be a सकर्मक use. Compare 'मृतं स्कन्धे समासजत्'—*Mahabharata*, "भूयःस भूमेर्धुर-

मासस्रज —*Raghu*, Or say these are instances of अन्तर्भावितण्यर्थ use of सृज (see Tika). 4, आन्तरः—Internal, i. e., something depending on the nature of the things (पदार्थ), more than this we cannot say. (कोऽपि), we do not know the character of the dependence. 5. बहिः &c—बहिस् exterior, outside. is an अव्यय। उपधीयन्ते इति उप+आ+धा+कि कर्मणि=उपाधयः condition, circumstance, accidents &c. बहिर्भूता बाह्या इत्यर्थः उपाधयः बहिरुपाधयः। तान्। 6. हि, च—Both are अवधारणे। विकसति हि—Opens without fail, द्रवति च—Surely melts, These are natural facts, there is some mysterious connection between the nature of the sun and the lotus on the one hand, and of the moon and gem on the other, the nature of which we do not know.

(*vii*) लवः—चन्द्रकेतो क एते ?

चन्द्रकेतुः—प्रियवयस्य, ननु तातपादाः।

लवः—ममापि तर्हि धर्मतस्तथैव यतः प्रियवयस्य इत्यात्थ। किन्तु चत्वारः खलु भवतामेवंव्यपदेशभागिनस्तत्रभवन्तो रामायणकथापुरुषाः तत् विशेषं ब्रूहि।

चन्द्रकेतुः—ननु ज्येष्ठतातपादा इत्यवेहि।

लवः (सोल्लासम्)—कथं रघुनाथः! दिष्ट्या सुप्रभातमद्य यदयं दृष्टो देवः। (सविनयकौतुकं निर्वर्ण्य) तात प्राचेतसान्तेवासी लवोऽभिवादयते।

Lava—Chandraketu who are the these (Who is he) ?

Chandra—Dear friend. revered father assuredly.

Lava—Then by custom (Or—in law) he is the same to me also, as you call me 'Dear friend.' But all the four illus-

trious heroes of the story of the Ramayana enjoy this designation from you. So give me paticulars (distinctive details).

Chandra—Well, take him as the eldest father.

Lava.—(*With joy*)—What! The lord of the Raghus! Luckly it is a happy dawn to-day, for, this king is seen. (*Observing with humility and curiosity*). Father, Lava, a pupil of prachetasa, (Valmiki), bows to you,

मित—। 'एते इति गौरवे बहुवचनम् ॥ धर्मतः' आचारात् शास्त्राद् वा। भवतां तव। गौरवे भवच्छब्दप्रयोगो बहुवचनञ्च। 'एवम् ईदृशो 'व्यपदेशः' अभिधानम् ,एवंव्यपदेशः' तातपादाभिधानमिति यावत्। तं भजन्ते इति 'एवंव्यपदेशभागिनः'। विशेषं भेदम् विस्तरमित्यर्थः कथय॥ शोभनं प्रभातं 'सुप्रभातम्' ॥

Notes.—1. धर्मतः—धर्म is here आचार। "धर्मोऽस्त्री पुण्ये आचारे" इत्यादि मेदिनी। Or say धर्म stands for धर्मशास्त्र। धर्मात् इति धर्म+ङसि (५मी)+तसि स्वार्थे = धर्मतः। हेतौ ५मी। 2. एवम् &c—एवंव्यपदेश+भज+घिनुण् कर्त्तरि। 3. विशेषम्—विशेष्यते अनेन इति वि+शिष+णिच्+घञ् करणे विशेषः distinctive character. तम्। Obj of ब्रूहि।

(*xii*) रामः—आयुष्मन् एह्येहि। (सस्नेहमालिङ्ग्य) अयि कृतं कृतमतिविनयेन। अनेकशारमपरिश्लथं परिष्वजस्व।

परिणतकठोरपुष्करगर्भच्छदपीनमसृणसुकुमारः।

नन्दयति चन्द्रचन्दननिस्यन्दजडस्तव स्पर्शः ॥१२॥

लवः (स्वगतम्)—ईदृशो मां प्रत्यमीषामकारणस्नेहः मया पुनरभिद्रुग्धमश्वेन यदायुधपरिग्रहं यावदध्यारूढो दुर्योगः। (प्रकाशम्) मृष्यन्त्विदानीं लवस्य बालिशतां तातपादाः।

Rama—Come long-lived one, come. (*Embracing him affecionately*). Darling, away. with excessixe modesty; embrace me more than on and close.

Your touch, full, smooth and soft like that of the inner leaves of a mature and full-bown lotus and cool like the moon-beam or sandal paste, delights me. (13).

Lava (*To himself*)—Such is this spontaneous affection for me ! But I, a fool even upon him have warred, for the mishap culminated in the taking up of arms. (*Aloud*) Now let my revered father pardon Lava's stupidity.

मित—। आलिङ्गितेन प्रत्यालिङ्गनमाचारः। विनयेन तदभिमुखे लवे राम आह—'अयि कृतम्' इत्यादि। प्रत्यालिङ्गनं सकृदेव क्रियते, तत्तूनालं मम तोषाय, तत् 'अनेकवारम् अपरिश्लथ' गाढं च परिष्वजस्व' आलिङ्गमाम। तथा करणे कारणमाह—परिणतेति। अन्वयः—परिणतकठोरपुष्कगर्भच्छदपीनमसृणसुकुमारः चन्द्रचन्दननिस्यन्दजडः तव स्पर्शः नन्दयति। व्याख्या—'परिणतं विकसितं' तत् कठोरं पूर्णावयवं 'पुष्करं' पद्मं तस्य 'गर्भच्छद' अन्त पालशम् 'इव पीनः' स्थूलः 'मसृणः' अकर्कश 'सुकुमारः' मृदुश्च 'चन्द्रचन्दनयोः' यः निस्यन्दः' क्षरणं चन्द्रिका, घृष्टचन्दनश्च स इव 'जड' शीतलः 'तव स्पशः' मां 'नन्दयति' आह्लादयति। तत् 'अनेकवारम्' इत्यादि। 'अमीषाम्' अमुष्य रामस्य। गौरवे बहुवचनम्। 'एभ्यः' एतान् पराजेतुम् 'अज्ञेन मया अभिद्रुग्ध' वैरायितम्। अभिद्रग्धं मया इति नास्ति संशयः 'यत् यस्मात 'आयुधपरिग्रह' यावत् अस्त्रग्रहणपर्यन्तं 'दुर्योगः' अशोभनव्यवहार: 'अध्यारूढः' प्रसृतः। लवस्य बालिशतां मूर्खताम्।

Notes.—1 **परिणत** &c.—**परिणाम** ffnal stage. The final stage of flower is in its **विकास**। Hence **परिणत** is **विकसित**। **कठोर** is fully developed as is **कठोरगर्भां** (Act I, para xviii). **छद्** + **णिच्** + **घ करणे** = **छद** leaf. **गर्भस्थाः छदा. गर्भच्छदाः**। **प्याय** + **क्त कर्त्तरि** **पीन** stout. The idea in **पीनः स्पर्शः** is similar to that in **मांसलदेहसौभाग्यम्** (Act I, para xxvi). For a similar idea compare. '**कठोरकमलगर्भपक्ष्मल. शरीरस्पर्शः** (Act IV, para xxxiii). 2. **चन्द्र**

&c.—निस्यन्द and निष्यन्द are optional forms meaning *oozings*. The moon beams are here supposed to be oozings of the moon, जड़ is हिमग्रस्त benumbed by cold "जड़ो मूर्खहिमग्रस्त" इत्यादि विश्व । Hence *cool*. 3. मया &c—मया अभिद्रुग्धम् is in the भाववाच्य । Hence अभि + द्रुह् is here अकर्मक । As such it can not have a कोपपात्र । Thus the rule "क्रुधद्रुहोरुपसृष्टयोः कर्म" has no scope here and एभ्य takes the चतुर्थी विभक्ति by the rule "क्रियार्थोपपदस्य च कर्मणि स्थानिनः" the sense being एतान् विजेतुं अभिद्रुग्धम् । 4. अध्यारूढ.—अधि + आ + रुह् + क्त कर्त्तरि अध्यारूढ lit, gone up, hence *proceeded*, *reached* &c. 5 दुर्योगः —दुष्टो योगः a bad move, an evil or unhappy turn or step,

(*xi*) राम—किमपराद्धं वत्सेन ?

चन्द्रकेतुः—अश्वानुयात्रिकेभ्यस्तातप्रतापाविष्करणमुपश्रुत्य वीरायितमनेन ।

रामः—नन्वयमलङ्कारः क्षत्रस्य ।

न तेजस्तेजस्वी प्रसृतमपरेषां प्रसहते
स तस्य स्वो भावः प्रकृतिनियतत्वादकृतकः ।
मयूखैरश्रान्तं तपति यदि देवो दिनकरः
किमाग्नेयो ग्रावा निकृत इव तेजांसि वमति ॥१४॥

Rama—Has any wrong been done by my child ?

Chandra—He played the part of a hero on hearing the proclamation of Sire's prowess from the followers of the horse.

Rama—Well, that is an adornment of a Kshattriya.

The spirted (one) does not brook the spirit radiated from others, that is his own character, not assumed, because assigned by name (Or—inherent in his elements). Why does the stone like one insulted, emit flames if the god the day-maker, steadily heats it with his rays ? (14).

मित—। 'वत्सेन अपराद्ध' किम्'—अपराधः कश्चित् कृतः किम् ? तातस्य' भवतः 'प्रतापस्य आविष्करणम्' उद्घोषणम्' । 'अनेन वीरायितं वीरेण इव आचरितम् [इति पूवत्र द्रष्टव्यम्] । न तेज इति । अन्वयः—तेजस्वी प्रसृतम् अपरेषां तेजः न प्रहसते । स तस्य प्रकृतिनियतत्वात् अकृतकः स्वः भावः । देवो दिनकरः यदि मयूखैः अश्रान्तं तपति आग्नेयो ग्रावा निकृत इव किं तेजांसि वमति ? व्याख्या—'तेजस्वी' महातेजा जनः प्रसृतं प्रकटितम् 'अपरेषाम्' अन्येषां तेज' प्रतापं 'न प्रसहते' न मृष्यति । स. अमर्षः 'तस्य तेजस्विनः 'प्रकृत्या' स्वभावेन नियतत्वात्' आवद्धत्वात् [यद्वा—'प्रकृतौ' उपादाने 'नियतत्वात्' सम्बद्धत्वात्] 'अकृतकः' अकृत्रिम 'स्वः भावः' निजो धर्म. । अतश्च परवृद्धि-मत्सरि मनो हि मानिनाम्' । दृष्टान्तमाह—'देवो दिनकर ' भगवान् आदित्यः यदि मयूखैः' किरणैः 'अश्रान्त' तपति अविराम' दलति तदा 'आग्नेयो ग्रावा' अग्न्युत्पादिका शिला 'निकृत इव' अपमानित इव 'किं तेजांसि वमति' कथम् आत्ममयूखान् प्रकटयति । तत्प्रकटनं तस्य निजो धर्म इत्येव । एवम् अनेनापि स्वधर्ममाश्रित्य वीरायितं कस्तत्र मर्षणप्रसङ्ग' ॥

Notes.—1. अपराद्धम्—अप + राध + क्त भावे । 2. वीरायितम्—वीरेण इव आचरितम् इति वीर + क्यङ् नामधातु + क्त भावे । 2 अयम —This refers to वीरायण (वीराचरण) and is masculine because the विधेय, i. e अलङ्कार is prominent here and is masculine (विधेयप्राधान्यात्) । 4 आग्नेयः—अग्नेरयम् इति अग्नि + ढक् आग्नेयः belonging to fire, connected with fire &c 5. निकृतः—निकार is अवमानना । निकृतः अवमानितः । cp. "प्राप्यनिकारसीदृशम्' —*Kirāt*.

(*xv*) चन्द्रकेतुः—अमर्षोऽप्यस्यैव शोभते वीरस्य । पश्यतु हि तातः प्रियवयस्यविनियुक्तजृम्भकास्त्रनिष्कम्पस्तम्भितानि सर्वतः सैन्यानि ।

रामः (विलोक्य)—वत्स लव संह्रियतामस्त्रम्। त्वमपि चन्द्रकेतो निर्व्यापारविलक्षितानि सान्त्वय सैन्यानि।

लवः—यथाज्ञापयति तातः। (इति प्रणिधानं नाटयति)।

चन्द्रकेतुः—यथादिष्टम् (इति निष्क्रान्तः)।

लवः—प्रशान्तमस्त्रम्।

ChanDra—This intolerance again befits this hero alone. For, behold Father, the forces all round are motionlessly fixed by the Jrmbhaka weapon, employed by my dear friend.

Rama (*Observing*)—Lava, my child, let the weapon be withdrawn, You too Chandraketu, cheer up the forces that are bewildered because powerless.

Lava—As father commands. (*Acts meditation*).

Chadra—As commanded (by father). (*Exit*).

Lava—The weapon has quieted down.

मित—। 'अमर्षः' तातप्रतापाविष्करणे अक्षमा। 'अस्यएव शोभते' नान्यस्य। यद्वा—'अस्य शोभते एव' यतः प्रियवयस्येन अनेन 'विनियुक्तेन जृम्भकास्त्रेन निष्कम्पं यथा तथा स्तम्भितानि बलानि'। नान्यः कश्चिदीदृशः अस्त्रवेदाभिज्ञः॥ 'संह्रियताम्' प्रशमय्यताम्। निर्व्यापाराणि' निरुद्धक्रियाणि अतएव विलक्षितानि' विमूढानि सैन्यानि। 'सान्त्वय' समाश्वासय॥

Notes—1. **अमर्षः** &c.—He is such a hero, he can afford to be intolerant. He is master of the **जृम्भक** weapons ; no one else is. except Sire. Hence no wonder he resented the proclamation. 2. **संह्रियताम्**—The **संहार** of a weapon is its withdrawal from action. 3. **निर्व्यापार** &c.—**निर्गतः व्यापारः**

एभ्यः निष्पापाराणि motionless स्तम्भितानि। विलक्षित is rendered विस्मयान्वित by वीरराघव। वि + लक्ष (आलोचने चुरादि) + णिच् स्वार्थे + क्त कर्मणि = विलक्षित bewildered, वि being a *Privative* here. Comp. विलक्ष in 'गोत्रेषु स्खलितः—भवति च व्रीडाविलक्षश्चिरम्"—*Sakuntala*. 4. प्रणिधानम्—ध्यानम् meditation. He meditates upon the charm (मन्त्र) that withdraws the weapon. प्र implies intensity.

(*xvi*) रामः—वत्स सरहस्यप्रयोगसंहरणान्यस्त्राणि आम्नायवन्ति।

ब्रह्मादयो ब्रह्महिताय तप्त्वा परःसहस्राः शरदस्तपांसि।
एतान्यपश्यन् गुरवः पुराणाः स्वान्येव तेजांसि तपोमयानि ॥ १५ ॥

अथैतन्मन्त्रपारायणोपनिषदं भगवान् कृशाश्वः परःसहस्रपरिवत्सरान्तेवासिने कौशिकाय विश्वामित्राय प्रोवाच। स तु भगवान् मह्यम्। इत्येव क्रमः। कुमारस्य तु कः सम्प्रदाय इति पृच्छामि।

Rama—My child, weapons with a secret charm for their employent and withrawal have a (are handed down by—*Prof. Tawney*) transmissional tradition,

(As to the Jrimbhakas), the old masters, headed by Brahman, having practised penance for over a thousand years, for the good of the Vedas, saw these the very fire of their own austerities. (15)

Next the secret of the complete mastery of the charm of these weapons, the worshipful Krisasva revealed unto Visvamitra the son of Kusika who had been his pupil for over a thonsand years : he again, the worshiplul, unto me, this is the succession here. I ask this—What is the tradition of transmission in my child's case ?

मित—। 'सरहस्ये समन्त्रके प्रयोगसंहरणे' येषां तादृशानि 'अस्त्राणि आम्नायवन्ति उपदेशवन्ति गुरूपदेशेनैव सिध्यन्ति ॥ एवं सामान्यत उपदेशापेक्षतामुक्त्वा जृम्भकाणां विशेषमाह—ब्रह्मेति। व्याख्यातं प्राक् (Act I) ॥ 'एतेषां जृम्भकास्त्राणां यत् 'मन्त्रपारायणं साकल्येन मन्त्रावृत्तिः तद्रूपा या 'उपनिषत्' गुह्यविद्या तां 'परःसहस्रपरिवत्सरान् सहस्रादप्यधिकानि वर्षाणि व्याप्य 'अन्तेवासिने' शिष्याय प्रोवाच। एष 'क्रमः' गुरुपरम्परा मत्सम्बन्धे। 'कुमारस्य' तु क सम्प्रदाय का गुरुपरम्परा॥

Notes.—1. आम्नायवन्ति—आ+म्ना+घञ् भावे=आम्नाय instruction initiation आम्नाय: अस्ति एषाम् इति आम्नाय+मतुप्। Require initation This is a general remark true of all weapons that are invoked and dismissed by secret charms. 2 एतन्मन्त्र &c.—समास see टीका। मन्त्राणां पारायणम् अन्तगमनम् मन्त्रपारायणम् complete pronouncement of the charms. For cerebral see ब्रह्मपरायणम् ante. उपनिषद्यते समीपे स्थीयते अस्याम् इति उप+नि+सद्+क्विप् अधिकरणे उपनिषत् secret knowledge. Now see Tika. 3. क्रमः—Order पौर्वापर्य्यम् succession of teachers 4. सम्प्रदायः—सम्प्रदीयते अस्मिन् इति सम्+प्र+दा+घञ् अधिकरणे a succession of teachers, a school.

(*xvii*) लवः—स्वतःप्रकाशान्यावयोरस्त्राणि।

रामः—(विचिन्त्य)—किं न सम्भाव्यते? कोऽपि प्रकृष्टपुण्यपरिपाकोपादानो महिमा स्यात्। द्विवचनन्तु कथम्?

लवः—भ्रातरावावां यमजौ।

रामः—तर्हि द्वितीयः कः?

नेपथ्ये—भाण्डायन, भाण्डायन,

आयुष्मतः किल लवस्य नरेन्द्रसैन्ये-
रायोधनं ननु किमात्थ सखे तथेति।

अद्यास्तमेतु भुवनेष्वधिराजशब्दः
क्षत्रस्य शस्त्रशिखिनः शममद्य यान्तु ॥१६॥

Lava—The weepons stood self-evealed unto us two.

Rama—(*Reflecceing*)—What is not possible ? There might be some inscrutable greatness caused by the ripening of merit But why the dual ?

Lava—We are brothers, twins.

RaMe—Who then is the other ?

In the TiringG Room—Bhaandayana, Bhandayana

They say there is a flght of Lava, the long-lived with the king's forces Well, do you say, friend, "Yes" To-day let the title "Lord Paramount" suffer extinction in the worlds. Let the flames of the weapons of the Kashattriyas be quenched to-day. (16)

मित—। 'आवयोः सम्बन्धे गुरूपदेशं विनैव 'स्वत ' अयत्नेनैव प्रकाशानि प्रकटानि' बभूवः 'अस्त्राणि जृम्भकास्त्राणि ॥ किं न सम्भाव्यते' जगति असम्भवं किमपि नास्ति। 'प्रकृष्टस्य' महतः पुण्यस्य परिपाकः' विपरिणामः एव उपादानं' कारणं यस्य तथाविधः कोऽपि महिमा' माहात्म्यं स्यात् तव। प्रभूतस्य पुण्यस्य फलकिमपि माहात्मयं ते जातं, एव विनापि गुरूपदेशम् अस्त्राणि अद्राक्षी. इति भावः। परम् 'आवयोः' इति द्विवचनेन कथमुच्यते ? आयुष्मत इति। अन्वयः—आयुष्मत लवस्य नरेन्द्रसैन्यैः आयोधन किल। ननु सखे किं:"तथा' इति आत्थ। अद्य भुवनेषु अधिराजशब्द अस्तम् एतु। अद्य क्षत्त्रस्य शस्त्रशिखिनः शमं यान्तु। व्याख्या—'आयुष्मतः लवस्य नरेन्द्रसैन्यैः' राजबलैः सह 'आयोधनं युद्धं' 'किल इति वार्त्ता श्रूयते 'ननु सखे किं' त्व 'तथा' सत्यमेव तत् 'इति आत्थ ' ब्रवीषि ? यद्येवम् 'अद्य भुवनेषु अधिराजः' इति 'शब्दः अस्तम् एतु 'विलय गच्छतु। एष मया हन्यते स अधिराज इत्यर्थः। 'अद्य क्षत्त्रस्य' क्षत्त्रियस्य जाते शस्त्रशिखिनः' प्रहरणानलाः शमं यान्तु' निर्वाणं लमन्ताम्। तेन सह अद्य तस्य सैन्यानि अपि नाशयामि इति भावः ॥

Notes—1. स्वतः &c.—प्रकाशन्ते इति प्र + काश् + अच् कर्त्तरि = प्रकाशानि manifest. स्वतः and प्रकाशानि may be taken as compounded or uncompounded. प्रकृष्ट &c.—उपादीयते अनेन इति उप + आ + दा + ल्युट् करणे = उपादानम् mateial, प्रकृष्टं पुण्यं प्रकृष्ट पुण्यम्। तस्यपरिपाक. प्रकृष्टपुण्यपरिपाकः। This means परिपक्वं प्रकृष्टपुण्यम् by the maxim "भावानयने द्रव्यानयनम्"। But परिपक्वपुण्य is the फल of that पुण्य। That फल is taken as the उपादान of a certain महिमा—It is identified as the महिमा। In other words the महिमा is the फल of that पुण्य। This is an instance of Bhavabhuti's preference for bombast and the round about प्रकृष्टपुण्यकृतो महिमा would have served the purpose equally well. 3 किल—Implies वार्त्ता = rumour report &c. 4. ननु—implies प्रश्न।

(*xviii*) रामः—

अथ कोऽयमिन्द्रमणिमेचकच्छवि-
र्ध्वनिनैव दत्तपुलकं करोति माम्।
नवनीलनीरधरधीरगर्जित-
क्षणबद्धकुड्मलकदम्बडम्बरम् ॥१६॥

लवः—अयमसौ मम ज्यायान् आर्यः कुशो नाम भरताश्रमात् प्रतिनिवृत्तः।

रामः—(सकौतुकम्)—वत्स इत आह्वयैनमायुष्मन्तम्।

लवः—एवम्। (इति परिक्रामति)।

Rama—Well, who is this one of blue complexion like a sapphire that makes me, with horripilation imparted by

his mere voice, look like a Kadamba that has budded blossoms at the very moment of the deep rumble of a dark early cloud ? (17)

Lava—This is he my noble senior known as Kusa come back from the hermitage of Bharata.

Rama (*With eagerness*)—My child, you call hither this long lived one

Lava—So be it. (*Goes round the stage*).

मित—। अथेति। अन्वयः—अथ इन्द्रमणिमेचकच्छविः कः अय ध्वनिनैव दत्तपुलकं मां नवनीरधरगर्जितक्षणवद्धकदम्बडम्बरं करोति। व्याख्या—'अथ' ननु पृच्छामि 'इन्द्र' इन्द्रनीलाख्यः यो मणिः' स इव 'मेचकच्छविः नीलद्युतिः 'कः अयं' क एष बालः ध्वनिना एव' कण्ठस्वरेणैव 'दत्त पुलको' यस्मै तथाविधं जनितरोमाञ्चं मां 'नवः' नूतनः वर्षारम्भे प्रादुर्भूत इत्यर्थः यः नीलनीरधरः' श्यामाम्बुदः तस्य यत् 'धीरगर्जित' मन्द्रध्वनिः तस्य क्षणे तन्मुहूर्त्ते इव [यद्वा—तस्मात् य 'क्षण' उत्सवः, स एव यः 'क्षणः' इति वा, तेन] 'बद्धकुड्मलः' उद्भिन्नमुकुलः यः 'कदम्ब.' तस्य 'डम्बर' विलास इव 'डम्बरो' यस्यतादृशं करोति। सञ्जातपुलकः सन् उद्भिन्नमुकुलः कदम्ब इव भवामि इत्यर्थः॥

Notes—1. इन्द्रमणि &c.—मेचक is blue श्यामल। 'मेचकः श्यामलेऽपि च" इति विश्व.। 2 ध्वनिनैव—करणे ३या। एव is अवधारणे and implies that the पुलक appears instantaneously with the ध्वनि। Hence we have interpreted क्षण below as काल the instant of the गर्जित। If however, it be argued that the instantaneous show of पुलक was due to the the thrill of joy that ध्वनि gave, then क्षण may be interpreted as उत्सव। 3. नवनील &c.—नव because the first new showers of the season bring forth blossoms in the कदम्ब। डम्बर is शोभा, also array. praparation &c., as in आडम्बर। Now see Tika.

(*XIX*) (ततः प्रविशति कुशः)।

कुशः (साद्भुतहर्षधैर्यं धनुरास्फालयन्)—

दत्तेन्द्राभयदक्षिणैर्भगवतो वैवस्वतादा मनो-
र्दृप्तानां दहनाय दीपितनिजक्षत्रप्रतापाग्निभिः।
आदित्यैर्यदि विग्रहो नृपतिभिर्धन्यं ममैतत्ततो
दीप्रास्त्रस्फुरदुग्रदीधितिशिखानीराजितज्यं धनुः ॥१८॥

(इति विकटं परिक्रामति)।

(*Then enters Kusa*).

Kusa (*patting his bow with wonder, joy and confidence*).

Lucky is this bow of mine with its string lighted up by the tops of the fierces flames shooting from the glowing weapons, if there is fight with kings, descended from the Sun—kings who, beginning with Manu, the worshipful, the Sun's son, have kindled the fire of their own Kshattriya prowess to consume the arrogant and have bestowed the boon of safety to Indra. (*Walks with haughty stride*).

मित—। 'अद्भूतम्' विस्मयः। 'धैर्य्यम्' अप्रकम्प्यता निर्विकारता। तैः सह यथा तथा धनु. 'आस्फालयन्' ताडयन्। प्रोत्साहनाय भृत्यादीनामपि पृष्ठे करेण मृदु ताड़नं दृश्यते लोके। दत्तेति। अन्वयः—भगवतो वैवस्वतात् मनोः आ दृप्तानां दहनाय दीपितनिजक्षत्रप्रतापाग्निभिः दत्तेन्द्राभयदक्षिणैः आदित्यैः नृपतिभिः यदि विग्रहः तत मम एतत् दीप्रास्त्रस्फुरदुग्रदीधितिशिखानीराजितज्य' धनुः धन्यम्। व्याख्या—'भगवतः वैवस्वतात्' सूर्य्यपुत्रात् 'मनोः' मनुनाम्नः सूर्य्यवंशीयानामादिपुरुषात् 'आ' ततः प्रभृति 'दृप्तानां' दर्पोद्धतानां दहनाय 'दीपितः' प्रज्वालितः 'निजः क्षत्रप्रतापाग्निः' क्षत्त्रतेजोहुताशनः यैः ततश्च दृप्तान् दग्ध्वा दत्ता इन्द्राय 'अभयदक्षिणा' भयाभावरूपदानं यैः तादृशैः आदित्यैः सूर्य्यवंशीयैः नृपतिभिः' सह 'यदि

विग्रहः' 'ततः मम एतत् दीप्रास्त्राणां भाडरायुधानां याः 'स्फुरन्त्यः प्रकाशमाना. उग्रा.' करालाः 'दीधितिशिखाः' किरणाग्राणि ताभिः 'नीराजिता बर्द्धितशोभा दीपिता इत्यर्थः 'ज्या गुणः यस्य तादृशं 'धनुः धन्यं' प्रशस्यम्। अत्र प्रथमार्द्धे असुरसमरः अध्वरत्वेन नीयते। तत्र आदित्या नृपतयो यज्वानः, क्षत्तेज एव यज्ञियाग्निः, इन्द्रः पुरोहितः, अभयं दक्षिणा। इत्येतत् सर्वमद्भुतम्। ईदृशैरादित्यैः सह युद्धम् इति धन्यं धनुः। ततश्च हर्षः। तस्मिंश्च युद्धे दीप्राणि मम अस्त्राणि सहायाः तत् का चिन्ता इति धैर्य्यम् इत्यनुसन्धेयम्।

Notes—1. साद्भुत &c.—अद्भुतश्च हर्षश्च धैर्य्यञ्च अद्भुतहर्षधैर्य्याणि। तैः सह। अद्भुत because these kings are all wonderful fighters (see Tika), हर्ष because of the good luck in getting a chance to fight the best fighter of this wonderful group of kings धैर्य्य is धीरता, i. e, absence of nervousness. This is because though the fight is going to be a grim one, victory is assured through the resplendent weapons he possesses. This confidence is already expressed in "अद्यास्तमेतु भुवनेष्वधिराजशब्दः" &c., sl. 16. 2. दत्त &c.—The word दक्षिणा in place of दान is significant. An ordinary दान is not a दक्षिणा but only the दान in an अध्वर। Hence it implies that the fight was the अध्वर। See टीका now। Also Indra was the instigator at the fight, hence he is the पुरोहित in the अध्वर and his दक्षिणा is अभय (safety). 3. आदित्यैः—अदितेरपत्यं पुमान् अदिति+ण्य = आदित्यः Sun. तस्य इमे इति आदित्य+यत् = आदित्याः descendants of the sun. 4. दीप्रास्त्र &c —स्फुरत् shooting, दीधिति light. शिखा top. नि.सम्यक् राजिता शोभिता इति निर्+राज+क्त कर्मणि = नीराजिता। This word is used on purpose. There is a

ceremony called नीराजना at which horses, elephants, weapons &c,, of the warrior 'are honoured with light, obeisance flowers &c. "ज्या was नीराजित" seems to hint at this नीराजनाविधि। See टीका now। 5. विकटम्—उद्धतं यथा तथा।

(XX) रामः—कोऽप्यस्मिन् क्षत्त्रियपोतके पौरुषातिरेकः।
दृष्टिस्तृणीकृतजगत्त्रयसत्त्वसारा
धीरोद्धता नमयतीव गतिर्धरित्रीम्।
कौमारकेऽपि गिरिवद्गुरुतां दधानो
वीरो रसः किमयमैत्युत दर्प एव ॥१९॥

मित -। क्षत्रियस्य पोत शिशुः 'क्षत्त्रियपोतः'। अज्ञातः क्षत्रियपोतः 'क्षत्रियपोतक। तस्मिन्। पौरुषस्य पुरुषोचितस्य शौर्य्यस्य 'अतिरेकः' आतिशय्यम्॥ दृष्टिरिति। अन्वयः—दृष्टिः तृणीकृतजगत्त्रयसत्त्वसारा। धीरोद्धता गति धरित्री नमयति इव। किमय वीरो रस उत दर्प एव कौमारकेऽपि गिरिवत् गुरुतां दधानः ऐति। व्याख्या—'दृष्टिः' अस्य नेत्रपात. तृणीकृत'' तृणमिव अनादृतः 'जगत्रयस्य' त्रिभुवनस्य सत्त्वसारः' वीर्य्योत्कर्षः यया तादृशी। धीरा' अविचलिता उद्धता विकठा च गतिः, पादपातः 'धरित्रीं पृथ्वीं' नमयति इव' अवनम्रां करोतीव। तत् 'किम् अयं वीरो रसः उत दर्प एव मूर्त्तिमान् वीरो रस दर्पो वा 'कौमारके अपि' वाल्ये अपि 'गिरिवत् 'गिरौ 'इव' 'गुरुतां दधान. भारम् आदधत् 'एति' आगच्छति॥

Rama—What an abundance of manliness in this strange Kshatriya boy!

Is this the sentiment of heroism or pride itself advances imparting, even in mere childhood, weight as in a mountain? The look rates as straw the quintessence of the might of the three worlds; the steps, proud and steady, send the earth down as it were (under them). (19).

Notes—1. क्षत्रिय &c,—क here is अज्ञाते। क्षत्रियपोत here means an *unknown* Kshattriya lad. Or क is attached स्वार्थ to क्षत्रियपोत। 2. तृणीकृत here does not mean actually transformed into straw, but only rated as straw, सत्त्वसार is usually explained differenly thus—सत्त्व is प्राणी। सार बल। सत्त्वानां सारः। In our Exp. सत्व=बल ("सत्त्वं गुणे पिशाचादौ बले द्रव्यस्वभावयोः" इति विश्वमेदिन्यौ) and सार is स्थिरांश extract. सत्वस्य सारः। Or सत्त्व- मनोबल। 3. कौमारकेऽपि—कुमारस्य भावः इति कुमार+अण्—कौमारः। The अपि here implies गर्हा, गर्हा is of कौमार In the matter of imparting the weight of a mountain कौमार is an unsuitable subject. Hence गर्हा attaches to कौमार! In other words कौमार is here कुत्सित and क comes in स्वार्थे by the rule "कुत्सिते"।

(*XXI*) लवः (उपसृत्य)—जयति जयत्यार्यः।

कुशः—नन्वायुष्मन् किमियं वार्ता युद्धमिति ?

लवः—तत्किञ्चिदेतत्। दृप्तभावमुत्सृज्य आर्येऽस्मिन् विनयेन वर्तताम्।

कुशः—किमर्थम्।

लवः—एष देवो रघुपतिस्तिष्ठति, स च स्निह्यत्यावयोः उत्कण्ठते च युष्मत्सन्निकर्षस्य।

कुशः (सतर्कम्)—स रामायणकथानायको ब्रह्मकोषस्य गोपायिता ?

लवः—अथ किम्।

Lava (*Approaching*)—Prosper, let noble bother prosper.

Kusa—Well, long-lived one, what is this talk of fight ?

Lava—It is a trifle. In this matter, let my noble brother assume modesty casting off this haughty bearing.

Kusa—What for ?

Lava—Here is the king, the lord of the Raghus, waiting , he, again, is affectionate towards us and is longing for your approach.

Kusa (*In doubt*)—This hero of the story of the Ramayana the gurdian of the treasure of the Vedas ?

Lava--What else ?

मित—। 'उपसृत्य' कुशम् इति शेषः ॥ 'इय वार्त्ता' एषा जनोक्तिः। यत् किञ्चित्' तुच्छमित्यर्थः। 'अस्मिन्' एतस्मिन् युद्धप्रस्तावे ॥ 'आवयोः सम्बन्धे 'स्निह्यति' स्नेहवान् भवति। 'तव सन्निकर्षः सन्निधिः। तस्य सम्बन्धे 'उत्कण्ठते अभिलष्यति, इच्छति च भवान् सन्निहितो भवतु इति ॥ 'तर्क' शङ्का। तेन सह। ब्रह्म वेदः। तद्रूपस्य तत्स्वरूपस्य कोषस्य 'गोपायिता रक्षिता ॥

Notes —1. उपसृत्य —It seems कुशमुपसृत्य is a better stage-direction. 2. दृप्तभावम् &c—दृप्तानाम् उद्धतानां भावः। तम्। It is a trifle, hence you need not trouble yourself about it ; lay aside this defiant attitude and resume your natural meekness. 3. एष &c—The king, with whose army the scufflewas, is himself present here , and he is affectionate towards us and longs to see you. So there is no room for defiance—विनयेन वर्त्तताम्। 4, युष्मत्सन्निकर्षस्य—The proper विभक्ति is the चतुर्थी। युष्मत्सन्निकर्षं लब्धुम् उत्कण्ठते=युष्मत्सन्निकर्षाय उत्कण्ठते। सम्बन्धमात्रविवक्षया षष्ठी। 5. गोपायिता—गुप+तृच् कर्त्तरि=गोपायिता with आय added. The आय is optional, hence also गोपिता or गोप्ता without आय्।

(*xxii*) कुशः—आशंसनीयपुण्यदर्शनः स महात्मा, किन्तु कथमस्माभिरुपगन्तव्य इति न सम्प्रधारयामि।

लवः—यथा गुरुस्तथोपचारेण ।

कुश —अयि कथं नामैतत् ?

लवः—अत्युदात्तसुजनश्चन्द्रकेतुरौर्मिलेयः प्रियवयस्य इति सख्येन मामुपतिष्ठते तेन तत्सम्बन्धेन धर्मतात एवायं राजर्षिरिति ।

कुशः—सम्प्रत्यवचनीयो राजन्येऽपि (एषः) प्रश्रयः ।

Kusa--The holy sight of the high-so .lcd king is as to be desired, but I cannot make out in what style he is to be approached by me,

Lava—With such resp. ct as one's father or uncle has to be approached

Kusa—Well, why thus ?

Lava—The exceedingly noble and good soul Chandraketu, Urmila's son treats me with friendship calling me "Dear friend" , so through his connection, this royal sage is indeed by custom our uncle.

KUsa—Now this humility is irreproachable even though towards a Kshattriya.

मित - । 'आशसनीय' प्रार्थनीय 'पुरायं' पवित्र 'दर्शनं' यस्य सः । 'सम्प्रधारयामि' अवगच्छामि ॥ 'उपचारेण' योगापूजया सह उपगन्तव्यः । 'यथा गुरु' उपगन्तव्यः 'तथा' ॥ 'अयि' इत्यनभिमतौ । यथा गुरुरित्यनभिमतं मे ॥ 'अत्युदात्तः' अतिशयेन महान् तथा 'सुजनः' 'और्मिलेय,' ऊर्मिलापुत्रः । 'उपतिष्ठते' सङ्गच्छते मैत्र्या । 'धर्मेण' लोकाचारेण 'तातः' पिता ॥ 'सम्प्रति अधुना सति सम्बन्धे' क्षत्रिय 'अपि प्रश्रयः' एष विनयः 'अवचनीयः' अनिन्द्यो मे । क्षत्रियम् अपि धर्मतातं नमामि इति नास्ति निन्दा ॥

Notes,—1. अयि &c —अयि here implies disapproval. Comp—अयि वहुतरं दृष्टव्यमस्ति &c., Act I, para xxxi. 2. अत्युदात्त

&c.—उदात्त is महत्। "उदात्तो दातृमहतोः" इत्यादि हेमः। Pracitcally it is the same as उदार here, वीरराघव has it uncompounded, which seems the better reading. 3. और्मिलेयः—ऊर्मिला is a human name, but it begins with ऊ which has वृद्धसंज्ञा। Hence the rule "अवृद्धाभ्यो नदीमानुषीभ्यस्तन्नामिकाभ्यः" does not apply and we get the usual ढक्। Thus और्मिलेय Urmila's son, 4 उपतिष्ठते—सङ्गतिकरणे आत्मनेपदम् by 'उपाद्देवपूजासंगतिकरण—पथिषु'। 4. धर्मतातः—धर्म is here आचार custom "धर्मोऽस्त्री पुण्य आचारे" इत्यादि मेदिनी। 5 सम्प्रति &c.—A क्षत्रिय has to be उद्धत towards क्षत्रिय who is an antagonist. But as the king is an affectionate धर्मतात, antagonism is out of the question. So there is no disgrace in being humble towards him.

(*xxiii*) लवः—पश्यत्वेनम् आकारानुभावगाम्भीर्य-सम्भाव्यमानविविधलोकोत्तरचरितातिशयमार्यो महापुरुषम्।

कुशः—(निर्वर्ण्य)—

अहो प्रासादिकं रूपमनुभावश्च पावनः।
स्थाने रामायणकविर्देवीं वाचं व्यवीवृतत् ॥२०॥

(उपसृत्य) तात प्राचेतसान्तेवासी कुशोऽभिवादयते।

Lava—Let noble brother mark this great personage the grandeur of whose various superhuman deeds may be inferred from his make, his majesty and tranquility.

Kusa (*marking attentively*)—

O the gracious form, O the sanctifying majesty ! In the right place did the poet of the Ramayana transform the Goddess of speech. (20).

(*Advancing*) Father, Prachetasa's (Valmiki's) disciple Kusa bows unto you.

मित—। 'आकारेण' आकृत्या 'अनुभावेन' प्रभावेण 'गाम्भीर्येण' अविचलतया च 'सम्भाव्यमानः' उत्प्रेक्ष्यमाणः विविधानां लोकोत्तराणाम् अतिमानुषाणां 'चरितानाम्' कर्मणाम् अतिशयः' उत्कर्षः यस्य तम् महा-पुरुषम् ॥ अहो इति । अन्वयः—अहो प्रासादिकं रूपं, पावनः अनुभावश्च । स्थाने रामायणकविः देवीं वाचं व्यवीवृतत् । व्याख्या—'अहो' विस्मय करमस्य प्रासादिकं' प्रसन्नतासमुद्भवं 'रूपम्' आकृतिः प्रसन्नतामयी अस्य आकृतिरिति भावः । विस्मयकर अस्य 'पावन,' पवित्रः 'अनुभावश्च प्रभावोऽपि । तत् 'स्थाने' यथास्थाने इमदृशे नायके एव विषये 'रामायणस्य तदाख्यायाः कथायाः 'कविः' प्रणेता देवीं वाचं वाग्देवीं व्यवीवृतत्' विवर्त्त-यामास, तादृशेन कथारूपेण परिणतामकरोत् । यादृशी रचना नायकोऽपि तादृश एव इति भावः ॥ Or स्थाने is युक्तार्थे अव्ययम् । Sisu. II 94 .

Notes—1. आकार &c —आकार refers to the build of the body. अनुभाव is तेजस् majesty, It is not prowess, for that cannot be inferred from a mere look at the person: लोकेभ्यः उत्तरं श्रेष्ठम् । Now see टीका । 2. प्रासादिकम्—प्रसाद serenity. प्रसादे भवम् इति प्रसाद्+ठञ अध्यात्मादि प्रासादिकम् । स्थाने—स्थान is यथास्थान the right place, तस्मिन् । विषयाधिकरणे ७मी । See next also Tika. 4. व्यवीवृतत्—वि+वृत+णिच्+लुङ् तिप् transformed. The goddess was given a shape (व्यवीवृतत्) in the matter of राम । From what I see before me, it is evident that the grandeur of the style of the poem thus obtained and the grandeur of its subject-matter—the hero Rama—suit each other. Cr—कवि वाचं व्यवीवृतत् इति स्थाने युक्तम् । See Tika

(*xxii*) रामः—एह्येहि आयुष्मन् ।

अमृताध्मातजीमूतस्निग्धसंहननस्य ते ।

परिष्वङ्गाय वात्सल्यादयमुत्कण्ठते जनः ॥२१॥

(परिष्वज्य स्वगतम्) तत् किमपत्यमयं दारकः,
अङ्गादङ्गात् स्रुत इव निजः स्नेहजो देहसारः
प्रादुर्भूय स्थित इव वहिश्चेतनाधातुरेव ।
सान्द्रानन्दक्षुभितहृदयप्रस्रवनेनेव सृष्टो
गात्रं श्लेषे यदमृतरसस्रोतसा सिञ्चतीव ॥२२॥

Rama—Come, long-lived one, come,

This person, through affection, longs for an embrace of your person, that is pleasing like a water-laden cloud. (21).

(*Embracing—To himself*)—

Well, whose son could this boy be that is as if the essence of my body produced from affection and issued from every limb, as if the element of my consiousness itself, having become manifest, is standing outside, as if made of the dripping of my heart when stirred by intense joy, as if swashing my body, at embrace, with a stream of the juice of nectar. (22).

मित—। अमृतेति । अन्वयः—अय जनः, वात्सल्यात् ते अमृताध्मात-जीमूतस्निग्धसंहननस्य परिष्वङ्गाय उत्कण्ठते । व्याख्या—'अयं जनः' एष अहं 'वात्सल्यात्' स्नेहात् 'ते' तव 'अमृतेन' जलेन आध्मातः पूर्णः यो जीमूतः मेघः स इव 'स्निग्धं' नेत्रतर्पणं यत् 'संहननं' देहः तस्य 'परिष्वङ्गाय आलिङ्गनाय ["तुमर्थाच्च'—इति ४ र्थी] उत्कण्ठते' औत्सुक्येन तिष्ठति ॥ "तत् किम्' इत्यादि परवर्तिना श्लोकेन अन्वितम् । अङ्गादिति । अन्वयः—तत् अङ्गात् स्रुतः निजः स्नेहजः देहसार इव, चेतनाधातुरेव प्रादुर्भूय वहिः स्थित इव, सान्द्रानन्दक्षुभितहृदयप्रस्रवेन सृष्ट इव अयं दारकः किमपत्य यत् श्लेषे अमृतरसस्रोतसा गात्रं सिञ्चतीव । व्याख्या—परिष्वजा परमानन्दसन्दोहमनुभवन् प्राह—तत् तस्मात् यतोऽमभूतपूर्वं आनन्द तत. पृच्छामि अङ्गात् अङ्गात् सर्वेभ्य अङ्गेभ्यः 'स्रुतः' क्षरितः 'निज.' स्वीयः मम इत्यर्थः स्नेहात् जातः देहसारः शरीरस्य स्थिरांशः स्नेहरूपं यत्

एकमुपादानं देहे अस्ति तस्य निष्कर्षः 'इव स्थितः। एतस्मिन्ष्ठ एव मदीयः स्नेह इति भावः। किञ्च 'चेतनारूपो' यो 'धातुः' उपादानं स 'एव प्रादुर्भूय' मर्तिमान् भूत्वा बहिः शरीरात् वहिः स्थित इव। एतदधीनं मे जीवन-मित्याशयः। अपरञ्च 'सान्द्रेण प्रगाढ़ेन 'आनन्देन क्षुभितं' विचलितं यत् हृद्यं तस्य प्रस्रवेन द्रवेण सृष्ट इव। एतत्गतो मे कृतश्च आनन्द इत्यर्थः। एवंविधः 'अयं दारकः किमपत्यं कस्य जनस्य अपत्यं स्यात् 'यत' अपत्यं श्लेषे' आलिङ्गनकर्मणि अमृतरसस्य सुधाद्रवस्य स्रोतसा' प्रवाहेन मम गात्रं' सिञ्चतीव' प्लावयतीत। मृता सीता विलुप्तञ्च तयैव सह मदीय-मपत्यम्। एतत्पुनर्न जाने कस्यापत्यं निजमिव अपत्यमानन्दयति माम् इति कौतूहलम्॥

Notes—1. अमृत &c.—अमृत is जल। "अमृतं यज्ञशेषे स्यात् पीयुषे सलिले घृते' इति विश्वमेदिन्यौ। जीमूत is मेघ। स्निग्ध is literally opposed to परुष, hence *juicy* here *pleasing*. संहनन is गात्र। 'गात्रं वपुः संहननम्' इत्यमर। The derivation we offer सहन्यते अनेन इति सम+हन+ल्युट् करणे संहननम् that with which the soul is killed Or say हन is here गतौ, then संहनन is that with which the world is reached. See Tika. कृद्योगा कर्मणि षष्ठी। 2 किमपत्यम्—कस्य अपत्यम् &c—। 3. अङ्गादङ्गात—वीप्सायां द्विवचनम्। It reminds us of the well-known words "अङ्गादङ्गाद्विनिष्क्रान्तो (प्रभवसि) हृदयादभिजायसे। आत्मा वै पुत्रनामासि जीवस्व शरदां शतम॥" Joy affection, consciousness &c. are all seen in the boy. The boy is my affection itself Vidyasagara reads देहजः स्नेहसारः। But अङ्गादङ्गात स्रुतः seems to include देहज,। Our reading appears in three of his manuscripts, 4, प्रादुर्भूय &c.—The boy is my consciousness itself i e., I shall lose consciousness if he be away.

5. सान्द्र &c.—Compare "हृदयादभिजायसे" in the quotation above. The boy is my joy incarnate. 6 *Remark.*—The sentiment raised is one of mere curiosity at this stage. Rama knows—this cannot be his boy, well then whose is he that affects him so strangely ? Comp. Sak VII.

(*xxv*) लवः—तात ललाटन्तपो धर्मदीधितिः तदत्र शालच्छाये मुहूर्त्तमासनपरिग्रहं करोतु तातः ।

रामः—यदभिरुचितं वत्सस्य । (इति सर्वे परिक्रम्योपविशन्ति) ।

रामः (स्वगतम्—)

अहो प्रश्रययोगेऽपि गतिस्थित्यासनादयः ।

साम्राज्यशंसिनो भावाः कुशस्य च लवस्य च ॥२३॥

Lava—Father, the sun is heating your brow, so let father for a moment take a seat here, in the shade of these *Sala* trees.

Rama—As it pleases my child (*All walk round and sit down*).

Rama—(*To himself*)—

Ha ! Even when modified (lit—accompanied) by humility the bearing, such as gait, stance, seat &c. of both Kusa and Lava declare their sovereignty. (23), (R—)

मित -। ललाटं तपतीति 'ललाटन्तप' तिग्मांशुः। शालानां छाया 'शालच्छायम्' ॥ अहो इति। अन्वयः—अहो कुशस्य च लवस्य च गतिस्थित्यासनादयो भावा प्रश्रययोगे अपि साम्राज्यशंसिनः। व्याख्या—'अहो' आश्चर्यम्। 'कुशस्य च लवस्य च गति.' गमनं 'स्थिति.' अवस्थानम् 'आसनम्' उपवेशनम् इत्यादयो भावाः' चेष्टाः 'प्रश्रयेण विनयेन यो 'योगः' संसर्गः तस्मिन् सति अपि विनयेन तिरोहितस्वरूपेऽपि साम्राज्यं शंसन्ति सूचयन्तीति 'साम्राज्यशंसिन.। साम्राट् सूनावेतौ इत्यनयोर्गत्यादिभिरेव निवेद्यते इत्यर्थः ॥

Notes—*1*. ललाटन्तप.—ललाट + तप + खश् कर्त्तरि। The sun was in his face. Lava notices this and suggests a seat elsewhere. 2 घर्म &c.—दीधिति ray. घर्मः दीधितिरस्य। सूर्य। 3 शालच्छाये—"छाया वाहुल्ये" इति नपुंसकत्वम्। 4. वत्साय—'रूच्यर्थानां प्रीयमाणः" इति संप्रदाने चतुर्थी। 5. प्रश्रय &c.—प्रश्रय meekness विनय। Modified by विनय the movements are apt to appear as common-place. Even thus they declare sovereignty. गति &c.—गति and स्थिति have already been seen. The आसन is seen just new when परिक्रम्य उपविशन्ति। 7 साम्राज्य &c.—साम्राज्यं साधु शंसन्ति इति साम्राज्य+शंस+णिनि कर्त्तरि साधुकारिणि। सम्राजो भावः = साम्राज्यम् with ष्यञ्। They declare sovereignty. Hence they are of royal descent, 8. *Remark*=The vagueness of "whose son could he be" (किमपत्यम् &c,) is a bit removed. Rama now knows that they are scions of *some* royal race

(*xxvi*) (राम—)

> वपुरविहितसिद्धा एव लक्ष्मीविलासाः
> प्रतिजनकमनोज्ञं कान्तिमत् कैतयन्ति।
> अमलिनमिव रत्नं रश्मयस्ते मनोज्ञा
> विकसितमिव पद्मं बिन्दवो माकरन्दाः ॥२४॥

(रा—)

The play of grace, not procured yet achieved, occupies their body which is beautiful and charming to every-one just as attractive rays do the flawless gem, or the drops of honey do the full-blown lotus. (24). (R—)

मित—साम्राज्यसूचकतां दर्शयति वपुरिति। अन्वयः—मनोज्ञा ते रश्मयः अमलिनं रत्नमिव, माकरन्दाः बिन्दवः विकसितं पद्ममिव अवि-

अविहितसिद्धा एव लक्ष्मीविलासाः कान्तिमत् प्रतिजनकमनीयं वपुः केतयन्ति। व्याख्या— मनोज्ञाः' मनोहराः ते रश्मयः' प्रसिद्धाः भासः 'अमलिन विशद 'रत्नमिव,' माकरन्दाः' मकरन्दस्य मधुन इत्यर्थः 'बिन्दवः विकसितं प्रफुल्लं 'पद्ममिव', 'अविहिताः' अकृताश्च सिद्धाः' सम्पन्नाः 'एव' नैसर्गिका इतियावत् लक्ष्म्या शोभायाः 'विलासाः' विभ्रमाः 'कान्तिमत्, उज्ज्वलं 'प्रतिजनकमनीयं' सर्वमनोरमं 'वपुः' देहं केतयन्ति निवसन्ति। अकर्मकत्वात् देशस्य कर्मता॥

Notes —1. अविहित &c.– लक्ष्मीविलास is there and delights every-one (प्रतिजनकमनीय), but this लक्ष्मीविलास is not secured by artificial means (अविहित) as in the case of an ordinary individual, it comes natural to them (सिद्ध) as is expected in one of royal descent. अविहितसिद्ध may also be explained thus :—विहितं विधानम् effort. विहितेन सिद्धा. विहित-सिद्धाः secured with effort न तथा। 2. केतयन्ति—कित निवासे is चुरादि and अकर्मक। Hence the देश i. e., वपुः becomes कर्म by the maxim देशश्चाकर्मकाणाम्"। अमलिनम् &c —The second half of the verse cites illustrative examples. The lustre of the gem and the honey in the lotus come by nature and are not यत्नसिद्ध। 3. *Remark*—Verse 24 is in support of verse 23.

(*xxvii*) (राम—) भूयिष्ठाश्च रघुकुलकुमारच्छायामेतयोः पश्यामि।

कठोरपारावतकण्ठमेचकं वपुर्वृषस्कन्धसबन्धुरांसकम्।
प्रसन्नसिंहस्तिमितञ्च वीक्षितं ध्वनिश्च माङ्गल्यमृदङ्गमांसलः
॥२५॥ (राम—)

(R—) I also see in them great resemblance with boys of the race of Raghu.

The body is dark-blue like the throat of an adult pigeon, with the neck as of a bull and shoulders evenly set. Also the look is steady as of a lion at ease; the voice again is full like that of a festive drum. (25). (R —)

मित—। एव सामान्यतो बालयो राजपुत्रयो निरूप्य विशेषं निरूपयति —'एतयो' कुशे लवे च भूयिष्ठं समधिकां रघुकुलकुमाराणां छायां प्रतिबिम्बं सादृश्यमित्यर्थः 'पश्यामि ॥ तदेव दर्शयति कठोरेति। अन्वय - वपुः कठोरपारावतकण्ठमेचकं वृषस्कन्धम् अवन्धुरांसकम्, वीक्षितञ्च प्रसन्नसिंह स्तिमितम् ध्वनिश्च माङ्गल्यमृदङ्गमांसलः। व्याख्या--'वपु शरीरं 'कठोरस्य' उपचितगात्रस्य प्राप्तयौवनस्य इत्यर्थः पारावतस्य' कपोतस्य 'कण्ठः' इव 'मेचक' नीलम्, किञ्च 'वृषस्य स्कंधः इव 'स्कन्धः' यस्मिन् तादृशम् अपि च 'अवन्धुरौ अनुन्नतानतौ 'अंसौ' भुजसंधी यस्मिन् तादृशम्। 'वीक्षितञ्च' अवलोकनमपि 'प्रसन्नस्य' सिंहस्य' इव स्तिमितम् अव्याकुलम्। ध्वनिश्च कण्ठध्वनिरपि माङ्गल्यस्य' मङ्गलकरस्य 'मृदङ्गस्य' इव मांसलः गम्भीर। तत् किमेतौ ऐक्ष्वाकस्य कस्यचिद्राजर्षे. कुमारौ तेन च गोत्रलक्षणैर्मदनुकारिणौ ? इति विस्मयवितर्कविलास ॥

Notes—1. **भूयिष्ठाम्** &c—Rama's curiosty is now replaced by surprise. The look is like princes of Raghu's race. This is detailed in the verse following. 2. **कठोर** &c.—**कठोर** adult, full grown. Comp. '**परिणतकठोर** &c,' sl. 13. **मेचक** is blue as in "**अये कोयमिन्द्रमणिमेचकच्छविः**," sl. 17. 3. **प्रसन्न** &c.—**प्रसन्न** is undisturbed. **प्रसन्नसिंह** by **लक्षणा** here means **प्रसन्नसिंहवीक्षित। प्रसन्नसिंह इव स्तिमितम्। वीक्षित** has **भावे क्त।** 4. **मांगल्य** etc.—**मंगलमेव इति मंगल+अण्स्वार्थे (प्रज्ञादि) मांगलम्। मांगले साधु इति मांगल + यन् मांगल्यम्।** Here again by **लक्षणा माङ्गल्य मृदङ्ग** is **मांगल्यमृदंगध्वनि। मांगल्यमृदंगइव मांसल :।**

5 *Remark*—The surprise is mixed with deliberation. The boys seem to be princes of Raghu's race and through family likeness they resemble *me* in build &c. Well then who is that lucky Raghava whose sons they are ?

(*xxviii*) (राम—) (सूक्ष्मं निरूप्य) अये न केवलमस्मत्संवादिन्याकृतिः,

अपि जनकसुतायास्तच्च तच्चानुरूपं
स्फुटमिह शिशुयुग्मे नैपुणोन्नेयमस्ति ।
ननु पुनरिव तन्मे गोचरीभूतमक्ष्णो-
रभिनवशतपत्रश्रीमदास्यं प्रियायाः ॥२५॥

(R—) (*Observing closely*) Ha ! Their form resembles not mine alone.

This and that again, similar to those of the daughter of Janaka also, are with a little skill, to be clearly guessed in these two boys. Nay, methinks the face of my darling, bearing the charm of a fresh-blown lotus, has as if once again, come within the range of my eyes. (26).

मित —। अस्माभिः मया सवादिनी सदृशी 'अस्मत्संवादिनी' ॥ अपीति। अन्वय —इह शिशुयुग्मे जनकसुताया अनुरूपमपि नैपुणोन्नेयं तच्च तच्च स्फुटम् अस्ति । ननु प्रियायाः तत् अभिनवशतपत्रश्रीमत् आस्यं पुनः मे अक्ष्णोः गोचरीभूतमिव। व्याख्या—'इह अस्मिन् 'शिशुयुग्मे' बालकयुगले जनकसुताया 'अनुरूपम्' सदृशञ्च 'नैपुणेन निपुणतया उन्नेयं निर्ग्राह्यं तत् च तत् च एकाधिको भावः 'स्फुटम् अस्ति' सुस्पष्टमास्ते । 'ननु' किं बहुना 'प्रियायाः तत् 'अभिनवस्य' सद्योविकसितस्य 'शतपत्रस्य' पद्मस्य या 'श्रीः' कान्तिः तद्युक्तम् आस्यं मुखं 'पुनः' भूयो 'मे अक्ष्णोः गोचरीभूतम् इव अक्षिविषयं गतमित्युत्प्रेक्षे । मदनुकारिणी जनकजानुकारिणी च अनयोराकृतिः अयि भोः किमेतत् इति भावः ॥

Notes.—*1.* अस्मत् &c —संवाद is सादृश्य । अस्माभिः संवादः । अस्मत्संवादः । सः अस्ति अस्याः अस्मत्संवाद+इनि मत्वर्थ । Having resemblance with me. 2. तच्च तच्च—Refers to different things, such as ओष्ठमुद्रा, कर्णपाश, नेत्र &c. as detailed below. Hence a तद् for each reference. It is not a case of वीप्सा । 3. नैपुण etc.—निपुण clever. निपुणस्य भावः इति निपुण+अण् नैपुणम् cleverness. The word is both युवादि (अण) and ब्राह्मणादि (ष्यञ्) yielding two forms , so नैपुण्य also । For the idea compare ' विदग्धैर्निर्मितः" (IV. 21) 4. ननु—This is an अव्यय modifying the previous statement (आक्षेप) । What do I say of resemblance here and there (तच्च तच्च) ? It is the Whole face as it were I see before me. 5. *Remark*—This raises a suspicion. Resemblance with myself can be explained by family likeless, but how is it that they are so much like my wife ? Who then are these ?

($xxrix$) (रा—)

मुक्ताच्छदन्तच्छविसुन्दरीयं सैवोष्ठमुद्रा स च कर्णपाशः ।
नेत्रे पुनर्यद्यपि रक्तनीले तथापि सौभाग्यगुणः स एव ॥२७॥

(रा—)

(R—) This is the very same closing of the lips (Or—cover in the shape of lips) beautiful by the glimpses of the pearl-white teeth , the same again are the beautiful ears. If however, the eyes are blue and red (i e , not blue only like those of Sita), the virtue of attractiveness is still the very same. (27). (R —).

मित—। अनुरूपतां विशदयति मुक्तेति । अन्वयः—इयं मुक्ताच्छदन्तच्छविसुन्दरी ओष्ठमुद्रा सा एव कर्णपाशः स च। नेत्रे पुन यद्यपि रक्तनीले तथापि सौभाग्यगुणः स एव। व्याख्या—'इयम्' एषा शिशुयुगले

दृश्यमाना 'मुक्ताच्छानां' मुक्ताधवलानां 'दन्तानां छविभिः कान्तिभिः 'सुन्दरी' शोभना 'ओष्ठमुद्रा' ओष्ठयोर्मुद्रणं मुद्रितौ ओष्ठौ इत्यर्थः 'सा एव' ननु सीताया इव। कर्णपाश प्रशस्तौ कर्णौ 'स च स एव सीतायाः कर्णपाशा इव नास्ति सन्देह'। 'नेत्रे पुनः' नयने तु यद्यपि' यदि च 'रक्तनीले न हि सीताया इव केवलं नीले तथापि सत्यपि एतावति 'भेदे' 'सौभाग्यगुण' सुभगतारूपो गुणः 'स एव' तद्वदेव वर्त्तते। तत् किमेतौ ममैव तनयौ इति वितर्कः॥

Notes.—1. मुक्ताच्छ &c.—The teeth are slightly visible (see next). 2. ओष्ठमुद्रा—Literally "closing of the lips." This means "the lips closed" by the maxim "भावानयने द्रव्यानयनम्"। When the lips close they do not press firmly against each other so as to give a determined expression to the face, but remain very slightly parted. Hence the teeth are slightly visible. 3. कर्णपाशः—पाश in the उत्तरपद is प्रशस्तवचन। प्रशस्तः कर्णः कर्णपाशः। "प्रशंसावचनैश्च इति समासः। A नित्यतत्पुरुष। 4 नेत्रे पुनः &c—पुनः introduces a difference, The eyes of the boys are रक्त नील, i.e. blue with a tinge of red, but Sita's eyes are blue only. The female eye is often described as इन्दीवरद्युति। In the male a tinge of red is deemed auspicious, कौसल्या describes राम as "रक्ताक्षो दुन्दुभिस्वनः"। Perhaps it is for this reason that वीरराघव takes नेत्रे as referring to शिशुनेत्र, and सीतानेत्र, hence dual. In consequence in रक्तनीले he suppose रक्त to refer to the boys' eyes—the boys are रक्ताक्ष—and नील to refer to the eyes of सीता alone. 5. सौभाग्यगुणः—सुभग is सुन्दर। तस्य भाव इति सुभग+ष्यञ सौभाग्यम् सौन्दर्य्यम्। "हृद्भगसिन्ध्वन्ते पूर्व-

पदस्य च' इत्युभयपदवृद्धिः। सौभाग्यमेव गुणः। This shows that there is अभेद in spite of the भेद noted above. 4 *Remark*—Note how राम is gradually drawing the boy towards him. He starts with the simple query.—"Whose children are they ?" (किमपत्यमय दारकः) । He answers his query himself saying—They are certainly scions of some royal race (साम्राज्यशंसिनो भावाः कुशस्य च लवस्य च) । Soon he becomes more definite—They are princes of Raghu's—race (भूयिष्ठाञ्च रघुकुलच्छायामेतयोः पश्यामि) । Here however, he has reached the final stage—I see Sita's face in them (अभिनवशतपत्रश्रीमदास्यं प्रियायाः they are my boys. He realises the extreme unlikeliness of this conclusion hence he looks for corroborative evidence in the following para.

(*xxx*) (रा—) तदेतत् प्राचेतसाध्युषितमरण्यं यत्र किल देवी परित्यक्ता, इयञ्चानयोराकृतिर्वत्सयोः। यदपि— स्वतः प्रकाशान्यस्त्राणीति, तत्र विमृशामि अपि खलु तच्चित्रदर्शनप्रस्तावे अस्त्राभ्यनुज्ञानमुद्भूतं स्यात्, न ह्यसाम्प्रदायिकान्यस्त्राणि पूर्वेषामप्यनुशुश्रुमः। अयञ्च संप्लवमानमात्मानं सुखातिशयो हृदयस्य मे विश्रम्भयते। भूयिष्ठञ्च मया द्विधा प्रतिमन्नो देव्या गर्भभार आसीत्। (रा—)

(R—) This indeed is that forest inhabitated by Prachetasa where the queen was abandoned , and such is the appearance of these dear boys. Again in the matter that the weapon are self-revealed, I surmise, might not the permission to the weapons, given on the occasion of inspecting the picture, have taken effect ? For, even of the ancients we have not heard of ultra-traditional (got without initiation) weapons. This excessive delight too of my

heart steadies my drifting soul. And it was fully understood by me the queen's burden of foetus was divided into two.

मित—। 'प्राचेतसेन' वाल्मीकिना 'अध्युषितं कृतवसति। 'किल' इत्यवधारणे। 'इयञ्च' सीतासदृशी च। इहैव सीता परित्यक्ता इहैव वालौ सीतया मया च तुल्यरूपौ। तन्नैतदसम्भव यत् ममैव सुतावेतौ क्रव्याद्भिर्भक्षितायामपि सीतायां दैवेन परिरक्षतौ। अस्य समर्थनमाह—'स्वतःप्रकाशानि अस्त्राणि इति लवेनोक्तम्। 'तत्र विमृशामि' शङ्के 'अपि' सम्भाव्येत किं चित्रदर्शनप्रस्तावे तत अस्त्राणाम् अभ्यनुज्ञानम् अनुमतिः 'खलु' तदेव 'उद्गतं' सम्प्राप्तं स्यात्'। "सर्वथा त्वत्प्रसूतिमुपयास्यन्ति" इति यत् चित्रदर्शने मया प्रोक्तं तदेव अनुज्ञारूपेण गृह्णतो अस्त्रदेवता जन्मनि एतौ समाश्रिता तत एव उच्यते स्वतःप्रकाशानि अस्त्राणि इति। वस्तुतस्तु 'पूर्वेषामपि पूर्वाचार्याणामपि 'अस्त्राणि असाम्प्रदायिकानि' गुरूपदेशं बिनैव स्वत. प्रकाशानि इति न हि अनुशुश्रमः' नैव श्रूयते अस्माभि.। [अत्यन्तापह्नवे लिट्]। सर्वमेतदाशाजननं मे मन्दभाग्यस्य। तदुपरि 'अयं मे हृदयस्य सुखातिशयश्च' कुशस्य परिष्वङ्गात् नाम 'संप्लवमान' शङ्कासागरे सन्तरन्तम् अस्थिरम् 'आत्मान' विस्रम्भयते' विस्रम्भेण विश्वासेन योजयति तवैव तनयौ इति विश्वासमुत्पाद्य स्थिरीकरोति इत्यर्थः। द्वौ पुत्रौ यथा परित्यक्तायाः सीताया न सम्भवति इति न मन्तव्यम्। यतः—'देव्या गर्भभारः मया भूयिष्ठञ्च वहुश एव द्विधा प्रतिपन्न' द्विधाविभक्तत्वेन गृहीत 'आसीत्'। तत् यमजावेतौ स्याताम्॥

Notes.—1. तदेतत् &c.—Construe एतत् तत् अरण्यं यत्र &c. 2 इयञ्च—That is say, like Sita and like myself. Hence the inference is natural that these are Sita's sons. 3. चित्रदर्शनप्रस्तावे &c.—See Act. 1 para xxvi. अभ्यनुज्ञानम् command. It is not *permission*' which usually is preceeded by a prayer on the part of the party raceiving permission. Here the

weapon made no prayer to Rama. A command again is addressed to the person commanded. The language used (त्वत्प्रसूतिम् उपस्थास्यन्ति) is not of command. उपतिष्ठन्ति commands, उपस्थास्यन्ति does not. The weapons cannot act on उपस्थास्यन्ति। Hence perhaps Rama's doubt as expressed by विमृशामि अपि स्यात् See next 4. असाम्प्रदायिकानि—सम् + प्र दा + घञ् भावे सम्प्रदायः formal gift, *i.e.*, gift by initiation. तत्र भवानि इति सम्प्रदाय + ठञ् साम्प्रदायिकानि। न तथा। There was no initiation in this case. Hence also the weapons could not pass over to the boys Thus Rama is not sure that the simple words त्वत्प्रसूतिम् उपस्थास्यन्ति have transferred the weapons. 5. अनुशुश्रुम—We have not even heard, let alone actual seeing of it. This is a total denial (अत्यन्तापह्नवे)। Hence we have लिट् without परोक्षता। 6. संप्लवमानम्—प्लवमान is floating in sea of doubt 7. विस्रम्भयते—विस्रम्भेन योजयति विस्रम्भ + णिच् (नामधातु) + लट् ते। Comforts steadies. कर्त्रभिप्रायविवक्षायामात्मनेपदम्। The rules "निगरणचलनार्थेभ्यश्च" "अणावकर्मकात्—" &c., have no application here, because there apply only when णिच् is added to certain *root* (धातोः); here the णिच् comes after a प्रातिपदिक not a धातु। 8. भूयिष्ठञ्च &c.—This meets the objection that सीता could not have become the mother of *two* boys after exile. She gave birth to *twins*. I am almost sure of this for I could perceive that her foetus was divided into two. The following verse is in support of this.

(*xxxi*) (रा—) (सास्रम्)—

पुरारूढे स्नेहे परिचयविकासादुपचिते

रहो विस्रब्धाया अपि सहजलज्जाजडदृशः।

मयैवादौ ज्ञातः करतलपरामर्शकलया
द्विधा गर्भग्रन्थिस्तदनु दिवसैः कैरपि तया ॥२८॥

(रुदित्वा) तत् किमेतौ पृच्छामि केनाप्युपायेन ?

(R—) (*With tears*)—

From shampooing with the palm of my hand in privacy (she having her eye fixed through inborn bashfulness, though quite at ease, the affection that had previously grown having developed through growth of familiarity) the attachment of her foetus was first by me perceived to be in two places, and then by her in a few days.

(*Having wept*) Shall I then question them by some means of other ?

मित –। पुरेति। अन्वयः—पुरा रूढे स्नेहे परिचयविकासात् उपचिते विस्रब्धाया अपि सहजलज्जाजडदृशः गर्भग्रन्थिः रहः करतलपरामर्शकलया आदौ मया एव द्विधा ज्ञातः तदनु कैरपि दिवसैः तया। व्याख्या— पुरा' पूर्वं विवाहात् परमेव इत्यर्थः 'रूढे' अङ्कुरिते 'स्नेहे' अनुरागे गच्छति काले 'परिचयस्य' परस्परहृदयविज्ञानस्य विकासात्' स्फुरणात् 'उपचिते' प्रगाढ़े सति विस्रब्धायाः अपि' विश्वस्ताया अपि अनियन्त्रणाया अपि इत्यर्थः 'सहजया' प्रकृतिसुलभया 'लज्जयाजडदृशः' मदीयेन व्यापारेण स्तिमितनेत्रायाः सीतायाः 'गर्भग्रन्थिः गर्भबन्धः 'रहः' एकान्ते 'करतलेन' यः 'परामर्शः' संवाहन तस्य 'कलया' कलनया अनुष्ठानेन करणेन इत्यर्थः 'आदौ' प्रथमं 'मया एव द्विधा द्वयोः स्थानयोः ज्ञातः' अनुभूतः तदनु' ततः परं 'कैः अपि दिवसैः' कैश्चित् दिनैः (अपवर्गे तृया) 'तया' सीतया ज्ञात. ॥

Notes—1. पुरा &c —पुरा may be compounded or left uncompounded with रूढ़। 2. रहः—It seems better taken with करतलपरामर्शकलया than विस्रब्धायाः as is usual. The दूरान्वय is quite immaterial with भवभूति। 3. अपि—The force is

this—First the affection was of long standing (पुरा) ; next, the affection had deepened (उपचित), as a consequence she left absolutely no restraint before me (विस्रब्धा) : in spite of all this (अपि) &c 4 सहज &c—The जड़ता of the eyes was caused by her सहजलज्जा which overcame her विस्रम्भ। Of course the लज्जा was due to the shampooing. 5 द्विधा—द्विधा स्थित इति ज्ञातः। द्वयो स्थानयोः इति द्वि + धाच् अधिकरणविचाले i e. multiplication of location, गर्भग्रन्थि has one place usually for its location. Here we have two. One has become two. 6. तत् किमेतौ &c.—Rama personally has no longer much doubt that the boys are his children. He now wants corroboration from the boys themselves

(*xxxii*) लवः—तात किमेतत्—

बाष्पवर्षेण नीतं वो जगन्मङ्गलमाननम्।
अवश्यायावसिक्तस्य पुण्डरीकस्य चारुताम् ॥२९॥

कुशः—अयि वत्स,

विना सीतादेव्या किमिव हि न दुःखं रघुपतेः
प्रियानाशे कृत्स्नं किल जगदरण्यं हि भवति।
स च स्नेहस्तावानयमपि वियोगो निरवधिः
किमित्येवं पृच्छस्यनधिगतरामायण इव ॥३०॥

Lava—Father, what is this ?

Thy face, the source of the world's welfare is led to the beauty of a dew besprinkled white lotus through the flow of tears ? (29).

Kusa— O dear brother.

Without queen Sita what is not a source of grief to the lord of the Raghus ? It is said that the whole world becomes indeed a wilderness on the loss of one's beloved wife. That love in that measure and this endless separation ! Why ask thus like one that has not learnt the Ramayana ? (30).

मित—। वाष्पेत्यादि। अन्वयः—जगन्मङ्गलं आननं वाष्पवर्षेण अवश्यायावसिक्तस्य पुण्डरीकस्य चारुतां नीतम्। व्याख्या—'जगतां मंगलं' मंगलावाहं कल्याणकरं वः आननं बाष्पवर्षेण' अश्रुपातेन 'अवश्यायेन' तुषारेण 'अवसिक्तस्य' प्रोषितस्य पुण्डरीकस्य' श्वेतपद्मस्य 'चारुतां नीतं' कान्ति प्रापितम्। विरहपाण्डु वदनमण्डलं पुण्डरीकेण सवर्णं जातम्॥ विनेति। अन्वयः—सीतादेव्या विना रघुपतेः किमिव न हि दुःखम्। प्रियानाशे किल कृत्स्नं जगत् अरण्यं हि भवति। स च तावान् स्नेहः अयमपि निरवधिः वियोगः। अनधिगतरामायण इव किमिति एवं पृच्छसि। व्याख्या—'सीतादेव्या विना' सीतादेवीं विहाय स्थितस्य 'रघुपते' रामस्य 'किमिव' किं नाम वस्तु 'न हि दुःखं नैव दुःखकरम्? सर्वं दुःखकरम् अतः सुलभमेव तस्य रोदनम्। कुत एवमित्याह—'प्रियानाशे किल' जना कथयन्ति दयिताया नाशे सति 'कृत्स्नं जगत्' निखिल भुवनस्थं वस्तुजातं 'अरण्यं हि भवति' वनमिव नूनं प्रतिभाति। अतएव सर्वं दुःखकरम् [सत्यश्चोक्त तदारम्याणय-रमणाणि प्रियाः शल्यं तदासवः। तदैकाकी सबन्धुः सन्निष्टेन रहितो यदा"] 'स च' पूर्वानुभूतः लोकविदितश्च रामसीतयोः 'तावान्' अतिभूमिं गतः स्नेहः' "प्रीति' पक्षान्तरे 'अयमपि' एषोऽधुना अनुभूयमानः 'निरवधिः निरन्तर-स्थायी 'वियोग.' सीतया सह विरहः—इति भूयान् अनयोः मिलनविरहयोः भेदः, अतश्च कष्टदायक एव। 'अनधिगतरामायणः' रामायणं पठित्वापि अनधिगतम् अनधीतं रामायणं येन तादृशः जन 'इव, किमिति कस्मात् हेतोः 'एवं पृच्छसि' जिज्ञाससे। जिज्ञासा न त्वयि युक्ता इति भावः।

Notes. 1. अवश्याय &c.,—अवश्यायते शीतो भवति इति अव+श्यै+ण कर्त्तरि अवश्यायः frost, 2. पुण्डरीकस्य—Rama's face is expec-

ted to be क्षाम। It had become पाण्डु through grief. 3. प्रियनाशे &c.—किल shows that he is only repeating what people say, he can not have any personal experience in the matter. 4 किमिति—A compound अव्यय meaning 'why'. Also see next para.

(*xxiii*) रामः (स्वगतम्)—अये तटस्थित: आलाप , कृतं प्रश्नेन। दग्धहृदय, कोऽयमाकस्मिकस्ते पारिप्लवो विकार: ? एवं निर्भिन्नहृदयावेगः शिशुजनेनाप्यनुकम्पितोऽस्मि। भवतु तावदन्तरयामि। (प्रकाशम्) वत्सौ, रामायणमिति श्रूयते भगवतो वाल्मीकेः सरस्वतीनिस्यन्दः प्रशस्तिरादित्यवंशस्य, तत्र किञ्चित् कौतूहलेन श्रोतुमिच्छामि।

Rama—(*To himself*)—Ha! Their talk is indifferent away with questions Blighted heart, what what unaccountable unrestrained perturbation of thine is this ? With the heart's commotion thus revealed I am being pitied by boys even. Well, I will screen it over. (*Aloud*) Dear boys, a eulogy of the solar race, the flow of the divine speech of Worshipful Valmiki is spoken of. Through curiosity I wish to hear a little of it.

मित—। 'तटे' कूले 'स्थितः जलं नावगाहते उदासीन इत्यर्थः। उदासीन 'आलाप.' उदासीनस्येव आलापः। यदि सीतासुतः स्यात् कुशः तदा आप्लवत् 'विना जननया' इति ब्रूयात् न तु विना सीता देव्या' इति तातस्य इति न तु 'रघुपतेः इति। प्रश्नेन कृतं' ज्ञातं ज्ञातव्यं वृथा प्रश्नः। नेमौ सीतासुतौ इत्यर्थ.। अकस्मादागत 'आकस्मिकः' अकारण इत्यर्थ.। पारिप्लवः' चञ्चलः। निर्भिन्नः प्रकटः 'हृदयावेग.' मनोविकारो यस्य तादृशः। 'अन्तरयामि' प्रच्छादयासि अनिर्भिन्नो यथा स्यात् तथा करोमि इत्यर्थः। 'सरस्वत्या' वाण्याः 'निस्यन्दः' प्रवाहः'। 'प्रशस्तिः' प्रशंसा। वाल्मीकिना विरचितः सूर्यवंशस्यप्रशंसामयः प्रबन्ध इत्यर्थ. ॥

Notes—1. तटस्थितः—Primarily it means a person who stands at the margin of water and does not get down into it. Hence an indifferent *person*. Here again it is applied not to the person but to the आलाप of the person Practically then तटस्थित आलाप. is the same as तटस्थितस्य आलापः। 2. आकस्मिकः—अकस्मात् भव इति अकस्मात्+ठञ्। Unaccountable. निर्भिन्न &c. 3. निर्भिन्न &c—Comp. अनिर्भिन्नो गभीरत्वात्'—III, sl, 1, 4. अन्तरयामि—अन्तर is अन्तर्धि screen. "अन्तरमवकाशावधिपरिधानान्तर्द्धिभेदतादर्थ्ये" &c.—*Amara*. अन्तरेण योजयामि इति अन्तर+णिच् (नामधातु)+लट् मिप्। Having become निर्भिन्न the हृदयावेग stands uncovered, I will again cover it up. 5. कौतूहलेन &c.—He is trying to keep himself engaged and thus screen over his निर्भिन्नहृदयावेग।

(*xxxiv*) कुशः—स कृत्स्न एव सन्दर्भः अस्माभिराम्नातः, स्मृत्युपस्थितौ तावदिमौ बालचरितस्य अन्त्येऽध्याये श्लोकौ।

रामः—उद्घोषयतु वत्सः।

कुशः—प्रकृत्यैव प्रिया सीता रामस्यासीन्महात्मनः।
प्रियभावः स तु तया स्वगुणैरेव वर्द्धितः॥३१॥
तथैव रामः सीतायाः प्राणेभ्योऽपि प्रियोऽभवत्।
हृदयं त्वेव जानाति प्रीतियोगं परस्परम्॥३२॥

Kusa—The whole of that work has been read through by us. These two verses in the last chapter of the Balacharita have now come up to memory.

Rama—Let my darling repeat them.

Kusa—To Rama, the high-souled, by nature indeed, was Sita dear but that dearness she really enchanced by her own virtues (31).

In the very same manner Rama became dearer than life to Sita; but their hearts alone knew the extent of each other's ove. (32).

मित—। 'सन्दर्भ' प्रवन्धः। 'आवृत्त' अधीतः। 'स्मृतौ उपस्थितौ' आगतौ। 'बालचरितस्य' बालकाण्डस्य ॥ 'उदीरयतु' उच्चारयतु ॥ प्रकृत्येति। अन्वयः—सीता प्रकृत्या एव महात्मनः रामस्य प्रिया आसीत्। स तु प्रियभावः तया स्वगुणैः वर्द्धित एव। व्याख्या—छगमा। स्वभावजा प्रियता स्वभावदस्तैर्गुणैः वर्द्धिता इति भावः॥ तथेति। अन्वय—रामः तथा एव प्राणेभ्यः अपि सीताया प्रियः अभवत्। किन्तु परस्परं प्रीतियोगं हृदयमेव जानाति। व्याख्या—'राम' यथा सीता तस्य प्रिया तथा एव प्राणेभ्यः अपि सीताया प्रिय अभवत्। 'तु' किन्तु 'परस्परम्' अन्योऽन्यं प्रति ईदृशं 'प्रीतियोग प्रेमबन्धनं तयोः 'हृदयम् एव जानाति नान्यः कोऽपि ॥

Notes—1. तावत्—अवधारणे। Or say अवधौ, for the present स्मृत्युपस्थितौ। 2. बालचरितस्य &c.—The verses are read differently in different editions of the Ramayana I am to'd that Grierson's Ramayana has Bhavabhuti's readings. 3. प्रियभाव.—Here प्रियाया भाव would give प्रियाभावः। So that take प्रियम् in the neuter (सामान्ये नपुंसकम्), then say प्रियस्य भावः। 4. परस्परम्—Derive *ante*. द्वितीया in connection with प्रति understood.

(*xxxv*) रामः—कष्टमतिदारुणोऽयं हृदयमर्मोपघातः। हा देवि, एवं किल तदासीत्। अतो निरन्वयविपर्यासविरसवृत्तयो विप्रलम्भपर्यवसायिनस्तापयन्ति संसारवृत्तान्ताः।

क्व तावानानन्दो निरतिशयविस्रम्भबहुलः
क्व तेऽन्योन्यं यत्नाः क्वचन गहनाः कौतुकरसाः।
सुखे वा दुःखे वा क्व नु खलु तदैक्यं हृदययो-
स्तथाप्येष प्राणः स्फुरति न तु पापो विरमति ॥ (राम)

Rama—O woe! This is a very heavy blow to the vitals of my heart. Alas! my queen! Such indeed was it then.

O, they do afflict, these affairs of life that through unexpected (lit—disconnected) reversals are bitter in their course and thus end in disappointment.

Where now is that immense bliss augmented by unsurpassed confidence? Where are those mutual efforts? Where are those indescribable tastes of fun (Or—festivities)? Where indeed is that union of hearts in joy as well as sorrow? Yet this heart beats, the vile thing does not indeed stop. (33) (R—)

मित—। 'हृदयस्य मर्मणि' जीवस्थाने 'उपघात' प्रहार। एवं किल' ईदृश एव "प्रत्युप्तस्यैव" इत्यादिश्लोकप्रकार एव 'तदा आसीत्'। निर्गत अन्वयः अनुवृत्ति यस्य स 'निरन्वय' पूर्ववर्तिसूचकशून्यः यः 'विपर्यास' अन्यथाभावः दशान्तरमित्यर्थः तेन 'विरसा' अप्रीतिकरा 'वृत्तिः' प्रसगे येषां तादृशाः अतएव 'विप्रलम्भे प्रतारणायां 'पर्य्यवस्यन्ति' ये तथाविधाः ईदृशत्वेन नीता अनीदृशा जायमाना आपातसरसाः परिणामनीरसा इत्यर्थः। 'संसारवृत्तान्ताः' संसारभावा॥ क्वेति। अन्वयः—निरतिशयविस्रम्भबहुलः तावान् आनन्द क्व? ते अनयोन्यं यत्ना क्व? गहना· कौतुकरसा: क्वचन? तत् सुखे वा दुःखे वा हृदययो. ऐक्यं क्व नु खलु? तथापि एष पापः प्राणः स्फुरति न तु विमरति। व्याख्या—निर्भरः अतिशयः अस्य 'निरतिशयः' भूमा इत्यर्थः यः 'विस्रम्भ' अन्योऽन्यविश्वास तेन बहुल.' विवृद्धः 'तावान्' तत्परिमित. महान् इत्यर्थः आनन्द. क्व' कुत्र गतः? गत एव आनन्दः। 'ते' पूर्वदृष्टा 'अन्योऽन्य' परस्पर' प्रति यत्नाः' प्रोत्युत्पादनचेष्टाः 'क्व'? गता एव ते। 'गहनाः' सान्द्राः 'कौतुकस्य प्रहासस्य उत्सवस्य 'रसाः' स्वादाः 'क्वच' क्वापि? ते च गताः। 'तत्' पूर्वानुभुतं 'सुखे वा दु.खे वा हृदययोः ऐक्य क्व तु खलु' क्वचा गतम्? इत्थं सर्वमेव अपुनरावृत्तये गतं 'तथापि एष पापः' दुष्टः प्राण.' हृन्मारुतः स्फुरति' चलति 'त विरमति' न प्रशाम्यति॥

Notes—1. हृदयमर्म &c.—हृदयमर्मन् is the most sensitive spot in the heart. Bhavabhuti often refers to it, thus—

'हृन्मर्मव्रण इव वेदनां करोति' (1.30), व्रणो रूढग्रन्थिः स्फुटित एव हृन्मर्मणि पुनः" (II.36) &c. 2. निरन्वय &c.— अन्वीयते अनुगम्यते इति अनु + इ + अच कर्मणि अन्वयः that which is followed, hence cause, because it is always followed by the effect. In this sense, निरन्वय means अहेतुक। वि + परि + अस + घञ् भावे विपर्यास reversal. निरन्वयविपर्यास now means causeless, hence unexpected reversal The टीका gives a slightly different explanation. 3. विप्रलम्भ &c.— For विप्रलब्ध in the sense प्रतारणा comp. "मया एव विप्रलब्ध आर्यपुत्रः" III 4. कौतुक &c — कौतुक is परिहास fun रस is स्वाद taste 5 प्राणः— This is singular musculine when meaning हृद्वायु the air that circulates in the heart. "प्राणो हृन्मारुते" इत्यादि विश्वमेदिनी। By हृन्मारुत is probably meant the pulsation of the heart and vitality, cp "निघ्नन् प्रियं प्राणम्" Kirat III. 41.

(*xxxvi*) [रा—] भोः कष्टम्।

प्रियागुणसहस्राणामेकोन्मीलनपेशलः
य एव दुःस्मरः कालस्तमेव स्मारिता वयम् ॥३४॥
तदा किञ्चित् कृतपदमङ्गैः कतिपयै-
स्तदोषद्भिस्तारि स्तनयुगलमामीन्मृगदृशः।
वयःस्ने हाकूतव्यतिकरघनो यत्र मदनः
प्रगल्भव्यापारः स्फुरति हृदि मुग्धस्य वपुषि ॥३५॥

(R—) O woe!

I am remined of that very period that is the most painful to think of because charming on account of the simultaneous (Or—wondrous) unveiling of the thousands of the virtues of my darling. (34).

(The period) when Love, intensified by the union of age, affect on and desire, germinates at heart with a vigorous move but is subdued in the body, (for) then (तदा) the breasts of the fawn eyed (girl) that had slowly made their mark became in but a few days slightly expansive. (35).

मित — । प्रियेति । अन्वय —प्रियागुणसहस्राणाम् एकोन्मीलनपेशलः यः एव काल दुःस्मर तमेव वयं स्मारिताः । व्याख्या—'प्रियायाः' सीतायाः 'गुणसहस्राणाम्' असंख्यानां गुणानां यत् 'एकोन्मीलनं' युगपदुन्मेषो वा तेन 'पेशलः मधुरः 'यः एव कालः दुःस्मरः' स्मर्त्तुमशक्यः तमेव वयं स्मारिताः स एव अस्माभिः स्मृतः । यस्य स्मरणं दुःसह स एव काल स्मृत इत्यर्थः ॥ काल' विशिनष्टि तदेति । अन्वय —यत्र वयःस्नेहाकूतव्यतिकरघनः मदन· हृदि प्रगल्भव्यापार (सन्) स्फुरति वपुषि च मुग्धः । तदा किञ्चित् किंचित् कृतपदं मृगदृशः तत् स्तनयुगलं कतिपयै. अहोभिः ईषद्विस्तारि आसीत् । व्याख्या कं कालम् इत्यपेक्षायामाह 'यत्र' यस्मिन् काले 'वयसः' नवयौवनस्य स्नेहस्य अनरोगानुरागस्य 'आकूतस्य' अभिलाषस्य च यः 'व्यतिकरः' एकत्र समावेशः तेन घन सान्द्रः 'मदनः हृदि मनसि प्रगल्भः प्रौढ 'व्यापार ' प्रसरः यस्य तादृश सन् स्फुरति' आविर्भवति वपुषि च' देहे पुन' 'मुग्ध ' अप्रगल्भ । किम्भूतं वयः इत्याह –'तदा' तस्मिन् काले 'किंचित्' शनैः शनै कृतपदम् दीर्घेणेव कालेन मुकुलितप्राय 'मृगदृशः' हरिणलोचनाया सीतायाः 'तत् स्तनयुगल कतिपयै अहोभि· झटित्येव ईषद्विस्तारि' आभोगवत् आसीत्' । तद् हृदि प्रगल्भो मदनः नोचेत् कथं झटिति स्तनपरिणाहः ॥

Notes—1. प्रिया &c.—सहस्र here is merely a large number not actually a thousand. गुणानां सहस्राणि गुणसहस्राणि &c. 2 एक &c.—एक is by transference of epithets, यौगपद्ययुक्त simultaneous. Or एक is श्रेष्ठ hence अद्भूत wondrous पेशल is रम्य charming 'पेशलः कुशले रम्ये' इति हैमः । Now see Tika.

3. दुःस्मरः—दुःखेन स्मर्य्यते दुर्+स्मृ+खल् कर्मणि of painful memory. 4. तमेव &c.—स्मृ+णिच्+क्त कर्मणि = स्मारित caused to remember. Here before णिच् we had वयं तं स्मृतवन्तः। With णिच् the poet wants कुशः अस्मान् तं स्मारितवान्। Changing the voice कुशेन वयं तं स्मारिताः। According to Bhattoji, however, the अणिकर्त्ता does not become कर्म्म here and the form becomes कुशः अस्माभिः तं स्मारितवान् yielding the final from कुशेन अस्माभिः स्मारितः। 5. तदा &c—As already remarked this is against the Viracharita where Sita is seen to be an adult already at marriage.

(*xxxvii*) कुशः—अयञ्च मन्दाकिनीचित्रकूटवनविहारे सीतादेवीमुद्दिश्य रघुपतेः श्लोकः—

त्वदर्थमिव विन्यस्तः शिलापट्टोऽयमग्रतः।
यस्यायमभितः पुष्पैः प्रवृष्ट इव केसरः॥३६॥

रामः (सलज्जास्मितस्नेहकरुणम्)—अति नाम मुग्धः शिशुजनः विशेषतस्त्वरण्यचरः। हा देवि, स्मरसि तस्य प्रदेशस्य तत्समयविस्रम्भातिप्रसङ्गसाक्षिणः? कष्टं भोः कष्टम्!

श्रमाम्बुशिशिरीभवत् प्रसृतमन्दमन्दाकिनी
मरुत्तरलितालकाकुलललाटचन्द्रद्युति।
अकुङ्कुमकलङ्कितोज्ज्वलकपोलमुत्प्रेक्ष्यते
निराभरणसुन्दरश्रवणपाशसौम्यं मुखम्॥३८॥

(राम—)

Kusa—This again is Raghupati's verse indeed for queen Sita when sporting in the forest of Chitrakuta by the river Mandakini.

For thee, as it were, has been laid this slab of stone, in front, on both sides of which this Vakula tree has showered heavily with flowers. (36).

Rama (*With affection, Pathos and a bashful smile*)—Boys are indeed very simple especially the dwellers in the woods. Ah ! Queen , dost thou remember that place, the witness of our excess of familiarity at the time ? Woe ! O woe !

(By me) is being fancied before me thy face—beautiful though without decorations, glorious in its well-shaped ears, with cheeks bright and not defiled with saffron, at the time having the sweat of toil on it and becoming cool, with the lustre of your moon-like brow ruffled by your tresses that were agitated by the mild breeze that proceeded from the Mandakini, (37).

मित — । 'मन्दाकिनीगतं चित्रकूटवनम् शाकपार्थिवादि । मन्दाकिनी-समोपस्थं वनमित्यर्थं ।। तत्र विहार त्वदर्थमिति । अन्वय—अयम् अग्रतः शिलापट्टः यस्य अभितः अयं केशर पुष्पैः प्रवृष्ट इव त्वदर्थम् इव विन्यस्तः । व्याख्या—'अयम् अग्रतः' पुरोवर्त्ती 'शिलापट्टः' प्रस्तरतलम् यस्य अभितः' उभयतः पार्श्वयोरित्यर्थ. 'अय केशरः' एष बकुलपादपः पुष्पैः इव' वारिवर्षण-मिव पुष्पवर्षणं कृतबान् 'त्वदर्थम् इव मन्ये तवैव प्रयोजने 'विन्यस्तः' स्थापितः तत् इह शेष्व ।। लज्जाजनितं स्मितं 'लज्जास्मितम् । प्राक्तनस्नेह-स्मरणात् स्नेहः' । तत् सर्वं नास्ति इति 'करुणम्' । 'मुग्ध.' सरलः । अरण्यचरस्तु विशेषतो मुग्धः' । 'प्रदेशस्य' इति शेषविवक्षया षष्ठी । 'तत्समय इत्यादि व्याख्यातं प्राक् ।। श्रमेति । अन्वयः—श्रमाम्बुशिशिरी-भवत् प्रसृतमन्दमन्दाकिनीमरुत्तरलिताळकाकुलललाटचन्द्रद्युति अकुङ्कुमक-लङ्कितोज्ज्वलकपोलम् निराभरणसुन्दरश्रवणपाशसौम्यं(ते) मुखम् उत्प्रेक्ष्यते । व्याख्या—'श्रमाम्बुभिः शिशिरीभवत्' शीततां गच्छत् 'प्रसृतः प्रवृत्त यः मन्द्रः मन्दाकिनीमरुत् तेन तरलितैः' 'चञ्चलैः' 'अलकैः' चूर्णकुन्तलैः ललाट-पार्श्वस्थैः केशैः आकुला विमिश्रा मन्दीकृता इत्यर्थः 'ललाटचन्द्रस्य' चन्द्रतुल्यस्य ललाटस्य द्युतिः यस्मिन् तत् 'अकुङ्कुमकलङ्कितौ' कुङ्कुमेन

अकलङ्कितौ 'उज्ज्वलौ कपोलौ' गण्डौ यस्मिन् तत् निराभरणौ च सुन्दरौ च यौ 'श्रवणपाशौ प्रशस्ते श्रवणे ताभ्यां सौम्य' सुखम् 'उत्प्रेक्ष्यते' अग्रतः परिदृश्यते इव मया ॥

Notes —1. यस्यायमभितः—अभित requires द्वितीया by the Varttika 'अभितःपरित.—' । यम् अभितः is the form expected, निरङ्कुशा कवय । 2. पुष्पैः—The करण of वर्षणक्रिया । 3. प्रवृष्ट—प्र intensive. The root is taken intransitively and the क्त is कर्त्तरि । Here the downpour is achieved with flowers not with water. 4 इा देवि &c—Addresses Sita in the air. He fancies he see her there प्रदेशस्य has षष्ठी by 'अधीगर्थदयेशां कर्मणि' । 5 अकुङ्कुम &c.—कुङ्कुमेन कलङ्कितौ shows that Sita's complexion was brighter than the lustre of कुङ्कुम । This was due to the permanent अङ्गराग given her by अनसूया, the wife of the Atri cf. 'स्फुरत्प्रभामण्डलमानस्यं सा विभ्रतीशाश्वत. मङ्गरागम् । रराज शुद्धेति पुनःस्वपुर्यै । सन्दर्शिता वह्निगतेव भर्त्रा ॥''—Raghu XVI. 6. निराभरण etc—श्रवणपाश is a नित्यसमास of the तत्पुरुष class, पाश is प्रशंसावाची when it is final in the तत्पुरुष । The समास is "प्रशसावचनैश्च" । पाश is of the मतल्लकादि class—मतल्लिकाद्गमिश्राः स्यु प्रकाण्डस्थलभित्तयः । हस्तपाशतदाः पादपाशोमचर्बिकादयः''—*Vardhamana* 7. *Remarks*—For the moment it seemed to him that Sita was actually present there and he was looking at her beautiful face. This gave him relief but he is soon dis-illusioned and exclaims in despair कष्ट भोः कष्टम् etc

(*xxiii*) (राम—) (स्तम्भित इव स्थित्वा सकरुणम्)—अहो नु खलु भोः—

चिरं ध्यात्वा ध्यात्वा निहित इव निर्माय पुरतः
प्रवासेऽप्याश्वासं न खलु न करोति प्रियजनः ।
जगज्जीर्णारण्यं भवति हि विकल्पव्युपरमे
कुकूलानां राशौ तदनु हृदयं पच्यत इव ॥३८॥

(R—) (*With Pathos after remaining as if paralysed*)—Ha O indeed !

Even in separation it is not that a dear one does not give consolation when created, as it were, by meditation—long meditation—and placed in front, At the cessation of the delusion, the world, verily, becomes a blighted wilderness. Thereafter the heart is as though being baked in a heap of husks a-glow. (38).

मित—। सीतामुखदर्शनं विप्रलम्भमात्रम् इति ज्ञात्वा शोकक्षोभात् 'स्तम्भित इव स्थित्वा सकरुणम्'आह ॥ चिरमिति। अन्वयः—प्रवासे अपि चिरं ध्यात्वा ध्यात्वा निर्माय पुरतः निहित इव प्रियजनः आश्वासं न करोति (इति) न खलु। विकल्पव्युपरमे जगत् जीर्णारण्यं हि भवति। तदनु हृदय कुकूलानां राशौ पच्यते इव। व्याख्या—'प्रवासे अपि' विरहे अपि चिर ध्यात्वा ध्यात्वा' [नित्यार्थे द्विरुक्ति] निरन्तरानुध्यानेन निर्माय' अलीकं कल्पयित्वा 'पुरतः निहित इव' निमातुरग्रे स्थापित इव 'प्रियजनः आश्वासम्' अवसितो विरह इति सान्त्वनं न करोति (इति) नखलु' अपि तु करोत्येव। सीताया छद्मग्रतः कल्पयित्वा ममापि जातमेव क्षण समाश्वासनम्। 'विकल्पस्य' अलीकस्य, विपरीतायाश्च तस्याः कल्पनायाः 'व्युपरमे' अवसाने, अपयाते मोहे इत्यर्थः जगत् जीर्णारण्य हि' अवदग्धं काननमिव हि भवति। 'तदनु' ततः परं 'हृदयं कुकूलानां राशौ' महति तुषानले 'पच्यते इव' दह्यते, पाकं भजते इव। यथा अस्मिन् क्षणे मदीय हृदयम् ॥

Notes—1. **स्तम्भित इव** &c.—He sees it is a delusion and the shock paralyses him for a moment. 1. a. **पुरतः**—It is

an underived primitive word meaning 'in front' अव्यय— अधि ७मी : 'पुरतः प्रथमे अग्रे' इति विश्वः। Some derive it with अतसुच् after पूर्व, but in that case पुर् cannot be ordered in place of पूर्व। The rules being 'पूर्वाधरावराणामसि पुरधवश्चैषाम्' and "अस्ताति च'। cp. "कथं पुरतः कश्चित् विभाषाग्रहणं योगात् विभज्यते। तेन पूर्वशब्दादतसुच्। अस्थाति च इति सूत्रे चकारस्य अनुक्तसमुच्चयार्थत्वात् पुरादेशः। तच्चिन्त्यम्। पुरतः इति.. अप्रामाणिकमेव'— *Bhattoji*. 2 विकल्प &c—कल्प्यते निर्मीयते इति कल्पः ... ion. विरुद्धः कल्पः विकल्पः false creation, delusion. 3 कुकूलानाम्— कुकूल is तुषानल। In this sense अमर takes it as masculine, but other authorities declare it to be always neuter. कुकूलं शङ्कुभिः कीर्णे श्वभ्रे ना तु तुषानले" इत्यमर। "कुकूलं तु तुषानले" इत्यादि हैमः &c. 4. पच्यते—Not burnt up but slowly being baked so as to feel it the more. कर्मकर्तरि लट्।

(*xxxii*) नेपथ्ये—

वशिष्ठो वाल्मीकिर्दशरथमहिष्योऽथ जनकः
सहैवारुन्धत्या शिशुकलहमाकर्ण्य सभयाः।
जराग्रस्तैर्गात्रैरथ खलु विदूराश्रमतया
चिरेणागच्छन्ति त्वरितमनसोऽपि श्रमजडाः॥३९॥

In The Tiring Room—Vasishtha even along with Arundhati, Valmiki, the Queens of Dasaratha, and Janaka alarmed on hearing of the boys' quarrel, are coming slowly though their will is hurrying, languid through fatigue because of their age-stricken limbs and especially because the hermitage is far away. (39)

मित—। वशिष्ठ इति। अन्वयः—अरुन्धत्या सह एव वशिष्ठः वाल्मीकिः दशरथमहिष्यः अथ जनकः शिशुकलहमाकर्ण्य सभयाः (सन्तः) त्वरितमनसोऽपि जराग्रस्तैः गात्रैः अथ विदूराश्रमतया श्रमजडाः चिरेण

आगच्छन्ति खलु । व्याख्या—सुगमा । दशरथमहिष्यः' कौसल्याकेकयी-सुमित्राः । 'शिशुकलह'' लवचन्द्रकेत्वोः कलहम् । 'उभयाः' इति अरुन्धती-वशिष्ठवाल्मीकीनाम् उभयोरर्थे भयम् इतरेषां तु चन्द्रकेतोरर्थं । विदूरे आश्रमो' येषां तेषां भावेन । 'आगच्छन्ति' इहैव रणाङ्गने ॥

Ntoe.—1. दशरथमहिष्य—The queens had all gone to Rishyasringa's sacrifice and from there had come over to Valmiki hermitage. See Act I&IV. 2. अथ—Implies समुच्चय । "अथाथो संशये स्यातामधिकारे च मङ्गले। विकल्पानन्तरप्रश्नकार्त्स्न्यारम्भ समुच्चये ॥' इति मेदिनी। 3. जरायस्तैः &c.—उपलक्षणे तृतीया। विदूराश्रमतया—हेतौ ३या। This is with respect to the old people. The hermitage was not actually very far away but *to old people* the distance was rather long 6. चिरेण—इति विभक्तिप्रतिरूपकमव्ययम् । क्रियाविशेषणे ३या ।

(*xl*) रामः—कथं भगवन्तावरुन्धतीवशिष्ठौ अम्बा जनकश्च अत्रैव ! कष्टम् ! कथं खल्वेतेद्रष्टव्याः । (सकरुणं विलोक्य) अहह ! तातजनकोऽप्यत्रैवायाति इति वज्रेन ताडितोऽस्मि मन्दभाग्यः ।

सम्बन्धस्पृहणीयताप्रमुदितैर्जुष्टे वशिष्ठादिभि-
र्दृष्टापत्यविवाहमङ्गलमहे तत्तातयोः सङ्गतम् ।
पश्यन्नीदृशमीदृशे पितृसखं वृत्ते महावैशसे
दीर्यै किं न सहस्रधाहमथवा रामेण किं दुष्करम् ॥४०॥

Rama—How so! Are the worshipful Arundhati and Vasistha, my mothers and Janaka indeed here ? O woe! How can these be faced ? (*Observing—With pathos*) Oh! ill-starred as I am, I am struck with a thunder—bolt as father Janaka too is coming this very way,

Having before witnessed the meeting of the two fathers at the auspicious marriage festivities of their children—festivities joined in by Vasishtha and others delighted at

the desirability of the connection—why do I not burst into a thousand pieces now seeing my father's friend in this plight after the perpetration of such a terrible cruelty (to his daughter) ? Or, what cannot be suffered (lit—done) by Rama ? (40).

मित— । सम्वन्धेति । अन्वयः—सम्वन्धस्पृहणीयताप्रमुदितैः वशिष्ठादिभिः जुष्टे अपत्यविवाहमङ्गलमहे तातयोः तत् सङ्गतं दृष्ट्वा ईदृशे महावैशसे वृत्ते ईदृशं पितृसखं पश्यन् किमहं सहस्रधा न दीर्य्ये ? अथवा रामेण किं दुष्करम् ? व्याख्या—'सम्वन्धस्य' जनकानां रघूणाञ्च विवाहसम्वन्धस्य 'स्पृहणीयतया' प्रार्थनीयतया 'प्रार्थनीयतया 'प्रमुदितैः' समधिकहर्षमनुभवद्भिः वशिष्ठादिभिः' परमर्षिभिः जुष्टे स्वोपस्थित्या सम्भाविते 'अपत्ययोः मम च सीतायाश्च विवाहमङ्गलस्य महे उतसवे तातयोः' गुर्वोः जनकदशरथयोः 'तत्' आनन्दमयं 'सङ्गतं' समागमं दृष्ट्वा ईदृशे एवंविधे 'महावैशसे' सीतानिधनरूपे घोरे घाते 'वृत्ते' जाते सति 'ईदृशम्' ईदृशीमवस्थां प्रपन्नं पितृसखं' पितुः सखायं तातजनकं ' पश्यन् किम् अहं' सहस्रधा न दीर्य्यें' विदीर्णो न भवामि । 'अथवा' नैतदाश्चर्य्यम् । 'रामेण' वज्रमयेण 'किं दुष्करं । एतत् दृष्ट्वा अविदीर्णेन देहेन अवस्थानं सुकरमेव तस्य रामस्य ।

Notes—1. सकरुणम् &c.—कथं भगवन्तौ &c. is uttered immediately on hearing what is said behind the scene. The party is not then within sight. Now they are all visible and the sight of Janaka deeply affects Rama. 2. अत्रैव—Even here, i.e., he is coming upto me. This is the first interview with these august personages after Sita's exile. 3. सम्वन्ध etc — Comp. "जनकानां रघूणाञ्च सम्वन्धः कस्य न प्रियः" । (I. sl 27). 4. दृष्ट्वा पश्यन्—This is for contrast. I saw *that* and am now seeing *this*. 5. वृत्ते महावैशसे—The वैशस was of my creation. I brought disunion in union. What was thoght desirable by sages like Vasishtha was rendered most un-

desirable by my wicked self. भावे ण्मी। 6. दीप्य+इ+लट् ए कर्मकर्त्तरि। 7. रामेण etc—रामोऽस्मि सर्वसहः। दुष्कर has खल कर्मणि। रामेण has अनुक्ते कर्त्तरि तृतीया, because षष्ठी is barred by 'नलोकाव्ययनिष्ठाखलर्थतृनाम्'।

(*xli*) नेपथ्ये—कष्टं कष्टम्!

अनुभावमात्रसमुपस्थितश्रियं सहसैव वीक्ष्य रघुनाथमीदृशम्।
प्रथमप्रमूढजनकप्रबोधनाद्विधुराः प्रमोहमुपयान्ति मातरः ॥४१॥

रामः—हा तात, हा मातरः, हा जनक,

जनकानां रघूणाञ्च तत् कृतस्नं गोत्रमङ्गलम्।
तस्मिन्नकरुणे पापे वृथा वः करुणा मयि ॥४२॥

यावत् सम्भावयामि। (इत्युत्तिष्ठति)।

कुशलवौ—इत इतस्तातः। (इति सकरुणाकुलं परिक्रम्य निष्क्रान्ताः सर्वे)।

इति कुमारप्रत्यभिज्ञानो नाम षष्ठोऽङ्कः।

In The Tiring Room—Woe! O Woe!

After the reviving of Janaka, who fainted away first on suddenly beholding Raghunatha in this plight with beauty reduced to majesty only, the mothers distressed are falling into a swoon. (41).

Rama—Alas father! Alas mother! Alas Janaka,

Useless (misplaced) is your pity on me, the sinner that was pitiless on (Sita) what was the sum total of the blessings of the race of Janaka and Raghu. (42).

Let me attend (upon), (*Rises*).

Kusa and Lava—This way, father, this way. (*Exeunt all walking with agitation and pathos*).

This is the sixth Act named *Recognition of the princes*.

मित—। अनुभावेति। अन्वयः—ईदृशम् अनुभावमात्रसमुपस्थितश्रियं रघुनाथं सहसैव वीक्ष्य प्रथमप्रमूढजनकप्रबोधनात् (परम्) विधुराः मातरः प्रमोहम् उपयान्ति। व्याख्या—'ईदृशम्' एतदवस्थम् 'अनुभावमात्रे' केवले महिम्नि 'समुपस्थिता' पर्य्यवसिता 'श्रीः' कान्तिः यस्य तादृशं रघुनाथं सहसैव' अतर्कितमेव 'वीक्ष्य' दृष्ट्वा प्रथमं' सर्वाग्र 'प्रमूढस्य' मोहमुपगतस्य 'जनकस्य प्रबोधनात्' समाश्वासनात् परं 'विधुराः' शोकविह्वला 'मातरः प्रमोहम् उपयान्ति' विसञ्ज्ञा भवन्ति ॥ हा जनक' इति प्रक्षिप्तमिव प्रतिभाति ॥ जनकानामिति। अन्वयः—सुगमा। 'यत' सीतारूपं' वस्तु। पूर्वार्द्धं व्याख्यातं प्राक्प्रथमाङ्के। 'तस्मिन्' सीतारूपवस्तुविषये 'अकरुणे' दयाहीने अतः 'पापे पापिनि मयि इत्यर्थः [पापशब्दात् मत्वर्थीयः अर्श-आद्यच्]। समभावयामि' समीपगमनेन सत्कारं करोमि।इति भावः। यावद्योगे लट् ॥

Notes—*1*. सहसैव—The एव may be taken with either सहसा or वीक्ष्य। 2. प्रथम etc.—The sight distressed them all, but Janaka could not stand it at all. The mothers ran to his assistance. After he had revived they were eased of apprehension on his account, but the sight of his emotion re-doubled their own distress and they too were falling into a swoon. 3 हा जनक—This seems to be an interpolation. Bare जनक is disrespectful coming from Rama. Also हा तात is irrelevant now with reference to दशरथ। We believe the current reading is हा तात, हा मातरः where तात refers to जनक and is mentioned first because it was he who fainted first and the voice behind the curtain mentions him first. 4. जनकानाम etc.—See I, sl. 5. 5. सकरुणाकुलम्—आकुल perplexed. सकरुणञ्च आकुलञ्च यथा तथा। 6. कुमारप्रत्यभिज्ञानः—प्रत्यभिज्ञान is recognition. Though राम has still some doubts, the recognition of कुश and लव as his son is well nigh complete. उपचारात् अङ्कविशेषणम् ततः पुंस्त्वम्।

उत्तरचरितम्

सप्तमोऽङ्कः ।

(i) (ततः प्रविशति लक्ष्मणः) ।

लक्ष्मणः—भोः भोः । अद्य खलु भगवता वाल्मीकिना सब्रह्मक्षत्रपौरजानपदाः प्रजाः सहास्माभिराहूय कृत्स्न एव सदेवासुरतिर्य्यग्नागनायकनिकायो जङ्गमः स्थावरश्च भूतग्रामःस्वप्रभावेण सन्निधापितः । आदिष्टश्चाहमार्य्येण—वत्स लक्ष्मण, भगवता वाल्मीकिना स्वकृतिमप्सरोभिः प्रयुज्यमानां द्रष्टुमुपनिमन्त्रिताः स्मः तत् गङ्गातीरम् आतोद्यस्थानमुपगम्य क्रियतां समाजसन्निवेशः—इति । कृतश्च मर्त्यामर्त्तस्य भूतग्रामस्य समुचितस्थानेषु समुपवेशनं मया । अयञ्च—

राज्याश्रमनिवासेऽपि प्राप्तकष्टमुनिव्रतः ।
वाल्मीकिगौरवादार्य्य इत एवाभिवर्त्तते ॥१॥

(*Then enters Lashmana*)

Lak.—Ho ! Ho ! To-day by worshipful Valmiki, after having summoned along with us the subjects from the town and the country including Brahmanas and Kshattriyas, even the entire world of creation, movable and immovable including the host of gods, demons and the leading *Nagas* birds and beasts, has been caused to assemble through his spiritual power. And I am instructed by the noble brother

—"Dear Lakshmana, we have been invited by worshipful Valmiki to witness his own composition being staged by the celestial nymphs; go then to the place of concert on the banks of the Ganges and get the audience seated", And the seating of all beings mortal and immortal has been arranged for by me. And here,—

Comes this very way, in deference to Valmiki, my noble brother who. though living in the hermitage of a kingdom, observes the rigorous vow of a hermit. (1)

मित—। 'अद्य खलु भगवता बाल्मीकिना कृतस्न एव भूतग्रामः' निखिला एव सृष्टिः 'स्वप्रभावेण' आत्मनस्तपोवलेन 'सन्निधापितः' उपस्थापितः आश्रमं प्रापित इत्यर्थ। किम्भूतो भूतग्रामः ?—'जङ्गमः' चलः स्थावरश्च अचलश्च अधिष्ठातृदेवतया। एवं कृतस्नो भूतग्रामः। मन्ये जङ्गमेषु ये महान्तः तेषु तस्य प्रभावो न प्रसर्पति, ते नात्र समागताः—देवासुरनिकायेन' देवदानवसमूहेन ' तिर्य्यगुरगनायकनिकायेन नागेषु पशुपक्षिषु च ये प्रधानं तेषामपि समहेन 'सह कृत्स्न एव भूतग्राम.'। तत एव किं यूयमपि इह प्राप्ताः ?—केनापि कारणेन, यत् स एव भगवान् जानाति, अस्माकम् अस्मत्प्रजानाञ्च पृथगाह्वानं कृतम्। 'अस्माभिः सह सब्रह्मक्षत्त्पौरजानपदाः प्रजाः आहूय उपनिमन्त्र्य स्वप्रभावेण कृतस्न एव भूतग्रामः सन्निधापितः। 'स्वकृतिम्' आत्मना कृतं नाटकविशेषम्। 'प्रयुज्यमानाम्' अभिनीयमानाम्। 'आतोद्यस्थानं' वाद्यभूमिम्। समाजसन्निवेशः' समागतानां प्रेक्षकाणामुपवेशनम्। 'मर्त्त्यस्य' मरणशीलस्य अमर्त्त्यस्य चिरजीविनः॥ राज्येति। अन्वेति। अन्वयः—राज्याश्रमनिवासे अपि प्राप्तकष्टमुनिव्रतः आर्य्यः वाल्मीकिगौरवात् इत एव अभिवर्त्तते। व्याख्या—राज्यरूपे आश्रमे' यो निवासः स्थिति. तस्मिन् 'अपि प्राप्तम् अनुभूतं 'कष्ट' क्लेशकरं 'मुनिव्रतं येन तथाविधः 'आर्य्यः' रामः बाल्मीकौ' यत् 'गौरवं' बहुमानः तस्मात् हेतोः न तु रङ्गदर्शनलालसया 'इत एव' इहैव आतोद्यस्थाने 'अभिवर्त्तते' आगच्छति॥

Notes—1. खलु—This is here an expletive (वाक्यालङ्कारे) "खलु स्याद्वाक्यभूषायाम्" इत्यादि विश्वमेदिनी। 2. सब्रह्म &c.—ब्रह्म ब्राह्मणजातिश्च क्षत्रं क्षत्रियजातिश्च ब्रह्मक्षत्रे। पौराश्च जानपदाश्च पौरजानपदाः। ब्रह्मक्षत्राभ्यां सह सब्रह्मक्षत्राः। सब्रह्मक्षत्राः पौरजानपदा. याश्च ताः। Q. प्रजाः। 3 आहूय—ल्यप्। आह्वान here is निमन्त्रण। We have all been, specially invited. Why this special treatment for us is more than I know. The staging was intended for Rama and his subjects, the rest of the creation were to be witnesses only. Hence the difference in the treatment. 4. सदेवासुर &c.—निचीयते अस्मिन् इति नि+चि+अधिकरणे निकायः a group, देवासुराश्च तिर्य्यगुरगनायकाश्च। तेषां निकायः समूहः देवासुरतिर्य्यगुरगनायकनिकायः। तेन सह। Qual. भूतग्रामः 5. भूतग्रामः—भूतानां समूह इति भूत+ग्रामच। This is by the Varttika "गुणादिभ्यो ग्रामच् वक्तव्यः" गुणादि being आकृतिगण। Certain lexicographers who come much later than Katyayana have ignored this Varttika and taken ग्राम as a प्रातिपदिक meaning समूह when final in a षष्ठी तत्पुरुष। Thus "शब्दादिपूर्वो वृन्देऽपि ग्रामः" इति हैम। 6. स्वप्रभावेण—No invitation was issued to these. 7 आतोद्यस्थानम्—आ सम्यक् तुद्यते ताड्यते इति आ+तुद्+ण्यत् कर्म्मणि=आतोद्यम् musical instrument 8. राज्याश्रम &c—The राज्य in the verse is meaning less. If it is an आश्रम then कष्टमुनिव्रत is expected. आश्रमनिवास is inseparable from मुनिव्रत। Thus अपि has no force. If we construe अपि with आर्य्य below, the criticism is avoided, thus राज्याश्रमनिवासे प्राप्तकष्टमुनिव्रतः आर्य्यः अपि &c. But the दुरान्वय becomes glaring in that case. Perhaps दूरान्वय is better than असङ्गति। राज्य is often identified with आश्रम। cp. "राज्याश्रममुनिं मुनिः"—*Raghu* I.

(*ii*) (ततः प्रविशति रामः) ।

रामः—वत्स लक्ष्मण, अपि स्थिता रङ्गप्रेक्षकाः ।

लक्ष्मणः—अथ किम् ?

रामः—इमौ पुनर्वत्सौ कुशलवौ चन्द्रकेतुसदृशौ स्थानप्रतिपत्तिं लम्भयितव्यौ ।

लक्ष्मणः—प्रभुस्नेहप्रत्ययात् तथैव कृतम् । इदं तु आस्तीर्णं राजासनम् । उपविशत्वार्यः ।

रामः—(उपविशति) ।

लक्ष्मणः—प्रस्तूयतां भोः ।

(*Then enters Rama*).

Rama—Dear Lakshmana, are the spectators of the acting seated ?

Lak.—What else ? (yes).

Rama—But this two, dear Kusa and Lava, have to be accorded the honour of seats like that of Chandraketu.

Lak.—That is just what has been done by me from a knowledge of (lit—through reliance on) Master's affection (for them). Here again is the royal seat spread out ; let my noble brother sit down.

Rama—(*Sits down*).

Lak.—Let the play begin, ho !

मित—। 'रङ्गः' नृत्यम् । अत्र नृत्यमित्यु पलक्षणं समग्रस्य अभिनयकर्मणः । तस्य 'प्रेक्षकाः' । "नृत्ये रणे खले रागे रङ्गः क्लीवे ऽपुनापि" इति त्रिकाण्डशेषः । स्थिता.' 'आसीनाः' । 'स्थानस्य' आसनस्य 'प्रतिपत्तिः' गौरवम् । विशिष्टासनपरिग्रहात् यत् गौरवं तत् । 'लम्भयितव्यौ' प्रापयितव्यौ । प्रभोः स्नेहः' । तस्मिन् 'प्रत्ययः' तस्मात् [हेतौ ५मी] ।

Note—1. रङ्गः &c.—रज्यन्ते जना अस्मिन् इति रञ्ज+घञ् अधिकरणे रङ्गः dance , hence *music* in general. It also means the theatre and hence, by transference, the audience. Thus "आलिखित इव सर्वतो रङ्गः"—*Sakuntala* 2. लम्भयितव्यौ—लभ +णिच् +तव्य कर्मणि। The root is here गत्यर्थ। Hence, before णिच्—कुशलवौ (कर्त्ता) स्थानप्रतिपत्तिं लप्स्येते। Attaching णिच—त्वं कुशलवौ (कर्म) स्थानप्रतिपत्तिं लम्भयिष्यसि। This is by the rule गति बुद्धि। Changing the voice त्वया कुशलवौ (उक्तकर्म) स्थानप्रतिपत्तिं लम्भयिष्येते (=लम्भयितव्यौ)। See also our Kirat I sl. 15. and under "लम्भयेत्"—Kirat XI sl. 57.

(*iii*) (प्रविश्य सूत्रधारः)—भो भो भगवान् भूतार्थवादी प्राचेतसः सजङ्गमस्थावरं जगदाज्ञापयति—यदिदमस्माभिरार्षेण चक्षुषा समुद्वीक्ष्य पावनञ्च करुणाद्भूतरसञ्च किञ्चिदुपनिबद्धं तत्र कार्य्यगौरवादवधातव्यम्—इति।

रामः—एतदुक्तं भवति—साक्षात्कृतधर्माणो महर्षयः। तेषामृतसाराणि परीरजांसि प्रज्ञानानि न क्वचिद्व्याहन्यन्ते इत्यनभिशङ्कनीयानि—इति।

(*Entering*) Stage-Manager—Ho ! Ho ! The Worshipful Prachetasa, who speaks only of matters that are true, thus commands the world including the movable and the immovable—"Owing to the gravity of the matter, attention has to be paid to that something, which is sanctifying and at the same time marvellous and pathetic in sentiment and which has been composed by me after having ascertained it with my saintly vision."

Rama—This is what is being said—"The great seers have direct perception of the nature of things. Their knowledge transcends the range of passion, is immutable like nectar, is now here falsified, hence should never be doubted."

मित्र—। 'भूतार्थं यथार्थं वदति' यः सः सत्यवचनः इत्यर्थः। 'आर्षेण' ऋषिजनोचितेन 'चक्षुषा' न हि प्राकृतजनवत् चर्मणोद्वीक्ष्य सम्यगुद्वीक्ष्य वस्तुमामन्तरलकमपि ज्ञानालोकेन दृष्टा। 'करुण' च अद्भुतः' च द्वौ 'रसौ' यस्मिन् तत्। 'कार्य्यस्य' प्रस्तुतस्य कर्मणः 'गौरवात् गुरुत्वात् हेतोः। 'अवधातव्यम्' अवधानं कत्तव्यम्। 'एतदुक्तं भवति' एष भगवद्वचनस्य निष्कर्षः। 'साक्षात्कृतः' ज्ञानमयेन चक्षुषा प्रत्यक्षीकृतः' धर्मः द्रव्यधर्मः वस्तुतत्त्वमित्यर्थः येः ते। 'अमृतम्' इव 'साराणि' स्थिराणि अनन्यथाभावीनि इत्यर्थः। 'रजसः' कामादिकस्य 'पराणि' रजोगुणातीतानि शुद्धतत्त्वमयानि। 'प्रज्ञानानि' प्रकृष्ट-ज्ञानानि। न 'व्याहन्यन्ते' न अन्यथाभवन्ति। 'अनभिशङ्कनीयानि निःशङ्क' ग्राह्याणि। यदुच्यते महर्षिणा, तत सत्यं मन्यतां भवन्तः इति भावः॥

Notes.—1. भूतार्थ &c.—अर्थ is अभिधेय sense. भूत is सत्य true; "भूतं सत्योपमानयोः" इत्यादि हैमः। भूतः अर्थः भूतार्थः true in its sense, भूतार्थ + वद् + णिनि कर्त्तरि ताच्छील्ये। 2. समुद्वीक्ष्य—Having fully observed, thoroughly examined &c. 3. साक्षात् &c.—धर्म is स्वभाव nature, "धर्म्मः पुण्यः श्रमे न्याये स्वभावाचारयोः क्रतौ" इत्यादि विश्वः। साक्षात् is प्रत्यक्ष directly perceived. An अव्यय। असाक्षात् साक्षात् सम्पद्यमानः कृतः इत्यर्थे साक्षात्+कृ+क्त कर्मणि साक्षात्कृतः गतितत्—Now see Tika. बहु। अन् समासान्त। 4. अमृत &c.—सारयन्ति कालमतिवाहयन्ति इति सृ+णिच् अच् कर्त्तरि=साराणि that which defies time, imperishable &c. Now see Tika 5. परोरजांसि—Those that are beyond the sphere of action of रजोगुण, i. e, unrestrained by passion and prejudices, Comp also परःसहस्राः (I sl. 15) for सुट् etc. 6. प्रज्ञानानि—प्रकृष्टानि ज्ञानानि insight.

(*iv*) नेपथ्ये—हा अज्जउत्त हा कुमार लक्खण एआइणिं मन्दभाइणिं असरणं अरण्णे आसण्णप्पसववेअणं क्रूदाखं सावदा

मं अहिलसन्ति। ता दाणों मन्दभाइणों भाईरहीए अत्ताणअं णिक्खवेमि [हा आर्य्य पुत्र, हा कुमार लक्ष्मण, एकाकिनीं मन्द-भागिनीम् अशरणाम् अरण्ये आसन्नप्रसववेदनां हताशां श्वापदा माम् अभिलषन्ति। तदिदानीं मन्दभागिनीं भागीरथ्यामात्मानं निक्षिपामि]।

लक्ष्मणः (आत्मगतम्)—कष्टं वत अन्यदेव किमपि।

सूत्रधारः—

विश्वम्भरात्मजा देवी राज्ञा त्यक्ता महावने।
प्राप्तप्रसवमात्मनं गङ्गादेव्यां विमुञ्चति ॥२॥

(इति निष्क्रान्तः)।

In The Tiring Room—Alas, husband! Alas, prince Lakshmana! Beast of prey are longing after me, the ill stared, alone as I am in this wilderness without a protection with the final throes near and with all hopes gone. I shall therefore, luckless as I am, throw myself into the Bhagirathi.

Lak.—(*To himself*)—O woe! Alas! This is indeed something quite different.

Manager—The queen, the daughter of Visvambhara (Earth), abandoned by the king in deep forest, throws herself into the divine Ganges with the pangs of delivery on (2).

(*Exit*)

मित—। हताः' गता 'आशा' जीविताशा यस्याः ताम्॥ 'बत' इत्यव्ययं खेदे। अन्यत् तत् परिचिन्तितमस्माभिः ततो भिन्नम्॥ विश्वेति॥ अन्वयः—राज्ञा महावने त्यक्ता विश्वम्भरात्मजा देवी प्राप्तप्रसवम् आत्मानं गङ्गादेव्यां विमुञ्चति। व्याख्या—सुगमा। 'विश्वम्भरा' इति साभिप्रायम्॥

पतिरेव पत्नीं भरति। इयन्तु परित्यक्ता समर्था पुनरस्य माता विश्वमेव भरति। तथापि इय भरणकर्त्तारमलभमाना हताशा आत्मनं जले पातयति इत्यभिप्रायः।

Notes—1. हताशाम्—She has lost all hope. Her hurband has abandoned her, her mother, though close by takes no notice of her. Who else would save her ? None Hence in despair (हताशा) she says, भागीरथ्यामात्मानं निक्षिपामि। 2. विश्वम्भरा &c —विश्वं बिभर्त्ति इति विश्व + भृ + खच् कर्त्तरि स्त्रियां = विश्वम्भरा the allsustainer, i e., the earth. Now see Tika. 3. गंगादेव्याम्—Taken along with भागीरथ्यामात्मानं निक्षिपामि above the देवी seems misplaced देवीत्व should be in the back-ground and नदीत्व made prominent गङ्गाम्भसि seems to save the purpose.

(*v*) रामः—हा देवि, हा देवि। लक्ष्मण, अवेक्षस्व !

लक्ष्मणः—आर्य्य, नाटकमिदम्।

रामः—हा देवि दण्डकारण्यवासप्रियसखि, एष ते रामात् दैवदुर्विपाकः।

लक्ष्मणः—आर्य्य दृश्यतां तावत् प्रबन्धार्थः।

रामः—एष सज्जोऽस्मि वज्रमयः।

(ततः प्रविशति उत्सङ्गितैकैकदारकाभ्यां पृथ्वीभागीरथीभ्याम् अवलम्बिता सीता)।

रामः—वत्स लक्ष्मण: असंविज्ञातमनिबन्धनमन्धतमसमिव प्रविशामि धारय माम्।

Rama – Ha, my Queen! Ha, my Queen! Lakshmana, go and see.

Lak.—Noble brother, this is a play.

Rama—Alas Queen ! Dear companion of my sojourn in the forest of Dandaka, such has been the evil turn of fortune through Rama.

Lak.—Noble brother, first see the matter of the composition.

Rama—Here, my adamantine self is ready.

(Then enters Sita supported by Prithi and Bhagirathee with a boy in the lap of each).

Rama—Dear Lakshmana, hold me ; I am as if entering a blinding gloom, unaccountable (अनिबन्धन) and never before experienced (असंबिज्ञातम्) ।

मित—। 'अवेक्षस्व पश्य। द्रुतं गच्छ कालोचितञ्च कुरु इत्यर्थः। 'दैवस्य' भाग्यस्य 'दुर्विपाक ' बिषमः परिणामः रामात् ॥ 'तावत्' इत्यव्ययमवधौ। प्रथमं 'प्रबन्धस्य' अभिनीयमानस्य काव्यस्य 'अर्थः' वस्तु 'दृश्यतां पश्चात् बिचारय शुभं जातम् अशुभं वा ॥ 'उत्संगितः' क्रोडे कृतः एकैकः दारकः' बालः याभ्यां ताभ्याम्। असंबिज्ञातम्' अननुभतपूर्वम् अज्ञातकारणम् अन्धतमसम् ॥

Notes—1 दण्डकारण्य &c.—Com. महारण्यवासप्रियसखि, Act1. para lxv. 2. तावत्—Here it means अवधि time-limit. "यावत् तावच्च साकल्येऽवधौ मानेऽवधारणे" इत्यमरः। The time-limit is till the acting is over. 3. उत् &c.—एकः एकः एकैकः। बोप्सायां द्विरुक्तिः। बहुव्रीहिबद्भावः। Now बहु—see Tika. 4. असंबिज्ञातम् —सम्यक् विज्ञातमिति सम्+वि+ज्ञा+क्त कर्मणि। न तथा। I have never experienced this sort of thing before. 5. अनिबन्धनम् —निबध्यते अनेन इति नि+बन्ध+ल्युट् करणे निबन्धनम् cause. अविद्यमानं निबन्धनमस्य &c. I do not know whence it comes. 6. अन्धतमसम्—अन्धं तमः अन्ध+तमस्+अच् समासान्त by the

rule "**अवसमन्धेभ्यस्तमसः**' । This emotion is owing to the sudden apparition of **सीता** ।

(*vi*) देव्यौ—समाश्वसिहि कल्याणि दिष्ट्या वैदेहि वर्द्धसे ।
अन्तर्जलं प्रसूतासि रघुवंशधरौ सुतौ ॥३॥

सीता (समाश्वस्य)—दिट्ठिआ दारए पसूदम्हि । हा अज्जउत्त [दिष्ट्या दारकौ प्रसूतास्मि । हा आर्य्यपुत्र] । (इति मूर्च्छति) ।

लक्ष्मणः (पादयोर्निपत्य)—आर्य्य दिष्ट्या वर्द्धामहे कल्याणप्ररोहो रघुवंशः । (विलोक्य) हा हा कथं क्षुभितबाष्पोत्पीड़निर्भरः प्रमुग्ध एवार्य्यः (इति वीजयति) ।

Goddesses—Blessed Vaidehi, be composed, luckily you prosper. Under water you are delivered of two boys, the up-holders of the race of Raghu, (3)

Sita (*Recovering*)—Luckily I am delivered of two boys ! Alas, husband ! (*Faints away*),

Lak.—(*Falling at the feet*)—Noble brother, luckily do we prosper, Raghu's race has now got blessed offshoots. (*Observing*) Alas ! Alas ! How so ! Powerless under an out-burst of tears that have been stirred, my noble brother has indeed fainted away. (*Fans him*).

मित—। समाश्वसिहीति । अन्वयः—कल्याणि वैदेहि समाश्वसिहि, दिष्ट्या वर्द्धसे । अन्तर्जलं रघुवंशधरौ सुतौ प्रसूता असि । व्याख्या—सुगमा । 'अन्तर्जलं' जले । विभक्त्यर्थेऽव्ययीभावः ॥ आर्य्यपुत्रेण न दृष्टौ दारकौ इति दुःखेन प्राह—हा आर्य्यपुत्र इति ॥ 'कल्याणः' मंगलमय 'प्ररोहः' अङ्कुरः अस्य । 'क्षुभितः' उद्वेलः यः 'बाष्पोत्पीड़ः' अश्रुप्रवाहः तेन 'निर्भरः' विह्वलः । 'प्रमुग्धः' प्रमोह गतः ॥

Notes—1. **अन्तर्जलम्**—A **नित्यसमास** of the **अव्ययीभाव** class The constituents are **अन्तर्**, an **अव्यय** meaning **मध्ये**, and **जल** ।

But the 'वाक्य must be अस्वपद, i, e., it must not contain both अन्तर and जल। Hence say जले इति अन्तर्जलम् or अन्तर्जले। Comp.—"अन्तर्गिरि" in Kirat I. 2. हा आर्य्यपुत्र—Comp. किं वा मया प्रसुतया न परिचुम्बितमार्य्यपुत्रेण"—Act III. 3. कल्याणप्ररोहः &c.—This explains the joy of लक्ष्मण। It has been so long a permanent source of grief to Rama's three brothers that with Rama's loss of progeny the direct line of the solar race goes unrepresented. Comp. "अप्रतिष्ठे रघुज्येष्ठे का प्रतिष्ठा कुलस्य नः" &c., Act V. sl. 25.

(*vii*) पृथ्वी—वत्से समाश्वसिहि समाश्वसिहि।

सीता (आश्वस्य)—भअवदि का तुमं इअं अ [भगवति का त्वम् इयञ्च]।

पृथ्वी—इयं ते श्वशुरकुलदेवता भागीरथी।

सीता—भअवदि णमो दे [भगवति, नमस्ते]।

भागीरथी—चारित्रोपचितां कल्याणसम्पदमधिगच्छ।

लक्ष्मणः—अनुगृहीताः स्मः।

भागीरथी—इयं ते जननी वसुन्धरा।

सीता—हा अम्ब एरिसी अहं तुए दिट्ठा [हा अम्ब, ईदृशी अहं त्वया दृष्टा]।

पृथ्वी—एहि वत्से एहि पुत्रि। (इति सीतामालिङ्ग्य मूर्च्छति)।

PRITHVI—Take heart, my child, take heart.

SITA—(*Coming round*)—Worshipful lady, who you are and this one ?

PRITHVI—This is Bhagirathi, the guardian deity of your father-in-law's house.

SITA—Salutation to thee, worshipful (deity).

BHAG—May you attain the profusion of blessings by your character.

LAK—We are favoured.

BHAG—This is your mother Vasundhara.

SITA—Alas mother ! I am seen by thee in this plight !

PRITHVI—Come darling ! Come daughther ! (*Faints having embraced Sita*).

मित—"चारित्रं" चरित्रं पातिव्रत्यादिभिः पूतं शीलम् तेन 'उपचितां' वर्द्धिताम् अर्जितामित्यर्थः। 'कल्याणानां 'सम्पत्' राशिः। ताम्।

Notes.—1. अनुगृहीताः—अनु + ग्रह + क्त कर्मणि। Favoured. They were favoured, for Sita's attainment of कल्याणसम्पद् through चारित्र will give them scope to take back Sita. Then Bhagirathi's uttering was hailed by Lakshmana—the spectator. See also next para.

(*viii*) लक्ष्मणः (सहर्षम्)—दिष्ट्या पृथ्वीभागीरथीभ्यामभ्युपपन्ना आर्या।

रामः—(अवलोक्य)—करुणतरं खल्वेतद्वर्त्तते।

भागीरथी—विश्वम्भरापि नाम व्यथते इति जितमपत्यस्नेहेन। यद्वा सर्वसाधारणो ह्येष मोहग्रन्थिरन्तश्चरस्तेतनावतामनुपप्लवः संसारतन्तुः।

वत्से वैदेहि (?), देवि भूतधात्रि समाश्वसिहि।

पृथ्वी (आश्वस्य)—देवि, सीतां प्रसूय कथमाश्वसिमि ?

एकश्चिरं राक्षसमध्यवासस्त्यागोद्वितीयश्च सुदुःसहोऽस्याः। (४—)

भागीरथी—

को नाम पाकाभिमुखस्य जन्तोर्द्वाराणि दैवस्य पिधातुमीष्टे ॥४॥

LAK. (*With joy*)—O luck ! Noble sister has been succoured by prithvi and Bhagirathi

RAMA (*Observing*)—This is really supremely pathetic.

BHAG—Maternal affection has triumphed for even Visvambhara grieves. Or rather this unseverable bond of delusion—a chain to the world that operates on the heart of sentient being—is common to all. Cheer Up, child Vaidehi ; goddess Bhutadhatri, Cheer up.

PRITHVI (*Having recovered*)—Goddess, how can I cheer up after having given birth to Sita ?

First her long stay is the midst of Rakshasas ; second the abandoment , both are extremely unbearable (to me) (4)

BHAG—Who ever can close the gates of the fate of a creature when it is about to mature ? (4)

मित—। अभ्युपपन्ना अनुगृहीता साहाय्येन इति शेषः ॥ 'करुणतरम्' इति करुणम् ॥ 'एषः अनुपप्लवः' अभेद्यः मोहग्रन्थिः' मायावन्धनं चेतनावतां' प्राणभृताम् 'अन्तश्चरः' हृदये व्यापारवान् 'संसारिणां वन्धनरज्जुः 'सर्वसाधारणो हि' अतएव विश्वम्भरापि व्यथते ॥ सीतां प्रसूय' तस्या दुःसहेन दुःखेन पीड़िता 'कथमाश्वसिमि'। एक इति। अन्वयः—अस्याः चिरं राक्षसमध्यवासः एकः, त्यागश्चद्वितीयः सुदुःसहः। व्याख्या—'अस्याः' सोतायाः "चिर" दोर्घकालं राक्षसानां मध्ये वासः एक· सुदुःसहः क्षोभो मम, 'त्यागश्च' भर्त्रा 'द्वितीयः' सुदुःसहः क्षोभः। कथमाश्वसिमि। अन्वयः—जन्तोः पाकाभिमुखस्य दैवस्य. द्वाराणि पिधातुं को नाम ईष्टे। व्याख्या—'जन्तोः' प्राणिनः 'पाकाभिमुखस्य 'दैवस्य' नियतेः द्वाराणि मार्गान् 'पिधातु' रोद्धुं को नाम ईष्टे प्रभवति। न कोऽपि। सीताया भाग्याधीनं सर्वं जातम् अलमनुशोचनया ॥

Notes.—1. दिष्ट्या &c.—लक्ष्मण is glad that Sita is helped by Prithvi and Bhagirathi. Thus they had hopes of their कुलप्रतिष्ठा in Lava and Kusa, 1. a करुणतरम्—Pathetic because

this happens while I am living and reigning. The stage-direction is defective. Rama is in a swoon ("प्रमुग्ध एवास्य:" —para vi). Better say आश्वस्य अवलोक्य। 2. जितम्—जि here means either उत्कर्षप्राप्ति or अभिभव। *Trans*—'has triumphed' or 'rules supreme''. 3. वत्से वैदेहि etc.—This is defective. Sita has already recovered (see para vii, सीता आश्वस्य &c.).

(*ix*) पृथ्वी—भागीरथि, सदृशमुक्तम्। युक्तमेतद्वा रामभद्रस्य ?

न प्रमाणीकृतः पाणिर्बाल्ये बालेन पीडितः।
नाहं न जनको नाग्निर्नानुवृत्तिर्न सन्ततिः ॥५॥

सीता—हा अज्जउत्त सुमराविदम्हि [हा आर्यपुत्र स्मारितास्मि]।

पृथ्वी—आः कस्तवार्यपुत्रः ?

सीता (सलज्जास्रम्)—जहा वा अम्बा भणादि [यथा वा अम्बा भणति]।

रामः—अम्ब पृथ्वि, ईदृशोऽस्मि।

भागीरथी—भगवति वसुन्धरे, शरीरमसि संसारस्य, तत् किमसंविदानेव जामात्रे कुप्यसि ?

घोरं लोके विततमयशो या च वह्नौ विशुद्धि-
र्लङ्काद्वीपे कथमिव जनस्तामिह श्रद्दधातु।
इक्ष्वाकूणां कुलधनमिदं यत् समाराधनीयः
कृत्स्नो लोकस्तदतिगहनं किं स वत्सः करोतु ॥६॥

तथाप्येष तेऽञ्जलिः !

PRITHVI—Well said (lit.—Suitably replied), Bhagirathi. For Ramabhadra again, has this been proper ?

No heed was paid to the hand taken in childhood by the child, nor to myself, nor to Janaka, nor to Fire, nor to devoted following, nor to progeny. (5)

SITA—Alas ! I am reminded of husband.

PRITHVI—Who is thy husband, hey ?

SITA—(*With shame and tears*)—Or (it is really) as mother says.

RAMA—Mother Prithvi, so have I become.

BHAG—Worshipful Vasundhara, you are the body of this world, then why, as if in ignorance, are you angry with your son-in-law ?

A dire infamy had spread among the people. How indeed could people here have faith in the purification in fire that happened in the island of Lanka ? The treasure of the race of Ikshavaku is—that people have all to be served That is a very hard task , what could that child do ? (6).

Still here is my fold ot plams (Or—here are my palms folded) to you.

मित— । नेति । अन्वयः—वाल्ये वालेन पीडितः पाणिः न प्रमाणीकृतः, न अहम् न जनकः, न अग्निः, न अनुवृत्तिः, न सन्ततिः । व्याख्या—सीतापरित्यागे वाल्ये वालेन पीडितः 'परिणयविधौ' गृहीतः 'पाणिः' सीतायाः करः 'न प्रमाणीकृतः' कर्त्तव्यनिर्णेतृत्वेन न चिन्तितः । वाल्याद्वियं मे सहचारिणी, हृदयमस्या जानामि नेयं परित्यागमर्हति इत्तेव मन्तव्यं स्यादित्यर्थः । 'न अहं पृथिवी प्रमाणीकृता । नरचारित्रसक्षिणी अहमपि न पृष्ठा—सीता त्याज्या न वा इति । 'न जनकः' विज्ञः श्वशुरः प्रमाणीकृतः । 'न अग्निः' नरचरित्रसाक्षी वह्निरपि न प्रमाणीकृतः । 'न अनुवृत्तिः वनेऽपि अनुगमनम् । न सन्ततिः' गर्भस्था प्रमाणीकृता । अस्या विनाशे सन्ततिलोपः स्यात् तन्नेयं त्याज्या इत्येव मन्तव्यं स्यात् ।। कस्तव आर्य्यपुत्रः, विधवा इव अनाथासि इत्यर्थः । 'शरीरमसि संसारस्य' अतएव सर्वं जनासि तथापि असंविदाना' अजानती 'इव किं जामात्रे कुप्यसि' ।

घोरमिति। अन्वयः—लोके घोरम् अयशः विततम्। या च लङ्काद्वीपे वह्नौ विशुद्धिः ताम् इह कथं जनः श्रद्दधातु। इदम् इक्ष्वाकूणां कुलधनं यत् कृत्स्नो लोकः समाराधनीयः। तत् अतिगहनम्। स वत्सः किं करोतु। व्याख्या—'लोके जगति 'घोरम् अयशो विततम्' प्रसृतम्'। ननु वह्नौ विशुद्धा सा कथमयशः इत्याह—'या च या पुनः दूरे 'लङ्काद्वीपे वह्नौ विशुद्धिः ताम्' तस्याम् इह' अयोध्यायां 'कथं जनः श्रद्दधातु विश्वसितु। इत्थं सति अविश्वासे किं कर्त्तव्यमित्याह 'इदम् इक्ष्वाकूणां' रघुणां 'कुलस्य धनं' सर्वस्वभूतं यत् कृत्स्नः लोकः' 'निखिलाः प्रकृतयः 'समाराधनीय' रञ्जनीयः। 'तत्' सर्वलोकरञ्जनम् 'अतिगहनं सुदुस्करम्। स वत्सः' रामः किं करोतु' सुकरं नान्यत् किञ्चिदासीत् येन सर्वलोक—रञ्जनं स्यात्, दुस्करमपि सीतापरित्यागमेवाकरोत्॥

Notes —1. **नाहम्**—This is because of two reasons. First she is Rama's mother-in-law, second because the Earth is one of the witnesses who sees all that people do. Comp **'आदित्य-चन्द्रावनिलोऽनलश्च द्यौर्भूमिरापो हृदयं यमश्च। अहश्च रात्रिश्च उभे च सन्ध्ये धर्मश्च जानाति नरस्य वृत्तम्॥''** 2. **आर्य्यपुत्रं स्मारिता**—grammar see under **तमेव स्मारिता वयम्**, VI, sl. 34 3. **कस्तवार्य्यपुत्रः**—You have no longer a husband now. Forget that you had one. 4. **असंविदाना—सम+विद+शानच् कर्त्तरि संविदाना** aware It is used intransitively (of **कर्मविवक्षा**), hence the **आत्मनेपद** by **'समो गमृच्छिप्रच्छिस्वरत्यर्त्तिश्रु विदिभ्यः''** 5 **जामात्रे—"क्रियाग्रहणमपि कर्त्तव्यम्" इति सम्प्रदाने चतुर्थी** as in **पत्ये शेते। "क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः"** does not apply If it did, Panini would have written **यस्मै कोपः** and not **यं प्रति कोपः**—so not **यस्मै कोपः।** 6. **तामिह** &c.—**श्रत्** is an **अव्यय** meaning **भक्ति।** It is treated like an **उपसर्ग।** Hence **श्रत्+धा+लोट तु। श्रत्** is the **कर्म** of **धा**, consequently **ताम्** here is irregular, should be **तस्याम्।** 7. **तथापि** &c —Ganga tries to appease her wrath.

(x) लक्ष्मणः—अव्याहतान्तःप्रकाशा हि देवता भूतेषु विशेषेण गंगा ।

रामः—अम्ब अनुवृत्तस्त्वया भगीरथगृहे प्रसादः ।

पृथ्वी—देवि नित्यंप्रसन्नास्मि वः किन्त्वापातदुःसहः शोकावेगः अपत्यस्य ; न पुनर्न जानामि सीतास्नेहं रामभद्रस्य !

दह्यमानेन मनसा दैवाद्वत्सां विहाय सः ।
लोकोत्तरेण धैर्येण प्रजापुण्यैश्च जीवति ॥७॥

राम—सकरुणा हि गुरवो गर्भरूपेषु ।

LAK —In the matter of beings—god, specially Ganga, are of unfailing inner illumination ('i. e.' they see everything in its proper light).

RAMA—Mother, unceasing has been thy favour to the house of Bhagirathi.

PRITHVI—Goddess, I am always gracious towards (those that are) your own , but the shock of an offspring's grief is hard to withstand at the time of the visitation. It is, however, not that I do not know of Ramabhadra's love for Sita

He having abandoned my darling through fate, lives, with a burning heart, through his superhuman fortitude and the merits of his subjects. (7)

RAMA—Superiors are indeed kind to those that are like children unto them.

मित—। 'अव्याहतः' अप्रतिहतः 'अन्तः' मध्ये मनसि इत्यर्थं 'प्रकाशः स्फुरणं यस्या सा। यद्वा—अव्याहतः अनन्यथाभूतः 'अन्तःस्थितस्य' भूत-मनोगतस्य 'प्रकाशः स्फुरणं यस्याः सा। या हि भूतानां मनोगतं तत्वतः पश्यति सा इत्यर्थः॥ 'अनुवृत्तः' सातत्येन दर्शितः। उपसर्गवशात् वृतिः सकर्मकः। 'नित्यं प्रसन्नास्मि वः' युस्मभ्यम् ; अअखिलवन्धमं वाहुल्यमेव

ते। 'आपाते' आविर्भावकाले 'दुःसहः'। दह्यमानेनेति। अन्वयः—दैवात् वत्सां विहाय दह्यमानेन मनसा सः लोकोत्तरेण धैर्येण प्रजापुण्यैश्च जीवति। व्याख्या—'दैवात्' दैवकृतात् दुर्योगात् हेतोः 'वत्सां' सीतां 'विहाय परित्यज्य दह्यमानेन' साक्षात् दाहमिव अनुभवता 'मनसा' सह सत्यपि मरणकारणे इत्यर्थः रामभद्रः लोकोत्तरेण अलौकिकेन धैर्येण' हेतोः प्रजानां पुण्यैश्च' हेतुभिः 'जीवति'॥ गर्भः अपत्यम्। 'गर्भः रूपम्' आकृतिः येषां तेषु विषये। पुत्रतुल्योऽहम् अस्या अतोऽनुकम्पते मां भगवती पृथ्वी इत्यर्थः॥

Notes—1. अव्याहत &c.—For समास see टीका। They look within themselves (प्रणिधान) and have not to seek information outside like ordinary mortals. Their inner self is then illumined (अन्तःप्रकाश) and reveals to them whatever they want to know, Comp. "सोऽपश्यत् प्रणिधानेन सन्ततिस्तम्भकारणम्। भावितात्मा भुवो भर्त्तुरथनं प्रत्यबोधयत्॥"—*Raghu* This is said because गङ्गा has spoken the truth. How could she know ? She knew unerringly (अव्याहत) by प्रणिधान all that passed within Rama when he abandoned सीता। 2. देवि नित्यम् &c —This is because भागीरथी has folded her palms to win Prithvi's favour. Why supplication ? I am always pleased with you all. 3. आपात &c —The शोकावेग of the अपत्य is दुःसह to the mother. Sita weeps (शोकावेग), how can I bear it ? 3. दह्यमानेन &c.—दहेः कर्मणि शानच्। All this happened within a few hours of her exile "He is being consumed with grief, merits of his people have kept him alive &c. are, to say the least, premature at this stage.

(*xi*) सीता (रुदती कृताञ्जलिः)—णेदु मं अत्तणो अंगेसु विलअं अम्बा [नयतु मामात्मनः अंगेषु विलयम् अम्बा]।

रामः—किमन्यद्ब्रवीतु ।

भागीरथी—शान्तम् । अविलीना संवत्सरसहस्रं भूयाः ।

पृथ्वी—वत्से तावदपेक्षणीयौ ते पुत्रौ ।

सीता—अणाधम्हि किं एदेहिं [अनाथास्मि किमेताभ्याम्] ।

रामः—हृदय वज्रमयमसि ।

भागीरथी—कथं त्वं सनाथाप्यनाथा ।

सीता—कीरिसं मम अभव्वाए सणाधत्तणं [कीदृशं मम अभव्यायाः सनाथत्वम्] !

देव्यौ—जगन्मङ्गलमात्मानं कथं त्वमवमन्यसे ।
आवयोरपि यत्सङ्गात् पवित्रत्वं प्रकृष्यते ॥८॥

SITA (*Weeping—With palm joined*)—Let mother lead me to mergence in her limbs.

RAMA—What else could she say ?

BHAG—Peace ! Mayest thou be not extinct for a thousand year ?

PRITHVI—Really my child, have regard for your infants.

SITA—I am helpless without a pratector myself , what is the use of these ?

RAMA—You are all adamant, oh heart.

BHAG—How having a husband, you are without a protector.

SITA—What like is this possession of a husband for me the inauspicious.

GODDESSES—Why do you despise your own self that is auspicious to the whole world and through contact with which the purity even of us is enhanced ? (8).

मित—। 'विलयः' अदृश्यता विनाश इत्यर्थः ॥ 'अपेक्षणीयौ' चिन्तनीयौ । आत्मार्थां अन्यार्थं वा यदि नास्ति जीवितस्पृहा तथापि अपत्यार्थं

अविलयो वाञ्छनीयस्ते इति भावः॥ 'अनाथा' अशरणा। आत्मानमपि रक्षितुमशक्ताहम् अपत्यार्थे, नास्ति मे अपेक्षा। 'अभव्यायाः' अलक्षणायाः। सुलक्षणा हि पतिसौभाग्यवती भवति अहं तु अलक्षणा। तस्मात् नास्ति मे भर्त्तृमतीत्वम्॥ जगदिति। अन्वयः—जगन्मङ्गलमात्मानं—यत्संगात् आवयोरपि पवित्रत्वं प्रकृष्यते—कथं त्वम् अवमन्यसे। व्याख्या—'जगतां मंगल' मंगलकरं भव्यजननम् 'आत्मान—यस्य' 'संगात्' साहचर्यात् 'आवयोरपि पवित्रयोरपि 'पवित्रत्वं प्रकृष्यते' प्रकर्षं लभते तादृशम् आत्मानं 'कथं त्वम् अवमन्यसे'—अभव्या इति गर्हसे॥

Notes—1. अंगेषु विलयम् &c.—Reminds of the विलय of सृष्टि in Brahman. विलय regression. 2 किमन्यत् &c —Her regression into Earth, her original source, is the only proper thing for her now. 3. अपेक्षणीयौ &c —For the sake of the infants at least you should avoid (विलय) regression. Affection for the infants ought to hold you on to the land of the living The reading अवेक्षणीयौ implies the question—"who is to guard your infants in your absence ?" This is easily answered saying "You two will do it." But अपेक्षणीयौ raises a real difficulty with regard to पुत्रः and has to be preferred. 4. अभव्यायाः—भवतीति भू+यत् कर्त्तरि भव्यम् blessing तत् अस्ति अस्य इति भव्य+अच् मत्वर्थे भव्या blessed, auspicious न भव्या अभव्या inauspicious The current reading is मन्दभागिन्याः। But मन्दभागिनी (unlucky) is not a निन्दा, while अभव्या certainly implies निन्दा। The verse following says—You are deprecating (अवमन्यसे) self, This shows that अभव्या is the better reading. Deprecation of self should always, be avoided, especially in your case. cp. "नात्मानमवसादयेत्"—*Gita* 6. जगन्मंगलम्—You bring blessings to the worlds, you connot be अभव्या। 6. प्रकृष्यते—प्र+कृष्+लट् ते कर्मकर्त्तरि or कर्मणि।

(*xxii*) लक्ष्मणः—आर्य श्रूयताम् ।

रामः—शृणोतु लोकः ।

(नेपथ्ये कलकलः)

रामः—अद्भुततरं किमपि ।

सीता—किं त्ति सअलं अन्तरिक्खं पज्जलदि [किमिति सकलमन्तरीक्षं प्रज्वलति] ।

देव्यौ—ज्ञातम् ।

कृशाश्वः कौशिको राम इति येषां गुरुक्रमः ।
आविर्भवन्ति तान्येव शस्त्राणि सह जृम्भकैः ॥९॥

नेपथ्ये—देवि सीते नमस्तेऽस्तु गतिर्नः पुत्रकौ हि ते ।
आलेख्यदर्शने देवो यथाह रघुनन्दनः ॥१०॥

LAK—Hear my noble brother.

RAMA—Let the people hear.

(A hubbub in the tiring room)

RAMA—Something very strange (perhaps).

SITA—Why is it that the whole vault of heaven is ablaze ?

GODDESSES—Found !

These very weapons including the Jrimbhakas, in the matter of which Krisasva, Kausika, Rama are the *gurus* in order, do now make their appearance. (8).

IN THE TIRING ROOM—Salutation be to thee, Queen Sita. Your sons are, to be sure, our destinations as king Raghunandan had commanded while inspecting the picture. (10)

मित—अद्भुततरम्' अत्यद्भुतम् । यद्वा—अद्भूतं दृष्टं ततोऽद्भुतं द्रष्टव्यम् इत्यतिशायने तरप् । कृशाश्व इति । अन्वयः—कृशाश्वः कौशिकः

रामः इति येषां गुरुक्रमः तान्येव शस्त्राणि जम्भकैः सह प्रादुर्भवन्ति। व्याख्या—'कृशाश्वः कौशिकः रामः इति येषां गुरुक्रमः' आचार्य्यपरम्परा 'तान्येव शस्त्राणि जम्भकैः सह प्रादुर्भवन्ति प्रकटीभवन्ति। तेषामेव भासा अन्तरीक्षं ज्वलति।। देवीति। सुगमम्।।

Notes—1. **शृणोतु लोकः**—I stand in no need to hear. I never doubted Sita's purity. It is the people (**लोकः**), her calumniators, who should listen. 2. **अन्तरीक्षम्—अन्तः मध्ये-स्वर्गमर्त्ययोः मध्ये ईक्ष्यते इति अन्तर+ईक्ष+घञ् कर्मणि अन्तरीक्षम्** the sky. 3. **प्रज्वलति**...Sita is startled. 4. **गुरुक्रमः—गुरूणाम् उपदेष्टॄणाम् क्रमः परम्परा।** 5 **देवि सीते** &c—As already remarked under Act VI. **चित्रदर्शनप्रस्तावे अस्त्राभ्यनुज्ञानम्** &c., the appearance of the weapons is not satisfactorily explained. **गति** is **आश्रय** resort, that which is reached. **गम्यते इयम् इति गम+क्तिन् कर्मणि।**

(*xiii*) सीता—दिट्ठिआ अत्थदेअदाओ प्फुरन्दि [दिष्ट्या अस्त्रदेवताः स्फुरन्ति]।

लक्ष्मणः—उक्तमासीदार्येण "सर्वथेदानीं त्वत्प्रसूतिमुपस्थास्यन्ति" इति।

देव्यौ—नमो वः परमास्त्रेभ्यो राघवस्य परिग्रहात्।
अनुध्यातैरुपेतव्यं वत्सयोर्भद्रमस्तु वः ।।११।।
रामः—क्षुभिताः कामपि दशां कुर्वन्ति मम साम्प्रतम्।
विस्मयानन्दसन्दर्भजर्जरा करुणोर्मयः ।।१२।।

SITA—Luckily it is the divine weapons a-glow.

LAK—It was declared by my noble brother—"They will now certainly serve your children."

GODDESSES—Salutation to you the best of weapons from Raghava's wife. You have to appear unto these dear boys when thought of. (Now) let blessings attend upon you. (II).

RAMA—The waves of grief, that have been raised, are now being broken into joy, wonder and apprehension (Or—volumes of joy and wonder) throwing me into an indescribable condition.

मित—। अस्त्राणां देवताः, अधिष्ठात्र्यः ॥ नम इति। अन्वयः—राघवस्य परिग्रहात् परमास्त्रेभ्य वः नमः। अनुध्यातैः वत्सयोः उपेतव्यम्। भद्रमस्तु वः। व्याख्या—व्याकुला निरुत्तरा सीता इति तदर्थं देव्यौ प्रतिवदतः—'राघवस्य' रामस्य 'परिग्रहात्' पत्न्याः सीतायाः सकाशात् 'परमास्त्रेभ्यः शस्त्रोत्तमेभ्यः 'वः' नमः। वयं युष्मभ्यं सीतायाः प्रतिप्रणाम ब्रूम इत्यर्थः। स्मृतैः भवद्भिः 'वत्सयोः' दारकायोरेतयोः 'उपेतव्यं' समीपमागन्तव्यम्। सम्प्रति 'भद्रं' मंगलम् 'अस्तु वः' प्रति निवर्त्तध्वमिति भावः॥ क्षभिता इति। अन्वयः—क्षमिताः करुणोर्मयः साम्प्रतं विस्मयानन्दसन्दर्भजर्जराः (सत्यः) मम कामपि दशां कुर्वन्ति। व्याख्या—'क्षभिताः' प्राप्तविक्षोभाः उत्ताला इत्यर्थः याः 'करुणोर्मयः' शोकतरंगाः ताः 'साम्प्रतम्' अधुना 'विस्मयेन' घटनाचक्रस्य अद्भुततया जातेन अद्भूततरेण 'आनन्देन' सीताया विपन्निवारणात् सुतसम्प्राप्तेश्च जातेन हर्षेण तथा 'सन्दर्भेण' अत परं किं वा स्यात् इति शङ्कया [यद्वा—'विस्मयस्य' च यः 'सन्दर्भः' प्रवाहः तेन] जर्जरा. विशीर्णाः सत्यः 'मम कामपि' अनिर्वचनीयां दशां कुर्वन्ति। विभिन्ना रसाः न जाने किमनुभवामि।

Notes—1. **विद्युत्पा** &c.—She was startled by the flashand is now assured that it is nothing but the flash of weapons that have come to be friend. 2. **नमो वः** &c.—**विद्यासागर** assigns this verse to **राम** reading **धन्या स्मो वः परिग्रहात्** in the

second quarter. But the greeting should come from सीता or her deputies. राम is only a spectator and has no voice in the matter. If we say that राम in his emotion forgets that it is a play and replies to the weapons, then the address *to* सीता made by the weapon goes unanswered which creates an awkward situation, because apart from the discourtesy of the thing, the weapons cannot retire unless dismissed by either सीता or by पृथवी or गङ्गा as Sita's deputies. We therefore prefer to give it to the goddesses, Sita was too unwell and upset to reply hereself. परिग्रह is पत्नी wife. "पत्नीपरिजनादानमूलशापाः परिग्रहाः इत्यमरः। परिगृह्यते इति परि + ग्रह + अप् कर्मणि। अपादाने ५मी—mental अपाय being assumed, भद्रमस्तु like शिवास्ते पन्थानः is a formula of dismissal. 3. विस्मय &c.—सम् + दृभ + घञ् भावे सन्दर्भ apprehension, array. दृभ meaning भय gives apprehension, when meaning रचन we have array' (प्रवाह); For समास see टीका। 4. करुण &c.—करुण is grief. करुणस्य ऊर्मयः waves of grief. This implies that राम compared his mind to a sea. He does not know the state of his mind (कामपि दशाम्) because there is करुणरस, अद्भुतरस (विस्मय), (आनन्द) and भयानक (सन्दर्भ) all mixed up in a confused mass.

(*xiv*) देव्यौ—रमस्व वत्से, रामभद्रतुल्यविदानों ते संवृत्तौ पुत्रौ।

सीता—भअवदीओ को एदाणां खवियोचिदं कम्म करिस्सदि [भगवत्यौ क एतयोः क्षत्रियोचितं कर्म करिष्यति]।

रामः—एषा वशिष्ठगुप्तानां रघूणां वंशवर्धिनी।

कष्टं सीतापि सुतयोः संस्कर्तारं न विन्दति ॥१३॥

भागीरथी—पुत्रि, किं तवानया चिंतया ? एतौ हि वत्सौ स्तन्यत्यागात् परेण भगवतो वाल्मीकेरर्पयिष्यामि, स एतयोः क्षत्त्रकृत्यं करिष्यति ।

यथा वशिष्ठांगिरसावृषी प्राचेतसस्तथा ।
जानकानां रघूणाञ्च वंशयोरुभयोर्गुरुः ॥१४॥

GODDESSES—Rejoice, child ! your boys have now become the equals of Ramabhadra.

SITA—Worshipful deities, who will render unto these the rites, befitting a Kshattriya ?

RAMA—Pity ! Even Sita, here, does not find an expurgator for her boys after having added to the race of the Raghu's—the race cared for by Vasishtha himself (13).

BHAG. Daughter, away with this thought [*Lit*—What have you to do with this thought]. I shall entrust these dear ones to worshipful Valmiki after they are weaned of of mother's milk , he will render unto them the rites for Kshattriyas.

Like the sages Vasishtha and Angirasha Prachestasa also is the *guru* of the races of the descendants of both Janaka and Raghu. (Or—As are the sages Vasishtha and Angirasa so is Prachetasa, and he is the *guru* of the race of the descendants of both Janaka and Raghu). (14).

मित—। 'रमस्व' मोदस्व ! 'क्षत्रियाणाम उचितं योग्यम् ॥ एषेति । अन्वयः—स्पष्टम् । वशिष्ठगुप्तानां रघूणां वंशवर्द्धिनी एषा सीतापि सुतयोः संस्कार्त्तारं न विन्दति । व्याख्या—अहो 'कष्टम्' दुःखम् । स्वयं 'वशिष्ठेन ब्रह्मपुत्रेण 'गुप्तानां रक्षितानां रघुवंशीयानां 'वंशवर्द्धिनी' अपत्येन कुलालंम्बन-भूता 'एषा सीतापि पुत्रयोः संस्कारं क्षत्रियोचितं संस्कारं करिष्यन्तं जनं न विन्दति' न लभते ॥ 'अनयोः' कः कर्म करिष्यति । 'क्षत्राणां कृत्यम्'

कर्म्म। होत्रं संस्कारमित्य॑ः॥ यथेति। अन्वयः—यथा ऋषी वशिष्ठांगिरसौ तथा प्राचेतसः उभयोः जनकानां रघूणाञ्च वंशयाः गुरुः। व्याख्या—सुगमा। 'आंगिरसः' शतानन्दः।

Notes—1. रामभद्र &c.—रामभद्रेण तुल्यौ। तादृशावेव वीरौ अस्वलाभात्। 2. वंश &c.—वंशं वर्द्धयति इति वंश+वृध+णिच्+णिनि —She who is under the care of the illustrious Vasishtha himself cannot find one to purify her sons. O Fate! 4. स्तन्यत्यागात् परेण—See Act III, para 5. 5. वशिष्ठ &c.—अंगिरस् was one of the mind-born sons of ब्रह्मन्। तस्य गोत्रापत्यं पुमान् इति अङ्गिरस्+अण् आङ्गिरसः। Refers to शतानन्द।

(*xv*) रामः—सुविचिन्तितं भगवत्या।

लक्ष्मणः—आर्य्य सत्यं विज्ञापयामि तैस्तैरुपायैर्वत्सौ कुशलवावुत्प्रेक्षे।

एतौ हि जन्मसिद्धास्त्रावुभौ प्राचेतसान्मुनेः।
वीरौ सम्प्राप्तसंस्कारौ वयसा द्वादशाब्दिकौ ॥१५॥

रामः—वत्स इत्येवाहं परिप्लवमानहृदयः सम्प्रमुग्धोऽस्मि।

पृथ्वी—एहि वत्स पवित्रीकुरु रसातलम्।

रामः—हा प्रिये लोकान्तरं गतासि।

Rama—Well thought of by the worshipful (Bhagirathi).

LAK—Noble brother, I tell thee the truth—From these clues I am thinking of dear Kusa and Lava.

For, these two had the weapons revealed at birth, both the heroes received purification from the sage Prachetasa and both have completed their twelfth year of birth [*Lit*...*by* birth have seen their twelfth monsoon], (15).

RAMA—Dear brother for this very reason, with an agitated heart, I am utterly unnerved (lit—Stupefied).

PRITHVI—Come child, sanctify the nether regions.

RAMA—Alas darling, you are gone to another world !

मित—। 'सुविचिन्तित' सुष्ठु निरूपितम् । 'उपायैः' हेतुभिः । 'उत्प्रेक्षे' ऊहे ॥ एताविति । अन्वयः—उभौ हि एतौ वीरौ जन्मसिद्धास्त्रौ मुनेः प्राचेतसात् सम्प्राप्तसंस्कारौ, वयसा द्वादशाब्दिकौ । व्याख्या—उपायान् आह—'उभौ हि' उभावेव 'एतौ वीरौ जन्मन सिद्धाणि अस्त्राणि ययोः तादृशौ, इत्येक उपायः । 'मुने. प्राचेतसात् सम्प्राप्ताः संस्काराः' याभ्यां तादृशौ, इत्युपायो द्वितीयः । 'वयसा' हेतुना द्वादश अब्दाः' वर्षाः सन्ति ययोः तादृशौ, इति तृतीय उपायः ॥ 'परिप्लवमान' चपलं 'हृदयं' यस्य तादृशः । 'इत्येव' अस्मादेव कुशलवोत्प्रेक्षणादेव । अहमपि कुशलवावुत्प्रेक्षे इत्यर्थः । 'लोकान्तरं' अन्यं लोकं लोकान्तरं रसातलमित्यर्थः । तत्र स्थिता च भूलोकसम्पर्कविरहिता इति खेदः ॥

Notes—1. वत्सौ &c —कर्म of उत्प्रेक्षे । 2. एतौ &c.—Three reasons are given to establish the plurality of उपाय (उपायैः) 3. द्वादशाब्दिकौ—द्वौ च दश च द्वादश । द्वादशानां पूरणः इति द्वादश+डट्=द्वादश twelfth. अपः ददाति इति अप+दा+क कर्त्तरि अब्द monsoon : by transference of epithets it means here वत्सरः । द्वादशः अब्दः द्वादशाब्दः । सः अस्ति अनयोः इति द्वादशाब्द+ठन् द्वादशाब्दिकौ these that have completed their twelfth year. etc. 4. हा &c.—Transferred to another world but not dead.

(*xiv*) सीता—णेदु मं अत्तणो अङ्गेसु विलअं अम्बा, ण सक्कोम्हि एरिसं जीअलोअपरिवत्तं अणुभविदुं [नयतु मामात्मनः अंगेषु विलयमम्बा, नशक्नोमि ईदृशं जीवलोकपरिवर्त्तमनुभवितुम्] ।

रामः—किमुत्तरं स्यात् ।

पृथ्वी—वत्से स्तन्यत्यागं यावत् मन्नियोगतः पुत्रयोरपेक्षस्व, परेण यथा रोचते तथा करिष्यसि।

भागीरथी—एवं नाम। (ततो निष्क्रान्ताः गंगापृथ्वी-सीताः)।

रामः—कथं विलय एव वैदेह्याः सम्पन्नः! हा देवि दण्डकारण्यवासप्रियसखि, हा चारित्रदेवते, लोकान्तरं पर्य्यवसितासि! (इति मूर्च्छति)।

SITA—Let mother lead me to mergence in her own limbs. I am unable to bear such vicissitudes of the land of the living.

RAMA—What would the answer be ?

PRITHVI—Child, at my bidding, have regard for the boys until they are weaned of mother's milk. Thereafter you will do as pleases you.

BHAG.—Just so (*Now exeunt Ganga Prithvi and Sita*)

RAMA—How so ! Vaidehi's mergence itself has come about ! Alas, Queen, my dear companion in the sojourn in the forest of Dandaka : Alas, the presiding deity of character ! You are gone to another world ! (*Faints away*).

मित—। 'अङ्गेषु विलयं' विलीनतां 'नयतु त्वदीयादंगात् मामसृजः तत्रैव सम्प्रति मां प्रतिसंहर। सशरीरं वासं तु न रोचये। 'जीवलोकस्य' प्राणिजगतः 'परिवर्त्तं' दशाविपर्य्यासम् 'अनुभवितुं न शक्नोमि'। असह्योऽयं परिवर्त्तः तत् मां विलयं नयतु॥ 'किम् उत्तरं' पृथ्व्या प्रतिवचनं 'स्यात्' विलयम् अनुमोदेत न वा इत्यर्थः'॥ नियोगः' आदेशः। 'मम नियोगः', तस्मात्। 'पुत्रयोः' सम्बन्धे' 'अपेक्षस्व' पुत्रौ अपेक्षस्व इत्यर्थः। 'परेण' परं स्तन्यत्यागात् परम् 'यथा रोचते'॥ 'एवं नाम' इति पृथ्वीवाक्यस्य अनुमोदनम्॥ 'कथम्' इत्याश्चर्य्ये'। 'विलय एव' इत्यनुमानम्। विलये वैदेह्या निश्चयः, देवीभ्याञ्च स्तन्यत्यागकालापेक्षा विहिता। स च गतः कालः। तत् 'विलय एव सम्पन्नः' इति परिशुद्धमनुमानम्! 'चरित्रं' शीलम्। तदेव 'चारित्रम्'। तस्य 'देवता'। 'पर्य्यवसिता' गता—अभे-कार्थत्वात् धातूनाम्॥

Notes—1. पुत्रयोः—The षष्ठी is peculiar ; we expect द्वितीया। But विवक्षावशात् कारकाणि। There is no कारकविवक्षा here, hence शेषे षष्ठी। २. नाम—Implies अभ्युपगम assent. गंगा agrees with पृथ्वी। "नाम कोपेऽभ्युपगमे" इत्यादि मेदिनी। 3. पर्य्यवसिता—परि+अव+सो+क्त कर्त्तरि। The root सो is अन्तकर्म्मणि, i. e, it implies the end (अन्त)। The पर्य्यवसान, means end, finish &c. Comp. "अवसितं हसितम्", "दिनावसाने सन्ध्येव" &c. But the senses of roots enunciated by पाणिनि are illustrative not exhaustive. There are other senses besides those enunciated , these have to be inferred from usage. Here सो means 'to go'. A different explanation without change of meaning may be suggested, Thus—परि stands uncompounded and is to be taken with 'लोकान्तरम्'। अवसिता 'ended' vanished &c , in its usual sense. 'लोकान्तर' परि' पातालमभिलक्ष्य 'अवसिता' अन्तर्हिता। लोकान्तरम् = कर्म्मप्रवचनीययोगे द्वितीया। परि being a लक्षण (indicator) is कर्म्मप्रवचनीय by the rule "लक्षणेत्थभूताख्यानभागवीप्सासु प्रतिपर्य्यनवः"।

(*xvii*) लक्ष्मणः—भगवन् वाल्मीके, परित्रायस्व परित्रायस्व ; एष किं ते काव्यार्थः ?

नेपथ्ये—अपनीयतामातोद्यकम्। भो भोः सजंगमस्थावराः प्राणभृतो मर्त्त्यामर्त्त्याः, पश्यत भगवता वाल्मीकिनानुज्ञातं पवित्रमाश्चर्यम्।

लक्ष्मणः (विलोक्य)—

मन्थादिव क्षुभ्यति गांगमम्भो व्याप्तञ्च देवर्षिभिरन्तरिक्षम्।
आश्चर्यमार्य्या सह देवताभ्यां गंगामहीभ्यां सलिलादुदेति ॥१६॥

LAK—Help ! Worshipful Valmiki, help ! Is this the object of your poem ?

IN THE TIRING ROOM—Let musical instruments be removed. Ho ! Ho ! living beings movable and immovable mortal and immortal behold the holy marvel approved by worshipful Valmiki.

LAK—(*Observing*)—The current of Ganga is being agitated as if from churning ; the sky again is crowded with gods and sages. O wonder ! Nobel sister-in-law is emerging out from water along with the goddesses Ganga and Mahi. (14).

मित—। 'काव्यस्य' अभिनीयमानस्य प्रवन्धस्य 'अर्थः' प्रयोजनम् । "विलय एव वैदेह्या सम्पन्न" इत्येव किं ग्रन्थस्य प्रतिपाद्यम् ? 'आतोद्यक' वाद्ययन्त्रादि 'अपनीयताम्' अपसार्य्यताम् निवृत्तोऽभिनय इत्यर्थः । 'जंगमाः' चराः 'स्थावराः, 'मर्त्त्याः' मरणशीलाः 'अमर्त्त्याः' चिरजीविनः इति प्रकारेण सर्वे 'प्राणभृतः । वाल्मीकिना अनुज्ञातम् अनुमोदितम् । स्वयं वाल्मीकिरेव इदमाश्चर्य्यं दर्शयति व इति भावः ॥ आश्चर्य्यं विवृणोति मन्थादिति । अन्वय—गांगम् अम्भः मन्थादिव क्षुभ्यति , अन्तरिक्षं च देवर्षिभिः व्याप्तम् । आश्चर्य्यम् । देवताभ्यां गंगामहीभ्यां सह आर्य्या सलिलात् उदेति । व्याख्या - 'गांगम्' अम्भः गंगाप्रवाहः मन्थादिव मन्थनादिव 'क्षुभ्यति' आलोडितं भवति । न हि प्रकृत्या कृत एष क्षोभः यतः 'अन्तरिक्षं च' आकाशं पुनः 'देवैः ऋषिभिः' च व्याप्तम् इत्याश्चर्य्यम् । आश्चर्य्यम् अद्भुततर पुनरेतत् यत् देवताभ्यां गंगामहीभ्यां सह आर्य्या वैदेही 'सलिलात्' गंगाम्भस 'उदेति' उन्मज्जति ॥

Notes—*1.* **एष** &c.—Do you mean to inform us that **सीता** has merged in Earth ? 2. **सजंगम** &c.—**प्राणभृतः** is the **विशेष्य** and **सजंगमस्थावराः** and **मर्त्यामर्त्याः** are **विशेषण** । 3. **वाल्मीकिना** &c.—We should not be surprised if **वाल्मीकि** himself spoke these words. 4. **देवर्षिभिः—देवाश्चऋषयश्च देवर्षयः । तैः ।** The wonder lies in this—The gods and the sages are in eager expectation above , the waters of the Ganges are being violently agitated , and lo ! noble sister-in-law emerges from water ! Wonder indeed.

(*xvii*) पुनर्नेपथ्ये—

अरुन्धति जगद्वन्द्ये गंगापृथ्व्यौ भजस्व नौ ।
अर्पितेयं तवाभ्यासे सीता पुण्यव्रता वधूः ॥१७॥

लक्ष्मणः—आश्चर्यम् । आर्य, पश्य पश्य । (विलोक्य) कष्टमद्यापि नोच्छ्वसित्यार्यः ।

(ततः प्रविशत्यरुन्धती सीता च)

अरुन्धती—

त्वरस्व वत्से वैदेहि मुञ्च शालीनशीलताम् ।
एहि जीवय मे वत्सं प्रियस्पर्शेन पाणिना ॥१८॥

(AGAIN IN THE TIRING ROOM)—

Arundhati, deserving the world's homage, do a favour unto us, Ganga and Prithvi. Your daughter-in-law Sita, here of holy vow, is made over to your care. (17).

LAK—Wonder, wonder! look, noble brother look? (*Observing*) O woe! Even now noble brother does not come round.

(*Then enter Arundhati and Sita*).

ARUN—Hasten, child Vaidehi. Abandon bashfulness. Come revive my child with your hand, the touch of which is dear to him. (18).

मित—। अरुन्धतीति । अन्वयः—जगद्वन्द्ये अरुन्धति, नौ गंगापृथ्व्यौ भजस्व । इयं पुण्यव्रता वधूः सीता तव अभ्यासे अर्पिता । व्याख्या—हे जगद्वन्द्ये त्रिभुवनपूज्ये 'अरुन्धति—नौ' आवां 'गंगापृथ्व्यौ भजस्व' अनुगृहाण । कथमनुग्रहे इत्याह— इयं पुण्यव्रता' पूतचरिता 'वधूः' स्नुषा त्वदीया 'तव अभ्यासे' समीपे 'अर्पिता' न्यस्ता । न्याससंगीकृत्य आवामनुगृहाण ॥ त्वरस्वेति । अन्वयः—सुगमः । व्याख्या—सुगमा ॥ 'शालीनशीलताम्' लज्जाशीलताम् इति भावः—सुख ॥

Notes.—1. भजस्व—भज usully means 'to accept' 'to worship' &c. Here the sense is favour'. 2. अभ्यासे—अभ्यास is

अन्तिक neighbourhood. "अभ्यासोऽभ्याशेऽन्तिके" इति विश्वमेदिन्यौ। 3. *Remark*—अरुन्धति was among the spectators. The stage direction is defective. After the verse should be added निष्क्रान्ता अरुन्धती। Without this ततः प्रविशति &c, below becomes incongruous. 4. ततः प्रविशति &c,—Another defective stage-direction. Add पृथ्वी भागरथी च। These two also must enter, for otherwise एषा, इयम &c. below become inconsistent. 5, शालीन &c.—शालाप्रवेशमर्हति इति शालाप्रवेश + खञ् शालीनः bashful. The उत्तरपद, i.e, प्रवेश disappears by निपातन in the rule "शालीनकौपीने अधृष्टाकार्ययोः"। शालीनस्य शीलमिव शीलं यस्य शालीनशीलम्। सामान्ये नपुंसकम्। तस्य भावः। ताम्। Avoid शीलं यस्याः, because पुंवद्भाव will not then be available.

(*m*) सीता (ससम्भ्रममुपसृत्य रामं स्पृशन्ती)—समस्ससिदु अज्जउत्तो [समाश्वसितु आर्यपुत्रः]।

रामः—(समाश्वस्य सानन्दम्) भो. किमेतत्। (दृष्ट्वा सहर्षाद्भुतम्) अयि देवी, अरुन्धती, सर्वे च प्रहृष्टदृष्यशृंगशान्तासमेता गुरवः।

अरुन्धती—वत्स एषा भगवती भागीरथीगृहदेवता सुप्रसन्ना गंगा।

भागीरथी—जगत्पते रामभद्र, स्मर्यतामालेख्यदर्शने मां प्रत्यात्मनो वचनम्, यथा—'सा त्वमम्ब स्नुषायामरुन्धतीव सीतायां शिवानुध्यानपरा भव'—इति। तत्र अनृणास्मि।

SITA (*Advancing with agitation and touching Rama*)—Let my husband take heart.

RAMA (*With joy, having recovered*)=Ho! What is this? (*Observing—With joy and wonder*) Ha, the Queen! Arundhati and all the elders, overjoyed along with Rishyasringa and Santa!

ARUN—My son, this is the worshipful deity of the house of Bhagiratha, the highly gracious Ganga.

BHAG—Rambhadra, the lord of the world, remember your words to me at the inspection of the painting, thus—"With such traditions, mother, do thou be like Arundhati watchful over the welfare of thy daughter-in-law Sita." In the matter of that I am absolved.

मित—। सविस्मयः प्राह 'किमेतत्' इति। हर्षेण अद्भुतेन' च 'सह'। 'प्रहृष्यन्तश्च ऋष्यश्शृङ्गशान्तासमेताश्च गुरवः'॥ इयतो वर्षान् सीतायाः समाश्रयः इति प्राह 'सुप्रसन्ना इति॥ अविद्यमानमृणमस्याः 'अनृणा'। इह ऋणमिति अवश्यकरणीयार्थं। प्रभोर्वचनम् अवश्यकरणीय-मेव। अतएव "जगत्पते" इति सम्बोधनम्॥

Notes—1. अये देवो &c.—The sight of सीता was अद्भुत to राम and caused his हर्ष! वाल्मीकि has invited the whole world, hence अरुन्धती &c, were all among the spectators unnoticed by राम so long, 2. सुप्रसन्ना—Through her spiritual power अरुन्धती was aware of the many invaluable services rendered unto सीता by गंगा, hence the epithet is a happy one at this moment. 3. जगत्पते—This is a necssary epithet. Being king of the whole world he was king of गंगा also. Hence सा त्वमम्ब &c, is a king's command. Now see below. 4. तत्र—तस्मिन् वचने विषये, i. e., I have obeyed. 5. अनृणा—For समास see टीका। ऋण here is not a debt, by transference of epithets it means something unavoidable like the repayment of a debt, Such a thing is the king's command. गंगा has become अनृणा by executing the command.

(*xx*)—अरुन्धती—इयं ते श्वश्रूर्भगवती वसुन्धरा।

पृथ्वी—उक्तञ्च पूर्वमायुष्मता वत्सापरित्यागे, यथा—भगवति वसुन्धरे श्लाघ्यां दुहितरमवेक्षस्व जानकीम्"—इति। तदधुना कृतवचनास्मि प्रभोर्वत्सस्येति।

रामः—कथम् ! ज्ञातमहापराधो भगवतीभ्यामनुकम्पितः ।
(इति प्रणमति) ।

अरुन्धती—भो भोः पौरजानपदा इयमधुना भगवतीभ्यां जाह्नवीवसुन्धराभ्यामेवं प्रशस्य ममारुन्धत्याः समर्पिता, पूर्वञ्च भगवता वैश्वानरेण निर्णीतपुण्यचारित्रा सब्रह्मकैश्च देवैः संस्तुता सवितृकुलवधूर्देवयजनसम्भवा सीतादेवी परिगृह्यते इति कथं भवन्तो मन्यन्ते ?

ARUN—This is your mother-in-law worshipful Vasundhara.

PRITHVI—Verily at my child's renunciation afore it was said by thy long-lived self, thus—"O mighty repository of riches (Earth), look after your worthy daughter Janaki" So I have now done the bidding of my son, my master

RAMA—How ? I am commiserated by the worshipful goddesses though I gave great offence ! (*Bows down*)

ARUN—Ho ! Ho ! Citizens and Villagers, here is being taken back this daughter-in-law of the solar race, Queen Sita, sprung from the sacrificial ground and who again formerly with her holy character tested by the divine fire was eulogised by the gods including Brahman, and who has just been committed to me Arundhati by the worshipful Jahnavi and Vasundhara after having belauded her What do you think of it ?

मित । 'पूर्वम्' इत्यत्र प्रथमाङ्को द्रष्टव्यः । 'प्रभो' इति वचनस्य अवश्यकर्त्तव्यतां दर्शयति । 'एवं प्रशस्य' इत्यत्र 'अरुन्धति जगद्वन्द्ये" इत्यादिश्लोको द्रष्टव्यः 'पूर्वञ्च' इति रावणवधान्ते । "निर्णीत" परिदृष्ट निश्चितं वा पुण्यं चारित्रं चरित्रं यस्याः । 'देवैः' संस्तुता अग्निपरीक्षावसाने । 'इति' एतत् सीतायाः ग्रहणं 'कथं' भवन्तो मन्यन्ते' अयुक्तं वा मन्यन्ते ।

Notes—1. श्वश्रूः—श्वशुरस्य स्त्री इति श्वशुर + ऊङ्श्वश्रूः by निपातन in the rule "श्वशुरः श्वश्र्वा" । 2. प्रभो—This is because

he was the king वत्सस्य because he was her son-in-law. 3. मम—शेषविवक्षया षष्ठी । As in वाल्मीकेः अर्पयति ante. 4 वैश्वानरेण—विश्वे नराअस्य विश्वानरः a certain sage (ऋषि) । विश्व becomes विश्वा by the rule "नरे संज्ञायाम्" । विश्वानरस्य अपत्यं पुमान् इति विश्वानर + अण = वैश्वानरः fire. 5. निर्णीतपुण्यचारित्रा —The पुण्यचारित्र was already there, the चारित्र was not made पुण्य by fire Fire only declared the पुण्यचारित्र । 6. सब्रह्मकैः —ब्रह्मा एव इति ब्रह्मन् + क स्वार्थे ब्रह्मकः । ब्रह्मकेण सह सब्रह्मकाः । तैः । Arundhati's words are rather sarcastic.

(*xxi*) लक्ष्मणः—एवमार्यया अरुन्धत्या निर्भर्त्सिताः प्रजाः । कृत्स्नश्च भूतग्राम आर्यां नमस्करोति लोकपालाश्च पुष्पवृष्टिभिरुपतिष्ठन्ते ।

अरुन्धती—जगत्पते रामभद्र ।

निर्योजय यथाधर्मं प्रियां त्वं धर्मचारिणीम् ।

हिरण्मय्याः प्रतिकृतेः पुण्यप्रकृतिमध्वरे ॥१८॥

सीता (स्वगतम्)—जाणादि अज्जउत्तो सीतादुक्खं पमज्जिदुं [जानाति आर्यपुत्रः सीतादुःखं प्रमार्ष्टुम्] ।

रामः—यथा भगवत्यादिशति ।

लक्ष्मणः—कृतार्थोऽस्मि ।

सीता—जीविदम्हि [जीवितास्मि] ।

LAK—The subjects have been thus rebuked by noble Arundhati. Also the entire creation are saluting my noble sister-in-law and the guardians of the Universe together with the Saptarshis are honouring her with showers of flowers.

ARUN.—Ramabhadra, lord of the world—

Employ at the sacrifice, as is your duty, your dear co-worker in piety, the holy original of the golden image. (19)

SITA—(*To herself*)—My huband knows how to wipe off Sita's grief.

RAMA—As your worshipful self commands.

LAK.—My purpose is served.

SITA—I am enlivened (=given back life).

मित—। सुरासुराणामनुमोदनमुल्लिख्य यदुच्यतेप्राकृतान् मर्त्यान् प्रति "किं भवन्तो मन्यन्ते" इति तत् निर्भर्त्सनमेव प्रजानाम। 'भुतग्रामः' भूत-समूहः॥ नियोजयति। अन्वय – त्वं हिरण्मय्या. प्रतिकृतेः पुण्यप्रकृतिं प्रियां धर्मचारिणीं यथाधर्मम् अध्वरे नियोजय। व्याख्या –'त्व हिरण्मय्याः प्रतिकृतेः सुवर्णप्रतिमायाः भवद्कृताया पुण्यप्रकृति पवित्रम् आदर्शं 'प्रियाम'। आत्मनः प्रीतिदायिनीं 'धर्मचारिणीं सहधर्मिणीं 'यथाधर्मं' शास्त्रमनुपालयन्' 'अध्वरे' यागे प्रकान्तेऽस्मिन् अश्वमेधे 'नियोजय' व्यापारय। परिगृहाणेनामित्यर्थः। एतेन प्रतिकृतिकरणेन यदद्भुतं प्रेम प्रख्यापितं तदर्थं कृतज्ञा प्राह—'जानाति' इत्यादि। मदीया प्रतिकृतिरध्वरे नियोजिता इति सर्वथा प्रमृष्टं त्यागदुःखम् इत्यर्थः॥

Notes.—1. भुतग्रामः—भूतानां समूह इति भूत+ग्रामच् समूहे भूतग्राम the host of beings or ग्राम=समूह। 2 आर्य्याम् &c —Here चतुर्थी in connection with नमस् is over-ruled by द्वितीया owing to कृ। "उपपदविभक्तेः कारकविभक्तिर्बलीयसी। Comp. नारायणं नमस्कृत्य नरञ्चैव नरोत्तमम्। देवीं सरस्वतीञ्च व ततो जयमुदीरयेत्॥" 3. उपतिष्ठन्ते—देवतावद्बुद्ध्या पूजयन्ति। Hence आत्मनेपद by the Varttika "उपाद्देवपूजासङ्गतिकरणमित्रकरणपथिषु"। By the force of her character she had become a veritable goddess (देवता)। Comp. 'भावबोरपि यत्सङ्गात् पवित्रत्वं प्रकृष्यते'—sl. 9. *ante*. 4. यथाधर्म्मं—धर्म्ममनतिक्रम्य नियोजय is the sense. (अव्ययी भाव) which implies that if after all this you do now do not take her back अधर्म्मे पतित स्या.—you will incur demerit. 5. प्रियाम्—

This is double-edged, meaning she pleases you (प्रीणातीति प्रिया) and also she is dear to you. Hence by taking her back you do nothing unpalatable (out of fear of धर्मसंकोप) like the sick man swallowing a bitter pill. 6. जानाति &c — The golden image declares an unprecedented favour and सीता is grateful for it. Compare—' आर्य्यपुत्र इदानीमसि त्वम्। अहो उत्खातं इदानीं परित्यागलज्जाशल्यमार्य्यपुत्रेण'—Act. III.

(xxii) लक्ष्मणः—आर्य्ये एष निर्लज्जो लक्ष्मणः प्रणमति।

सीता—वच्छ एरिसो चिरं जीव [वत्स ईदृशश्चिरं जीव]।

अरुन्धती—भगवन् वाल्मीके उपनीयेतामिमौ सीतागर्भसम्भवौ रामभद्रस्य कुशलवौ। (इति निष्क्रान्ता)।

रामलक्ष्मणौ—दिष्ट्या तथैव तत्।

सीता (सबाष्पाकूतम्)—कहिं मे पुत्तआ [कुत्र मे पुत्रकौ]।

(ततः प्रविशति वाल्मीकिः कुशलवौ च)

वाल्मीकिः—वत्सौ कुशलवौ, एष रघुपतिः पिता युवयोः, लक्ष्मणः कनिष्ठतातः सीतादेवी जननी। एष राजर्षिर्जनको मातामहः।

Lak—Noble Sister-in-law, here shameless Lakshmana bows to you.

Sita—Dear one, may you live long just as you are.

Arun—Worshipful Valmiki, let these two Kusa and Lava, born of Sita's womb, be introduced (lit. brought up) to Ramabhadra. (*Exit*)

Rama and Lak.—O Luck! It is just as we thought.

Sita (*With tears and a look of enquiry*)—Where are my boys?

(*Then enter Valmiki and Kusa and Lava*)

VALMIKI—Dear Kusa and Lava here is your father the lord of the Raghus, your uncle LAKSHMANA, your mother queen Sita. Here is your maternal grand-father the royal sage Janak.

मित—। यथा वने परित्यज्य भूयोऽपि मुखं दर्शयति इति 'निर्लज्जः' ॥ 'ईदृशः' भ्रातुर्वचनकरः भव ॥ 'रामभद्रस्य सम्बन्धे उपनीयेताम्' इत्यन्वयः ॥ 'तत्' वस्तु यथा अस्माभिस्त्वप्रेक्षितं 'तथा एव' कुशलवावेव सीतासुतौ। आकूतम्' अभिप्रायः दर्शनाभिलाष इत्यर्थः ॥

Notes.—1. **ईदृशः**—Lakshmana was devotedly attached to **सीता**। To abandon her in the forest in that fashion merely because his brother commanded, was almost a death blow to him. Yet he did it without demur. Such obedience was rare. May you remain such (**ईदृशः**) ever obedient to your brother 2. **भगवन् वाल्मीके—वाल्मीकि** was outside. She wants him to come in with **कुश** and **लव**। 3. **सबाष्प** &c.—She is to see them after a separation of nearly twelve years Hence the tears **आकूत** is **अभिप्राय**। **बाष्पेण आकूतेन च सह**। She asks the question *meaningly i. e*, She wants to see them forthwith before they are brought up to her. 4. **मातामहः**:—This is mother's father. **मातुः पिता इत्यर्थे मातृ+डामहच्**।

(*xxiii*) सीता (सहर्षकरुणाद्भुतं विलोक्य)—कथं तादो (कथं तातः)!

कुशलवौ—हा तात, हा अम्ब, हा मातामह।

रामः (सहर्षमालिङ्ग्य)—ननु वत्सौ, पुण्यैः प्राप्तौ स्थः।

सीता—एहि जाद कुश, एहि जाद लव, चिरस्स परिव्वजध पुणो जम्मत्तरगदं जणणिं (एहि जात कुश, एहि जात लव, चिरस्य परिष्वजेथां पुनर्जन्मान्तरगतां जननीम्)।

कुशलवौ (तथा कृत्वा)—धन्यौ स्वः ।

सीता—भअवं पणमामि (भगवन् प्रणमामि) ।

वाल्मीकि —इत्थमेव चिरं भूयाः ।

SITA (*Observing with joy and surprise*)—How so! my father

KUSA AND LAVA—O father! O mother! O grand father

RAMA (*Embracing with joy*)—Well dear boys, through mercy I have you been restored

SITA—Come child Kusa come child Lava embrace for long your mother who has come to a new life (lit—new birth)

KUSA and LAVA (*Doing as bid*)—We are blessed!

SITA—Worshipful Sir I bow to you

VALMIKI—May you continue thus for long indeed

मित—। पितुदर्शनात् इव , अतीतस्मारणेत् करुणम् अचिन्तितो पस्थित्या अद्भुतम् ॥ हा इति खेदे । ईदृशी भवता भवितव्यता इति रामायणपाठात् विदितसववृत्तान्तौ अनुकम्पेते ॥ जन्मान्तर गता प्राप्ता । का नाम जन्तु एकस्मिन्नेव जन्मनि ईदृश दशाविपर्ययमनुभवति तत् विवासितां सीतां मृता मन्येथाम् इयमपरा सीता जननी युवयो इति भाव । ईदृशी —भर्त्रा पुत्राभ्यांश्च अवियुक्ता ।

Notes—1 कथ तात —This is surprising that Janaka is there She was not aware of the fact that a drama was to be staged and the whole world had been invited to witness the staging Just then पृथ्वी and भागीरथी were commanded by वाल्मीकि to come over with her this is all she knew 2. चिरस्य—An अव्यय meaning चिर । चिर परिष्वजेथाम् is the sense अत्यन्तसंयोगे द्वितीया which has disappeared because चिरस्य is an अव्यय । अव्ययत्वात् विभक्तिलोप ।

(*xxiv*) सीता—भअवं तादो कुलगुरु अज्जाअन्धो सभत्तुआ अज्जा सम्माद्देई सलक्खणा सुप्पसण्णा भआउत्तवन्झा क्षम

कुशलवा वि दीसन्ति, ता णिव्भरम्हि आणन्देण [अहो ! तातः, कुलगुरुः, आर्य्याजनः, सभर्तृका आर्य्या शान्तादेवी, सलक्ष्मणाः सुप्रसन्ना आर्य्यपुत्रचरणाः, समं कुशलवौ अपि दृश्यन्ते, तत् निर्भरास्मि आनन्देन] ।

(नेपथ्ये कलकलः)

वाल्मीकिः (उत्थायावलोक्य च)—उत्खातलवणो मधुरेश्वरः प्राप्तः ।

लक्ष्मणः—सानुषङ्गाणि कल्याणानि ।

रामः—सर्वमिदमनुभवन्नपि न प्रत्येमि । यद्वा प्रकृतिरिय-मभ्युदयानाम् ।

SITA—I am bewildered with delight, for here are seen simultaneously father, our family preceptor, my mothers-in-law, noble princess Santa with her husband, the highly gracious feet of my husband together with Lakshmana and Kusa and Lava as well.

(*A hubbub in the tiring room*)

VALMIKI (*Rising and observing*)—The lord of Madhura has come having up-rooted Lavana.

LAK—Blessings have a continuous following.

RAMA—Through experiencing all this, I do not believe it, or this is the nature of blessings.

मित—। 'निर्भरा' विह्वला ॥ 'मधुरा' मथुरा, तस्या 'ईश्वरः' स्वामी लवणस्य स्थाने नायकः शत्रुघ्नः प्राप्तः इत्यर्थः ॥ 'अनुषङ्गेन अनुबन्धेन सह वर्त्तमानानि सानुषङ्गाणि' कल्याणान्तरेण अनुगतानि मङ्गलानि इत्यर्थः ॥

Notes—1. निर्भरा—भरति इति भृ + अच कर्त्तरि भर that which supports, i. e, strength &c. निर्गतः भरः अस्याः निर्भरः powerless, bewildered &c. 2. उत्खातलवण: &c.—This is incongruous (see *Intro*). 3. सानुषङ्गाणि—अनुषज्यन्ते इति अनु + सञ्ज + घञ् कर्मणि अनुषङ्ग appendage. Viraraghava makes it neuter (अनुषङ्गाम्) । See Tika.

(*xxv*) वाल्मीकिः—रामभद्र, उच्यतां किं ते भूयः प्रियमुपकरोमि ।

रामः—अतः परमपि प्रियमस्ति ? तथापीदमस्तु—

पाप्मभ्यश्च पुनातु वर्द्धयतु च श्रेयांसि सेयं कथा
मङ्गल्या च मनोहरा च जगतो मातेव गङ्गेव च ।
वाल्मीकेः परिभावयन्त्वभिनयैर्विन्यस्तरूपां बुधाः
शब्दब्रह्मविदः कवेः परिणतप्रज्ञस्य वाणीमिमाम् ॥४०॥

(इति निष्क्रान्ताः सर्वे) ।

इति सम्मेलनं नाम सप्तमोऽङ्कः ।

VALMIKI—Ramabhadra, say what further joy can I do unto thee.

RAMA—Is there any joy exceeding this ? However, be it thus.

May that story, auspicious and enchanting like Ganga and the mother of the world, sanctify by removing sins and augment blessings. May the wise deem *this—this* to which has been imparted form by actings—as the speech of Valmiki the poet of mature intellect who knows Brahman in the shape of word (20).

(*Exenut all*).

This is the Seventh Act named Re-union.

मित—। परम् अधिकम् ॥ अतः परं भरतवाक्यम्—पाप्मभ्य इति । अन्वयः—जगतो माता इव च गङ्गा इव च मङ्गल्या च मनोहरा च सा इयं कथा पाप्मभ्यः पुनातु च श्रेयांसि वर्द्धयतु च । अभिनयैः विन्यस्तरूपाम् बुधाः शब्दब्रह्मविदः परिणतप्रज्ञस्य कवेः वाल्मीकेः वाणीं परिभावयन्तु । यद्वा—इमां वाणीं बुधाः परिभावयन्तु इति योजना । व्याख्या—'जगतो माता' पृथ्वी 'इव च गङ्गा इव च मंगल्या च मंगलकरा च 'मनोहरा च' हारिणी च 'सा' वाल्मीकिप्रणीता प्रसिद्धा 'इयं' युष्मत्समीपे उपस्थापिता 'कथा पाप्मभ्यः' पापेभ्यः [इति अपादाने ५मी] पुनातु च'

शोधयतु च श्रेयांसि मंगलानि 'वर्द्धयतु च' पुष्णातु च। 'अभिनयैः' प्रयोगैः 'विन्यासं' विहितं रूपं स्वरूपं यस्याः ताम् 'इमां' सम्प्रति श्रुतां वाचं 'बुधाः विद्वांसः 'शब्दब्रह्मविदः' शब्दब्रह्म यः वेत्ति तस्य, वागात्मनि प्रबुद्धस्य अतएव 'परिणता पूर्णतां प्राप्ता 'प्रज्ञा' धीर्यस्य तस्य 'कवेः वाणीं परिभावयन्तु' मन्यन्ताम्। अस्मिन् भवभूतिप्रोक्ते यत्र तत्र वाल्मीकिना विरोधो लक्ष्यते तत्तदपि वाल्मीकेरेव वाक्यं मन्यन्ताम् इत्यर्थः। यद्वा—अभिनयः विन्यस्तरूपां शब्दब्रह्मविदः परिणतप्रज्ञस्य कवेः वाल्मीकेः इमां वाणीं बुधाः परिभावयन्तु सती वा असती वा इति विमृशन्तु॥

Notes—1. **सेयं कथा—सा** refers to Valmiki's story as in the Ramayana. **इयम्** points at the same story now retold. The story is not a new one, but the memorable one as given to the world by Valmiki. 2 **वाल्मीकेः** &c.—The second half of the verse is with special reference to Bhavabhuti's version. My version differs from Valmiki's in certain matters. Do not therefore forthwith reject my version as unworthy of credence rather deem this too as spoken by Valmiki himself Here the construction is—**सा इयं कथा। इमां वाल्मीकेः वाणीं परिभावयन्तु।** In this **इमाम्** being in an **अन्वादेश** ought to be **एनाम्।** A defence may be suggested. In the first half **सा इयं कथा** refers to the *substance* of the story **कथावस्तु।** The second half speaks of the *form* or *body* of the story—**कथारूप** i. e., the **रचना, भाषा** &c. Thus the reference being to different things, we have no **अन्वादेश** and **इमाम्** is in order. In the alternative construction given in the **टीका** the **अन्वादेश** seems to be unavoidable. The reading **तामेताम्** for **वाल्मीकेः** seems defective (see *Intro*). 3. *Remark*—This verse contains the same idea as the verse "**प्राचेतसो मुनिवृषा प्रथमः कवीनाम्**" &c., of the Viracharita as discussed in the introduction.

THE END.

Uttara Charitam

Test and University Questions

Q 1. Describe the character of Rama.

Ans—See Introduction.

Q. 2. Compare the character of Sita and Sakuntala.

Q. 3. Compare Kalidas and Bhavabhuti with reference to Uttaracharit and Sakuntala. (See Intro)

Q. 4. Describe how the union of Rama and his sons was effected.

Ans.—See substance--in Act VI (also Intro. P. ii.).

Q. 5. Why in Act III Rama is again caused to go to Panchavati.

Ans.—This is to elevate Rama's character. Here we learn that Rama did not marry again after banishing Sita : Also to show the internal love of Rama towards Sita. (See also Introduction).

[N. B.—Mark Sita is here (in Act III) introduced as an invisible entity and is seen to be living, only to help development in the final union in Act, VII. Ganga brings her unseen only to make her feel and see Rama's condition at her separation].

Q. 6. Give the substances of Act. VII. VI, III and II

Q. 7. Describe the fight of Chandraketu and Lava-Kusha, What was the cause of this fight ?

Ans.—See Act. V and opening of Act. VI. [Challenge in connection with অশ্বমেধ animal caused fight].

Q. 8. How their fight ended ?

Ans.—Rama's entrance made them stop fight

Q 9. Give the significance of Viskambhaka of Act VI.

Ans —This is to give us hint of the cessation of fight, and eventually Rama's union with his sons. The introduction of Vidhyadhara and Vidyadhari is to show us the interest that gods are also taking in the matter of Rama.

Q 10 Mark the feeling of Rama at Lava's and Kusa's sight in Act VI.

Q 11 Why was চিত্রদর্শন introduced in Act I. Ans. This is to beguile Sita and glorify Rama's exploits.

Act I.

Mark the following slokas with translation and grammar of difficult words therein ,—

Slokas 1, 5, 7, 10, 12—(আবাধনায় has তুমর্থে ৪র্থী)

Slokas 13, 14, 15, 20, 23—(Mark allusions).

S'okas 25, 26, 27—বি+রম+লুঙ্ দ –ব্যরংসীৎ। "ব্যাঙ্ পরিভ্যো রমঃ" ইতি পরস্মৈপদম্)।

Slokas 29, 35, 37

Slokas 39, 40, 41, 43, 44, 46, 47.

Act II & IV

Mark the Slokas with translation, grammar etc. :—

Slokas 2, 4 9, 13, 14, 16, 21. 26, 27, 29 and 30.

Act. III, V, VI

Mark the following Slokas :—

Slokas 5, 9, 11, 13, 17, 19, 23, 35, 26, 28, 30, 31, 36, 27, 43, 44, 45 and 47. Also Sl. 4, 6, 16 19 and 30. of VII.

[*Addition in Act IV.*]

In "অরুন্ধতীপুরস্কৃতান দাবান্" we have বহু—(আহিতাগ্ন্যাদিষ্বাত ক্তান্তস্য পরনিপাতো বা)।